दक्षिणामूर्तिगायत्रीमन्त्रः:- **ॐ दक्षिणामूर्तये विद्महे ध्यानस्थाय धीमहि। तन्नो धीशः प्रचोदयात्।** षडङ्गन्यासः:- **ॐ दक्षिणामूर्तये हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ ध्यानस्थाय शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नो धीशः नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥** इसी प्रकार करन्यास भी करना चाहिये।

गौरीगायत्रीमन्त्रः:- **ॐ सुभगायै च विद्महे काममालायै धीमहि। तन्नो गौरी प्रचोदयात्।** षडङ्गन्यासः **ॐ सुभगायै हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ काममालायै शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नो गौरी नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥** इसी प्रकार करन्यास भी करना चाहिये। मूलमन्त्रः **ॐ क्लीं ॐ गौं गौरीभ्यो नमः।**

गणेशगायत्रीमन्त्रः:- **ॐ तत्पुरुषाय विद्महे वक्रतुण्डाय धीमहि। तन्नो दन्तिः प्रचोदयात्।** षडङ्गन्यासः:- **ॐ तत्पुरुषाय हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ वक्रतुण्डाय शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नो दन्तिः नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥** इसी प्रकार करन्यास भी करना चाहिये।

षण्मुखगायत्रीमन्त्रः:- **ॐ तत्पुरुषाय विद्महे महासेनाय धीमहि। तन्नः षण्मुखः प्रचोदयात्।** षडङ्गन्यासः:- **ॐ तत्पुरुषाय हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ महासेनाय शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नः षण्मुखः नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥** इसी प्रकार करन्यास भी करना चाहिये।

नन्दीगायत्रीमन्त्रः:- **ॐ तत्पुरुषाय विद्महे चक्रतुण्डाय धीमहि। तन्नो नन्दिः प्रचोदयात्।** षडङ्गन्यासः:- **ॐ तत्पुरुषाय हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ चक्रतुण्डाय शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नो नन्दिः नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥** इसी प्रकार करन्यास भी करना चाहिये।

सूर्यगायत्रीमन्त्रः:- **ॐ भास्कराय विद्महे महातेजाय (तन्त्रान्तरे तु महाद्युतिकरायेति पाठः) धीमहि। तन्नः सूर्यः प्रचोदयात्।** षडङ्गन्यासः:- **ॐ भास्कराय हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ महातेजाय शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नः सूर्यः नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥ इसी प्रकार करन्यास भी करना चाहिये।** मूलमन्त्रः:- **ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः ॐ विष्णु तेजसे ज्वालामणिकुण्डलाय स्वाहा।** द्वितीय सूर्यगायत्रीमन्त्रः:- **ॐ आदित्याय विद्महे मार्तण्डाय धीमहि। तन्नः सूर्यः प्रचोदयात्।**

चन्द्रगायत्रीमन्त्रः:- **ॐ क्षीरपुत्राय विद्महे अमृततत्त्वाय धीमहि। तन्नश्चन्द्रः प्रचोदयात्।** षडङ्गन्यासः:- **ॐ क्षीरपुत्राय हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ अमृततत्त्वाय शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नश्चन्द्रः नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥** इसी प्रकार करन्यास भी करना चाहिये। मूलमन्त्रः **ॐ चन्द्रत्त्वां चन्द्रेण क्रीणामि शुक्रेण मृतममृतेनगोरस्मोरतेचन्द्राणि।**

भौमगायत्रीमन्त्रः:- **ॐ अङ्गारकाय विद्महे शक्तिहस्ताय धीमहि। तन्नो भौमः प्रचोदयात्।** षडङ्गन्यासः **ॐ अङ्गारकाय हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ शक्तिहस्ताय शिखायै वषट् ॥३॥ ॐ**

धीमहि कवचाय हुम् ॥४॥ ॐ तन्नो भौमः नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥ इसी प्रकार करन्यास भी करना चाहिये। मूलमन्त्रः- ॐ अं अङ्गारकाय नमः। पृथ्विगायत्रीमन्त्रः- ॐ पृथिवीदेव्यै च विद्महे सहस्त्रमूर्त्यै च धीमहि। तन्नो मही प्रचोदयात्। षडङ्गन्यासः- ॐ पृथिवीदेव्यै च हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ सहस्त्रमूर्त्यै च शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नोमही: नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट्॥६॥ इसी प्रकार करन्यास भी करना चाहिये। मूलमन्त्रः- ॐ भूरसिभूतादिरसिश्विस्यधायाभुवनस्यमाहिंसीर्नमः।

अग्निगायत्रीमन्त्रः - ॐ महाज्वालाय विद्महे अग्निमध्न्याय धीमहि। तन्नोऽग्निः प्रचोदयात्। षडङ्गन्यासः- ॐ महाज्वालाय हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ अग्निमध्न्याय शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नोऽग्निः नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥ इसी प्रकार करन्यास भी करना चाहिये। मूलमन्त्रः ॐ अं अं अग्नये नमः। द्वितीय अग्निगायत्रीः- ॐ वैश्वानराय विद्महे लालीलाय धीमहि। तन्नोऽग्निः प्रचोदयात्। जलगायत्रीमन्त्रः- ॐ जलविम्बाय विद्महे नीलपुरुषाय धीमहि। तन्नस्त्वम्बु प्रचोदयात्। षडङ्गन्यासः- ॐ जलविम्बाय हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ नीलपुरुषाय शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नस्त्वम्बु नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥ इसी प्रकार करन्यास भी करना चाहिये। मूलमन्त्रः- ॐ जँ जँ ॐ वँ वँ ॐ लँ लँ ॐ जलविम्बाय नमः। आकाशगायत्रीमन्त्रः- ॐ आकाशाय च विद्महे नभोदेवाय धीमहि। तन्नो गगनं प्रचोदयात्। षडङ्गन्यासः- ॐ आकाशाय हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ नभोदेवाय शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नो गगनं नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥ इसी प्रकार करन्यास करना चाहिये। मूलमन्त्रः- ॐ गँ गँ ॐ नँ नँ ॐ आँ आँ ॐ गगनाय नमः। पवन (वायु) गायत्रीमन्त्रः- ॐ पवनपुरुषाय विद्महे सहस्त्रमूर्तये च धीमहि। तन्नो वायुः प्रचोदयात्। षडङ्गन्यासः- ॐ पवनपुरुषाय हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ सहस्त्रमूर्तये च शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नो वायुः नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥ इसी प्रकार करन्यास भी करना चाहिये। मूलमन्त्रः ॐ पँ पँ ॐ वाँ वाँ ॐ युँ युँ ॐ पवनपुरुषाय नमः।

इन्द्रगायत्रीमन्त्रः - ॐ तत्पुरुषाय विद्महे सहस्त्राक्षाय धीमहि। तन्न इन्द्रः प्रचोदयात्। षडङ्गन्यासः ॐ तत्पुरुषाय हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ सहस्त्राक्षाय शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्न इन्द्रः नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥ इसी प्रकार करन्यास भी करना चाहिये।

कामगायत्रीमन्त्रः - ॐ मन्मथेशाय विद्महे कामदेवाय धीमहि। तन्नोनङ्गः प्रचोदयात्। षडङ्गन्यासः ॐ मन्मथेशाय हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ कामदेवाय शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नोनङ्गः नेत्रत्रयाय वषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥ इसी प्रकार करन्यास भी करना चाहिये। द्वितीय कामगायत्रीः- ॐ कामदेवाय विद्महे पुष्पबाणाय धीमहि तन्नोनङ्गः प्रचोदयात्।

गुरुगायत्रीमन्त्रः- ॐ गुरुदेवाय विद्महे परब्रह्माय धीमहि। तन्नो गुरुः प्रचोदयात्। षडङ्गन्यासः ॐ गुरुदेवाय हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ परब्रह्माय शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नो गुरुः नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥ इसी प्रकार करन्यास भी करना

चाहिये। मूलमन्त्रः ॐ हुँ सँ क्राँ सौः गुरुदेवपरमात्मने नमः।

तुलसीगायत्री मन्त्रः- ॐ श्रीत्रिपुराय हृदयाय तुलसीपत्राय धीमहि। तन्न तुलसी प्रचोदयात्। षडङ्गन्यासः- ॐ श्रीत्रिपुराय हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ तुलसीपत्राय शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नतुलसी नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥ इसी प्रकार करन्यास भी करना चाहिये।

देवीगायत्रीमन्त्रः- ॐ देव्यब्रह्माण्यै विद्महे महाशक्त्यै च धीमहि। तन्नो देवी प्रचोदयात्। षडङ्गन्यासः- ॐ देव्याब्रह्माण्यै हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ महाशक्त्यै च शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नो देवी नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥ इसी प्रकार करन्यास भी करना चाहिये। मूलमन्त्रः ॐ ह्राँ श्रीं क्लीं नमः।

शक्तिगायत्रीमन्त्रः- ॐ सर्वसम्मोहिन्यै विद्महे विश्वजनन्यै धीमहि। तन्नः शक्तिः प्रचोदयात्। षडङ्गन्यासः- ॐ सर्वसम्मोहिन्यै हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ विश्वजनन्यै शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नः शक्तिः नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥ इसी प्रकार करन्यास भी करना चाहिये। **दुर्गागायत्रीमन्त्रः**- ॐ कात्यायन्यै विद्महे कन्याकुमार्यै धीमहि। तन्नो दुर्गा प्रचोदयात्। षडङ्गन्यासः ॐ कात्यायन्यै हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ कन्याकुमार्यै शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नो दुर्गाः नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥ इसी प्रकार करन्यास भी करना चाहिये। द्वितीय दुर्गागायत्रीमन्त्र-: ॐ महादेव्यै च विद्महे दुर्गायै च धीमहि। तन्नो देवि प्रचोदयात्। जयदुर्गागायत्रीमन्त्रः ॐ नारायण्यै च विद्महे दुर्गायै च धीमहि। तन्नो गौरी प्रचोदयात्। षडङ्गन्यासः ॐ नारायण्यै च हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ दुर्गायै च शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नो गौरी नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥ इसी प्रकार करन्यास भी करना चाहिये।

अन्नपूर्णागायत्रीमन्त्रः- ॐ भगवत्यै च विद्महे माहेश्वर्य्यै च धीमहि। तन्नोऽन्नपूर्णा प्रचोदयात्। षडङ्गन्यासः ॐ भगवत्यै च हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ माहेश्वर्य्यै च शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नोऽन्नपूर्णा नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥ इसी प्रकार करन्यास भी करना चाहिये।

कालीगायत्रीमन्त्रः - ॐ कालिकायै विद्महे श्मशानवासिन्यै धीमहि। तन्नोऽघोरा प्रचोदयात्। षडङ्गन्यासः ॐ कालिकायै हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ श्मशानवासिन्यै शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नोऽघोरा नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥ इसी प्रकार करन्यास भी करना चाहिये।

तारागायत्रीमन्त्रः- ॐ तारायै च विद्महे महोग्रायै च धीमहि। तन्नो देवी प्रचोदयात्। षडङ्गन्यासः ॐ तारायै च हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ महोग्रायै च शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ तन्नो देवी नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥ इसी प्रकार करन्यास भी करना चाहिये।

षोडशी (त्रिपुरसुन्दरी) गायत्रीमन्त्रः- ॐ ऐं त्रिपुरादेव्यै विद्महे क्लीं कामेश्वर्यै धीमहि। सौस्तन्नः क्लिन्ने प्रचोदयात्। षडङ्गन्यासः- **ॐ ऐं त्रिपुरादेव्यै हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ क्लीं कामेश्वर्यै शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ सौस्तन्नः क्लिन्ने नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥ इसी प्रकार करन्यास भी करना चाहिये।** द्वितीय त्रिपुरासुन्दरीगायत्रीमन्त्रः - **ॐ क्लीं त्रिपुरादेव्यै विद्महे कामेश्वरी धीमहि। तन्नः क्लिन्ने प्रचोदयात्।** तृतीय त्रिपुरासुन्दरीगायत्रीमन्त्रः- **ॐ ऐं वागीश्वर्यै विद्महे क्लीं कामेश्वर्यै धीमहिय्यै सोस्तन्नः शक्तिः प्रचोदयात्। इति षोडशीभेदेन बालागायत्रीमन्त्रः।** भुवनेश्वरीगायत्रीमन्त्रः **ॐ नारायण्यै च विद्महे भुवनेश्वर्यै धीमहि। तन्नो देवी प्रचोदयात्।** षडङ्गन्यासः **ॐ नारायण्यै च हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ भुवनेश्वर्यै शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नो देवी नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥** इसी प्रकार करन्यास भी करना चाहिये।

भैरवीगायत्रीमन्त्रः- ॐ त्रिपुरायै च विद्महे भैरव्यै च धीमहि। तन्नो देवी प्रचोदयात्। षडङ्गन्यासः- **ॐ त्रिपुरायै च हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ भैरव्यै च शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नो देवी नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥** इसी प्रकार करन्यास भी करना चाहिये।

छिन्नमस्तागायत्रीमन्त्रः- ॐ वैरोचन्यै च विद्महे छिन्नमस्तायै धीमहि। तन्नो देवी प्रचोदयात्। षडङ्गन्यासः- **ॐ वैरोचन्यै च हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ छिन्नमस्तायै शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नो देवी नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥** इसी प्रकार करन्यास भी करना चाहिये।

धूमावतीगायत्रीमन्त्रः- ॐ धूमावत्यै च विद्महे संहारिण्यै च धीमहि। तन्नो धूमा प्रचोदयात्। षडङ्गन्यासः- **ॐ धूमावत्यै च हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ संहारिण्यै च शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नो धूमा नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥** इसी प्रकार करन्यास भी करना चाहिये।

बगलामुखीगायत्रीमंत्रः- ॐ बगलामुख्यै च विद्महे स्तम्भिन्यै च धीमहि। तन्नो देवी प्रचोदयात्। षडङ्गन्यासः- **ॐ बगलामुख्यै च हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ स्तम्भिन्यै च शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नो देवी नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥** इसी प्रकार करन्यास भी करना चाहिये।

मातङ्गीगायत्रीमन्त्रः- ॐ मातङ्ग्यै च विद्महे उच्छिष्टचाण्डाल्यै च धीमहि। तन्नो देवी प्रचोदयात्। षडङ्गन्यासः- **ॐ मातङ्ग्यै च हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ उच्छिष्टचाण्डाल्यै च शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नो देवी नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥** इसी प्रकार करन्यास भी करना चाहिये।

महिषमर्दिनीगायत्रीमन्त्रः- ॐ महिषमर्द्दिन्यै विद्महे दुर्गायै धीमहि। तन्नो देवी प्रचोदयात्। षडङ्गन्यासः- **ॐ महिषमर्द्दिन्यै हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ दुर्गायै शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नो देवी नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥** इसी प्रकार करन्यास भी करना चाहिये।

त्वरितागायत्रीमन्त्रः– ॐ त्वरिता देवी विद्महे महानित्यायै धीमहि। तन्नो देवी प्रचोदयात्। षडङ्गन्यासः– **ॐ त्वरिता देवी हृदयाय नमः ॥१॥ ॐ विद्महे शिरसे स्वाहा ॥२॥ ॐ महानित्यायै शिखायै वषट् ॥३॥ ॐ धीमहि कवचाय हुम् ॥४॥ ॐ तन्नो देवी नेत्रत्रयाय वौषट् ॥५॥ ॐ प्रचोदयादस्त्राय फट् ॥६॥** इसी प्रकार करन्यास भी करना चाहिये। **इति श्रीत्र्यधिकपञ्चाशद्देवता गायत्रीमन्त्रे गायत्रीपटलतन्त्रं समाप्तम्।**

॥ श्री गायत्री कवचम् ॥

इस कवच में श्लोक ३१ से ३४ अन्य प्रयोग विधि है।

॥याज्ञवल्क्य उवाचः॥

स्वामिन् सर्वजगन्नाथ संशयोऽस्ति महान्मम्। चतुः षष्टिकलानां च पातकानां च तद्वद ॥१॥
मुच्यते केन पुण्येन ब्रह्मरूपं कथं भवेत्। देहश्च देवतारूपं मन्त्ररूपं विशेषतः ॥२॥
क्रमतः श्रोतुमिच्छामि कवचं विधिपूर्वकम्।

॥ब्रह्मोवाचः॥

विनियोगः– **ॐ अस्य श्री गायत्रीकवचस्य ब्रह्मविष्णुरुद्रा ऋषयः। ऋग्यजुः सामाथर्वाणिच्छन्दांसि। परब्रह्मस्वरूपिणी गायत्री देवता। भूः बीजम्। भुवः शक्तिः। स्वः कीलकम्। श्रीगायत्री प्रीत्यर्थे जपे विनियोगः।**

ऋष्यादिन्यासः– **ॐ ब्रह्मविष्णुरुद्र ऋषिभ्यो नमः शिरसि। ऋग्यजुः सामाथर्वच्छन्दोभ्यो नमः मुखे। परब्रह्मस्वरूपिणी गायत्री देवतायै नमः हृदि। भूः बीजाय नमः गुह्ये। भुवः शक्तये नमः पादयोः। स्वः कीलकाय नमः नाभौ। विनियोगाय नमः सर्वाङ्गे।**

करन्यासः– **ॐ भूर्भुवः स्वः तत्सवितुरित्यंगुष्ठाभ्यां नमः। ॐ भूर्भुवः स्वः वरेण्यं तर्जनीभ्यां नमः। ॐ भूर्भुवः स्वः भर्गोदेवस्य मध्यमाभ्यां नमः। ॐ भूर्भुवः स्वःधीमह्यनामिकाभ्यां नमः। ॐ भूर्भुवः स्वः धियो यो नः कनिष्ठिकाभ्यां नमः। ॐ भूर्भुवः स्वः प्रचोदयात् करतलकरपृष्ठाभ्यां नमः।**

षडङ्गन्यासः– **ॐ भूर्भुवः स्वः तत्सवितुरिति हृदयाय नमः। ॐ भूर्भुवः स्वः वरेण्यमिति शिरसे स्वाहा। ॐ भूर्भुवः स्वः भर्गोदेवस्येति शिखायै वषट्। ॐ भूर्भुवः स्वःधीमहीति कवचाय हुम्। ॐ भूर्भुवः स्वः धियो यो नः इति नेत्रत्रयाय वौषट्। ॐ भूर्भुवः स्वः प्रचोदयादिति अस्त्राय फट्।**

इति न्यासं कृत्वाकरौ बद्ध्वा प्रार्थयेत्। तथा च–

वर्णास्त्रां कुण्डिका हस्तां शुद्धनिर्मलज्योतिषीम्। सर्वतत्त्वमयीं वन्दे गायत्रीं वेदमातरम् ॥१॥
इति सम्प्रार्थ्य ध्यानं कुर्यात्–

॥ध्यानम्॥

मुक्ताविद्रुमहेमनीलधवलच्छायैर्मुखैस्त्रीक्षणैर्युक्तामिन्दु निबद्धरत्नमुकुटां तत्त्वार्थ वर्णात्मिकाम्।
गायत्रीं वरदाऽभयांऽकुशकशां शूलं कपालं गुणं, शङ्खं चक्रमथारविन्दयुगलं हस्तैर्वहन्तीं भजे॥
ॐ गायत्री पूर्वतः पातु सावित्री पातु दक्षिणे। ब्रह्मविद्या च मे पश्चादुत्तरे मां सरस्वती ॥१॥
पावकीं मे दिशं रक्षेत्पावकोज्ज्वल शालिनी। यातुधानीं दिशं रक्षेद्यातुधान गणार्दिनी ॥२॥

पावमानीदिशं रक्षेत्पवमानविलासिनी । दिशं रौद्रीमवतु मे रुद्राणी रुद्ररूपिणी ॥३॥
उर्ध्वं ब्रह्माणी मे रक्षेदधस्ताद्वैष्णवी तथा । एवं दशदिशो रक्षेत्सर्वतो भुवनेश्वरी ॥४॥
ब्रह्मास्त्र स्मरणादेव वाचां सिद्धः प्रजायते । ब्रह्मदण्डश्च मे पातु सर्वशस्त्रास्त्रभक्षकः ॥५॥
ब्रह्मशीर्षस्तथा पातु शत्रूणां वधकारकः । सप्तव्याहृतयः पातु स सदा बिन्दुसंयुतः ॥६॥
वेदमाता च मां पातु सरहस्या सदैवता । देवीसूक्तं सदा पातु सहस्राक्षरदेवता ॥७॥
चतुःषष्टिकला विद्या दिव्याद्यां पातु देवता । बीजशक्तिश्च मे पातु पातु विक्रमदेवता ॥८॥
तत्पदं पातु मे पादौ जंघे मे सवितुः पदम् । वरेण्यं कटिदेशं तु नाभिं भर्गस्तथैव च ॥९॥
देवस्य मे तु हृदयं धीमहीति गलं तथा । धियो मे पातु जिह्वायां यः पदं पातु लोचने ॥१०॥
ललाटे नः पदं पातु मूर्द्धानं मे प्रचोदयात् । तद्वर्णः पातु मूर्द्धानं सकारः पातु भालकम् ॥११॥
चक्षुषी मे विकारस्तु श्रोत्रं रक्षेत्तुकारकः । नासापुटे वकारो मे रेकास्तु कपोलयोः ॥१२॥
णिकारस्त्वधरोष्ठे च यंकारस्त्वधरोष्ठके । आस्यमध्ये भकारस्तुर्गोकारस्तु कपोलयोः ॥१३॥
देकारः कण्ठदेशे च वकारः स्कंधदेशयोः । स्यकारो दक्षिणं हस्तं धीकारो वामहस्तके ॥१४॥
मकारो हृदयं रक्षेद्धिकारो जठरं तथा । धिकारो नाभिदेशं च योकारस्तु कटिद्वयम् ॥१५॥
गुह्यं रक्षतु योकार ऊरू मे नः पदाक्षरम् । प्रकारो जानुनी रक्षेच्चोकारो जङ्घदेशयोः ॥१६॥
दकारो गुल्फदेशं तु यात्कारः पादयुग्मकम् । जातवेदेति गायत्री त्र्यम्बकेति दशाक्षरा ॥१७॥
सर्वतः सर्वदा पातु आपोज्योतीति षोडशी । इदं तु कवचं दिव्यं बाधाशत विनाशकम् ॥१८॥
चतुः षष्टिकलाविद्या सकलैश्वर्य सिद्धिदम् । जपारम्भे च हृदयं जपान्ते कवचं पठेत् ॥१९॥
स्त्रीगोब्राह्मणमित्रादि द्रोहाद्यखिल पातकैः । मुच्यते सर्व पापेभ्यः परं ब्रह्माधिगच्छति ॥२०॥
पुष्पाञ्जलिं च गायत्र्या मूलेनैव पठेत्सकृत् । शतसाहस्त्रवर्षाणां पूजायाः फलमाप्नुयात् ॥२१॥
भूर्जपत्रे लिखित्वै तत्स्वकण्ठे धारयेद्यदि । शिखायां दक्षिणे बाहौ कण्ठे वा धारयेद् बुधः ॥२२॥
त्रैलोक्यं क्षोभयेत्सर्वं त्रैलोक्यं दहति क्षणात् । पुत्रवान्धनवाञ्छी मान्नानाविद्यानिधिर्भवेत् ॥२३॥
ब्रह्मास्त्रादीनि सर्वाणि तदङ्गस्पर्शनात्ततः । भवन्ति तस्य तुल्यानि किमन्यत्कथयामि ते ॥२४॥
अभिमंत्रित गायत्री कवचं मानसं पठेत् । तज्जलं पिबतो नित्यं पुरश्चर्याफलं भवेत् ॥२५॥
लघुसामान्यकं मंत्रं महामंत्रं तथैव च । यो वेत्ति धारणां युञ्जञ्जीवन्मुक्तः स उच्यते ॥२६॥
सप्त व्याहृदयो विप्र सप्तावस्थाः प्रकीर्तिताः । सप्तजीवशता नित्यं व्याहृती अग्निरूपिणी ॥२७॥
प्रणवे नित्ययुक्तस्य व्याहृतीषु च सप्तसु । सर्वेषामेव पापानां सङ्कटे समुपस्थिते ॥२८॥
शतं सहस्त्रमभ्यर्च्य गायत्री पावनं महत् । दशशतमष्टोत्तरशतं गायत्री पावनं महत् ॥२९॥
भक्तिमान्यो भवेद्विप्रः संध्याकर्मसमाचरेत् । कालेकाले तु कर्त्तव्यं सिद्धिर्भवति नान्यथा ॥३०॥
प्रणवं पूर्वमुद्धृत्य भूर्भुवः स्वस्तथैव च । तुर्यं सहैव गायत्रीजप एव उदाहृतः ॥३१॥

तुरीयपादमुत्सृज्य गायत्रीं च जपेद्विजः । स मूढो नरकं याति कालसूत्रमधोगतिः ॥३२॥
मंत्रादौ जननं प्रोक्तं मन्त्रान्ते मृतसूतकम् । उभयोर्दोषनिर्मुक्तं गायत्री सफला भवेत् ॥३३॥
मंत्रादौ पाशबीजं च मन्त्रान्ते कुशबीजकम् । मन्त्र मध्ये तु या माया गायत्री सफला भवेत् ॥३४॥
वाचिकस्त्वहमेव स्यादुपांशु शतमुच्यते । सहस्त्रं मानसं प्रोक्तं त्रिविधं जपलक्षणम् ॥३५॥
अक्षमालां च मुद्रां च गुरोरपि न दर्शयेत् । जपं चाक्षस्वरूपेणानामिकामध्यपर्वणि ॥३६॥
अनामा मध्यमा हीना कनिष्ठादिक्रमेण तु । तर्ज्जनीमूलपर्यन्तं गायत्रीजपलक्षणम् ॥३७॥
पर्वभिस्तु जपेदेवमन्यत्र नियमं स्मृतम् । गायत्री वेदमूलत्वाद्वेदः पर्वसु गीयते ॥३८॥
दशभिर्ज्जन्मजनितं शतेनैव पराकृतम् । त्रियुगं तु सहस्त्राणि गायत्री हन्ति किल्बिषम् ॥३९॥
प्रातः कालेषु कर्त्तव्यं सिद्धिं विप्रो य इच्छति । नादालये समाधिश्च सन्ध्यायां समुपासते ॥४०॥
अङ्गुल्यग्रेण यज्जप्तं यज्जप्तं मेरुलङ्घने । असंख्यया च यज्जप्तं यज्जप्तं निष्फलं भवेत् ॥४१॥
विना वस्त्रं प्रकुर्वीत गायत्री निष्फला भवेत् । वस्त्रपुच्छं न जानाति वृथा तस्य परिश्रमः ॥४२॥
गायत्रीं तु परित्यज्य अन्य मन्त्रमुपासते । सिद्धान्नं च परित्यज्य भिक्षामटति दुर्मतिः ॥४३॥
ऋषिश्छन्दो देवताख्या बीजशक्तिश्च कीलकम् । नियोगं न च जानाति गायत्रीं निष्फला भवेत् ॥४४॥
वर्णमुद्रा ध्यान पदमावाहन विसर्जनम् । दीपचक्रं न ज़ानाति गायत्री निष्फला भवेत् ॥४५॥
शक्तिन्यासस्तथा स्थानं मन्त्रसम्बोधनं परम् । त्रिविधं यो न जानाति गायत्री निष्फला भवेत् ॥४६॥
पञ्चोपचारकाश्चैव होमद्रव्यं तथैव च । पञ्चाङ्गं च विना नित्यं गायत्री निष्फला भवेत् ॥४७॥
मन्त्रसिद्धिर्भवेज्जातु विश्वामित्रेण भाषितम् । व्यासो वाचस्पतिं जीवस्तुता देवी तपः स्मृतौ ॥४८॥
सहस्त्रं जप्ता सा देवी ह्युपपातकनाशिनी । लक्षजाप्ये तथा तच्च महापातकनाशिनी ॥४९॥
कोटिजाप्येन राजेन्द्र यदिच्छति तदाप्नुयात् । न देयं परशिष्येभ्यो ह्यभक्तेभ्यो विशेषतः ।
शिष्येभ्यो भक्ति युक्तेभ्यो ह्यन्यथा मृत्युमाप्नुयात् ॥५०॥

॥ इति श्रीमद्वसिष्ठ संहितायां महात्म्यसहितं गायत्री कवचं संम्पूर्णम् ॥

॥ मंत्रात्मक गायत्री कवच ॥

॥ श्री देव्युवाच ॥

देव देव महादेव! संसारार्णव तारक ! गायत्री कवचं देव! कृपया कथय प्रभो ।

॥ महादेव उवाच ॥

मूलाधारेषु या नित्या कुण्डली तत्त्वरूपिणी । सूक्ष्माति सूक्ष्मा परमा विसतन्तुस्वरूपिणी ॥
विद्युत्पुञ्जप्रतीकाशा कुण्डलाकृतिरूपिणी । परमब्रह्म गृहिणी पञ्चाशद् वर्णरूपिणी ॥
शिवस्य नर्तकी नित्या परंब्रह्मपूजिता । ब्रह्मणः सैव गायत्री सच्चिदानन्दरूपिणी ॥
तद् भ्रमावर्त्तवातोऽयं प्राणात्मा नित्यनूतनः । नित्यं तिष्ठतु सानन्दा कुण्डली भवविग्रहे ॥

अति गोप्यं महत् पुण्यं त्रिकोटितीर्थसंयुतम् । सर्वयज्ञमयं देवि! सर्वदानमयं सदा ॥
सर्वज्ञानमयं देवि! परंब्रह्ममयं सदा । कवचं कथयाम्याद्य पार्वति! प्राणवल्लभे ॥
ॐ भूः पातु ॐ पातु मे मूलं चतुर्दल समन्वितम् । ॐ भुवः ॐ पातु मे लिङ्गं षड्दल समन्वितम् ॥१॥
ॐ स्वः ॐ पातु मे कण्ठं साकाशं दलषोडशम् । ॐ तत् ॐ पातु मे रूपं ब्रह्मण्य कारणं परम् ॥२॥
ॐ स ॐ वदनं पातु रसना संयुतं मम । ॐ वि ॐ पातु मे गन्धं सदा शरीरसंयुतम् ॥३॥
ॐ तुः ॐ पातु मे स्पर्शं शरीरस्य च कारणम् । ॐ व ॐ पातु मे शब्दं शब्दविग्रहकारणम् ॥४॥
ॐ रे ॐ पातु मे नित्यं त्वचं शरीर रक्षकम् । ॐ णि ॐ पातु मे अक्षं सर्वतत्वैककारणम् ॥५॥
ॐ यं ॐ पातु मे श्रोत्रं श्रवणस्य च कारणम् । ॐ भ ॐ पातु मे घ्राणं गन्धोपादान कारणम् ॥६॥
ॐ र्गो ॐ पातु मे वाक्यं सभायां शब्दरूपिणी । ॐ दे ॐ पातु मे बाहुयुगलं ब्रह्मकारणम् ॥७॥
ॐ व ॐ पातु मे पादयुगलं ब्रह्मकारणम् । ॐ स्य ॐ पातु मे लिङ्गं सजलं षड्दलैर्युतम् ॥८॥
ॐ धी ॐ पातु मे नित्यं प्रकृतिं शब्दकारणम् । ॐ म ॐ पातु मे नित्यं मनो ब्रह्मस्वरूपिणीम् ॥९॥
ॐ हि ॐ पातु मे बुद्धिं परब्रह्ममयं सदा । ॐ धि ॐ पातु मे नित्यमहङ्कारं यथा तथा ॥१०॥
ॐ यो ॐ पातु मे नित्यं पृथिवीं पार्थिवं वपुः । ॐ यो ॐ पातु मे नित्यं जलं सर्वत्र सर्वदा ॥११॥
ॐ नः ॐ पातु मे नित्यं तेजः पुञ्जं यथा तथा । ॐ प्र ॐ पातु मे नित्यमनिलं देह कारणम् ॥१२॥
ॐ चो ॐ पातु मे नित्यमाकाशं शशि सन्निभम् । ॐ द ॐ पातु मे जिह्वां जप यज्ञस्य कारणम् ॥१३॥
ॐयात् ॐ पातु मे चित्तं शिवज्ञानमयं सदा । ॐ तत्वानि पातु मे नित्यं गायत्री परदेवता ॥१४॥
ॐ भू र्भुवः स्वः पातु मे नित्यं ब्रह्माणी जठरं क्षुधा । ॐत्वष्टा मे सततं पातु ब्रह्माणी भूर्भुवः स्वरः ॥१५॥

विनियोग :- ॐ अस्याः श्रीगायत्र्याः श्रीपरब्रह्म ऋषिः । ऋग्-यजुः-सामाथर्वांश्छन्दांसि । श्रीगायत्री ब्रह्माणी देवता । धर्मार्थकाम मोक्षार्थे जपे विनियोगः ।

ॐ भू र्भुवः स्वः तत्-सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ।

॥फल श्रुति॥

काम क्रोधादिकं सर्वस्मरणाद् याति साम्यताम् । इदं कवचमज्ञात्वा गायत्रीं प्रजपेद् यदि ।
लक्षादि जपेनैव न सिद्धिः जायते प्रिये ॥
गायत्री वाचनात् सर्वं स्मरणं सिद्ध्यति ध्रुवम् । पठित्वा कवचं विप्रो गायत्रीं सकृदुच्चरेत् ॥
सर्वपापविनिर्मुक्तो जीवन्मुक्तो भवेद् द्विजः । इदं कवचमज्ञात्वा कवचान्यं पठेत् तु यः ।
सर्वं तस्य वृथा देवि! त्रैलोक्य - मङ्गलादिकम् ॥
गायत्री कवचं यस्य जिह्वायां विद्यते सदा । तदाऽमृतमयी जिह्वा पवित्रा जप पूजने ॥
इदं कवचमज्ञात्वा ब्रह्मविद्यां जपेद् यदि । व्यर्थं भवति चार्वङ्गि! तज्जपं वन रोदनम् ॥
ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः । महानि पातकान्येव स्मरणान्नाशमाप्नुयुः ॥

॥ इति श्री मंत्रात्मक गायत्री कवचं समाप्तम् ॥

॥ अथ गायत्री पञ्जर स्तोत्रम् ॥

नारदजी ने जिस ब्रह्म स्वरूप का दर्शन किया था उसका वर्णन श्लोक १ से ४ तक तक है।

भगवन्तं देवदेवं ब्रह्माणं परमेष्ठिनम् । विधातारं विश्वसृजं पद्मयोनिं प्रजापतिम् ॥१॥
शुद्धस्फटिक संकाशं महेन्द्रशिखरोपमम् । बद्धपिङ्गजटाजूटा तडित्कनककुण्डलम् ॥२॥
शरच्चन्द्राभवदनं स्फुरदिन्दीवरेक्षणम् । हिरण्मयं विश्वरूपमुपवीताजिनावृतम् ॥३॥
मौक्तिकाभाक्ष - वलयस्तन्त्रीलय समन्वितः । कर्पूरोद्धूलिततनुः स्त्रष्टुर्नयनवर्द्धनम् ॥४॥
विनयेनोपसङ्गम्य शिरसा प्रणिपत्य च । नारदः परिपप्रच्छ देवर्षिगणमध्यगः ॥५॥

॥नारद उवाचः॥

भगवन्देवदेवेश सर्वज्ञ करुणानिधे । श्रोतुमिच्छामि प्रश्नेन भोगमोक्षैकसाधनम् ॥६॥
ऐश्वर्यस्य समग्रस्य फलदं द्वन्द्ववर्जितम् । ब्रह्महत्यादि पापघ्नं पापाद्यरिभयापहम् ॥७॥
यदेकं निष्कलं सूक्ष्मं निरञ्जनमनामयम् । यत्ते प्रियतमं लोके तन्मे ब्रूहि पितर्मम् ॥८॥

॥ब्रह्मोवाचः॥

विनियोग एवं ध्यान श्लोक ४२ से ५१ तक है'

शृणु नारद वक्ष्यामि ब्रह्ममूलं सनातनम् । सृष्ट्यादौ मन्मुखे क्षिप्तं देवदेवेन विष्णुना ॥९॥
प्रपञ्चबीजमित्याहुरुत्पत्तिस्थिति हेतुकम् । पुरा मया तु कथितं कश्यपाय सुधीमते ॥१०॥
सावित्रीपञ्जरं नाम रहस्यं निगमत्रये । ऋष्यादिकं च दिग्वर्णं साङ्गावरणकं क्रमात् ॥११॥
वाहनायुध मन्त्रास्त्रं मूर्तिध्यान समन्वितम् । स्तोत्रं शृणु प्रवक्ष्यामि तव स्नेहाश्च नारद ॥१२॥
ब्रह्मनिष्ठाय देयं स्याददेयं यस्य कस्यचित् । आचम्य नियतः पश्चादात्मध्यानपुरः सरम् ॥१३॥
ओमित्यादौ विचिंत्याथ व्योम हेमाब्ज संस्थितम् । धर्मकन्दगतज्ञानमैश्वर्याष्टदलान्वितम् ॥१४॥
वैराग्य कर्णिकासीनां प्रणवग्रहमध्यगाम् । ब्रह्मवेदी समायुक्तां चैतन्यपुरमध्यगाम् ॥१५॥
तत्त्वहंससमाकीर्णां शब्दपीठे सुसंस्थिताम् । नादबिन्दुकलातीतां गोपुरैरूपशोभिताम् ॥१६॥
विद्याविद्यामृतत्वादि प्रकारैरभि संवृताम् । निगमार्गलसंच्छन्नां निर्गुणद्वारवाटिकाम् ॥१७॥
चतुर्वर्गं फलोपेतां महाकल्प वनैर्वृताम् । सान्द्रानंद सुधासिन्धु निगम द्वारवाटिकाम् ॥१८॥
ध्यानधारण योगादितृणगुल्मलतावृताम् । सदसच्चित्स्वरूपाख्य मृगपक्षिसमाकुलाम् ॥१९॥
विद्याविद्याविचारत्वाल्लोकालोका चलावृताम् । अविकार समाश्लिष्ट निजध्यान गुणावृताम् ॥२०॥
पञ्चीकरण पञ्चोत्थभूततत्व निवेदिताम् । वेदोपनिषदर्थाख्य देवर्षिगण सेविताम् ॥२१॥
इतिहासग्रहगणैः सदारैरभिवन्दिताम् । गाथाप्सरोभिर्यक्षश्च गणकिन्नर सेविताम् ॥२२॥
नारसिंह पुराणाख्यैः पुरुषैः कल्पचारणैः । कृतगानविनोदादि कथालापनतत्पराम् ॥२३॥
तदित्यवाङ्मनोगम्य तेजोरूपधरां पराम् । जगतः प्रसवित्रीं तां सवितुः सृष्टिकारिणीम् ॥२४॥

वरेण्यमित्यन्नमयीं पुरुषार्थफलप्रदाम् । अविद्यावर्णवर्ज्यां च तेजोवद्गर्भसंज्ञिकाम् ॥२५॥
देवस्य सच्चिदानन्दपरब्रह्म रसात्मिकाम् । धीमह्यहं स वै तद्वद् ब्रह्माद्वैतस्वरूपिणीम् ॥२६॥
धियो यो नस्तु सविता प्रचोदयादुपासिताम् । परोसौ सविता साक्षादेनोनिर्हरणाय च ॥२७॥
परोरजस इत्यादि परंब्रह्म सनातनम् । आपोज्योतिरिति द्वाभ्यां पाञ्चभौतिकसंज्ञकम् ॥२८॥
रसोकतं ब्रह्मपदैस्तां नित्यां तपिनीं पराम् । भूर्भुवः सुररित्येतैर्निगमत्व प्रकाशिकाम् ॥२९॥
महर्जनस्तपः सत्यलोकोपरि सुसंस्थिताम् । तादृगस्या विराड्रूपरहस्यं प्रवदाम्यहम् ॥३०॥
व्योमकेशालकाकाशद्यो किरीटविराजिताम् । मेघभ्रुकुटिमाक्रान्तविधि विष्णुशिवार्चिताम् ॥३१॥
गुरुभार्गवकर्णान्तां सोमसूर्याग्निलोचनाम् । इडापिङ्गलसूक्ष्माभ्यां वामनासापुटान्विताम् ॥३२॥
संध्याद्विरोष्टपुटितां लसद्वाग्भूपजिह्विकाम् । सन्ध्यासौद्युमणेः कण्ठलसद्बाहु समन्विताम् ॥३३॥
पर्जन्यहृदयासक्त वसुसुस्तनमण्डलाम् । आकाशोदर वित्रस्तनाभ्यवान्तरदेशिकाम् ॥३४॥
प्रजापत्याख्यजघनां कटीन्द्राणीति संज्ञिकाम् । ऊरूमलयमेरुभ्यां शोभमानाऽसुरद्विषाम् ॥३५॥
जानुनी जह्नुकुशिक वैश्वदेवसदाभुजाम् । अयनद्वयजङ्घाद्य सुराद्यपितृसंज्ञिकाम् ॥३६॥
पदांघ्रिनखरोमाणि भूतलद्रुम लांछिताम् । ग्रहराश्यर्क्षदेवर्षिमूर्तिं च परसंज्ञिकाम् ॥३७॥
तिथिमासर्तु वर्षाख्यसुकेतु निमिषात्मिकाम् । अहोरात्रार्द्धमासाख्यां सूर्यचन्द्रमसात्मिकाम् ॥३८॥
मायाकल्पित वैचित्र्यसंध्याच्छादनसम्वृताम् । ज्वलत्कालानलप्रख्यां तडित्कोटिसमप्रभाम् ॥३९॥
कोटिसूर्यप्रतीकाशां चन्द्रकोटिसुशीतलाम् । सुधामण्डलमध्यस्थां सान्द्रानन्दाऽमृतात्मिकाम् ॥४०॥
वागतीतां मनोरम्यां वरदां वेदमातरम् । चराचरमयीं नित्यां ब्रह्माक्षरसमन्विताम् ॥४१॥
ध्यात्वा स्वात्मनिभेदेन ब्रह्मपञ्जरमारभे । पञ्जरस्य ऋषिश्चाहं छन्दो विकृतिरुच्यते ॥४२॥
देवता च परो हंसः परब्रह्माधिदेवता । प्रणवो बीजशक्तिः स्यादोंकीलकमुदाहृतम् ॥४३॥
तत्तत्वं धीमहि क्षेत्रं धियोऽस्त्रं यत् परं पदम् । मन्त्रमापोज्यातरिति योनिर्हंसः सवेधकम् ॥४४॥
विनियोगस्तु सिद्ध्यर्थं पुरुषार्थचतुष्टये । ततस्तैरङ्गषट्कं स्यात्तैरेव व्यापकत्रयम् ॥४५॥
पूर्वोक्तदेवतां ध्यायेत्साकारगुण संयुताम् । पञ्चवक्त्रां दशभुजां त्रिपञ्चनयनैर्युताम् ॥४६॥
मुक्ताविद्रुमसौवर्णां सितशुभ्रसमाननाम् । वाणीं परां रमां मायां चामरैर्दर्पणैर्युताम् ॥४७॥
षडङ्गदेवतामन्त्रैरूपाद्यवयवात्मिकाम् । मृगेन्द्रवृष पक्षीन्द्रमृगहंसासनस्थिताम् ॥४८॥
ऊर्ध्वेन्दुबद्धमुकुटकिरीट मणिकुण्डलाम् । रत्नताटङ्कमाङ्गल्यपरग्रैवेयनूपुराम् ॥४९॥
अंगुलीयककेयूर कङ्कणौघैरलंकृताम् । दिव्यस्त्रग्वस्त्र संछन्नरविमण्डलमध्यगाम् ॥५०॥
वराभयाब्जयुगलां शङ्खचक्रगदांऽकुशाम् । शुभ्रं कपालं दधतीं वहन्तीमक्षमालिकाम् ॥५१॥
गायत्रीं वरदां देवीं सावित्रीं वेदमातरम् । आदित्यपथगां नित्यां स्मरेद्ब्रह्मस्वरूपिणीम् ॥५२॥
विचित्रमन्त्रजननीं स्मरेद्विद्यां सरस्वतीम् । त्रिपदाऋषिड्मयी पूर्वामुखी ब्रह्मास्त्रसंज्ञिका ॥५३॥

चतुर्विंशतितत्त्वाख्या पातु प्राचीं दिशं मम । चतुष्पाद यजुर्ब्रह्मदण्डाख्या पातु दक्षिणाम् ॥५४॥
षट्त्रिंशत्तत्त्वयुक्ता सा पातु मे दक्षिणां दिशम् । प्रत्यङ्मुखी पञ्चपदी पञ्चाशत्तत्त्वरूपिणी ॥५५॥
पातु प्रतीचीमनिशं सामब्रह्मशिरोऽङ्किता । सौम्यां ब्रह्मस्वरूपाख्या साथर्वाङ्गिरसात्मिका ॥५६॥
उदीचीं षट्पदा पातु चतुष्षष्टिकलात्मिका । पञ्चाशत्तत्त्वरचिता भवपादाश ताक्षरी ॥५७॥
व्योमाख्या पातु मे चोर्ध्वां दिशं वेदाङ्गसंस्थिता । विद्युन्निभा ब्रह्मसंज्ञा मृगारूढा चतुर्भुजा ॥५८॥
चापेषुचर्मासिधरा पातु मे पावकीं दिशम् । ब्राह्मीकुमारी गायत्री रक्ताङ्गी हंसवाहिनी ॥५९॥
बिभ्रत्कमण्डल्वक्षस्त्रक्स्नुवान्मे पातु नैर्ऋतीम् । चतुर्भुजा वेदमाता शुक्लाङ्गी वृषवाहिनी ॥६०॥
वराभयकपालाक्षस्त्रग्विणी पातु वारुणीम् । श्यामा सरस्वती वृद्धा वैष्णवी गरुडासना ॥६१॥
शङ्खार्यब्जाभयकरा पातु शैवीं दिशं मम । चतुर्भुजा वेदमाता गौराङ्गी सिंहवाहना ॥६२॥
वराभयाब्जयुगुलैर्भुजैः पात्वपरां दिशम् । तत्तत्पार्श्वस्थिता स्वस्ववाहनायुधभूषणा ॥६३॥
स्वस्वदिक्षुस्थिताः पान्तु ग्रहशक्त्यङ्गदेवताः । मन्त्राधिदेवता रूपा मुद्राधिष्ठानदेवताः ॥६४॥
व्यापकत्वेन पात्वस्मानापादतलमस्तकम् । तत्पदं मे शिरः पातु भालं मे सवितुः पदम् ॥६५॥
वरेण्यं मे दृशौ पातु श्रुती भर्गः सदा मम । घ्राणं देवस्य मे पातु पातु धीमहि मे मुखम् ॥६६॥
जिह्वां मम धियः पातु कण्ठे मे पातु यः पदम् । नः पदं पातु मे स्कंधौ भुजौ पातु प्रचोदयात् ॥६७॥
करौ मे च पराः पातु पादौ मे रजसोऽवतु । ॐ मे नाभिं सदा पातु कटिं मे पातु मे सदा ॥६८॥
ओमापः सक्थिनी पातु गुह्यं ज्योतिः सदा मम । ऊरू मम रसः पातु जानुनी अमृतं मम ॥६९॥
जंघे ब्रह्मपदं पातु गुल्फौ भूः पातु मे सदा । पादौ मम भुवः पातु सुवः पात्वखिलं वपुः ॥७०॥
रोमाणि मे महः पातु रोमकं पातु मे जनः । प्राणश्च धातुस्तत्त्वानि तदीशः पातु मे तपः ॥७१॥
सत्यं पातु ममायूंषि हंसो वृद्धिं च पातु मे । शुचिषत्पातु मे शुक्रं वसु पातु श्रियं मम ॥७२॥
मतिं पात्वन्तरिक्षे सद्धोता दानं च पातु मे । वेदिषत्पातु मे विद्यामतिथिः पातु मे गृहम् ॥७३॥
धर्मं दुरोणसत्पातु नृषत्पातु सुतान्मम । वरसत्पातु मे मायामृतसत्पातु मे सुतान् ॥७४॥
व्योमसत्पातु मे बन्धून् भ्रातृनब्जश्च पातु मे । पशून्मे पातु गोजाश्च ऋतजाः पातु मे भुवम् ॥७५॥
सर्वं मे अद्रिजा पातु यानं मे पातवृतं सदा । अनुक्तमथ यत्स्थानं शरीरन्तर्बहिश्च यत् ॥७६॥
तत्सर्वं पातु मे नित्यं हंसः सोऽहमहर्निशम् ।

॥ माहात्म्यः ॥

इदं तु कथितं सम्यङ् मया ते ब्रह्मपञ्जरम् ॥७७॥
सन्ध्ययोः प्रत्यहं भक्त्या जपकाले विशेषतः । धारयेद् द्विजवर्यो यः श्रावयेद्वा समाहितः ॥७८॥
स विष्णुः स शिवः सोहं सोऽक्षरः स विराट् स्वराट् । शताक्षरात्मकं देव्यानामाष्टाविंशतिः शतम् ॥७९॥
शृणु वक्ष्यामि तत्सर्वमतिगुह्यं सनातनम् । भूतिदा भुवना वाणी वसुधा सुमना मही ॥८०॥
हरिणी जननी नन्दा सविसर्गा तपस्विनी । पयस्विनी सती त्यागा चैन्दवी सत्यवीरसा ॥८१॥

विश्वा तुर्या परा रेच्या निर्घृणी यमिनी भवा । गोवेद्या च जरिष्ठा च स्कन्दिनी धीर्मतिर्हिमा ॥८२॥
भीषणा योगिनी यक्षी नदी प्रज्ञा च चोदिनी । धनिनी यामिनी पद्मा रोहिणी रमणी ऋषिः ॥८३॥
सेनामुखी सामयी च वकुला दोषवर्जिता । सर्वकामदुघा सोमोद्भावाहङ्कारवर्जिता ॥८४॥
द्विपदा च चतुष्पदा त्रिपदा चैकषट्पदा । अष्टापदी नवपदी सा सहस्त्राक्षरात्मिका ॥८५॥
इदं यः परमं गुह्यं सावित्रीमन्त्रपञ्जरम् । नामाष्टविंशतिशतं शृणुयाच्छावयेत्पठेत् ॥८६॥
मर्त्यानाममृतत्वाय भीतानामभयाय च । मोक्षाय च मुमुक्षूणां श्रीकामानां श्रिये सदा ॥८७॥
विजयाय युयुत्सूनां व्याधितानामरोगकृत् । वश्याय वश्यकामानां विद्यायैवेदकामिनाम् ॥८८॥
द्रविणाय दरिद्राणां पापिनां पापशान्तये । वादिनां वादिविजये कवीनां कविताप्रदम् ॥८९॥
अन्नाय क्षुधितानां च स्वर्गायनाममिच्छताम् । पशुभ्यः पशुकामानां पुत्रेभ्यः पुत्रकांक्षिणाम् ॥९०॥
क्लेशिनां शोकशान्त्यर्थं नृणां शत्रुभयाय च । राजवश्याय द्रष्टव्यं पञ्जरं नृपसेविनाम् ॥९१॥
भक्त्यर्थं विष्णुभक्तानां विष्णौ सर्वान्तरात्मनि । नायकं विधिसृष्टानां शान्तये भवति ध्रुवम् ॥९२॥
निः स्पृहाणां नृणां मुक्तिः शाश्वती भवति ध्रुवम् । जप्यं त्रिवर्णसंयुक्तं गृहस्थेन विशेषतः ॥९३॥
मुनीनां ज्ञानसिद्ध्यर्थं यतीनां मोक्षसिद्धये । उद्यन्तं चन्द्रकिरणमुपस्थाय कृताञ्जलिः ॥९४॥
कानने वा स्वभवने तिष्ठञ्छुद्धो जपेदिदम् । सर्वान्कामानवाप्नोति तथैव शिवसन्निधौ ॥९५॥
मम प्रीतिकरं दिव्यं विष्णुभक्तिविवर्द्धनम् । ज्वरार्त्तानां कुशाग्रेण मार्जयेत्कुष्ठरोगिणाम् ॥९६॥
अङ्गमङ्गं यथालिङ्गं कवचेन तु साधकः । मण्डलेन विशुद्ध्येत् सर्वरोगैनै संशयः ॥९७॥
मृतप्रजा च या नारी जन्मवन्ध्या तथैव च । कन्यादिवन्ध्या या नारी तासामङ्गं प्रमार्जयेत् ॥९८॥
पुत्रानरोगिणस्तास्तु लभन्ते दीर्घजीविनः । तास्ताः संवत्सरादर्वाग्गर्भन्तु दधिरे पुनः ॥९९॥
पतिविद्वेषिणी या स्त्री अङ्गं तस्याः प्रमार्जयेत् । तमेव भजते सा स्त्री पतिं कामवश नयेत् ॥१००॥
अश्वत्थे राजवश्यार्थं बिल्वमूले स्वरूपभाक् । पलाशमूले विद्यार्थी तेजसाभिमुखो रवौ ॥१०१॥
कन्यार्थी चण्डिकागेहे जपेच्छत्रुभयाय च । श्रीकामो विष्णुगेहे च उद्याने श्रीवशी भवेत् ॥१०२॥
आरोग्यार्थे स्वगेहे च मोक्षार्थी शैलमस्तके । सर्वकामो विष्णुगेहे मोक्षार्थी यत्र कुत्रचित् ॥१०३॥
जपारम्भे तु हृदयं जपान्ते कवचं पठेत् । किमत्र बहुनोक्तेन शृणु नारद तत्त्वतः ।
यं यं चिन्तयते नित्यं तं तं प्राप्नोति निश्चितम् ॥१०४॥

॥ इति श्रीमद्वसिष्ठ संहितायां ब्रह्मनारदसंवादे श्रीमद्गायत्रीपञ्जरस्तोत्रं समाप्तम् ॥

|| श्री गायत्री हृदयम् ||

प्राप्त गायत्री हृदय स्तोत्र हमें अधूरा लगता है। गायत्री उपनिषद् के अन्त फलश्रुति में उपनिषद् को ही हृदय बताया है, अत: उपनिषद् का पाठ अवश्य करें।

विनियोग:- **ॐ अस्य श्रीगायत्री हृदयस्य श्री नारायण ऋषि:। गायत्री छन्द:। श्रीपरमेश्वरी देवता। श्रीपरमेश्वरी देवता प्रीत्यर्थे पाठे विनियोग:।**

ऋष्यादि न्यास:- **श्री नारायण ऋषये नमः शिरसि। गायत्री छन्दसे नम: मुखे। श्रीपरमेश्वरी देवतायै नम: हृदि श्रीपरमेश्वरी देवता प्रीत्यर्थे पाठे विनियोगाय नम: सर्वाङ्गे।**

अंगन्यास :- नाम के बाद **नम:** बोलकर उच्चारण कर न्यास करें। यथा – **द्यौ: नम: मूर्ध्नि। अश्विनौ नम: दन्तपंक्तौ। उभयो: सन्ध्यो: नम: ओष्ठौ। अग्नि: नम: मुखे। सरस्वती जिह्वायां। वृहस्पति: ग्रीवायां। अष्टौ वसव: स्तनयो:। मरुत: बाह्वो:। पर्जन्य: हृदये। आकाश: उदरे। अन्तरिक्षं नाभौ। इन्द्राग्नी कट्यो:। विज्ञान घन: प्रजापति: जघने। कैलास-मलय: ऊरौ। विश्वेदेवा: जान्वो:। कौशिक: जङ्घयो:। गुह्य: अयने। पितर: ऊरौ। पृथिवी पादयो:। वनस्पतय: अंगुलिषु। ऋषय: रोमसु। मुहूर्तानि नखेषु। ग्रहा: अस्थिषु। ऋतव: असृङ् -मांसयो:। सम्वत्सरा: निमिषे। आदित्यश्चन्द्रमा: अहोरात्रयो:। प्रवरां दिव्यां गायत्रीं सहस्त्रनेत्रां शरणमहं प्रपद्ये।**

ॐ तत्-सवितुर्वरेण्याय नम:। ॐ तत्-पूर्वा जयाय नम:। तत्-प्रातरादित्य-प्रतिष्ठायै नम:। प्रातरधीयानो रात्रिकृतं पापं नाशयति। सायमधीयानो दिवसकृतं पापं नाशयति। सायं प्रातरधीयानोऽपापो भवति। सर्वतीर्थेषु स्नातो भवति। सर्वैर्देवैर्ज्ञातो भवति। अवाच्य-वचनात् पूतो भवति। अभक्ष्य भक्षणात् पूतो भवति। अभोज्य भोजनात् पूतो भवति। अचोष्य चोषणात् पूतो भवति। असाध्य साधनात् पूतो भवति। दुष्प्रतिग्रह शतसहस्त्रात् पूतो भवति। सर्वप्रतिग्रहात् पूतो भवति। पंक्ति दूषणात् पूतो भवति। अनृतवचनात् पूतो भवति। अथाब्रह्मचारी ब्रह्मचारी भवति।

अनेन हृदयेनाधीतेन क्रतुसहस्त्रेणेष्टं भवति। षष्टिशत-सहस्त्र-गायत्र्या जप्यानि फलानि भवन्ति। अष्टौ ब्राह्मणान् सम्यक् ग्राहयेत्। तस्य सिद्धिर्भवति। य इदं नित्यमधीयानो ब्राह्मण: प्रात: शुचि: सर्वपापै: प्रमुच्यते। इति ब्रह्मलोके महीयते। इत्याह भगवान् श्रीनारायण:।

|| इति श्री गायत्री हृदय स्तोत्रम् सम्पूर्णम् ||

|| गायत्री स्तवराज: ||

इस स्तव में श्लोक ४, ५, ८, १०, ११, २५, २६ में अन्य मंत्रों के प्रयोग हैं।

विनियोग:- **ॐ अस्य श्री गायत्री स्तवराज मन्त्रस्य श्रीविश्वामित्र: ऋषि:। सकल जननी चतुष्पदा गायत्री परमात्मा देवता। सर्वोत्कृष्टं परम धाम तत्-सवितुर्वरेण्यं बीजं। भर्गो देवस्य धीमहि शक्ति:। धियो यो न: प्रचोदयात् कीलकं। ॐ भू: ॐ भुव ॐ स्व: ॐ मह: ॐ जन: ॐ तप: ॐ सत्यं ॐ तत्-सवितुर्वरेण्यं भर्गो देवस्य धीमहि ॐ धियो यो न: प्रचोदयात् ॐ आपो ज्योती रसोऽमृतं व्यापकं। मम धर्मार्थ काममोक्षार्थे जपे विनियोग:।**

ऋष्यादि न्यासः- श्रीविश्वामित्र ऋषये नमः शिरसि। सकल जननी चतुष्पदा गायत्री परमात्मा देवतायै नमः हृदि। सर्वोत्कृष्टं परम धाम तत्-सवितुर्वरेण्यं बीजाय नमः लिङ्गे। भर्गो देवस्य धीमहि शक्तये नमः नाभौ। धियो यो नः प्रचोदयात् कीलकाय नमः पादयोः। ॐ भूः ॐ भुव ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यं ॐ तत्-सवितुर्वरेण्यं भर्गो देवस्य धीमहि ॐ धियो यो नः प्रचोदयात् ॐ आपो ज्योती रसोऽमृतं व्यापकाय नमः सर्वाङ्गे। मम धर्मार्थ काममोक्षार्थे जपे विनियोगाय नमः अञ्जलौ।

॥ ध्यानम् ॥

गायत्रीं वेदधात्रीं शतमखफलदां वेदशास्त्रैक वेद्याम्।
चिच्छक्तिं ब्रह्मविद्यां परमशिवपदां श्रीपदं वै करोति।
सर्वोत्कृष्टं पदं तत्सवितुरनु पदान्ते वरेण्यं शरण्यम्,
भर्गो देवस्य धीमहि धियो यो नः प्रचोदयादित्यौर्वतेजः ॥१॥
साम्राज्यवीजं प्रणव त्रिपादं सव्यापसव्यं प्रजपेत् सहस्त्रकं।
संपूर्ण कामं प्रणवं विभूतिं तथा भवेद् वाक्यविचित्रवाणी ॥२॥
शुभं शिवं शोभनमस्तु मह्यं सौभाग्यभोगोत्सवमस्तु नित्यं।
प्रकाशविद्या त्रयशास्त्रसर्वं भजेन्महामन्त्रफलं प्रिये! वै ॥३॥

ब्रह्मास्त्रं ब्रह्मदण्डंशिरसि शिखिमहद्ब्रह्मशीर्षं नमोऽन्तकं। सूक्तंपारायणोक्तं प्रणवमथ महावाक्य सिद्धान्तमूलम्। सूर्यं त्रीणि द्वितीयं प्रथममनु महावेद वेदान्तसूक्तं। नित्यं स्मृत्यनुसारं नियमित चरितं मूलमंत्रं नमोऽन्तम् ॥४॥
अस्त्रं शस्त्रहतं त्वघोरसहितं दण्डेन वाजीहतम्, आदित्यादिहतं शिरोऽन्तसहितं पापक्षयार्थं परम्। तुर्यान्त्यादि विलोममंत्र पठनं बीजं शिखान्तोर्ध्वकम्, नित्यं कालनियम्य विप्रविदुषां किं दुष्कृतं भूसुरान् ॥५॥
नित्यं मुक्तिप्रदं नियम्य पवनं निर्घोषशक्तित्रयम्, सम्यग्ज्ञान गुरूपदेश विधिवद् देवीं शिखां तामपि। षष्ट्यैकोत्तर संख्ययानुगत सौषुम्णादि मार्गत्रयीम्, ध्यायेन्नित्य समस्त वेदजननीं देवीं त्रिसंध्यामयीम् ॥६॥
गायत्रीं सकलागमाथ विदुषां सौरस्य बीजेश्वरीम्, सर्वाम्नाय समस्तमंत्रजननीं सर्वज्ञधामेश्वरीम्। ब्रह्मादि त्रयसम्पुटार्थ करणीं संसार पारायणीम्, सन्ध्यां सर्वसमानतन्त्र परया ब्रह्मानु-सन्धायिनीम् ॥७॥
एक द्वि त्रि चतुः समानगणना वर्णाष्टकं पादयोः, पादादा प्रणवादि मन्त्रपठने मन्त्रत्रयी सम्पुटाम्। सन्ध्यायां द्विपदं पठेत् परतरं सायं तुरीयं युतम्, नित्यानित्यमनन्त कोटिफलदं प्रातं नमस्कुर्महे ॥८॥
ओजोऽसीति सहोस्यवो बलमसि भ्राजोऽसि तेजस्विनी, वर्चस्वी सवितागिन सोममममृतं रूपं धरं धीमहि। देवानां द्विजवर्यतां मुनिगणे मुक्तार्थिनां शान्तिनां, ओमित्येकमृचं पठन्ति यमिनो यं यं स्मरेत् प्राप्नुयात् ॥९॥
ओमित्येकमज-स्वरूपममलं तत्ससधा भादितम्, तारं तन्त्रसमन्वितं परतरे पादत्रयं गर्भितम्। आपो ज्योति रसोऽमृतं जनमहः सत्यं तपः स्वर्भुवः, भूयो भूय नमामि भूर्भुवः स्वरोमेतैर्महामंत्रकम् ॥१०॥
आदौ बिन्दुमनुस्मरन् परतरे बालात्रिवर्णोच्चरन्, व्याहृत्यादि सबिन्दुयुक्त त्रिपदातारत्रयं तुर्यकम्। आरोहादवरोहतः क्रमगता श्रीकुण्डलीत्थं स्थिता, देवी मानस पङ्कजे त्रिनयना पञ्चानना पातु माम् ॥११॥
सर्वे सर्ववशे समस्त समये सत्यात्मिके सात्विके, सावित्री सहितात्मके शशियुते सांख्यायन गोत्रजे!। सन्ध्या त्रीण्युपकल्प्य संग्रहविधिः सन्ध्याभिधा नामके, गायत्री प्रणवादि मन्त्रगुरुणा सम्प्राप्य तस्मै नमः ॥१२॥

क्षेमं दिव्यमनोरथाः परतरे चेतः समाधीयताम् , ज्ञानं नित्य वरेण्यमेतदमलं देवस्य भर्गो धियन् ।
मोक्ष श्रीर्विजयार्थिनोऽथ सवितुः श्रेष्ठं विधिस्तत्पदम् , प्रज्ञामेध प्रचोदयात् प्रतिदिनं यो नः पदं पातु माम् ॥१३॥

सत्यं तत्सवितुर्वरेण्य विरलं विश्वादि मायात्मकम् , सर्वाद्यं प्रतिपाद पादरमया तारं तथा मन्मथम् ।
तुर्याऽन्य त्रितयं द्वितीयमपरं संयोग सव्याहृतिम् , सर्वाम्नाय मनोन्मनी मनसिजा ध्यायामि देवीं पराम् ॥१४॥

आदौ गायत्रि मन्त्रं गुरुकृत नियमं धर्मकर्मानुकूलम् ,
सर्वाद्यं सारभूतं सकल मनुमयं देवतानामगम्यम् ।
देवानां पूर्वदेव द्विजकुल मुनिभिः सिद्ध विद्याधराद्यैः ,
को वा वक्तुं समर्थस्तव मनु महिमा बीज राजादिमूलं ॥१५॥

गायत्रीं त्रिपदां त्रिबीजसहितां त्रिव्याहृतिं त्रैपदाम्, त्रिब्रह्म त्रिगुणां त्रिकालनियमां वेदत्रयीं तां पराम् ।
सांख्यादित्रयरूपिणीं त्रिनयनां मातृत्रयीं तत्पराम्, त्रैलोक्य त्रिदश त्रिकोटि सहितां सन्ध्यां त्रयीं तां नुमः ॥१६॥

ओमित्येतत् त्रिमात्रा त्रिभुवन करणं त्रिस्वरं वह्निरूपं, त्रीणि त्रीणि त्रिपादं त्रिगुणगुणमयं त्रैपुरान्तं त्रिसूक्तं ।
तत्वानां पूर्वशक्तिं द्वितयगुरुपदं पीठयन्त्रात्मकं तम, तस्मादेतत् त्रिपादं त्रिपदमनुसरं त्राहि मां भो नमस्ते ॥१७॥

स्वस्ति श्रद्धाति मेधा मधुमति मधुरः संशयः प्रज्ञकान्तिः, विद्या बुद्धिर्बलं श्रीरतनुधनपतिः सौम्यवाक्यानुवृत्तिः ।
मेधा प्रज्ञा प्रतिष्ठा मृदुपतिमधुरा पूर्णविद्याप्रपूर्णम्, प्राप्तं प्रत्यूषचिन्त्यं प्रणवपरवशात् प्राणिनां नित्यकर्मम् ॥१८॥

पञ्चाशद्वर्णमध्ये प्रणवपरयुते मन्त्रमाद्यं नमोऽन्तम्, सर्वं सव्यापसाव्यं शतगुणमभितो वर्ममष्टोत्तरं ते ।
एवं नित्यं प्रजप्तं त्रिभुवनसहितं तुर्यमन्त्रं त्रिपादम्, ज्ञानं विज्ञानगम्यं गगनसुसदृशं ध्यायते यः स मुक्तः ॥१९॥

आदिक्षान्तसविन्दुयुक्तसहितं मेरुं क्षकारात्मकम्, व्यस्ताव्यस्तसमस्तवर्ग सहितं पूर्णं शताष्टोत्तरम् ।
गायत्रीं जपतां त्रिकाल सहितां नित्यं सनैमित्तिकम्, चैवं जाप्यफलं शिवेन कथितं सद्भोगमोक्ष प्रदम् ॥२०॥

सप्तव्याहृतिसप्ततारविकृतिः सत्यं वरेण्यं धृतिः, सर्वं तत्सवितुश्च धीमहि महाभर्गस्य देवं भजे ।
धाम्नो धामधर्माधिधारण महान् धीमत्पदं ध्यायते, ॐ तत्सर्वमनुप्रपूर्ण दशकं पादत्रयं केवलम् ॥२१॥

विज्ञानं विलसद्विवेकवचसः प्रज्ञानुसन्धारिणीम्, श्रद्धामेध्ययशः शिरः सुमनसः स्वस्तिश्रियः स्वां सदा ।
आयुष्यं धनधान्यलक्ष्मिमतुलां देवीं कटाक्षं परम् । तत्काले सकलार्थसाधनमहान् मुक्तिर्महत्वं पदम् ॥२२॥

पृथ्वी गन्धार्चनायां नभसि कुसुमता वायुर्धूप प्रकर्षो, वह्निर्दीपप्रकाशो जलममृतमयं नित्यसङ्कल्पपूजा ।
एतत् सर्वं निवेद्य सुख वसति हृदि सर्वदा दम्पतीनाम्, त्वं सर्वज्ञ! शिवं कुरुष्व ममता नाहं त्वया ज्ञेयसि ॥२३॥

सौम्यं सौभाग्यहे तु सकलसुखकरं सर्वसौख्यं समस्तं, सत्यं सद्भोगनित्यं सुखजनसुहृदं सुन्दरं श्रीसमस्तं ।
सौमङ्गल्यं समग्रं सकलशुभकरं स्वस्तिवाचं समस्तं, सर्वाद्यं सद्विवेकं त्रिपदपदयुगं प्राप्तमध्या समस्तं ॥२४॥

गायत्री पदपञ्च पञ्चप्रणवद्वन्द्वं त्रिधा सम्पुटम्, सृष्ट्यादि क्रममन्त्रजाप्य दशकं देवी पदं क्षुत्त्रयम् ।
मन्त्रादिस्थितकेषु सम्पुटमिदं श्रीमातृकावेष्टितं, वर्णान्त्यादिविलोममन्त्र जपनं संहारसम्मोहनम् ॥२५॥

भूराद्यं भूर्भुव स्वस्त्रिपदपदयुतं त्र्यक्षमाद्यन्तयोज्यम्, सृष्टिस्थित्यन्तकार्यं क्रमशिखि सकलं सर्वमन्त्रं प्रशस्तम् ।
सर्वाङ्गं मातृकाणां मनुमयवपुषं मन्त्रयोगं प्रयुक्तं, संहारं क्षादिवर्णं वसुशतगणनं मन्त्रराजं नमामि ॥२६॥

वैश्वामित्र मुदाहृतं हितकरं सर्वार्थसिद्धिप्रदम्, स्तोत्राणां परमं प्रभातसमये पारायणं नित्यशः ।
वेदानां विधिवादमन्त्रसकलं सिद्धिप्रदं सम्पदाम्, सम्प्राप्नोत्यपरत्र सर्वसुखदामायुष्यमारोग्यताम् ॥२७॥

॥ श्रीविश्वामित्र कृतो श्रीगायत्रीस्तवराजः शुभं भूयात् ॥

॥ श्री गायत्री उपनिषद् ॥

नमस्कृत्य भगवान् याज्ञवल्क्यः स्वयं परिपृच्छति- त्वं ब्रूहि भगवन्! गायत्र्या उत्पत्तिं श्रोतुमिच्छामि।

ब्रह्मोवाच-प्रणवेन व्याहृतयः प्रवर्तन्ते। तमसस्तु परं ज्योतिः कः पुरुषः स्वयम्भूर्विष्णुरिति हताः स्वांगुल्याः मथयेत्। मथ्यमानात् फेनो भवति। फेनाद् बुद्बुदो भवति। बुद्बुदादण्डो भवति। अण्डवानात्मा भवति। आत्मनः आकाशो भवति। आकाशाद् वायुर्भवति। वायोरग्निर्भवति। अग्नेरोङ्कारो भवति।

ॐकाराद् व्याहृतिर्भवति। व्याहृत्या गायत्री भवति। गायत्र्याः सावित्री भवति। सावित्र्याः सरस्वती भवति। सरस्वत्या वेदा भवन्ति। वेदेभ्यो ब्रह्मा भवति। ब्रह्मणो लोकाः भवन्ति। तस्माल्लोकाः प्रवर्तन्ते चत्वारो वेदाः साङ्गाः सोपनिषदः सेतिहासास्ते सर्वे गायत्र्याः प्रवर्तन्ते।

यथाग्निर्देवानां, ब्राह्मणो मनुष्याणां, मेरुः शिखरिणां, गंगा नदीनां वसन्त ऋतूनां, ब्रह्मा प्रजापतीनामेवासौ मुख्यः गायत्र्या गायत्री छन्दो भवति।

किं भूः? किं भुवः? किं स्वः? किं महः? किं जनः? किं तपः? किं सत्यं? किं तत्? किं सवितुः? किं वरेण्यं? किं भर्गः? किं देवस्य? किं धीमहि? किं धियः? किं यः ? किं नः? किं प्रचोदयात्?

भूरिति भूर्लोकः। भुवरित्यन्तरिक्ष लोकः। स्वरिति स्वर्लोकः। महरिति महर्लोकः। जन इति जनो लोकः। तप इति तपोलोकः। सत्यमिति सत्यलोकः।

ॐ भूर्भुवः स्वरोमिति त्रैलोक्यम्। तदसौ तेजः, यत् तेजसोऽग्निर्देवता। सवितुरित्यादित्यस्य। वरेण्यमित्यन्न मन्नमेव प्रजापतिः। भर्ग इत्यापो वै भर्गः, एतास्तत्-सर्वा देवताः। देवस्येन्द्रो वै देवयद् दिवं तदिन्द्रस्तस्मात् सर्वकृत् पुरुषो नाम विष्णुः। धीमहि किमध्यात्मं तत् परमं पदमित्यध्यात्मं। येन इति पृथिवी वै यो नः प्रचोदयात्।

काम इमाँल्लोकान् प्रच्यवन् यो नृशंस्योस्तोष्यस्तत् परमो धर्मः। इत्येषा गायत्री किं गोत्रा? कत्यक्षरा? कतिपदा? कतिकुक्षिः? कतिशीर्षाणि?

सांख्यायन सगोत्रा गायत्री। चतुर्विंशत्यक्षरा। त्रिपदा। षटकुक्षिः सावित्री।

कऽस्यास्त्रयः पादा भवन्ति? काऽस्याः कुक्षिः? कानि पञ्चशीर्षाणि?

ऋग्वेदोऽस्याः प्रथमः पादो भवति, यजुर्वेदो द्वितीयः, सामवेदस्तृतीयः। पूर्वा दिक् प्रथमा कुक्षिर्भवति, दक्षिणा द्वितीया, पश्चिमा तृतीया, उदीची चतुर्थी, ऊर्ध्वा पञ्चमी, अधरा षष्ठी कुक्षिः। व्याकरणमस्याः प्रथमं शीर्षं भवति, शिक्षा द्वितीयं, कल्पस्तृतीयं, निरुक्तं चतुर्थं, ज्योतिषमयनं पञ्चमं। किं लक्षणं? किमु चेष्टितं? किमुदाहृतं? किमक्षरं?

दैवत्यं लक्षणं। मीमांसा अथर्ववेदो विचेष्टितं। छन्दोविधिरित्युदाहृतं। को वर्णः? कः स्वरः।

श्वेतो वर्णः। षट्स्वराणि। इमान्यक्षराणि दैवतानि भवन्ति। पूर्वा भवति गायत्री, मध्यमा सावित्री, पश्चिमा सन्ध्या सरस्वती।

प्रातः संध्या रक्ता, रक्तपद्मासनास्था, रक्ताम्बरधरा, रक्तवर्णा, रक्तगंधानुलेपना, चतुर्मुखा, अष्टभुजा, द्विनेत्रा, दण्डाक्षमाला कमण्डलु स्रुक्स्रुव धारिणी, सर्वाभरण भूषिता, कौमारी ब्राह्मी हंस वाहिनी, ऋग्वेद सहिता ब्रह्म दैवत्या, त्रिपदा गायत्री, षटकुक्षिः, पञ्चशीर्षा, अग्निमुखा, रुद्र शिव विष्णु हृदया, ब्रह्मकवचा, सांख्यायन

सगोत्रा, भूर्लोक व्यापिनी, अग्निस्तत्वम्, उदात्तानुदात्तस्वरित स्वर मकारः आत्मज्ञाने विनियोगः।

इत्येषा गायत्री मध्याह्न संध्या श्वेता, श्वेत पद्मासनस्था, श्वेताम्बरधरा, श्वेतगन्धानुलेपना पञ्चमुखी, दशभुजा, त्रिनेत्रा, शूलाक्षमाला कमण्डलुकपालधारिणी, सर्वाभरणभूषिता सावित्री युवती माहेश्वरी, वृषभवाहिनी, यजुर्वेदसहिता, रुद्रदैवत्या त्रिपदा सावित्री, षट्कुक्षिः, पञ्चशीर्षा, अग्निमुखा, रुद्रशिखा, ब्रह्मकवचा, काश्यप सगोत्रा स्वर्लोकव्यापिनी, सूर्यस्तत्वं, उदात्तानुदात्त-स्वरितमकारः, कृष्णवर्णो मोक्षज्ञाने विनियोगः।

इत्येषा सरस्वती रक्ता गायत्री, श्वेता सावित्री, कृष्णवर्णा सरस्वती, प्रणवो नित्य युक्तश्च व्याहृतिषु च सप्तसु सर्वेषामेव पापानां सङ्करे समुपस्थिते। दशशतं समभ्यर्च्य गायत्री पावनी महत्। प्रह्लादोऽत्रिर्वशिष्ठश्च शुकः कण्वः पराशरः। विश्वामित्रो महातेजाः कपिलः शौनको महान्। याज्ञवल्क्यो भरद्वाजो जमदग्निस्तपो निधिः। गौतमो मुद्गलः श्रेष्ठो वेदव्यासश्च लोमशः। अगस्त्यः कौशिको वत्सः पुलस्त्यो माण्डुकस्तथा। दुर्वासास्तपसा श्रेष्ठो नारद कश्यपस्तथा। उक्तात्युक्ता तथा मध्या प्रतिष्ठान्यास पूर्विकाः।

गायत्र्युष्णिगनुष्टुप् च बृहती पंक्तिरेव च। त्रिष्टुप् च जगती चैव तथाति जगती मता। शक्करी सति पूर्वास्यादष्ठ्यत्यष्टी तथैव च। धृतिश्चाति धृतिश्चैव प्रकृतिः कृतिराकृतिः। विकृतिः संकृतिश्चैव तथाति कृतिरुत्कृतिः। इत्येताश्छन्दसां संज्ञाः क्रमशो वच्मि साम्प्रतम्। भूरिति छन्दो भुवरिति छन्दः स्वरितिच्छन्दो भूर्भुवः स्वरोमिति दैवी गायत्री। इत्येतानिच्छन्दांसि प्रथममाग्नेयं, द्वितीयं प्राजापत्यं, तृतीयं सौम्यं, चतुर्थमैशानं, पञ्चममादित्यं, षष्ठं बार्हस्पत्यं, सप्तमं पितृदैवत्यं, अष्टमं भगदैवत्यं नवममार्यम्णं, दशमं सावित्रं, एकादशं त्वाष्ट्रं, द्वादशं पौष्णं, त्रयोदशमैन्द्राग्नं, चतुर्दशं वायव्यं, पञ्चदशं वामदैवत्यं, षोडशं मैत्रावरुणं, सप्तदशं भ्रातृव्यमष्टदशं, वैश्वदेव्यं, एकोनविंशं वैष्णवं, विंशं वासवं, एकविंशं रौद्रं, द्वाविंशमाश्विनं, त्रयोविंशं चतुर्विंशं ब्राह्मं, दीर्घान् स्वरेण संयुक्तान् विन्दुनाद समन्वितान्।

व्यापकान् विन्यसेत् पश्चाद् दश पंक्त्याक्षराणि च। द्रुवुंपुस इति प्रत्यक्ष बीजानि।

प्रह्लादिनी प्रभा सत्या विश्वा भद्रा विलासिनी। प्रभावती जया कान्ता शान्ता पद्मा सरस्वती। विद्रुमस्फटिकाकारं पद्मराग समप्रभम्। इन्द्रनीलमणि प्रख्यं मौक्तिकं कुंकुम प्रभम्। अजनाभं च गाङ्गेयं वैदूर्यं चन्द्रसन्निभम्। हारिद्रं कृष्णदुग्धाभं रविकान्तिसमं भवम्। शुकपिच्छ समाकारं क्रमेण परिकल्पयेत्।

पृथिव्यापस्तथा तेजो वायुराकाश एव च। गन्धो रसश्च रूपं च शब्दः स्पर्शस्तथैव च। घ्राणं जिह्वा च चक्षुश्च त्वक् छोत्रं च तथापरं। उपस्थपायु पादादि पाणिर्वागपि च क्रमात्। मनो बुद्धिरहङ्कारमव्यक्तं च यथा क्रमम्। सुमुखं सम्पुटं चैव विततं विस्तृतं तथा। एकमुखं द्विमुखं च त्रिमुखं च चतुर्मुखं। पञ्चमुखं षणमुखं चाधोमुखं चैव व्यापकं। आञ्जलिकं ततः प्रोक्तं मुद्रितं तु त्रयोदशं। शकटं यमपाशं च ग्रंथितं सम्मुखोन्मुखं। प्रलम्बं मुष्टिकं चैव मत्स्यः कूर्मो वराहकं। सहाक्रान्तं महाक्रान्तं मुद्गरं पल्लव तथा। एता मुद्राश्चतुर्विंशद् गायत्र्याः सुप्रतिष्ठिताः।

ॐ मूर्ध्नि सञ्जाते ब्रह्मा, विष्णुर्ललाटे, रुद्रो भ्रूमध्ये, चक्षुषोश्चन्द्रादित्यौ, कर्णयोः शुक-बृहस्पति, नासिके वायुदैवत्यं, प्रभातं दोषा उभे सन्ध्ये मुखमग्निर्जिह्वा सरस्वती, ग्रीवा स्वाध्यायास्तनयोर्वसवः, बाह्वोर्मरुतः, हृदयं पर्जन्यं, आकाशमपरं नाभिरन्तरिक्षं, कटिरिन्द्रियाणि, जघनं प्राजापत्यं, कैलास मलयौ ऊरू, विश्वेदेवा जानुभ्यां, जान्वोः कुशिकौ, जङ्घयोरयन द्वयं, सुराः पितरः पादौ, पृथिवी वनस्पतिः गुल्फौ रोमाणि, मुहूर्तास्ते विग्रहाः केतुमासा ऋतवः, सन्ध्याकाल त्रयमाच्छादनं सम्वत्सरो निमिषः। अहोरात्रा-वादित्य चन्द्रमसौ सहस्त्र परमां देवीं शतमध्यां दशापरां। सहस्त्रनेत्रां देवीं गायत्रीं शरणमहं प्रपद्ये।

तत्-सवितुर्वरदाय नमः। तत्-प्रातरादित्याय नमः। सायमधीयानो दिवसकृतं पापं नाशयति। प्रातरधीयानो रात्रिकृतं पापं नाशयति। तत्-सायं-प्रातः प्रयुञ्जानोऽपापो भवति।

य इदं गायत्री हृदयं ब्राह्मणः प्रयतः पठेत्, चत्वारो वेदा अधीता भवति, सर्वेषु तीर्थेषु स्नातो भवति, सर्वैर्देवैर्ज्ञातो भवति, सर्वप्रति प्रत्यूहात् पूतो भवति, अलेह्य लेहात् पूतो भवति, अचोष्य-चोषात् पूतो भवति, सुरापानात् पूतो भवति, सुवर्णस्तेयात् पूतो भवति, पंक्तिभेदनात् पूतो भवति, पतित सम्भाषणात् पूतो भवति, अनृत वचनात् पूतो भवति, गुरुतल्प गमनात् पूतो भवति, अगम्या गमनात् पूतो भवति, वृषली गमनात् पूतो भवति, ब्रह्महत्यायाः पूतो भवति, भ्रूणहत्यायाः पूतो भवति, वीरहत्यायाः पूतो भवति, अ-ब्रह्मचारी सुब्रह्मचारी भवति।

अनेन हृदयाधीतेन क्रतु शतेनेष्टं भवति, षष्टिसहस्त्रं गायत्रीपा भवन्ति। अष्टब्राह्मणान् ग्राहयेत् अर्थसिद्धिर्भवति। य इदं गायत्री हृदयं ब्राह्मणः प्रयतः पठेत्। सर्वं पापैः प्रमुच्यते ब्रह्मलोके महीयते।

॥ इति श्री गायत्री उपनिषद् सम्पूर्णम् ॥

॥ श्रीगायत्री अष्टोत्तर सहस्त्रनाम स्तोत्रम्॥

विनियोगः - ॐ अस्य श्रीगायत्री अष्टोत्तर सहस्त्रनाम स्तोत्रस्य श्री ब्रह्मा ऋषिः। अनुष्टुप्छन्दः। श्रीदेवी गायत्री देवता। हलो बीजानि। स्वराः शक्तयः। सर्वाभीष्ट सिद्ध्यर्थे पाठे विनियोगः।

ऋष्यादिन्यासः - श्रीब्रह्मा ऋषये नमः शिरसि। अनुष्टुप्छन्दसे नमः मुखे। श्रीदेवी गायत्र्यै नमः हृदि। हल्भ्यो बीजेभ्यो नमः गुह्ये। स्वरेभ्यः शक्तिभ्यः नमः पादयोः। सर्वाभीष्ट सिद्ध्यर्थे पाठे विनियोगाय: नमः सर्वाङ्गे।

षडङ्गन्यासः - आं, ईं, ऊं, ऐं, औं, अः मातृकाक्षरों: से हृदयादिन्यास करें।

॥ ध्यानम् ॥

रक्त श्वेत हिरण्य नील धवलैर्युक्तां त्रिनेत्रोज्ज्वलाम्,
रक्तां रक्त नवस्त्रजं मणिगणैर्युक्तां कुमारीमिमाम् ।
गायँत्रीं कमलासनां करतलव्यानद्ध कुण्डाम्बुजाम्,
पद्माक्षीं च वरस्त्रजं च दधतीं हंसाधिरूढां भजे ॥

॥ श्रीनारद उवाच ॥

भगवन्! सर्वधर्मज्ञ! सर्वशास्त्र विशारद! श्रुतिस्मृति पुराणानां रहस्यं त्वन्मुखाच्छ्रुतम् ॥१॥
सर्वपापहरं देव! येन विद्या प्रवर्तते । केन वा ब्रह्मविज्ञानं किं नु वा मोक्ष साधनम् ॥२॥
ब्राह्मणानां गतिः केन केन वा मृत्युनाशनम् । ऐहिकामुष्मिक फलं केन वा पद्मलोचन ॥३॥
वक्तुमर्हस्यशेषेण सर्वं निखिलमादितः ।

॥ नारायण उवाच ॥

साधु साधु महाप्राज्ञ! सम्यक् पृष्टं त्वयानघ ॥४॥
श्रृणु वक्ष्यामि! यत्नेन गायत्र्यष्ट सहस्त्रकम् । नाम्नां शुभानां दिव्यानां सर्वपाप विनाशनम् ॥५॥

॥ अथ स्तोत्रम् ॥

अचिन्त्य लक्षणाव्यक्ताप्यर्थ मातृमहेश्वरी । अमृतार्णव मध्यस्थाप्यजिता चापराजिता ॥१॥
अणिमादि गुणाधाराप्यर्कमण्डल संस्थिता । अजराजापराधर्मा अक्षसूत्र धराधरा ॥२॥

अकारादि क्षकारान्ताप्यरि षड्वर्ग भेदिनी । अञ्जनाद्रि प्रतीकाशाप्यञ्जनाद्रि निवासिनी ॥३॥
अदितिश्चाजपाविद्याप्यरविन्द निभेक्षणा । अन्तर्बहिः स्थिताविद्या ध्वंसिनी चान्तरात्मिका ॥४॥
अजा चाजमुखावासाप्यरविन्द निभानना । अर्धमात्रार्थ दानज्ञाप्यरि - मण्डलमर्दिनी ॥५॥
असुरघ्नी ह्यमावास्याप्यलक्ष्मी घ्न्यन्त्यजार्चिता । आदिलक्ष्मीश्चादि शक्तिराकृतिश्चायतानना ॥६॥
आदित्य पदवीचाराप्यादित्य परिसेविता । आचार्याऽऽवर्तनाऽऽचाराप्यादि मूर्ति निवासिनी ॥७॥
आग्नेयी चामरी चाद्या चाराध्या चासनस्थिता । आधार-निलयाऽऽधारा चाकाशान्त निवासिनी ॥८॥
आद्याक्षर समायुक्ता चान्तराकाश रूपिणी । आदित्य मण्डलगता चान्तरध्वान्त नाशिनी ॥९॥
इन्दिरा चेष्टदा चेष्टा चेन्दीवर निभेक्षणा । इरावती चेन्द्रपदा चेन्द्राणी चेन्दुरूपिणी ॥१०॥
इक्षुकोदण्डसंयुक्ता चेषुसन्धानकारिणी । इन्द्रनील समाकारा चेडा पिङ्गलरूपिणी ॥११॥
इन्द्राक्षी चेश्वरी देवी चेहा त्रयविवर्जिता । उमा चोषा ह्युडुनिभा उर्वारुक फलानना ॥१२॥
उडुप्रभा चोडुमती ह्युडुपा ह्युडुमध्यगा । ऊर्ध्वं चाप्यूर्ध्वकेशी चाप्यूर्ध्वाधो गतिभेदिनी ॥१३॥
ऊर्ध्वबाहुप्रिया चोर्मिमाला वाग्ग्रंथदामिनी । ऋतं चर्षिर्ऋतुमती ऋषिदेव नमस्कृता ॥१४॥
ऋग्वेदा ऋणहर्त्री च ऋषिमण्डल चारिणी । ऋद्धिदा ऋजु मार्गस्था ऋजुधर्मा ऋतुप्रदा ॥१५॥
ऋग्वेदनिलया ऋज्वी लुप्तधर्म प्रवर्तिनी । लूतारिव सम्भूता लूतादि विषहारिणी ॥१६॥
एकाक्षरा चैकमात्रा चैका चैकैक निष्ठिता । ऐन्द्री ह्यैरावतारूढा चैहिकामुष्मिकप्रदा ॥१७॥
ओंकारा ह्योषधी चोता चोतप्रोत निवासिनी । और्वा ह्यौषध - सम्पन्ना औपासन फलप्रदा ॥१८॥
अण्डमध्यस्थिता देवी चाःकार मनुरूपिणी । कात्यायनी कालरात्रिः कामाक्षी कामसुन्दरी ॥१९॥
कमला कामिनी कान्ता कामदा कालकण्ठिनी । करिकुम्भस्तनभरा करवीर सुवासिनी ॥२०॥
कल्याणी कुण्डलवती कुरुक्षेत्र - निवासिनी । कुरुविन्द -दलाकारा कुण्डली कुमुदालया ॥२१॥
कालजिह्वा करालास्या कालिका कालरूपिणी । कमनीयगुणा कान्तिः कलाधारा कुमुद्वती ॥२२॥
कौशिकी कमलाकारा कामचार प्रभञ्जिनी । कौमारी करुणापाङ्गी ककुबन्ता करिप्रिया ॥२३॥
केशरी केशवनुता कदम्ब कुसुमप्रिया । कालिन्दी कालिका काञ्ची कलशोद्भव - संस्तुता ॥२४॥
काममाता क्रतुमती कामरूपा कृपावती । कुमारी कुण्डनिलया किराती कीरवाहना ॥२५॥
कैकेयी कोकिलालापा केतकी - कुसुमप्रिया । कमण्डलुधरा काली कर्मनिर्मूलकारिणी ॥२६॥
कलहंसगतिः कक्षा कृतकौतुक मंगला । कस्तूरी तिलका कम्प्रा करीन्द्रगमना कुहूः ॥२७॥
कर्पूर लेपना कृष्णा कपिला कुहराश्रया । कूटस्था कुधरा कम्रा कुक्षिस्थाऽखिल विष्टपा ॥२८॥
खड्ग खेटकरा खर्वा खेचरी खगवाहना । खट्वाङ्गधारिणी ख्याता खगराजोपरिस्थिता ॥२९॥
खलघ्नी खण्डितजरा खण्डाख्यान प्रदायिनी । खण्डेन्दुतिलका गंगा गणेशगुह - पूजिता ॥३०॥
गायत्री गोमती गीता गान्धारी गानलोलुपा । गौतमी गामिनी गाधा गन्धर्वाप्सर सेविता ॥३१॥

गोविन्द - चरणाक्रान्ता गुणत्रय विभाविता । गन्धर्वी गह्वरी गोत्रा गिरीशा गहना गमी ॥३२॥
गुहावासा गुणावती गुरुपाप प्रणाशिनी । गुर्वी गुरुवती गुह्या गोप्तव्या गुणदायिनी ॥३३॥
गिरिजा गुह्यमातङ्गी गरुड़ध्वज - वल्लभा । गर्वापहारिणी गोदा गोकुलस्था गदाधरा ॥३४॥
गोकर्ण निलयासक्ता गुह्यमण्डलवर्तिनी । धर्मदा घनदा घण्टा घोर दानव मर्दिनी ॥३५॥
घृणिमन्त्रमयी घोषा घनसम्पात दायिनी । घण्टारवप्रिया घ्राणा घृणिसन्तुष्ट कारिणी ॥३६॥
घनारि मण्डला घूर्णा घृताची घनवेगिनी । ज्ञानधातुमयी चर्चा चर्चिता चारुहासिनी ॥३७॥
चटुला चण्डिका चित्रा चित्रमाल्यविभूषिता । चतुर्भुजा चारुदन्ता चातुरी चरितप्रदा ॥३८॥
चूलिका चित्रवस्त्रान्ता चन्द्रमः कर्णकुण्डला । चन्द्रहासा चारुदात्री चकोरी चन्द्रहासिनी ॥३९॥
चन्द्रिका चन्द्रधात्री च चौरीचौरा च चण्डिका । चञ्चद्-वाग्वादिनी चन्द्रचूडा चोरविनाशिनी ॥४०॥
चारुचन्दन लिप्ताङ्गी चञ्चच्चामर - वीजिता । चारुमध्या चारुगतिश्चन्दिला चन्द्ररूपिणी ॥४१॥
चारुहोमप्रिया चार्वाचरिता चक्रबाहुका । चन्द्रमण्डलमध्यस्था चन्द्रमण्डलदर्पणा ॥४२॥
चक्रवाकस्तनी चेष्टा चित्रा चारुविलासिनी । चित्स्वरूपा चन्द्रवती चन्द्रमाश्चन्दनप्रिया ॥४३॥
चोदयित्री चिरप्रज्ञा चातका चारुहेतकी । छत्रयाता छत्रधरा छाया छन्दः परिच्छदा ॥४४॥
छायादेवी छिद्रनखा छन्नेन्द्रिय विसर्पिणी । छन्दोऽनुष्टुप् प्रतिष्ठान्ता छिद्रोपद्रवभेदिनी ॥४५॥
छेदा छत्रेश्वरी छिन्ना छुरिका छेदनप्रिया । जननी जन्मरहिता जातवेदा जगन्मयी ॥४६॥
जाह्नवी जटिला जेत्री जरामरणवर्जिता । जम्बूद्वीपवती ज्वाला जयन्ती जलशालिनी ॥४७॥
जितेन्द्रिया जितक्रोधा जितामृता जगत्प्रिया । जातरूपामयी जिह्वा जानकी जगती जरा ॥४८॥
जनित्री जह्नुतनया जगत्त्रयहितैषिणी । ज्वालामुखी जपवती ज्वरघ्नी जितविष्टया ॥४९॥
जिताक्रान्तमयी ज्वाला जाग्रती ज्वरदेवता । ज्वलन्ती जलदा ज्येष्ठा ज्याघोषास्फोट-दिङ्मुखी ॥५०॥
जम्भिनी जृम्भणा जृम्भा ज्वलन्माणिक्य कुण्डला । झिंझिका झणनिर्घोषा झंझा मारुत योगिनी ॥५१॥
झल्लरी वाद्यकुशला अरूपा अभुजा स्मृता । टङ्कबाणसमायुक्ता टङ्किनी टङ्कभेदिनी ॥५२॥
टङ्कोगण कृताघोषा टङ्कनीय महोरसा । टङ्कारकारिणी देवी ठठशब्दनिनादिनी ॥५३॥
डामरी डाकिनी डिम्भा डुण्डुमारैक निर्जिता । डामरीतन्त्र मार्गस्था डमड्डमरुनादिनी ॥५४॥
डिण्डीरवसहा डिम्भल सत्क्रीडा परायणा । ढुण्ढिविघ्नेश जननी ढक्काहस्ता ढिलिव्रजा ॥५५॥
नित्यज्ञाना निरुपमा निर्गुणा नर्मदानदी । त्रिगुणा त्रिपदा तन्त्री तुलसी तरुणातरुः ॥५६॥
त्रिविक्रम पदाक्रान्ता तुरीयपदगामिनी । तरुणादित्य सङ्काशा तामसी तुहिना तुरा ॥५७॥
त्रिकालज्ञान सम्पन्ना त्रिवेणी च त्रिलोचना । त्रिशक्तिस्त्रिपुरा तुङ्गा तुरङ्गवदना तथा ॥५८॥
तिमिङ्गिलगिला तीव्रा त्रिस्त्रोता तामसादिनी । तन्त्रमन्त्रविशेषज्ञा तनुमध्या त्रिविष्टपा ॥५९॥
त्रिसन्ध्या त्रिस्तनी तोषासंस्था तालप्रतापिनी । ताटङ्किनी तुषाराभा तुहिनाचल वासिनी ॥६०॥

तन्तुजालसमायुक्ता तारहारावलिप्रिया । तिलहोमप्रिया तीर्था तमालकुसुमाकृतिः ॥६१॥
तारका त्रियुता तन्वी त्रिशंकुपरिवारिता । तलोदरी तिलाभूषा ताटङ्कप्रिय वाहिनी ॥६२॥
त्रिजटा तित्तिरी तृष्णा त्रिविधा तरुणाकृतिः । तप्तकांचनसङ्काशा तप्तकांचनभूषणा ॥६३॥
त्रैयम्बका त्रिवर्गा च त्रिकालज्ञानदायिनी । तर्पणा तृप्तिदा तृप्ता तामसी तुम्बुरु स्तुता ॥६४॥
तार्क्ष्यस्था त्रिगुणाकारा त्रिभङ्गी तनुवल्लरिः । थात्कारी थारवा थान्ता दोहिनी दीनवत्सला ॥६५॥
दानवान्तकरी दुर्गा दुर्गासुर - निबर्हिणी । देवरीतिर्दिवा रात्रिर्द्रौपदी दुन्दुभिस्वना ॥६६॥
देवयानी दुरावासा दारिद्र्योद्भेदिनी दिवा । दामोदरप्रिया दीप्ता दिग्वासा दिगविमोहिनी ॥६७॥
दण्डकारण्य निलया दण्डिनी देवपूजिता । देववन्द्या दिविषदा द्वेषिणी दानवाकृतिः ॥६८॥
दीनानाथस्तुता दीक्षा दैवतादिस्वरूपिणी । धात्री धनुर्धरा धेनुर्धारिणी धर्मचारिणी ॥६९॥
धुरन्धरा धराधारा धनदा धान्यदोहिनी । धर्मशीला धनाध्यक्षा धनुर्वेद विशारदा ॥७०॥
धृतिर्धन्या धृतपदा धर्मराजप्रिया ध्रुवा । धूमावती धूमकेशी धर्मशास्त्रप्रकाशिनी ॥७१॥
नन्दा नन्दप्रिया निद्रा नृनुता नन्दनात्मिका । नर्मदा नलिनी नीला नीलकण्ठसमाश्रया ॥७२॥
नारायणप्रिया नित्या निर्मला निर्गुणा निधिः । निराधारा निरुपमा नित्यशुद्धा निरञ्जना ॥७३॥
नादविन्दु कलातीता नादविन्दुकलात्मिका । नृसिंहिनी नगधरा नृपनागविभूषिता ॥७४॥
नरकक्लेश शमिनी नारायणपदोद्भवा । निरवद्या निराकारा नारदप्रियकारिणी ॥७५॥
नानाज्योतिः समाख्याता निधिदा निर्मलात्मिका । नवसूत्रधरा नीतिर्निरुपद्रव कारिणी ॥७६॥
नन्दजा नवरत्नाढ्या नैमिषारण्यवासिनी । नवनीतप्रिया नारी नीलजीमूतनिःस्वना ॥७७॥
निमेषिणी नदीरूपा नीलग्रीवा निशीश्वरी । नामावलिर्निशुम्भघ्नी नागलोकनिवासिनी ॥७८॥
नवजाम्बूनदप्रख्या नागलोकाधिदेवता । नूपुराक्रान्त - चरणा नरचित्त प्रमोदिनी ॥७९॥
निमग्नारक्तनयना निर्घातसम-निस्वना । नन्दनोद्यान निलया निर्व्यूहोपरिचारिणी ॥८०॥
पार्वती परमोदारा परब्रह्मात्मिका परा । पञ्चकोश विनिर्मुक्ता पञ्चपातक नाशिनी ॥८१॥
परचित्तविधानज्ञा पञ्चिका पञ्चरूपिणी । पूर्णिमा परमा प्रीतिः परतेजः - प्रकाशिनी ॥८२॥
पुराणी पौरुषी पुण्या पुण्डरीक - निभेक्षणा । पातालतल - निर्मग्ना प्रीता प्रीतिविवर्धिनी ॥८३॥
पावनी पादसहिता पेशला पवनाशिनी । प्रजापतिः परिश्रान्ता पर्वतस्तनमण्डला ॥८४॥
पद्मप्रिया पद्मसंस्था पद्माक्षी पद्मसम्भवा । पद्मपत्रा पद्मपदा पद्मिनी प्रियभाषिणी ॥८५॥
पशुपाश - विनिर्मुक्ता पुरन्ध्री पुरवासिनी । पुष्कला पुरुषा पर्वा पारिजातसुमप्रिया ॥८६॥
पवित्रा पवित्राङ्गी पुष्पहास - परायणा । प्रज्ञावतीसुता पौत्री पुत्रपूज्या पयस्विनी ॥८७॥
पट्टिपाशधरा पंक्तिः पितृलोक - प्रदायिनी । पुराणी पुण्यशीला च प्रणतार्ति विनाशिनी ॥८८॥
प्रद्युम्न जननी पुष्टा पितामह परिग्रहा । पुण्डरीक - पुरावासा पुण्डरीक - समानना ॥८९॥
पृथुजङ्घा पृथुभुजा पृथुपादा पृथूदरी । प्रवालशोभा पिङ्गाक्षी पीतवासाः प्रचापला ॥९०॥

प्रसवा पुष्टिदा पुण्या प्रतिष्ठा प्रणवागतिः । पञ्चवर्णा पञ्चवाणी पञ्चिका पञ्जरस्थिता ॥९१॥
परमाया परज्योतिः परप्रीतिः परागतिः । पराकाष्ठा परेशानी पाविनी पावकद्युतिः ॥९२॥
पुण्यभद्रा परिच्छेद्या पुष्पहासा पृथूदरी । पीताङ्गी पीतवसना पीतशय्या पिशाचिनी ॥९३॥
प्रीतक्रिया पिशाचघ्नी पाटलाक्षी पटुक्रिया । पञ्चभक्ष - प्रियाचारा पूतना - प्राणघातिनी ॥९४॥
पुन्नागवन - मध्यस्था पुण्यतीर्थनिषेविता । पञ्चाङ्गी च पराशक्तिः परमाह्लादकारिणी ॥९५॥
पुष्पकाण्डस्थिता पूषा पोषिताखिल विष्टपा । पानप्रिया पञ्चशिखा पन्नगोपरि शायिनी ॥९६॥
पञ्चमात्रात्मिका पृथ्वी पथिका पृथुदोहिनी । पुराणन्यायमीमांसा पाटली पुष्पगंधिनी ॥९७॥
पुण्यप्रजा पारदात्री परमार्गैक गोचरा । प्रवालशोभा पूर्णाशा प्रणवा पल्लवोदरी ॥९८॥
फलिनी फलदा फल्गुः फूत्कारी फलकाकृतिः । फणीन्द्रभोगशयना फणिमण्डलमण्डिता ॥९९॥
बालबाला बहुमता बालातप निभांशुका । बलभद्रप्रिया वन्द्या वडवा बुद्धिसंस्तुता ॥१००॥
बन्दीदेवी बिलवती बडिशघ्नी बलिप्रिया । बान्धवी बोधिता बुद्धिर्बन्धूक कुसुमप्रिया ॥१०१॥
बालभानु प्रभाकारा ब्राह्मी ब्राह्मण देवता । बृहस्पतिस्तुता वृन्दा वृन्दावन विहारिणी ॥१०२॥
बालाकिनी बिलाहारा बिलवासा बहूदका । बहुनेत्रा बहुपदा बहुकर्णावतंसिका ॥१०३॥
बहुबाहुयुता बीजरूपिणी बहुरूपिणी । बिन्दुनाद कलातीता बिन्दुनादस्वरूपिणी ॥१०४॥
बद्धगोधांगुलि त्राणा बदर्याश्रमवासिनी । बृन्दारका बृहत्स्कंधा बृहती बाणपातिनी ॥१०५॥
बृन्दाध्यक्षा बहुनुता बनिता बहुविक्रमा । बद्धपद्मासनासीना बिल्वपत्र तलस्थिता ॥१०६॥
बोधिद्रुम निजावासा बडिस्था बिन्दुदर्पणा । बाला बाणासनवती बडवानल वेगिनी ॥१०७॥
ब्रह्माण्ड बहिरन्तःस्था ब्रह्मकङ्कणसूत्रिणी । भवानी भीषणवती भाविनी भयहारिणी ॥१०८॥
भद्रकाली भुजङ्गाक्षी भारती भारताशया । भैरवी भीषणाकारा भूतिदा भूतिमालिनी ॥१०९॥
भामिनी भोगनिरता भद्रदा भूरिविक्रमा । भूतवासा भृगुलता भार्गवी भूसुरार्चिता ॥११०॥
भागीरथी भोगवती भवनस्था भिषग्वरा । भाविनी भोगिनी भाषा भवानी भूरिदक्षिणा ॥१११॥
भर्गात्मिका भीमवती - भवबन्ध विमोचिनी । भजनीया भूतधात्री रञ्जिता भुवनेश्वरी ॥११२॥
भुजङ्गवलया भीमा भेरुण्डा भागधेयिनी । माता माया मधुमती मधुजिह्वा मधुप्रिया ॥११३॥
महादेवी महाभागा मालिनी मीनलोचना । मायातीता मधुमती मधुमांसा मधुद्रवा ॥११४॥
मानवी मधुसम्भूता मिथिलापुर - वासिनी । मधुकैटभसंहर्त्री मेदिनी मेघमालिनी ॥११५॥
मन्दोदरी महामाया मैथिली मसृणप्रिया । महालक्ष्मीर्महाकाली महाकन्या महेश्वरी ॥११६॥
माहेन्द्री मेरुतनया मन्दारकुसुमार्चिता । मञ्जु-मञ्जीर-चरणा मोक्षदा मञ्जुभाषिणी ॥११७॥
मधुरद्राविणी मुद्रा मलया मलयान्विता । मेधा मरकतश्यामा मागधी मेनकात्मजा ॥११८॥
महामारी महावीरा महाश्यामा मनुस्तुता । मातृका मिहिराभासा मुकुन्दपदविक्रमा ॥११९॥

मूलाधार स्थिता मुग्धा मणिपूरकवासिनी । मृगाक्षी महिषारूढ़ा महिषासुरमर्दिनी ॥१२०॥
योगासना योगगम्या योगा यौवनकाश्रया । यौवनी युद्धमध्यस्था यमुना युगधारिणी ॥१२१॥
यक्षिणी योगयुक्ता च यक्षराजप्रसूतिनी । यात्रा यानविधानज्ञा यदुवंशसमुद्भवा ॥१२२॥
यकारादि हकारान्ता याजुषी यज्ञरूपिणी । यामिनी योगनिरता यातुधान भयङ्करी ॥१२३॥
रुक्मिणी रमणी रामा रेवती रेणुका रतिः । रौद्री रौद्रप्रियाकारा राममाता रतिप्रिया ॥१२४॥
रोहिणी राज्यदा रेवा रमा राजीवलोचना । राकेशी रूपसम्पन्ना रत्नसिंहासनस्थिता ॥१२५॥
रक्तमाल्याम्बरधरा रक्तगन्धानुलेपना । राजहंस समारूढ़ा रम्भा रक्तबलिप्रिया ॥१२६॥
रमणीय युगाधारा राजिताखिल भूतला । रुरुचर्म परीधाना रथिनी रत्नमालिका ॥१२७॥
रोगेशी रोगशमनी राविणी रोमहर्षिणी । रामचन्द्र पदाक्रान्ता रावणच्छेदकारिणी ॥१२८॥
रत्नवस्त्रपरिच्छन्ना रथस्था रुक्मभूषणा । लज्जाधिदेवता लोला ललिता लिङ्गधारिणी ॥१२९॥
लक्ष्मीर्लोला लुप्तविषा लोकिनी लोकविश्रुता । लज्जालम्बोदरी देवी ललना लोकधारिणी ॥१३०॥
वरदा वन्दिता विद्या वैष्णवी विमलाकृतिः । वाराही विरजा वर्षा वरलक्ष्मीविलासिनी ॥१३१॥
विनता व्योममध्यस्था वारिजासन-संस्थिता । वारुणी वेणु सम्भूता वीतिहोत्रा विरूपिणी ॥१३२॥
वायुमण्डल मध्यस्था विष्णुरूपा विधिप्रिया । विष्णुपत्नी विष्णुमती विशालाक्षी वसुन्धरा ॥१३३॥
वामदेवप्रिया वेला वज्रिणी वसुदोहिनी । वेदाक्षर - परीताङ्गी वाजपेयफलप्रदा ॥१३४॥
वासवी वामजननी वैकुण्ठ - निलया वरा । व्यासप्रिया वर्मधरा वाल्मीकि परिसेविता ॥१३५॥
शाकम्भरी शिवा शान्ता शारदा शरणागतिः । शातोदरी शुभाचारा शुम्भासुर - विमर्दिनी ॥१३६॥
शोभावती शिवाकारा शङ्करार्द्धशरीरिणी । शोणा शुभाशया शुभ्रा शिरःसंधान कारिणी ॥१३७॥
शरावती शरानन्दा शरज्ज्योत्स्ना शुभानना । शरभा शूलिनी शुद्धा शबरी शुक्रवाहना ॥१३८॥
श्रीमती श्रीधरानन्दा श्रवणानन्ददायिनी । शर्वाणी शर्वरीवन्द्या षड्भाषा षड्ऋतुप्रिया ॥१३९॥
षडाधारस्थिता देवी षण्मुखप्रियकारिणी । षडङ्गरूप सुमति सुरासुर नमस्कृता ॥१४०॥
सरस्वती सदाधारा सर्वमङ्गलकारिणी । समागानप्रिया सूक्ष्मा सावित्री सामसम्भवा ॥१४१॥
सर्वावासा सदानन्दा सुस्तनी सागराम्बरा । सर्वैश्वर्यप्रिया सिद्धिः साधुबन्धु - पराक्रमा ॥१४२॥
सप्तर्षि मण्डलगता सोममण्डलवासिनी । सर्वज्ञा सान्द्रकरुणा समानाधिक वर्जिता ॥१४३॥
सर्वोत्तुङ्गा सङ्गहीना सद्गुणा सकलेष्टदा । सरघा सूर्यतनया सुकेशी सोमसंहतिः ॥१४४॥
हिरण्यवर्णा हरिणी ह्रींकारी हंसवाहिनी । क्षौमवस्त्रपरीताङ्गी क्षीराब्धितनया क्षमा ॥१४५॥
गायत्री चैव सावित्री पार्वती च सरस्वती । वेदगर्भा वरारोहा श्रीगायत्री पराऽम्बिका ॥१४६॥

॥फलश्रुति॥

इति साहस्त्रकम् नाम्ना गायत्र्याश्चैव नारद! पुण्यदं सर्वपापघ्नं महासम्पत्तिदायकम् ॥१॥
एवं नामानि गायत्र्यास्तोषोत्पत्ति कराणि हि। अष्टम्यां च विशेषेण पठितव्यं द्विजैः सह ॥२॥
जपं कृत्वा होमपूजा ध्यानं कृत्वा विशेषतः। यस्मै कस्मै न दातव्यं गायत्र्यास्तु विशेषतः ॥३॥
सुभक्ताय सुशिष्याय वक्तव्यं भूसुराय वै। भ्रष्टेभ्यः साधकेभ्यश्च बान्धवेभ्यो न दर्शयेत् ॥४॥
यद्गृहे लिखितं शास्त्रं भयं तस्य न कस्यचित्। चञ्चलाऽपि स्थिरा भूत्वा कमला तत्र तिष्ठति ॥५॥
इदं रहस्यं परम गुह्याद् गुह्यतरं महत्। पुण्यप्रदं मनुष्याणां दरिद्राणां निधिप्रदम् ॥६॥
मोक्षप्रदं मुमुक्षूणां कामिनां सर्वकामदम्। रोगाद् वै मुच्यते रोगी बद्धो मुच्येत् बन्धनात् ॥७॥
ब्रह्महत्या सुरापानं सुवर्णस्तेयिनो नराः। गुरुतल्पगतो वापि पातकान्मुच्यते सकृत् ॥८॥
असत्प्रतिग्रहाच्चैवाभक्ष्यभक्षाद् विशेषतः। पाखण्डानृत मुख्येभ्यः पठनादेव मुच्यते ॥९॥
इदं रहस्यममलं मयोक्तं पद्मजोद्भव! ब्रह्मसायुज्यदं नृणां सत्यं सत्यं न संशयः ॥१०॥

॥ इति श्रीगायत्री अष्टोत्तरसहस्रनाम स्तोत्रम् सम्पूर्णम् ॥

॥ इति गायत्री तंत्रम्॥

॥ श्री चक्रपूजार्चने पात्रा–सादनादि प्रयोगः॥

॥ सुधाकुम्भ स्थापनम्॥

तान्त्रिक यन्त्रार्चन आवरण पूजा से पहले सुधा मांसादि द्रव्यों का शोधन करना जरुरी है। अतः प्रथम सुधा कुंभ का पूजन स्थापन कर सुधा (प्रथम तत्व) का शोधन करें।

अपने वामभाग में त्रिकोण, षट्कोण, वृत्त, चतुरस्र मण्डल बनाकर शङ्खमुद्रा दिखायें। इष्ट मन्त्र के तीन विभाग करें उनको कूट कहते हैं।

जैसे बटुक मंत्र में- **१. ह्रीं बटुकाय २. आपदुद्धारणाय ३. कुरु कुरु बटुकाय ह्रीं।**

त्रिकोण के तीनों कोणों में त्रिपुर सुन्दरी के तीनों कूटों से पूजन करें। त्रिकोण में माया बीज **'ह्रीं'** से पूजन करें।

षट्कोण में अधोमुख एवं उर्ध्वमुख दो त्रिकोण बनते हैं। इनमें मन्त्र के त्रिकूटों से प्रथम बार दक्षिणावर्त से एवं द्वितीय आवृत्ति वामावर्त से करने पर षट्कोणों का पूजन होता है। **पुनः अग्निकोणे हृदयशक्तिं पूजयामि। ईशान्ये शिरः शक्तिं पूजयामि। वायव्ये शिखाशक्तिं पूजयामि। नैऋत्ये कवचशक्तिं पूजयामि। त्रिकोणमध्ये नेत्रशक्तिं पूजयामि। द्वारे अस्त्रशक्तिं पूजयामि।** इस प्रकार षट्कोण का पूजन कर वृत्त की **'अं आं इं ईं.........हं लं क्षं'** इत्यादि मातृकावर्णों से पूजन करें।

चतुरस्र के चारों द्वारों में पूजन करें - पूर्वे - **ओड्यान पीठाय नमः**। दक्षिणे -**जालंधर पीठाय नमः**। पश्चिमे - **पूर्णगिरि पीठाय नमः**। उत्तरे - **कामरूप पीठाय नमः।**

इस प्रकार मण्डल की पूजा करें। **'ॐ ह्रीं आधारशक्त्यै नमः'** से आधार पात्र का प्रक्षालन कर मण्डल पर रख कर पूजन करें। एवं अग्नि की दश कलाओं का पूजन उस पर करें।

ॐ अर्थप्रद दशकलात्मने वह्निमण्डलाय नमः। वह्निकलां पूजयेत् - **यं धूम्रार्चिषे नमः, रं उष्मायै नमः, लं ज्वलिन्यै नमः, वं ज्वालिन्यै नमः, शं विस्फुलिंगिन्यै नमः, षं सुश्रियै नमः, सं सुरूपायै नमः, हं कपिलायै नमः, लं हव्यवाहायै नमः, क्षं कव्यवाहायै नमः।**

तदनन्तर कलश को **'फट्'** मंत्र से धोकर, **'नमः'** से आधार पर स्थापित करें। कलश पात्र में सूर्य की कलाओं का पूजन करें।

ॐ धर्मप्रद द्वादशकलाय अर्कमण्डलकलात्मने नमः, ॐ कं भं तपिन्यै नमः, ॐ खं बं तापिन्यै नमः, गं फं धूम्रायै नमः, घं पं मरीच्यै नमः, डं नं ज्वालिन्यै नमः, चं घं रुच्यै नमः, छं दं सुषुम्नायै नमः, जं थं भोगदायै नमः, झं तं विश्वायै नमः, ञं णं बोधिन्यै नमः, टं ढं धारिण्यै नमः, ठं डं क्षमायै नमः।

कारण अर्थात् सुधा पात्र अलग हो तो उसका भी उपरोक्त विधि से मण्डल बनायें, आधारपात्र स्थापन करें, कलश पूजन करें, उसके बाद सुधा के संस्कार कर फिर **'अं आं.........लं क्षं'** मातृका वर्ण बोलते हुये पात्र में सुधा ड़ालें। अथवा इसी पात्र में सुधा के संस्कार करें।

यथा - **ॐ कामप्रद षोडशकलात्मने सोममण्डलाय नमः। चन्द्रमा की कलाओं का पूजन करें-**

ॐ अं अमृतायै नमः। आं मानदायै नमः। इं पूषायै नमः। ईं तुष्ट्यै नमः। उं पुष्ट्यै नमः। ऊं रत्यै नमः। ऋं धृत्यै नमः। ॠं शशिन्यै नमः। लृं चन्द्रिकायै नमः। ॡं कान्त्यै नमः। एं ज्योत्स्नायै नमः। ऐं श्रियै नमः। ओं प्रीत्यै नमः, औं अङ्गदायै नमः। अं पूर्णायै नमः। अः पूर्णामृतायै नमः। इसके बाद सुधा के संस्कार करें।

(१) '**ॐ वौषट्**' मन्त्र पढकर देखें (२) ''**फट्**'' मन्त्र से रक्षा करें (३) '**हुँ**' से अवगुण करें(४)'**वषट्**' से शुद्ध करें (५) '**स्वाहा**' से पूजन करें।

सुधा गायत्री का दश बार जप करें।

ॐ सुधा देव्यै च विद्महे कामेश्वर्यै च धीमहि। तन्नो रक्ताक्षिः प्रचोदयात्॥

॥ सुधायाः शापविमोचनम् ॥

एवमेव परंब्रह्म स्थूल सूक्ष्ममयं ध्रुवम्। कवचोद्भवां ब्रह्महत्यां तेन ते नाशयाम्यहम्॥
सूर्यमण्डल संभूते वरुणालयसंभवे। आस्यबीजमये देवि शुक्रशापाद्विमुच्यताम्॥
वेदानां प्रणवोबीजं ब्रह्मानन्दमयं यदि। तेन सत्येन मे देवि ब्रह्महत्या व्यपोहतु॥

पात्र को आच्छादित करके उपरोक्त मन्त्रों को पढ़ें -

ॐ सां सीं सूं सैं सौं सः शुक्रशाप विमोचिकायै सुरादेव्यै नमः। इति द्वादशा जपेत्॥१॥ **ॐ व्रां व्रीं व्रूं व्रैं व्रौं व्रः ब्रह्मशाप विमोचिकायै सुरादेव्यै नमः।** इति दशधा जपेत्॥२॥ **ॐ ह्रीं श्रीं क्रां क्रीं क्रूं क्रैं क्रौं क्रः सुधाकृष्णशापं विमोचय विमोचय श्रावय श्रावय स्वाहा।** इति दशधा जपेत्॥३॥ **ॐ रां रीं रुं रैं रौं रः रुद्रशापविमोचिकायै सुरादैव्यै नमः।** इति दशधा जपेत्॥४॥ **ॐ ह्रीं क्रीं परमस्वामिनी परमाकाश शून्यवाहिनी चन्द्रसूर्याग्नि भक्षिणि त्वं पात्रं विश विश स्वाहा।** इति घटोपरि दशधा जपेत्॥५॥ **ॐ ऐं ह्रीं श्रीं महेश्वराय विद्महे सुधादेव्यै च धीमहि। तन्नोऽर्द्धनारीश्वरः प्रचोदयात्।** इति दशधा जपेत्॥६॥

इसके बाद पात्र पर दश दोष निवारण हेतु ''अक्षत्'' फेंके।

दोष निवारण हेतु चाण्डालिनियों के बीजाक्षरों में अलग-अलग तंत्रों में मतभेद है। कहीं ''**ॐ ह्रीं श्रीं हसखफ्रें**'' है तो कहीं ''**ॐ ऐं ह्रीं श्रीं ह त् क्ष् ल् व् फ्रें** '' इत्यादि बीज मन्त्र है। कहीं तपनीय वध चाण्डालिनी की जगह बुध चाण्डालिनी है, निर्दय चाण्डालिनी की जगह निर्दोष चाण्डालिनी का प्रयोग है तो सर्वजन दृष्टि दोष निवारण हेतु - **पशुपाश चाण्डालिनी** का उल्लेख है। (तन्त्रों में अज्ञानी व निंदक को पशु संज्ञा दी गई है)

ॐ ऐं ह्रीं श्रीं पथिक देवताभ्यो हुं फट् स्वाहा ॥१॥ ॐ ऐं ह्रीं श्रीं फ्रें यं रं लं आं आस्फालिनी ग्रामचाण्डालिनी हुं फट् स्वाहा॥२॥ ॐ ऐं ह्रीं श्रीं ह्रौं ह्रां संगम स्पर्श चाण्डालिनी हुं फट् स्वाहा ॥३॥ ॐ ऐं ह्रीं श्रीं फ्रें घं ङं लं क्षं दृष्टिचाण्डालिनी हुं फट् स्वाहा ॥४॥ ॐ ऐं ह्रीं श्रीं ग्लौं ग्लां क्रोधचाण्डालिनी हुं फट् स्वाहा ॥५॥ ॐ ऐं ह्रीं श्रीं अं सृष्टिचाण्डालिनी हुं फट् स्वाहा ॥६॥ ॐ ऐं ह्रीं श्रीं आं क्रों घटचाण्डालिनी हुं फट् स्वाहा ॥७॥ ॐ ऐं ह्रीं श्रीं चं छं तपनीयवधचाण्डालिनी हुं फट् स्वाहा ॥८॥ ॐ ऐं ह्रीं श्रीं क्षं आं क्रों क्लीं निर्दयचाण्डालिनी हुं फट् स्वाहा ॥९॥ ॐ ऐं ह्रीं श्रीं स्त्रूं छं स्त्रौं खेदय खेदय सर्वजन दृष्टिस्पर्श दोषाय हुँ फट् स्वाहा ॥१०॥ ॐ हंसः शुचिषद्व- सुरंतरिक्षसद्धौता वेदिपदतिथिर्दुरोणसत्। नृषद्वरसदृत-सद्व्योम सदब्जागोजा-ऋतजा अद्रिजा ऋतंबृहत् ॥११॥

इस मन्त्र को ३ बार द्रव्य पर पढ़ें। गंध पुष्पाक्षत छोड़ें तथा दोष रहित इस सुधाद्रव्य के मध्य में **आनन्दभैरव व आनन्दभैरवी** का ध्यान करें।

ॐ सूर्यकोटिप्रतीकाशं चन्द्रकोटिसुशीतलम् । अष्टादशभुजं देवं पञ्चवक्त्रं त्रिलोचनम् ॥१ ॥
अमृतार्णवमध्यस्थं ब्रह्मपद्मोपरिस्थितम् । वृषारूढं नीलकण्ठं सर्वाभरणभूषितम् ॥२ ॥
कपालखट्वाङ्गधरं घण्टाडमरुवादिनम् । पाशाङ्कुशधरं देवं गदामुशलधारिणम् ॥३ ॥
खडगखेटक पट्टीशं मुद्गरं शूलदण्डधृक् । विचित्र खेटकं मुण्डं वरदाभयधारिणम् ॥४ ॥
लोहितं देवदेवेशं भावयेत् साधकोत्तमः ॥५ ॥

आनन्दभैरव का तीन बार पूजन करें – **ॐ ऐं ह्रीं श्रीं वं ह स क्ष म ल व र यूं आनन्दभैरवाय वौषट्। इति मन्त्रेण संपूज्य॥**

तदनन्तर आनन्दभैरवी का ध्यान करें। यथा –

भावयेच्च सुधां देवीं चन्द्रकोटियुतप्रभाम् । हेमकुंदेंदुधवलां पञ्चवक्त्रां त्रिलोचनाम् ॥१ ॥
अष्टदशभुजैर्युक्तां सर्वानन्दकरोद्यताम् । प्रहसंतीं विशालाक्षीं देवदेवस्य सम्मुखीम् ॥२ ॥

इतिध्यात्वा। **ॐ ऐं ह्रीं श्रीं हसक्षमलवरयीं आनन्दभैरवीं सुधादेव्यै वौषट्।** इत्यानन्दभैरवीं संपूजयेत्॥

ततः स्थालीमध्ये किंचिद्द्रव्यंगृहीत्वाद्रव्य मध्ये शक्तिचक्रं विलिख्य तदभावे त्रिकोणदक्षावर्तेन विलिख्य। उर्ध्वरेखायाम् अं आं.......अं अः। दक्षिणरेखायाम् – **कं खं......णं तं।** उत्तररेखायाम् – **थं दं......सं हं।** दक्षिणपार्श्वे – **ॐ लं नमः।** वामपार्श्वे – **ॐ क्षं नमः।** त्रिकोणमध्ये – **ईं (कामकलां) विलिख्य।**

इसके बाद उन दोनों का संयोगीवस्था का ध्यान करें और यह समझें कि उनके दिव्य स्राव से यह द्रव्य अमृतमय हो गया है।

ॐ ऐं ह्रीं श्रीं प्लूं स्त्रौं जूं सः अमृते अमृतोद्भव अमृतवर्षिणि अमृतं स्रावय स्रावय स्वाहा शुक्रादिशापात् सुरां मोचय मोचय मोचिकायै नमः।

ॐ मधुवाता ऋतायते मधुक्षरिन्ति सिन्धवः। इत्यादि तीन ऋचाओं से पूजन करें। गङ्गादि तीर्थों का आवाहन करें।

ॐ ह्रीं ॐ जूं सः का २२ बार जप करें। ८ बार मूल मन्त्र का जप करें। सुधामन्त्र से अभिमन्त्रित करें यथा –

पावमानः परानन्द पावमानः परो रसः । पावमानं परं ज्ञानं तेन ते पावयाम्यहम् ॥

पश्चात् धेनुमुद्रा से अमृतीकरण करें, मत्स्यमुद्रा से आच्छादन करें। कवच मन्त्र **'हुँ'** से अवगुंठन, अस्त्र से रक्षा, च्छटिका मुद्राभिदर्श, दिग्बंधनं कृत्वा।

कलश का ध्यान करें –

देवदानव संवादे मथ्यमाने महोदधौ। उत्पन्नोऽसि महाकुंभ विष्णुनाविधृतः करे॥१ ॥ त्वत्तोये सर्वदेवाः स्युः सर्वेवेदाः समाश्रिताः। त्वयि तिष्ठन्ति भूतानि त्वयिप्राणाः प्रतिष्ठिताः ॥२ ॥ शिवस्त्वं च घटोऽसि त्वं विष्णुस्त्वं च प्रजापतिः। आदित्याद्या ग्रहाःसर्वे विश्वेदवाः सपैतृकाः ॥३ ॥ त्वयि तिष्ठंति कलशे यतः कामफलप्रदाः। त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भवे ॥४ ॥ त्वदावलोकनमात्रेण भुक्तिमुक्तिफलं महत्। सान्निध्यं कुरु भो कुंभ प्रसन्नो भव सर्वदा ॥५ ॥

इसके बाद ''**घटसूक्त**'' का पाठ कर प्रार्थना करें –

समुद्रे मथ्यमाने तु क्षीरोदे सागरोत्तमे । तत्रोत्पन्नां सुरां ध्यायेत् कन्यकारूपधारिणीम् ॥१ ॥

अष्टादशभुजां देवीं रक्तान्तायत-लोचनाम् । आपीनवर्णां स्वर्गाभां बहुरूपां परां सुराम् ॥२॥
सा सर्वे संस्तुताः सर्व देवानामभयंकरि । या सुरा सा रमादेवी यो गंधः स जर्नादनः ॥३॥
यो वर्णः स भवेद् ब्रह्मा यो मदः स महेश्वरः । स्वादे तु संस्थितः सोमः शब्दसंस्थो हुतासनः ॥४॥
इच्छायां मन्मथो देवः पाताले तु च भैरवः । घटो ब्रह्माः रसोविष्णुर्विद्रवो रुद्र एव च ॥५॥
हुंकारः ईश्वरो प्रोक्तो व्योमादेस्तु सदाशिवः । घटमूले स्थितो ब्रह्मा घटमध्ये तु माधवः ॥६॥
घटकण्ठे नीलकण्ठो घटाग्रे सर्वदेवताः । लध्वी हि वारुणी देवी महामांसचरुप्रिया ॥७॥
सर्वविद्या तु या देवी सुरो देवि नमोऽस्तुते । अनेन घट सूक्तेन द्रव्यशुद्धि प्रजायतेः ॥८॥

इसके बाद कलश की प्राणप्रतिष्ठा करें। हाथ से कलश को आच्छादित करें। **ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं सः सोहं श्रीमद्त्रिपुरसुन्दर्यास्याधार सहितस्य कलशेऽस्मिन् अग्निसूर्यसोमकलानां प्राणा इह प्राणाः।**

ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं सः सोहं श्री बटुकभैरव कलशेऽस्मिन् जीव इह स्थितः।

ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं सः सोहं श्री बटुकभैरव कलशेऽस्मिन् सर्वेन्द्रियाणिवाङ्मनस्त्वक्-चक्षुर्जिह्वा- श्रोत्र- घ्राण - प्राणा इहागत्य सुखं चिरं तिष्ठंतु स्वाहा॥ इति प्राण प्रतिष्ठा॥ गंधादिभिः कलशं संपूजयेत्।

कलश में पाँच रत्नों की पूजा करें - (पूर्वे) **ग्लूं गगन रत्नाय नमः।** (दक्षिणे) **स्लूं स्वर्ग रत्नाय नमः** (पश्चिमे) **प्लूं पाताल रत्नाय नमः।** (उत्तरे) **म्लूं मर्त्यरत्नाय नमः।** (मध्ये) **न्लूं नागरत्नाय नमः।**

कलश बलिः- रक्तचन्दन सिन्दूर कुंकुम से कलश के पास त्रिकोण वृत्त चतुरस्त्र मंडल बनाये। '' **सर्वपथिक देवेभ्यो नमः** '' से गंधार्चन करे। मत्स्य मुद्रा से बलि रखें। बांये हाथ से ३ बार कलश पर घुमावे एवं बलि को बाहर विर्सजित करे।

॥ शुद्धि स्थापन विधिः (द्वितीय तत्त्वं मासं)॥

कुम्भस्य वामतः शुद्धिं संस्थाप्य। अग्नि मण्डलाय नमः। ॐ धर्मप्रद द्वादश कलात्मने शुद्धिपात्राय नमः। कामप्रद षोडश सोमकलात्मने नमः। धेनुमुद्रा दिखावें।

ॐ उद्बुध्यस्व पशो त्वं हि न पशुस्त्वं शिवोऽसि भोः। शिवोकृत्यमिदं पिण्डंयतस्त्वं शिवतां व्रज॥

ॐ पशु पाशाय विद्महे शिरश्छेदाय धीमहि। तन्नो छागः (मांस) प्रचोदयात्॥ यह पशु गायत्री मंत्र तीन बार कहें।

॥ अथ पात्रासादन प्रयोगः॥

शङ्खस्थापनम् :- कुंभ के समीप त्रिकोण वृत्त चतुरस्त्र मण्डल बनाकर **ॐ आधारशक्तये नमः** से पूजन करें। इस पर त्रिपदी स्थापन करें। **ॐ धर्मप्रद दशकलात्मने वह्निमण्ड़लाय नमः** से उसका पूजन करें। शङ्ख का प्रक्षालन करके उस पर रखें एवं **ॐ अर्थप्रद द्वादशकलात्मने सूर्यमण्ड़लाय नमः** से पूजन करें।

तीर्थमण्ड़लों का आवाहन कर शुद्धजल से पूरण कर जल में **ॐ कामप्रद षोड़शकलात्मने सोममण्डलाय नमः** से पूजन करें।

शङ्ख का पूजन करें -

शङ्खादौ चन्द्रदैवत्यं कुक्षौ वरुणदेवता। पृष्ठे प्रजापतिश्चैवमग्रे गङ्गा सरस्वती ॥
त्रैलोक्ये यानि तीर्थानि वासुदेवस्यचाज्ञया। शङ्खे तिष्ठति विप्रेन्द्र तस्माच्छंखं प्रपूजयेत् ॥

प्रार्थना करें-

त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे। निर्मितः सर्वदेवैश्च पाञ्चजन्य नमोऽस्तु ते ॥

ॐ पाञ्चजन्याय विद्महे पावमानाय धीमहि। तन्न शङ्खः प्रचोदयात् ॥

घण्टास्थापनम् – देव दक्षिणतः घण्टां संस्थाप्यः, नादं कृत्वा, पूजयेत – ॐ भूर्भुवः स्वः गरुडाय नमः। ॐ जगद्ध्वने मन्त्रमातः स्वाहा। गरुड मुद्रा दिखावें।

दीपस्थापनम् – देवस्य दक्षिणभागे घृतदीपं वामे तैलदीपं स्थापयेत्। सुदर्शन मन्त्र से घृतदीप का पूजन करें। ॐ रां रीं रूं रैं रौं रः सुदर्शनायास्त्राय फट् स्वाहा। तेलदीप की '' ॐ श्लीं पशु हुं फट् स्वाहा ''। इस पाशुपत मन्त्र से पूजन करें।

दीपशिखा का स्पर्श करें – **ॐ अघोराय घोरतमाय महारौद्राय वीरभद्राय ज्वालामालिने सर्वदुष्टप्राणोपसंहर्त्रे हुं फट स्वाहा।**

''**ॐ मार्तण्ड भैरवाय नमः**'' से नमस्कार करें तेज को अपनी आत्मा से समीभूत कर चित्त का शोधन करें।

''**हुं फद् स्वाहा**'' से मुख एवं **ॐ रक्ष रक्ष हुं फट् स्वाहा हृदये** से हृदय पर हाथ रख कर रक्षा करें।

हाथ में अक्षत पुष्प लेवें उन्हें सूंघकर मर्दन करके ईशान दिशा में दूर फेंके –

-ॐ ते सर्वे विलयं यांतु ये मां हिंसन्ति हिंसकाः। मृत्युरोगभयक्लेशाः पतन्तु रिपुमस्तके ॥

हस्त प्रक्षालन करें।

विशेषार्घ्यस्थापनम् – अपने एवं श्रीचक्र (देवयन्त्र) के बीच में सुधाकुंभ कलश की पूर्व विधि के समान विशेषार्घ का स्थापन करें।

वामे शङ्खं प्रतिष्ठाय मध्ये चार्घ्यं प्रकल्पयेत्। दक्षिणे प्रोक्षणीपात्र मर्घ्यत्रय विकल्पने। दृष्ट्वार्घ्यपात्रं देवेशि ब्रह्माद्या देवताः सदाः। नृत्यंति सर्वयोगिन्यः प्रीताः सिद्धि ददत्यपि ॥

विशेषार्घ में सुधाकुंभ से सुधा का पूरण कर निम्न मन्त्रों से अभिमन्त्रित करें –

ऐं क्लीं सौः ब्रह्माण्डखण्डसम्भूतमशेषरस संभवम्। आपूरितं महापात्रं पीयूष रसमावह ॥१॥
ऐं अखण्डैक रसानन्द कलेवर सुधात्मनि। स्वच्छंदस्फुरणा मन्त्रा निधेहिकुलरूपिणि ॥२॥
क्लीं अकुलस्थामृताकारे शुद्धज्ञान करे परे। अमृत्वं निधेह्यस्मिन् वस्तूनि क्लिन्नरूपिणी ॥३॥
सौः तद्रूपिण्यैकरस्यत्वं कृत्वाह्येतद स्वरूपिणी। भूत्वा परामृताकारं मयि विस्फुरणं कुरु ॥४॥

देवता के दक्षिण में प्रोक्षणीपात्र रखें। विशेषार्घ के वाम भाग में –

श्रीपात्र ॥१॥ गुरुपात्र ॥२॥ भैरवपात्र ॥३॥ शक्तिपात्र ॥४॥ योगिनीपात्र ॥५॥ भोगपात्र ॥६॥ वीरपात्र ॥७॥ आत्मपात्र ॥८॥ बलिपात्र ॥९॥ की स्थापना करें।

दक्षिण में पाद्य, अर्घ्य, आचमन एवं मधुपर्कादि चार पात्रों की स्थापना करें। अशक्ति में गुरु पात्र, वीरपात्र, आत्मपात्र,

बलिपात्र एवं भोगपात्र की स्थापना करें। तथा पाद्यादि अन्य उपचार हेतु एक पात्र की स्थापना करें।

पात्रों का उपयोग यन्त्रार्चन में अलग-अलग देवों के अर्चन हेतु होता है। श्रीपात्र से प्रधान देवों का, गुरुपात्र से गुरुमण्डल का एवं गुरु के हेतु, भैरवपात्र में अष्टभैरवों का, शक्तिपात्र से प्रधानदेव की शक्तियों का तथा पूजन समय में आपके सहभाग में मैथुन शोधन हेतु अपनी संगिनी शक्ति हेतु, योगिनीपात्र से योगनियों का, भोगपात्र एवं वीरपात्र से यन्त्र के परिधि देवता व इन्द्रादि लोकपालों का तथा आत्मपात्र से स्वयं का तथा बलिपात्र से बलिदेवताओं का तर्पण एवं प्रसाद ग्रहण होता है।

माँसशोधनम् - **ॐ पशुपाशाय विद्महे शिरश्छेदाय धीमहि। तन्नो माँस प्रचोदयात् ॥** इसका १० बार जप करें।

मीनशोधनम् - ॐ त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्धनम् । उर्वारुकमिवबंधनान्मृत्योर्मुक्षीय मामृतात् ॥

मुद्राशोधनम् - (मुद्रा अर्थात् चर्वण वस्तु नमकीन इत्यादि) **ॐ गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति । गर्भं ते अश्विनौ धत्तां वर्धेतां पुष्करस्त्रजौ ॥**

ॐ प्लूं ज्लूं ग्लूं स्वाहा। इति मन्त्रेण मांसमीनमुद्राः शोधयेत्।

शक्तिशोधनम् - मैथुनानन्द शोधन हेतु (रेतसः तर्पण हेतु) शक्ति की आवश्यकता है, अतः शक्ति दीक्षित होनी चाहिये अन्यथा उसके बायें कान में १० बार "**ह्रीं**" मन्त्र का जप कर शोधन करें। शक्ति का अर्चन अन्तरयाग पूजन में आता है जिसे चक्रपूजा कहते हैं अतः इसका विधान गुप्त है एवं इसके अधिकारी बिरले ही होते है, कारण शक्ति के अर्चन में बिन्दु का क्षरण नहीं होना चाहिये बिन्दु के क्षरण की अवस्था जब आने लगे तब उस बिन्दु को साधक प्राणायाम द्वारा नाभि मण्डल में खींचता है।

इस प्रकरण हेतु साधक को योग क्रियायें सीखनी चाहिये अन्यथा सुजाक व अन्य बिमारियाँ होने की संभावना रहती है।

चक्रपूजा अन्तर्गत शक्ति व स्वयं के अङ्गों में देवता के यन्त्रावरण देवों के न्यास करें, योनिकवच, योनिस्तोत्र, लिङ्गस्तोत्र द्वारा मातृमुख व पितृमुख का पूजन करें त्रिपुष्कर (योनि) एवं शिवदण्ड (लिङ्ग) की एक दूसरे में समष्टि करें। इसमें बिपरीत रतिक्रिया करने से साधक बिन्दु को नाभिमण्डल तक खींच सकता है।

अशक्त साधक रक्तपुष्प में आनन्दभैरवी तथा श्वेतपुष्प में आनन्दभैरव का पूजन करें। यन्त्रार्चन के बाद श्वेतपुष्प को नीचे रखकर उसके ऊपर रक्तपुष्प को अधोमुख कर दोनों का संयोग अवस्था अर्थात् विपरीत रति का ध्यान करें।

उसके बाद पात्रों से सुधा ग्रहण कर, मांसादि का प्रसाद ग्रहण करें। पात्र ग्रहण करने के भी कई मन्त्र हैं।

शक्तिशोधन हेतु **सामान्य विधान इस प्रकार है-**

ॐ ह्रीं त्रिपुरायै नमः, इमां शक्तिं पवित्रीं कुरु कुरु स्वाहा।

"**मम शक्ति कुरु कुरु**" से सामान्य जल से प्रोक्षण करें। उसके कर्ण में अपने इष्ट मन्त्र का जप करें। सुगन्धित द्रव्यों से शक्ति का लेपन करें -

कर्पूरं चैव कस्तूरीमिश्रितं चन्दनं तथा। सर्वाङ्गलेपनं कुर्यात् लक्ष्मीसूक्तेन बुद्धिमान ॥
पर्यङ्कोपरि तां कन्यां चन्दनं विलेपिताम्। ध्रुवा द्यौः इति मन्त्रेण कन्यां दक्षिणतोमुखीम् ॥

उन्मुखीशयनं कुर्यात् श्रीसूक्तेन कुमारकः। तस्याः पादौ प्रसार्याऽथ गुप्तेनाऽर्चनमाचरेत् ॥
न्यस्त्वा षोढाद्वयं चैव स्तोत्रं पञ्जरं न्यसेत्। कन्यां चैव न्यसेदेवं तत्तदङ्गानि संस्मरन् ॥
पादं जपपुरं चैव मार्जयेन्मूलविद्यया। गंधद्वारेति मन्त्रेण कुर्यात् कस्तूरिलेपनम् ॥
मूलमन्त्रेण सम्यक् च पुष्पमालां समर्पयेत्। निवेदयेद द्रव्यशुद्धिं तत्रैव जपमाचरेत् ॥

ॐ हं ॐ हुं फट् स्वाहा। ॐ ह्रीं श्रीं सुरतप्रिये॥ ॐ ह्रीं श्रीं ॐ फट् स्वाहा।

ऐं प्लूं ह्रौं जूं सः अमृते अमृतोद्भवे अमृतवर्षिणि शुक्रशापं मोचय मोचय अमृतं स्त्रावय स्त्रावय अमृतं कुरु कुरु स्वाहा।

ॐ विष्णुर्योनि कल्पयतु त्वष्टा रूपाणि पिंशतु। आसिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते ॥
गर्भं धेहि सिनीवाली गर्भं धेहि सरस्वति। गर्भं तेऽश्विनौ देवौ आधत्तां पुष्करस्त्रजौ ॥

॥ तिरस्करणीदुर्गा पूजनम् ॥

साधक जब मद्य माँसादि द्रव्यों से पूजन करता है तो निन्दकों द्वारा या अन्य किसी कारण से विघ्न की आशंका रहती है।

विशिष्ट साधक तिरस्करणी दुर्गा को सिद्ध करते हैं जिससे पूजा समय यदि किसी निन्दक या अदीक्षित का प्रवेश हो जाये तो मांसादि द्रव्यों का अन्य व्यञ्जनों में या पूजा सामग्री स्वरूप अन्य द्रव्यों में बदला हुआ रूप दिखाई देवें।

॥ ध्यानम् ॥

नीलं हयं समधिरुह्य पुरः प्रयाति नीलांशुकभरणमास्य विलेपनाढ्या।
निद्रापुटेन भुवनानि तिरोदधाना खड्गायुधा भगवती परिपातु भक्तान् ॥

गंधाक्षत से पूजन कर मन्त्र का स्मरण करें।

ॐ ह्रीं श्रीं नमो भगवति माहेश्वरि सर्व पशुजनमनश्चक्षु स्तिरस्करणीं कुरु कुरु स्वाहा।

ॐ ह्रीं क्लीं ऐं ग्लौं तिरस्करणीं सर्वजन वाग्वादिनी सकलपशुजन मनश्चक्षुषी श्रोत्र जिह्वा घ्राण तिरस्करणं कुरु कुरु ठः ठः ठः स्वाहा।

॥ अथ पात्र वन्दना ॥

भैरवी चक्र पूजन में पंच मकार पूजनान्तर देव्यार्चन करें पश्चात् तत्वों को गुरु आज्ञानुसार ग्रहण करें। तंत्र की साधना कठिन है भोग एवं योग का मिश्र योग है। कहा है- **करे माला मुखे हाला, वामे बाला सुकोमला।** प्रथम कारण द्रव्य को पहले शक्ति के अर्पण करे फिर साधक उच्छिष्ट ग्रहण करें। कारण ग्रहण करते समय साधक मूलाधार से कुण्डलिनी को उठावे एवं कण्ठ तक लाएं फिर कारण द्रव्य मैं ग्रहण नहीं कर रहा हुं यह कुण्डलिनी शक्ति ग्रहण कर रही है, ऐसी भावना करें। प्रत्येक पात्र के ग्रहण समय वंदना करे यथा-

प्रथम पात्रवन्दनम् (१) **ॐ श्रीमद्भैरवशेखरप्रविलसच्चन्द्रामृतप्लावितम्, क्षेत्राधीश्वरयोगिनीसुरगणैः सिद्धैः**

समाराधितम् ॥ आनन्दार्णवकं महात्मकमिदं साक्षात् त्रिखण्डाऽमृतम्, वन्दे श्रीप्रथमं कराम्बुजगतं पात्रं विशुद्धिप्रदम् ॥१॥ इति स्थूलशरीरं शोधयामि स्वाहा।

(२) द्वितीयं पात्रम्- ॐ हैमं मीनरसावहं दयितया दत्तं च पेयादिभिः किञ्चिच्चञ्चलरक्तपङ्कजदशा तस्यै समावेदितम् ॥ वामे स्वादु विशुद्धिशुद्धिकरणं पाणौ निधायाऽऽत्मके, वन्दे पात्रमहं द्वितीयमधुनाऽऽनन्दैकसंवर्धनम् ॥२॥ इति सूक्ष्मशरीरं शोधयामि स्वाहा।

(३) तृतीयं पात्रम्- ॐ सर्वाम्नायकलाकलापकलितं कौतूहलद्योतनम्, चन्द्रोपेन्द्रमहेन्द्रशम्भुवरुणब्रह्मादिभिः सेवितम् ॥ ध्यातं देवगणैः परं मुनिवरैर्मोक्षार्थिभिः सर्वदा, वन्दे पात्रमहं तृतीयमधुना स्वात्मावबोधक्षमम् ॥३॥ इति कारणशरीरं शोधयामि स्वाहा।

(४) चतुर्थं पात्रम्- ॐ मद्यं मीनरसावहं हरिहरब्रह्मादिभिः पूजितम्, मुद्रामैथुनधर्मकर्मनिरतं क्षाराम्लतिक्ताश्रयम् ॥ आचाराष्टकसिद्धिभैरवकला मांसेन संशोधितम् पायात् पञ्चमकारतत्त्वसहितं पात्रं चतुर्थं नमः ॥४॥ इति महाकारणशरीरं शोधयामि स्वाहा।

(५) पञ्चमं पात्रम्- ॐ आधारे भुजगाधिराजवलये पात्रं महीमण्डलम्, मद्यं सप्तसमुद्रवारि पिशितं चाष्टौ च दिग्दन्तिनः ॥ सोऽहं भैरवमर्चयन् प्रतिदिनं तारागणौ रक्षितम्, आदित्यप्रमुखैः सुरासुरगणैराज्ञाकरैः किङ्करैः ॥५॥ इति आत्मतत्त्वं शोधयामि स्वाहा।

(६) षष्ठमं पात्रम्- ॐ रुद्र चामरभद्रपीठपरमानन्दोदितं दीपनम्, वामां राज्यमनोरमां शुभकरं सायुज्यसाम्राज्यदम् ॥ नानाव्याधिभवान्धकूपहरणं जन्मान्तरं नाशनम्, श्रीमत्सुन्दरितर्पणं हरिरसं पात्रं च षष्ठं भजे ॥६॥ इति विद्यातत्त्वं शोधयामि स्वाहा।

(७) सप्तमं पात्रम्- ॐ जाग्रत्स्वप्नसुषुप्तिकार्यपरत श्चैतन्यसाक्षिप्रदम्, बिन्दुर्भास्करवह्निचन्द्रधनुषो ज्योतिः कलां चार्पितम् ॥ ईडापिङ्गलमध्यमाह्विवलया यत्कुण्डलीमध्यगम्, पात्रं सप्तमपूरणेन परमानन्दाधिकं पातु माम् ॥७॥ इति कुलतत्त्वं शोधयामि स्वाहा।

(८) अष्टमं पात्रम्- ॐ मूढाज्ञानकदम्बकाननकठोराग्निस्वरूपां पराम् ज्ञानध्वस्तसमस्तसंशयधिया पूर्णं सुधाधारया ॥ भोगं मोक्षकरं सभावशकरं मूर्ध्नि ज्वलन्तीं पराम्, देवीं वक्षसि संजपन्ननुदिनं पात्रं भजे चाऽष्टमम् ॥८॥ इति मूलतत्वं शोधयामि स्वाहा।

(९) नवमं पात्रम्- ॐ मन्ये ब्रह्ममयं समस्तजगतां सारं महत् शाश्वतम्, दुर्ज्ञेयं भवभोग चञ्चलधियां स्थूलाकृतिं ध्यायताम् ॥ अस्माकं द्रवरूपतां करुणया पात्रं तदेतद् द्रुतम्, तत् पात्रं नवमं पिवेच्च नियतं भुक्तिं च मुक्तिप्रदम् ॥९॥ इति विशेषतत्वं शोधयामि स्वाहा।

(१०) दशमं पात्रम्- ॐ वामे चन्द्रमुखी मुखे च मधुरं पात्रं कराम्भोरुहे, मूर्ध्नि श्रीगुरुचिन्तनं भगवतीध्यानास्पदं मानसे ॥ जिह्वायां जपसाधनं परिणतं कौलक्रमाभ्यासनम्, तत् पात्रं दशमं पिवेच्च परमं भुक्ति च मुक्तिप्रदम् ॥१०॥ इति देवीतत्वं शोधयामि स्वाहा।

(११) एकादशं पात्रम्- ॐ वामां वामकरे, सुधां च अधरे, मन्त्रं जपन् मानसे वीणावेणुरवावयन्त्रविधिवद् गायन्ति पञ्चो रसः क्रीडाकेलिकुतूहलेन रसनालावण्यलीलारसः। प्राणोल्लासविलासपूर्णसमये पात्रं च एकादशम् ॥११॥ इति सर्वतत्त्वं शोधयामि स्वाहा।

पात्र वंदना करके कारण ग्रहण करने के बाद साधक **शांति स्तोत्र** का पाठ कर क्रम समापन करे। शक्ति की प्रसन्नता हेतु कुलाङ्गना स्तोत्र पाठ, शक्तिशोधन समय, चक्रपूजा समय अथवा सौभाग्यार्चन समय करे।

॥ शांतिस्तोत्रम् ॥

ॐ नशन्तु प्रेतकूष्माण्डा नश्यतु दूषका नराः। साधकानां शिवाः सन्तु आम्नाय परिपालिनाम् ॥
जयन्ति मातरः सर्वा जयन्ति योगिनीगणाः । जयन्ति सिद्धडाकिन्यो जयन्ति गुरवः सदा ॥
जयन्ति साधकाः सर्वे विशुद्धाः कौलिकाश्च ये । समयाचारसम्पन्ना जयन्ति पूजका नराः ॥
नन्दन्तु अणिमासिद्धाः नन्दन्तु कुलपालकाः। इन्द्राद्या देवताः सर्वान्तृप्यन्तु वास्तुदेवताः ॥
चन्द्रसूर्यादयो देवास्तुष्यन्तु मम भक्तितः। नक्षत्राणि ग्रहा योगाः करुणा राशयस्तथा ॥
सर्वे ते सुखिनो यान्तु सर्वा नद्यश्च पक्षिणः। पशवस्तरवश्चैव पर्वताः कन्दरा गुहाः ॥
ऋषयो ब्राह्मणाः सर्वे शान्ति कुर्वन्तु मे सदा। शुभा मे विदिताः सन्तु मित्रास्तिष्ठन्तु पूजकाः ॥
ये ये पापधियः सुदूषणरता मन्निन्दकाः पूजने। वेदाचारविमार्गनष्टहृदया भ्रष्टाश्च ये साधकाः ॥
दृष्ट्वा चक्रमपूर्वमर्चनविधौ ये कोलिका दूषकाः। ते ते यान्तु विनाशमत्र समये श्रीभैरवस्याऽऽज्ञया ॥
साधकानां च द्वेष्टारः सदैवाम्नायदूषकाः। डाकिनीनां मुखे यान्तु तृप्तास्तत्पिशितैस्तु ताः ॥
शत्रवो नाशमायान्तु मम निन्दाकराश्च ये । द्वेष्टारः साधकानां च ते नश्यन्तु शिवाऽऽज्ञया ॥
ॐ शान्तिरस्तु शिवं चास्तु वासवाग्निप्रसादतः। मरुतां ब्राह्मणैश्चैव वसुरुद्रप्रजापतेः ॥

॥ अथ कुलाङ्गना स्तोत्रम् ॥

कुलाङ्गना स्तोत्र का पाठ शक्ति शोधन समय, चक्रपूजा अथवा सौभाग्यार्चन समय करे।

मातर्देवि नमस्तेऽस्तु ब्रह्मरूपधरेऽनघे । कृपया हर मे विघ्नं मन्त्रसिद्धिं प्रयच्छ मे ॥१॥
माहेशि वरदे देवि परमानन्दरूपिणि । कृपया हर मे विघ्नं मन्त्रसिद्धिं प्रयच्छ मे ॥२॥
कौमारि सर्वविद्येशे कुमारक्रीडने परे । कृपया हर मे विघ्नं मन्त्रसिद्धिं प्रयच्छ मे ॥३॥
विष्णुरूपधरे देवि विनतासुतवाहिनि । कृपथा हर मे विघ्नं मन्त्रसिद्धिं प्रयच्छ मे ॥४॥
वाराहि वरदे देवि दंष्ट्रोद्धृतवसुन्धरे । कृपया हर मे विघ्नं मन्त्रसिद्धिं प्रयच्छ मे ॥५॥
शक्ररूपधरे देवि शक्रादिसुरपूजिते । कृपया हर मे विघ्नं मन्त्रसिद्धिं प्रयच्छ मे ॥६॥
चामुण्डे मुण्डमालासृक् चर्चिते विघ्ननाशिनि। कृपया हर मे विघ्नं मन्त्रसिद्धिं प्रयच्छ मे ॥७॥
महालक्ष्मि महोत्साहे क्षोभसन्तापनाशिनि । कृपया हर मे विघ्नं मन्त्रसिद्धिं प्रयच्छ मे ॥८॥
मितिमातृमये देवि मितिमातृवहिष्कृते । एके बहुविधे देवि विश्वरूपे नमोऽस्तु ते ॥९॥

॥ फलश्रुति ॥

एतत् स्तोत्रं पठेद्यस्तु कर्मारम्भेषु संयतः। विदग्धां वा समालोक्य तस्यविघ्नं न जायते ॥१॥
कुलीनस्य द्वारदेवाः कथितास्तव पुत्रक। दीक्षाकाले नित्यपूजासमये नार्चयेद्यदि ॥२॥
तस्य पूजाफलं वत्स नीयते यक्षराक्षसैः । यदि व्रीडापरा सा तु भोजने तद्गृहाद्बहिः ॥३॥
स्थितः पठेत् स्मरेत् स्तोत्रं यावत् तृप्तिः प्रजायते । आचम्य मुखवासादि ताम्बूलं च निवेदयेत् ॥४॥
ततो दद्यात् पुनर्माल्यं गन्धं चन्दनपङ्किलम् । विसृज्य प्रदक्षिणीकृत्य वरं प्रार्थ्य सुखी भवेत् ॥५॥
अन्या यदि न गच्छेतु निजकन्यां निजानुजाम्। अग्रजा मातुलानीं वा मातरं तत्सपत्निकाम् ॥६॥
पूर्वाभावे परा पूज्या मदंशा योषितो मतः । सर्वाभावे ह्येकतरा पूजनीया प्रयत्नतः ॥७॥
एकश्चेत् कुलशास्त्रज्ञः पूजार्हस्तत्र भैरव । सर्व एव सुराः पूज्याः सत्यं ब्रह्मशिवादयः ॥८॥
एका चेद्युवती तत्र पूजिता चावलोकिता । सर्वा एव परादेव्यः पूजिताः कुलभैरव ॥९॥

१. शैलपुत्री
२. ब्रह्मचारिणी
१. चन्द्रघण्टा
४. कूष्माण्डा
५. स्कंदमाता
६. कात्यायनी
७. कालरात्री
८. महागौरी
९. सिद्धिदात्री

॥ अथ श्री दुर्गा तंत्रम् ॥

नित्यकर्मविधिः– तांत्रिक संध्यानुसार साधक प्रारम्भ में गुरु व इष्ट का ध्यान करे। पृथ्वी की वंदनाकर अपना जो स्वर चल रहा हो वहीं पैर भूमि पर प्रथम रखे। शौचादि से निवृत्त हो तांत्रिविधि मंत्रों से दातुन, स्नान, तर्पण कर पूजागृह में प्रवेश करे। स्थान पूजा, आसनशुद्धि तत्वशोधन, शरीरशोधन, भूतशुद्धि करे। गुरुगणेश स्मरण करे, दीपपूजा वरुण पूजादि कर, तत्वों का शोधन कर पात्रा सादन कर, गणेश मातृका नवग्रह एवं इष्टदेव का षोड़शोपचार से पूजन करे। मातृका न्यास मूलमंत्र न्यासादि कर मंत्र जप करे, कवच, हृदय शतनाम सहस्रनाम एवं स्तव वंदना करे। नित्य होमादि कर्म करे। कवच एक बार करे तो मंत्र जाप के प्रारंभ में करें। दो बार करे तो पुनः कवच पाठ कर्म समाप्ति समय करें।

॥ दुर्गाभुवनवर्णनम् ॥

॥श्री भैरव उवाच ॥

तंत्रादौ देवि वक्ष्ये ऽहं दुर्गाभुवनमद्भुतम्।

जयं नाम महादिव्यं बहुविस्तारविस्तृतम् । नानारत्न समाकीर्णं सूर्यकोटिसमप्रभम् ॥१७॥
इन्द्रगोपकवर्णं च चन्द्रकोटिमनोहरम् । अप्रमेयमसंख्यैयमगम्यं सर्ववादिनाम् ॥१८॥
इदं दिव्यं जयं नाम भुवनं परमेश्वरि । तत्रैव वसते दुर्गा नवरूपात्मिका परा ॥१९॥
या देवदेवी वरदा सर्वलोकैकसुन्दरी । या दुर्गेति स्मृता लोके ब्रह्माण्डोदरवर्तिनी ॥२०॥
विष्णुना तपसा पूर्वमाराध्य परमेश्वरी । महिषस्यासुरेन्द्रस्य वधार्थायाव तारिता ॥२१॥
योगमाया महामाया सर्वदा परमेश्वरी । तामेवाहर्निशं ध्याये श्रीविद्यां परमां जपे ॥२२॥
तामद्याहं प्रवक्ष्यामि विद्याचरणदायिनीम् । यां श्रुत्वा स शिवो जातः पञ्चनादात्मकः शिवः ॥२३॥
यदाऽभूद्धरिहीना सा दुर्गा निष्कलरूपिणी । साक्षाद्भुवनरूपाऽपि महज्ज्योतिः स्वरूपिणी ॥२४॥
तदा शवहकाले तु ज्योतीरूपे महीश्वरि । शिवः प्रभामण्डलतो निर्गतो ऽचेतनो विभुः ॥२५॥
अशृणोन्नादमाधारं जगतां बीजमुत्तमम् । अवमं सारमायां त्वं सृष्टोऽग्रे मनुनायकः ॥२६॥
इति श्रुत्वा परानादं तारमित्युपदीर्यते । शिवो जजाप सहसा बीजं त्रिजगतां शिवे ॥२७॥

तेन मायेति शब्दं स शुश्राव गगना त्ततः। दमं भज महेशान सदानन्दालयं परम् ॥२८॥
बिन्दुनादमयो देवः शिवोऽभूत्परमेश्वरः । ततो नादं स शुश्राव दृष्टिकर्ण विवर्जितम् ॥२९॥
दुर्गां भजेति स शिवः पञ्चनादात्मकोऽभवत् । ततो जप्त्वा पराविद्यामसृजज्जगदम्बिके ॥३०॥
आदौ वायुं शिवः सृष्ट्वा ततः सृष्टिं यथेच्छया । इच्छामात्रं शिवे विश्वं विश्वेश्वरि चंराचरम् ॥३१॥
ससर्ज लवमात्रं स शितिकण्ठः शिवः शिवे । इतीमां गुप्तविद्यां तु लब्ध्वा गुरुपदार्चनात् ॥३२॥

दुर्गापञ्चरत्नेश्वरी विद्यानम्:- दुर्गा की सिद्धि हेतु उसकी ५ शक्तियों का यजन पूजन करने से पूर्ण फल मिलता हैं। दुर्गायाः परमं तत्वं पंचरत्नेश्वरीमयम्। श्री दुर्गा शारिका शारी सुमुखी बगलामुखी ॥ पञ्चरत्नेश्वरीविद्या दुर्गायाः कथितामया। सुदिने देवि दुर्गायाः पञ्चरत्नेश्वरीं जपेत् ॥ अर्थात् श्री दुर्गा, सरस्वती, शारिका, मातंगी व बगलामुखी की समग्र साधना से पुरश्चरण का फल प्राप्त होता हैं।

॥ भगवती गौरी ॥

चतुरक्षर मंत्रः- ह्रीं भवान्यै नमः मंत्र के **अज ऋषि, छन्द अनुष्टुप्, देवता गौरी हैं।**

बालार्काऽभां त्रिनयनां खड्गखेटवराभयान्। दोर्भिदधानां सिंहस्थां भवानीं भावयेत् सदा॥

एकादशाक्षर मंत्र :- ॐ ह्रीं श्रीं सौं ग्लौं गं गौरी गीं स्वाहा।

गौराङ्गीं घृतपङ्कजां त्रिनयनां श्वेताम्बरां सिंहगां, चन्द्रोद्भासितशेखरां स्मितमुखीं दोर्भ्यां वहन्तीं गदाम् । विष्ण्विन्द्राम्बुजयोनि शम्भुत्रिदशैः संपूजितांघ्रिद्वयां, गौरी मानसपङ्कजे भगवतीं भक्तेष्टदां तां भजे ॥

मंत्र के **अजऋषि, छन्द निचृद्, देवता त्रैलोक्य मोहिनी गौरी हैं।** गौरी मंत्रों का **ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः** से अंगन्यास करे।

षोडशाक्षरमंत्रः- ह्रीं गौरि रुद्रदयिते योगेश्वरि हुं फट् स्वाहा। मंत्र के देवता ऋषि चतुरक्षर वाले हैं। हेमाभां बिभ्रतीं दोर्भिदर्पणाञ्जनसाधने। पाशाङ्कुशौ सर्वभूषां तां गौरीं सर्वदा स्मरेत्॥

उनविंशाक्षरमंत्र :- कांक्षितस्त्रीवशङ्करि सुभगेपृथक् पृथक् स्त्री स्वाहा। ऋषि देवता उपरोक्त मंत्रवत्।

सप्तचत्वारिंशाक्षर राजमुखी गौरीः- ॐ राजमुखि राजाधिमुखि वश्यमुखि ह्रीं श्रीं क्लीं देवि देवि महादेवि देवाधिदेवि सर्वजनस्य मुखं मम वशं कुरु कुरु स्वाहा। मेरु तन्त्र के अनुसार प्रारंभ में "ॐ" है तथा मंत्रकोष के अनुसार "हस्त्रैं" हैं।

अष्टचत्वारिंशाक्षर मंत्र :- मेरुतंत्र के अनुसार राजमुखि के पहिले **"हस्त्रैं ॐ"** है तथा मंत्रकोष के अनुसार **"हस्त्रैं व्यरूं"** राजमुखि के पहले लगावे शेष मंत्र पूर्ववत् हैं।

एक षष्ट्यक्षर मंत्र :- ह्रीं नमः ब्रह्मश्रीराजिते राजपूजिते जयविजये गौरि गांधारि त्रिभुवनवशङ्करि सर्वलोकवशङ्करि सर्वस्त्रीपुरुषवशङ्करि सुसु दुदु घे घे वावा ह्रीं स्वाहा।

विनियोगः- **अस्य मंत्रस्य अज ऋषि, निचृद् छंदः, श्रीत्रैलोक्यमोहिनी गौरी देवता ह्रीं बीजं स्वाहा शक्तिं सर्वाभीष्ट सिद्ध्यर्थे सर्वजन वशमानार्थे जपे विनियोग। कहीं कहीं पाठान्तर में जयेविजये हैं।**

अंग न्यास के छः विभाग ह्रीं ..... राजपूजिते ॥१॥ जय....गांधारी ॥२॥ त्रिभुवनवशंकरि ॥३॥ सर्वलोकवशंकरि ॥४॥ सर्वस्त्रीपुरुषवशंकरि ॥५॥ सुसु....स्वाहा॥६॥

गीर्वाण सङ्घार्चित पादपङ्कजारुणप्रभा बाल-शशांङ्कशेखरा ।
रक्ताम्बरालेपनपुष्य युङ्मुदे सृणिं सपाशं दधती शिवाऽस्तु नः ॥

॥ भगवती दुर्गा ॥

एकाक्षर :- भगवती दुर्गा का एकाक्षरी बीजमंत्र "दुं" है। दां दीं दूं दें दौं दः से अङ्गन्यास करे।

॥ अथ अष्टाक्षर मंत्र प्रयोगः॥

भगवती दुर्गा का अष्टाक्षर मंत्र प्रधान हैं।

मंत्रोद्धार :- मायाद्रि (माया-ह्रीं, अद्रि-द) कर्णविन्द्वाढ्यो (कर्ण-उ, बिन्दुअनुस्वार) भूयोऽसौ सर्गवान भवेत्। (पुन यह वर्ण विसर्ग युक्त :दुः) पञ्चान्तकः (ग) प्रतिष्ठावान (आ) मारुतो (य) भौतिकासनः (ऐ) इस तरह ह्रीं दुं दुर्गायै हुआ। इसके बाद '' तारादि (ॐ) हृदयान्तो ऽयं (हृदयः नमः) मंत्रोवस्वक्षरात्मकः। आदि में ॐ और अंत में नमः लगाने से

यथा मन्त्रः- ॐ ह्रीं दुं दुर्गायै नमः''।

॥ अष्टाक्षर मन्त्रस्य विधानम् ॥

विनियोग :- ॐ अस्य श्रीदुर्गाष्टाक्षरमंत्रस्य महेश्वर ऋषिः। श्री दुर्गाष्टाक्षरात्मिका देवता। दुं बीजम्। ह्रीं शक्तिः॥ ॐ कीलकाय नम इति दिग्बंधः। धर्मार्थकाममोक्षार्थे जपे विनियोगः।

ऋष्यादिन्यास :- ॐ महेश्वरऋषये नमः शिरसि ॥१॥ अनुष्टुप्छंदसे नमः मुखे ॥२॥ श्रीदुर्गाष्टाक्षरात्मिकादेवतायै नमो हृदि ॥३॥ दुं बीजाय नमो नाभौ ॥४॥ ह्रीं शक्तये नमो गुह्ये ॥५॥ ॐ कीलकाय नम : पादयोः ॥६॥ नमो दिग्बंधः इति सर्वाङ्गे ॥७॥ इति ऋष्यादिन्यासः।

करन्यास :- ॐ ह्रां अंगुष्ठाभ्यां नमः ॥१॥ ॐ ह्रीं तर्जनीभ्यां नमः ॥२॥ ॐ ह्रूं मध्यमाभ्यां नमः ॥३॥ ॐ ह्रैं अनामिकाभ्यां नमः ॥४॥ ॐ ह्रौं कनिष्ठिकाभ्यां नमः ॥५॥ ॐ ह्रः करतलकरपृष्ठाभ्यां नमः ॥६॥ इति करन्यासः ।

हृदयादिन्यास :- ॐ ह्रां हृदयाय नमः ॥१॥ ॐ ह्रीं शिरसे स्वाहा। ॥२॥ ॐ ह्रूं शिखायै वषट् ॥३॥ ॐ ह्रैं कवचाय हुम् ॥४॥ ॐ ह्रौं नेत्रत्रयाय वौषट् ॥५॥ ॐ ह्रः अस्त्राय फट् ॥६॥ इति हृदयादिषडंगन्यासः।

वर्णन्यास :- ॐ ॐ नमः शिरसि ॥१॥ ॐ ह्रीं नमो मुखे ॥२॥ ॐ दुं नमो वक्षसि ॥३॥ ॐ गां नमो नाभौ ॥४॥ ॐ यैं नमः पृष्ठे ॥५॥ ॐ नं नमो जान्वोः॥६॥ ॐ मः नमः पादयोः॥७॥ इतिवर्णन्यासः।

तत्त्वन्यास :- ॐ ॐ आत्मतत्त्वाय नमः शिरसि॥१॥ ॐ ह्रीं विद्यातत्त्वाय नमो मुखे॥२॥ ॐ ह्रीं दुं शिवतत्त्वाय नमो हृदि॥३॥ ॐ गुरुतत्त्वाय नमो नाभौ॥४॥ ॐ ह्रीं शक्तितत्त्वाय नमः जंघयोः ॥५॥ ॐ दुं शिवशक्तित्त्वाय नमः पादयोः ॥६॥ इति तत्त्वन्यास।

शुद्धमातृकान्यास :- **ॐ अँ आँ कँ खँ गँ घँ ङँ इँ ईं हृदयाय नमः ॥१॥ ॐ ह्रीं उँ ऊँ चँ छँ जँ झँ ञँ ऋँ ॠँ शिरसे स्वाहा ॥२॥ ॐ दुं लृँ टँ ठँ डँ ढँ णँ ॡँ शिखायै वषट् ॥३॥ ॐ गां एं तं थं दं धं नं ऐं कवचाय हुम् ॥४॥ ॐ यैं ओं पं फं बं भं मं औं नेत्रत्रयाय वौषट् ॥५॥ ॐ नमः अं यं रं लं वं शं षं सं हं लं क्षं अः अस्त्राय फट् ॥६॥ इति शुद्धमातृकान्यासः।** एवं करन्यासं कुर्यात्।

ततः पद्धतिमार्गेण देवीकलामातृका विन्यस्य पूर्वोक्तषडंगं कृत्वा ध्यायेत्।

॥ अथ ध्यानम्॥

दूर्वानिभां त्रिनयनां विलसत्किरीटां शंखाब्जखड्गशरखेटकशूलचापान्।
संतर्जनीं च दधतीं महिषासनस्थां दुर्गां नवारकुलपीठगतां भजेऽहम् ॥

॥ अथ यंत्रपूजनम् ॥

भद्रमंडल पर दुर्गा की नवपीठशक्तियों का अर्चन करे। यंत्र की आवरण पूजा हेतु गंध, पुष्पाक्षत को मिश्रण कर लेवे। प्रत्येक आवरण पूजा के पहले अनुमति हेतु पुष्पांजलि देवे। आवरण देवताओं का पादुकापूजन गंधपुष्पाक्षत से कर पुनः पुष्पांजलि देवे तथा विशेषार्ध से जल छोड़े एवं कहे **पूजितास्तर्पिताः संतु।**

नवपीठशक्तीः पूजयेत्। तद्यथा-**ॐ प्रभायै नमः ॥१॥ ॐ मायायै नमः ॥२॥ ॐ जयायै नमः ॥३॥ ॐ सूक्ष्मायै नमः ॥४॥ ॐ विशुद्धायै नमः ॥५॥ ॐ नंदिन्यै नमः ॥६॥ ॐ सुप्रभायै नमः ॥७॥ ॐ विजयायै नमः ॥८॥ ॐ सर्वसिद्धिदायै नमः ॥९॥** इति पूजयेत्।

ततः स्वर्णादिनिर्मितं यंत्रपत्रं ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेण संशोष्य तस्योपरि श्रीचक्रं चतुर्द्वारं त्रिवृत्तमष्टदलं वृत्तं षडस्त्रं त्रिकोणं बिंद्वात्मकयंत्रमष्टगंधेन विलिख्य-

मंत्र - **"ॐ ह्रीं वज्रनखदंष्ट्रायुधाय महासिंहाय फट्।"** इति मंत्रेण पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य प्रतिष्ठां च कृत्वा मूलेन मूर्तिं प्रकल्प्य पुनर्ध्यात्वावाहनादिपुष्पांतैरुपचारैः संपूज्य देव्याज्ञया आवरणपूजां कुर्यात्। तद्यथा-पुष्पांजलिमादाय -

ॐ संविन्मये परे देवि परामृतरसप्रिये। अनुज्ञां देहि मे दुर्गे परिवारार्चनाय ते ॥१॥

ॐ ह्रीं दुं सर्वसिद्धिप्रदाय श्रीचक्राय नमः। इति पुष्पांजलिं दद्यात्। इत्याज्ञां गृहीत्वा आवरणपूजामारंभेत्।

प्रथमावरणम् :- तद्यथा- भूपुराभ्यंतरे पूर्वादिचतुर्दिक्षु- **ॐ ह्रीं दुं गं गणेशाय नमः गणेशश्रीपादुकां पूजयामि तर्पयामि नमः इति सर्वत्र ॥१॥ ॐ ह्रौं कुमाराय नमः कुमारश्रीपा० ॥२॥ ॐ प्रीं पुष्पदंताय नमः पुष्पदंतश्रीपा० ॥३॥ ॐ वें विकर्तनाय नमः विकर्तनश्रीपा० ॥४॥** इति द्वारपालान् संपूजयेत्। ततः पुष्पांजलिमादाय मूलमुच्चार्य।

ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सले। भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥१॥

इति पठित्वा पुष्पांजलिं च दत्त्वा विशेषार्घाद्बिंदुं निक्षिप्य **पूजितास्तर्पिताः संतु** इति वदेत्। इति प्रथमावरणम् ॥१॥

द्वितीयावरणम् :- ततोऽष्टदले पूज्यपूजकयोरंतराले प्राचीं तदनुसारेण अन्या दिशः प्रकल्प्य प्राचीक्रमेण वामावर्तेन च **ॐ ब्राह्मयै नमः ब्राह्मीश्री० ॥१॥ ॐ नारायण्यै नमः नारायणीश्री० ॥२॥ ॐ चामुंडायै नमः चामुण्डाश्री० ॥३॥ ॐ अपराजितायै नमः अपराजिताश्री० ॥४॥ ॐ माहेश्वर्य्यै नमः माहेश्वरीश्री० ॥५॥ ॐ कौमार्यै नमः कौमारीश्री० ॥६॥ ॐ वाराह्यै नमः वाराहीश्री० ॥७॥ ॐ नरसिंह्यै नमः। नारसिंहीश्री० ॥८॥**

इत्यष्टौ संपूज्य पुष्पांजलिमादाय मूलमुच्चार्य **"अभीष्टसि०" ॐ ह्रीं दुं सर्वाशापूरकाय श्रीचक्राय नमः।** इति

पुष्पांजलिं दद्यात्। इति द्वितीयावरणम् ॥२॥

॥ दुर्गा पूजन यन्त्रम् ॥

तृतीयावरणम् :- ततोऽष्टदलाग्रेषु प्राचीक्रमेण वामावर्तेन च । **ॐ असितांगभैरवाय नमः असिगांगभैरवश्री० ॥१॥ ॐ रुरुभैरवाय नमः। रुरुभैरवश्री० ॥२॥ ॐ चंडभैरवाय नमः। चंडभैरवश्री० ॥३॥ ॐ क्रोधभैरवाय नमः। क्रोधभैरवश्री० ॥४॥ ॐ उन्मत्तभैरवाय नमः। उन्मत्तभैरवश्री० ॥५॥ ॐ कपालभैरवाय नमः। कपालभैरवश्री० ॥६॥ ॐ भीषणभैरवाय नमः। भीषणभैरवश्री० ॥७॥ ॐ संहारभैरवाय नमः। संहारभैरवश्रीपा० ॥८॥ इत्यष्टौ भैरवान्पूजयित्वा पर्वोक्तं पुष्पांजलिं च दद्यात्।** इति तृतीयावरणम् ॥३॥

चतुर्थावरणम् :- ततः नवकोणे देव्यग्रिकोणमारभ्य वामावर्तेन च। **ॐ शैलपुत्र्यै नमः। शैलपुत्रीश्रीपा० ॥१॥ ॐ ब्रह्मचारिण्यै नमः। ब्रह्मचारिणीश्रीपा० ॥२॥ ॐ चंद्रघंटायै नमः। चंद्रघंटाश्रीपा० ॥३॥ ॐ कूष्माण्डायै नमः। कूष्मांडाश्री० ॥४॥ ॐ स्कंदमात्रे नमः। स्कंदमातृश्री० ॥५॥ ॐ कात्यायन्यै नमः। कात्यायनीश्रीपा० ॥६॥ ॐ कालरात्र्यै नमः। कालरात्रिश्रीपा० ॥७॥ ॐ महागौर्यै नमः। महागौरीश्री० ॥८॥ ॐ सिद्धिदायै नमः। सिद्धिदाश्रीपा० ॥९॥** इति संपूज्य **अभीष्ट० ॐ ह्रीं दुं अष्टसिद्धिदाय श्रीचक्राय नमः।** इति दूर्वादलांजलिं च दद्यात्। इति चतुर्थावरणम् ॥४॥

पंचमावरणम् :- ततो वृत्ते (प्रथम वीथिकायाम्) पूर्वादिक्रमेण वामावर्तेन च। **ॐ अंबिकायै नमः अंबिकाश्रीपादुकां पूजयामि तर्पयामि नमः ॥१॥ ॐ अष्टाक्षरायै नमः अष्टाक्षराश्रीपा० ॥२॥ ॐ अष्टभुजायै नमः। अष्टभुजाश्री० ॥३॥ ॐ नीलकंठायै नमः नीलकण्ठाश्रीपा० ॥४॥ ॐ जगदंबिकायै नमः जगदंबिकाश्री० ॥५॥ इति संपूज्य पुष्पांजलिं च दद्यात्।** इति पंचमावरणम् ॥५॥

षष्ठावरणम् :- ततो वृत्ते (द्वितीय वीथिकायाम्) प्राचीक्रमेण वामावर्तेन च। **ॐ शंखाय नमः ॥१॥ ॐ पद्मायनमः ॥२॥ ॐ खड्गाय नमः ॥३॥ ॐ बाणेभ्यो नमः ॥४॥ ॐ धनुषे नमः ॥५॥ ॐ खेटकाय नमः ॥६॥ ॐ शूलाय नमः ॥७॥ ॐ तर्जन्यै नमः ॥८॥** इत्यस्त्राणि संपूज्य पुष्पांजलिं च दद्यात्। इति षष्ठावरणम् ॥६॥

सप्तमावरणम् :- ततो भूपुरे पूर्वादिकमेण। **ॐ लं इन्द्राय नमः ॥१॥ ॐ रं अग्नये नमः ॥२॥ ॐ मं यमाय नमः ॥३॥ ॐ क्षं निर्ऋतये नमः ॥४॥ ॐ वं वरुणाय नमः ॥५॥ ॐ यं वायवे नमः ॥६॥ ॐ कुं कुबेराय नमः ॥७॥ ॐ हं ईशानाय नमः ॥८॥ ॐ आं ब्रह्मणे नमः ॥९॥ ॐ ह्रीं अनंताय नमः ॥१०॥ तद्बाह्ये इन्द्रादिसमीपे ॐ वं वज्राय नमः ॥१॥ ॐ शं शक्तये नमः ॥२॥ ॐ दं दंडाय नमः ॥३॥ ॐ खं खड्गाय नमः ॥४॥ ॐ पां पाशाय नमः ॥५॥ ॐ अं अंकुशाय नमः ॥६॥ ॐ गं गदायै नमः ॥७॥ ॐ त्रिं त्रिशूलाय नमः ॥८॥ ॐ पं पद्माय नमः ॥९॥ ॐ चं चक्राय नमः ॥१०॥** इति इन्द्रादिदशदिक्पालान् वज्राद्यायुधानि च संपूज्य पुष्पांजलिं च दद्यात्। इति सप्तमावरणम् ॥७॥

इत्यावरणपूजां कृत्वा धूपादिनमस्कारांतं संपूज्य षडंगं कृत्वा पुनर्ध्यात्वा देव्यग्रे मालामादाय जपं कुर्यात्। अस्य पुरश्चरणमष्टलक्षं चतुर्लक्षं वा एकलक्षं वा कुर्यात्। तत्तद्दशांशहोमतर्पणमार्जनब्राह्मणभोजनं च कुर्यात्। एवं कृते मन्त्रः सिद्धो

भवति सिद्धे च मंत्रे मंत्री प्रयोगान् साधयेत्।

॥ प्रयोगविधानम् ॥

आठ लाख जप से मंत्र का पुरश्चरण करे। दशांश होम की आवश्यकता नहीं हैं। त्रिमधुयुक्त तिल अथवा दुग्ध मिश्रित अन्न से आठ हजार होम करे। महाचीनक्रम के अनुसार १ लाख जप करे पश्चात् प्रयोग विधि करे। रात्रि में श्मशान में १० हजार जप कर सर्षप व मांस से दशांश होम करे तो शत्रु का स्तंभन होवे। वटवृक्ष के नीचे रुद्राक्ष माला से १० हजार जप करे तथा घृत कमलपुष्प व कमलगट्टे से हवन करे तो लक्ष्मी प्राप्ति होवे संमोहन होवे। वन व एकांत में १० हजार जप कर वेत की जड से दशांश होम करे शत्रुनाश होवे। १० हजार जपकर, घृतोषधि, जीरा, कपिबीज कपित्थ से दशांश होम से स्त्री आकर्षण होवे। १० हजार जप कर घी, इक्षुरस, गन्ने के टुकडे, लालपुष्पों से होम से इन्द्रादि समान लोगों का वशीकरण होवे। पीपल के नीचे १० हजार जप करे तथा स्त्री के नख केशादि से आज्य होम करे तो शत्रु का उच्चाटन होवे। सुरलता, कनेर, विल्वपेड़ के नीचे १० हजार जप करे कुक्कुट के अंगों व नानापुष्पों से होम करे रोग उपद्रव नष्ट होकर शांति होवे। इस मंत्र के जप होम से अभिषिक्त होने पर तथा भस्मादि धारण करने से राजा विजय प्राप्त करे, गर्भिणी पुत्र प्राप्त करें।

॥ इति दुर्गाष्टाक्षर मंत्रप्रयोगः॥

॥ अथ नवार्ण महामंत्र प्रयोगः॥

॥ अथ नवार्ण मंत्र मंत्रोद्धार ॥

ऐं ह्रीं क्लीं चामुण्डायै विच्चे: ऐं बीजमादीन्दुसमानदीप्तिं ह्रीं सूर्यतेजोद्युतिमद्वितीयम्। क्लीं मूर्तिवैश्वानरतुल्यरूपं तृतीयमानन्त्यसुखाय चिन्त्यम् ॥१॥ चां शुद्धजाम्बूनदकान्ति तुर्यं मुं पञ्चमं रक्ततरं प्रकल्प्य। डां षट्कमुग्रार्तिहरं सुनीलं यैं सप्तमं कृष्णतरं रिपुघ्नम् ॥२॥ विं पाण्डुरं चाष्टममादिसिद्धं च्चें धूम्रवर्णं नवमं विशालम्। ऐं ह्रीं क्लीं चामुण्डायै विच्चे इति नवाक्षरो मन्त्रः। एतानि बीजानि नवात्मकस्य जप्तुः प्रदद्युः सकलार्थसिद्धिम् ॥३॥

अथ मंत्र - **ऐं ह्रीं क्लीं चामुण्डायै विच्चे।**

॥ बहुविध नवार्ण मंत्राः॥

ॐ ऐं ह्रीं क्लीं लृं श्रीं क्लीं नमः ॥१॥ ऐं ह्रीं क्लीं चामुण्डायै विच्चे ॥२॥ हूं ऐं ऐं ह्रीं चामुण्डायै स्वाहा (इतिडामरोक्तः) **॥३॥ ॐ ऐं ह्रीं क्लीं लृं श्रीं ह्रीं नमः** (इति दाक्षणात्या) **॥४॥ हूं ऐं ऐं ह्रीं चामुण्डायै स्वाहा ॥** इति सारस्वताः ॥५॥

श्रीं ह्रीं ऐं चामुण्डायै विच्चे ॥६॥ ह्रीं श्रीं ऐं चामुण्डायै विच्चे ॥७॥ ऐं क्लीं ह्रीं चामुण्डायै विच्चे ॥८॥ क्लीं ह्रीं ऐं चामुण्डायै विच्चे ॥९॥ ऐं ह्रीं श्रीं चामुण्डायै विच्चे ॥१०॥ ह्रीं क्लीं ऐं ॐ चामुण्डायै विच्चे॥११॥

कामना भेद से नवार्ण मंत्र निम्न प्रकार से भी प्रयोग में आते हैं।

ऐं ह्रीं क्लीं चामुण्डायै विच्चे (सरस्वती प्रधान) **॥१२॥ ह्रीं क्लीं ऐं चामुण्डायै विच्चे** (लक्ष्मी प्रधान) **॥१३॥ ह्रीं ऐं क्लीं चामुण्डायै विच्चे** (माया प्रधान) **॥१४॥ क्लीं ऐं ह्रीं चामुण्डायै विच्चे** (आकर्षण प्रधान) **॥१५॥ क्लीं ह्रीं ऐं चामुण्डायै विच्चे** (काली प्रधान) **॥१६॥**

नवार्ण महामंत्र- ऐं ह्रीं महादुर्गे नवाक्षरि नवदुर्गे नवात्मिके नवचण्डि महामाये महामोहे महायोगनिद्रे जये मधुकैटभ विद्राविणि महिषासुरमर्दिनि धूम्रलोचनसंहत्रि चण्डमुण्ड विनाशिनि रक्तबीजान्तके निशुंभविध्वंसिनि शुंभदर्पघ्नि देवि अष्टबाहुके कपाल खट्वाङ्ग शूल शंख खड्ग खेटक धारिणि छिन्नमस्तधारिणि रुधिर मांस भोजिनि समस्तभूतप्रेतादि योग ध्वंसिनि ब्रह्मेन्द्रादिस्तुते देवि मां रक्षय रक्षय मम शत्रून् नाशय नाशय ह्रीं फट् हूं फट् ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे ॥१२॥ इत्यादि अनेकभेदाः।

॥ अथ नवार्ण मंत्र जप विधि ॥

तंत्र क्रिया व कामना भेद से नवार्ण मंत्र १२-१३ तरह के हैं। ***सप्तशती में जो मूल मंत्र है वह नवाक्षर है। ॐ लगाने से दशाक्षरी हो जाता है,*** किन्ही किन्ही आचार्यो के मत से किसी मंत्र में प्रारंभ में प्रणव या नमः लगाने से मंत्र में नपुंसक प्रभाव शुरु हो जाता है, बीजाक्षर प्रधान है। तांत्रिक प्रणव "**ह्रीं**" हैं। अतः माला के जप में प्रारंभ में "ॐ" लगावे तथा जब माला पूरी हो जावे तो माला के अंत में "ॐ" लगाये यही **मंत्र जाग्रति** हैं। दक्षिण भारत में दसपदा, दसवक्त्रा मानकर दशाक्षरी मंत्र जपते हैं। नवार्ण मंत्र षड़ाम्नाय युक्त है, षड़ाम्नाय मंत्र होने से सभी चतुर्विध कार्यों में ग्राह्य है। अगर मंत्र सिद्ध नहीं हो रहा हैं, विपत्ति, परेशानियाँ आती है तो "**ऐं**" के सवालाख "**ह्रीं**" के सवा लाख "**क्लीं**" के सवा लाख "**चामुण्डायै विच्चे**" के सवा लाख जप करायें फिर नवार्ण का पुरश्चरण करायें, ऐसा कराने से हमने सफलता देखी है। इसके बाद भी संघर्ष रहता है तो लोम विलोम मंत्र का पुरश्चरण करें, व्याहृतीयों का लोम विलोम संपुट लगाकर जप करें। अन्य कई क्रियायें हैं जो साधना विषय में आती हैं, गुरु गम्य हैं।

विनियोग :- **ॐ अस्य श्री नवार्ण मंत्रस्य.ब्रह्मविष्णुरुद्रा ऋषयः गायत्र्युष्णिगनुष्टुप् छन्दांसि श्रीमहाकाली महालक्ष्मी महासरस्वत्यो देवताः नन्दा शाकम्भ्री भीमाः शक्त्यः रक्तदंतिकादुर्गा भ्रामर्यो बीजानि, अग्नि वायु सूर्यास्तत्त्वानि, ऋग्यजुः सामानि स्वरूपाणि, ऐं बीजं, ह्रीं शक्तिः, क्लीं कीलकं श्री महाकालीमहालक्ष्मी महासरस्वती स्वरूपा त्रिगुणात्मिका श्री महादुर्गा देव्या प्रीत्यर्थे श्री दुर्गासप्तशती पाठांगत्वेन जपे विनियोगः।**

ऋष्यादिन्यास :- **(१) ब्रह्म विष्णु रुद्रा ऋषिभ्यो नमः शिरसि। (२) गायत्र्युष्णिगनुष्टुप् छन्दोभ्यो नमः मुखे। (३) श्री महाकाली महालक्ष्मी महासरस्वती देवताभ्यो नमः हृदि। (४) ऐं बीज सहिताय रक्तदंतिका, दुर्गायै, भ्रामरी देवताभ्यो नमः लिङ्गे (मनसा)। (५) ह्रीं शक्ति सहिताय नन्दा शाकम्भरी भीमा देवताभ्यो नमः नाभौ। (६) क्लीं कीलक सहितायै अग्नि वायु सूर्य तत्वेभ्यो नमः गुह्ये** (लिंग मूल के ऊपर एवं छोटी आंतों के बीच का भाग)। **(७) ऋग्यजु साम स्वरूपिणी श्री महाकाली महालक्ष्मी महासरस्वती देवताभ्यो नमः पादौ। (८) श्री महादुर्गाप्रीत्यर्थे जपे विनियोगः सर्वाङ्गे। ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे-** मंत्र पढकर शुद्धि करें॥

नवार्ण कराङ्ग न्यासः - '**करन्यास क्रिया** से मूल मंत्र की ऊर्जा को हाथों में स्थापित कर उन्हें ओजमय बनाया जाता हैं। यथा तर्जनी अंगुली इंगित करने के काम आती हैं अतः पहिले तर्जनी से अंगूठे में ऊर्जा स्थापित करते हैं (**ॐ अंगुष्ठाभ्यां नमः**) अंगुष्ठ बुद्धिका केन्द्र है। अतः उस शक्ति का सहस्त्रार से सम्बन्ध बनता है फिर अंगुष्ठ से उर्जा को अन्य अंगुलियो में स्थापित करते हैं। अब संपूर्ण हाथों के शुद्ध होने पर पांचों अंगुलियों से आकर्षिणी शक्ति माध्यम से शरीर के अन्य अंगो में ऊर्जा स्थापित करने के लिये हृदयादि न्यास करते हैं।

आगच्छवरदे देवि त्रिपुरे श्रीपरेश्वरि। घटमध्ये समायाहि पूजये शारदीयकम्। कुरण्टक पुष्प, कुंदपुष्प, शोहलधूप, रक्तवर्तिका दीप, फेनपक्वान्न, मत्स्य, साखोट फल, कूष्टौषधि अर्पण करें। पंचवर्षात्मिका कन्या की '**वसुन्धरा**' तथा सुवासिनी की **करालिनी** नाम से पूजा कर पूर्ववत् पूजा समापन करे। मध्याहन् में '**कुलगणपति**' गणेश पूजन तथा दुर्गा का **चण्डा** नाम से आवाह्न करे पूजा करें। वकुलपुष्प, कर्पूरधूप, दध्योदन, सफेद सरसों वराहमांस, सूक्ष्मेलौषधि छागादि बलि प्रदान करे। सायंकाल में '**उच्छिष्टगणपति**' की पूजा करे। उत्तराम्नाय से दशानना श्री गुह्यकाली की भरतोपासिता महाविद्या के न्यासादि तथा ध्यान कर पूजा करे।

ॐ उत्तराम्नाय संपूज्ये श्रीमत् सिद्धिकरालिके। घटमध्ये समायाहि तिष्ठ श्रीगुह्यकालिके ॥ पंचम्यामद्य देवि त्वां सायाह्ने पूजयाम्यहम्॥ गुह्येश्वर सहित सावरण पूजा कर पूर्ववत् कर्म समापन करे।

॥ षष्ठी कृत्य ॥

पूर्ववत् गणषोढान्यास करके महागणपति पूजा करे। त्रिपुरामालिनी के न्यास ध्यान करे। सर्वरक्षाकर १० दल चक्र की पूजा करे।

ॐ त्रिपुरामालिनि परे षष्ठिके ब्रह्मरूपिणि। आगच्छागच्छ वरदे पूजां तुभ्यं करोम्यहम्॥ षड्वर्षात्मिका कन्या की '**सरस्वती**' तथा सुवासिनीं की '**इच्छा**' नाम से पूजा करे। गोरोचन चंदन, रूपकेशरपुष्प, विचित्र पुष्प, बालधूप, कुंकुमाम वर्तिका, दध्योदन, शल्ल की मांस, मधुपात्र, वंशरोचन औषधी से पूर्ववत् कर्म समापन करे। मध्याह्न में '**कुलगणपति**' का पूजन कर '**चण्डवती**' के न्यासादि कर पूजा कर काश पुष्प, गुग्गल धूप, पूख, वराहमांस, येपानिका ब्रीहि जातीफल, छाग कूष्माण्ड बलि प्रदान करे। सायंकाल में '**विरञ्चिगणपति**' की पूजा कर पूर्वाम्नाय से **भुवनेश्वरी** की पंचाक्षरी विद्या के न्यास ध्यान कर पूजा करे।

भुवनेश्वरि भो मातः पूर्वसिंहासनेश्वरि। षष्ठयां सायाह्नकालेऽस्मिन् पूजां तुभ्यं करोम्यहम्॥ घटमध्ये समायाहि मूलप्रकृति रूपिणि॥

सदाशिव सहित आवारण पूजा करे। षष्ठी, सप्तमी अथवा अष्टमी जिस दिन मूल नक्षत्र हो उस दिन यंत्र लिखकर या कलश के वाम भाग में सरस्वती का आवाहन करे।

॥ सप्तमी कृत्य ॥

सप्तम दिन प्रातः सप्तम गण षोढान्यास करके '**महागणपति**' पूजन करे त्रिपुरासिद्धा के न्यास कर श्रीयंत्र के सर्वरोगहर अष्टदल चक्र के आवरण देवताओं का पूजन करें।

आगच्छ त्रिपुरासिद्धे वशिन्याद्य समन्विते। सर्वरोगहरे चक्रे तिष्ठ त्वां पूजयाम्यहम्॥ देवी पूजा करे। रक्तयज्ञोपवीत, रक्तचंदन, बंधूकपुष्प, जातिपुष्प, महाधूप, रक्तवर्तिका, रक्तोदन नैवेद्य, मृगमांस, रक्तपात्र, कदलीफल, कुरंटब्रीहि, वंशरोचन अर्पण करें। सप्तवर्षीयात्मिका कन्या की **'रमा'** तथा सुवासिनी की **'ज्ञाना'** नाम से पूजा कर पूर्ववत् कर्म समाप्त करे। मध्याह्न में **'कुलगणपति'** का पूजन कर **'चण्डरूपा'** देवी का नीलकमल पुष्प से अर्चा करे, बलिप्रदान करें। अपराह्न में नवपत्रिका (कदली, दाडिमी, धान्य, हरिद्रा, मानक, कचि, बिल्व अशोक तथा जयन्ती) का जय दुर्गा मंत्र से प्रोक्षण कर प्रधान घट पर रख **कर्म कुब्जिका** की पूजा करें। रत्नादियुत घट से देवि का महाभिषेक कर अधिवासन करे। **क्षिप्रप्रसाद गणेश** की पूजा कर उपम्नाय से नवार्णमहाविद्या का न्यास ध्यान सहित पूजन करे।

ॐ आरोपिताऽसि चामुण्डे मृण्मये श्रीफलेऽपि च। स्थिरीभूत्वा तु सततं गृहे त्वं कामदा भव॥ नवपत्रिकाओं में शारदा का पूजन करे। अधिवासन समय शय्या, जलपात्र, भोजन, ताम्बूल, वस्त्रादि देवी के अर्पण करें।

मूलमंत्र युक्त प्रार्थना करे- (विशेष पूजा विधान कात्यायनी मत में देखे) **यज्ञभागान् गृहाण त्वं सर्वाभिः शक्तिभिः सह। शारदीयामिमां पूजां ग्रहीतुं तमिहागता॥** पश्चात् दुर्गा के १५ आयुधों का पूजन करे। ध्वजा छत्र चामर घण्टा समर्पित कर छाग कूष्माण्ड बलि देवे।

॥ अष्टमी कृत्य ॥

नित्य की तरह प्रातः अष्टम गण षोढान्यास कर **महागणपति** का पूजन करे। महाषोडशी का न्यासादि ध्यान कर त्रिपुराम्बा का आवाहन करे। देवी के महास्नान हेतु हो सके तो भूमण्डल पर सिन्दूर से त्रिकोण में १४ दल तक श्री यंत्र बनाये। उसमें अलग अलग आवरणों में छोटे छोटे कलश रखे। १४ दल चक्र वाले कलश में, नदी संगम जल, गंगोदक, शंखोदक, उष्णोदक, चतुस्मोदक, शीतसोदक पंचगव्य व पंचामृत डाले। १० दल चक्र कलश में पंचामृत पुष्पोदक, कुशोदक, फलोदक, गन्ने का रस, नारिकेलोदक, पुनः दूसरे १० दल चक्र कलश में गजदंत व सूअरदंत का प्रक्षालित जल, मृत्तिका जल, सुवर्ण एवं रत्नोदक, सर्वोषधिमिश्रित जल, कस्तूरी, हरिद्रा, केसर, कर्पूर, श्रीखण्डमिश्रित जल, गंधोदक, गोरोचनोदक। अष्टकोण कलश में गंगाजल, वर्षा का जल, समुद्रोदक, पद्मकेशर मिश्रितोदक, सरोवर, झरना व तीर्थ जल डाले।

दुर्गा विधान से पूजा करें तो दुर्गा यंत्र बनाकर आवरण स्थानों में कलश रखें।

त्रिकोण में सुधापूर्ण कलश रखे। अलग अलग राग रागिनियों से अमृतोभिषेक करे जैसे- मालवराग व विजय वाद्य सहित गंगाजल से, ललितराग व देववाद्य से वर्षा जल द्वारा, विभासराग व दुन्दुभिवाद्य से वाग्मती जल से। भैरवराग तथा अमरवाध से समुद्रोदक से। केदाराराग व इन्द्राद्यभिषेक वाद्य से पद्मरेणूदक। वैराटीराग व शङ्खवाद्य से झरने के जल से। वसन्तराग व पंचशब्द वाद्य से तीर्थोदक से। धानुषीराग व विजय वाद्य से सरोवर जल से। भैरवीराग तथा सर्वविजय वाद्य से सुधापूर्ण कलश में स्नान अभिषेक कराये। स्नानवेदी से उठाकर यंत्र व मूर्ति को प्रधान पीठ पर रखे। सर्वसिद्धिप्रद त्रिकोण चक्र में त्रिपुराम्बा का आवाहन करे।

आगच्छ मदगृहे देवि सहशक्तिभिरष्टभि। पूजां गृहाण विधिवत् सर्वकल्याण हेतवे॥

सुगंधितद्रव्यों से पूजा अर्चा करे जातिपुष्प, कर्पूररसमाला, कृष्णागरु धूप, रक्तवर्तिका दीप, क्षीरान्न, यकृन्मांस, इक्षु, कलिङ्गफल कज्जल विशेषतः अर्पण करे। खड्ग छुरिका, कटार पंचवाण इक्षुचाप, कुन्त, शूल, चर्म, पाश, अंकुश एवं तुला इन ११ आयुधों की स्वबीजमंत्र से पूजा करे। यथा- **खं खड्गाय नमः**। अष्टवर्षात्मिका कन्या की **'गौरी'** तथा सुवासिनी की **'क्रिया'** नाम से पूजा कर पूर्ववत् समाप्त करे।

मध्याह्न में '**अतिचण्डिका**' का पूजन करे। बन्धूक पुष्प अष्टांग धूप अर्पण कर पूजाविधान कर छाग कुष्माण्ड बलिप्रदान करे। पूर्व में गणपति का '**कुलगणपति**' नाम से पूजन करे। सायंकाल में '**विघ्नगणपति**' की पूजाकर '**महाकुब्जिका**' का न्यास ध्यान युक्तपूजन करे।

ॐ ॐ ॐ ॐ ॐ अवतीर्य क्रमान्तस्था मण्डलोर्ध्वे तु पङ्कजे। त्र्यस्त्रासन समारूढां सिद्धकूटेन संस्थिताम्॥ वक्त्रान्ते दूतीसंयुक्तां आयुधै समलंकृताम्। आराधये महादेवीं सर्वेषां सर्व संस्थिताम्॥ या सा परापरा शक्तिः खगस्था खस्वरूपिणी। सोमसूर्यपदान्तस्था आयान्तु इह मण्डले॥ गृहाण मतकृतां पूजां पश्चिमाम्नाय नायिके॥

कुब्जिकेश्वर सहित आवरण पूजा कर कर्म समापन करे। रात्रि में **उग्रचण्डा** विधान से पूजा करे। कुलगणपति का सावरण पूजा विधान करे। बिल्वपत्र द्रोणपुष्प, करवीरपुष्प, पद्ममाला, जपाकुसुम, कुमुदपुष्प व गुग्गुल धूप पक्वान्नादि अर्पण कर विविध फल अर्पण करे। आनंदकलश (सुधाकलश) में अष्ट दिशाओं में असिताङ्गादि अष्टभैरव तथा मध्य में आनंद भैरव का पूजन करे। देवि तथा भैरव के लिये छाग कूष्माण्ड बलि प्रदान करे।

॥ नवमी कृत्य ॥

नित्य पूजा की तरह नवम् गण षोढ़ान्यास करके महागणपति का पूजन कर। दुर्गायंत्र में बिन्दु में दुर्गा का तथा श्रीयंत्र के बिन्दु मध्य में त्रिपुरभैरवी का न्यास ध्यान युक्त पूजन करे। **आगच्छ मद्गृहेदेवि त्रिपुरे भैरवीश्वरि। गृहाण मत् कृतां पूजां नवम्यां परमेश्वरि॥** सुगंधितद्रव्य सेफालिका व जपापुष्प अर्पण करे। कपिधूप, रक्तवर्तिकादीप, पक्वान्न, हिंगुऔषधि जातीफल इत्यादि अर्पण कर पूजा करे। छाग माँस अर्पण करे। श्री यंत्र में परापर रहस्य योगिनियों की आवरण पूजा करे। नववर्षात्मिका कन्या की '**दुर्गा**' व सुवासिनी की भी 'दुर्गा' संज्ञा से पूजा करे। कुरु कुल्लादि देवियों का आचार्य द्वार मध्य में बैठकर विसर्जन करे। '**मध्याह्न**' में '**महोग्रचण्डा**' का न्यास ध्यान कर पूजा करे। मन्दारपुष्प महाधूप पक्वान्न वराह मांस, रूपकेशर अर्पण करे, पक्वान्न, वराहमांस, छागमांस कुष्माण्डादि अर्पण कर बलि प्रदान करे। 'सायंकाल' में **महागणपति** का पूजन कर उर्ध्वाम्नाय से श्री महाषोडशी महात्रिपुरसुंदरी का न्यास ध्यान कर पूजन करे।

ॐ ११ महापद्मवनान्तस्थे कारणानन्द विग्रहे। सर्वभूतहिते मातरेह्येहि परमेश्वरि॥

कामेश्वर सहित श्री यंत्र का चक्रार्चन कर पूजा समापन करे। शिवा बलि देवे।

॥ दशमी कृत्य ॥

प्रातः दशमगण षोढान्यास कर महागणपति पूजन करे। घट में कामेश्वर सहित कामेश्वरी श्री यंत्र आवरण देवताओं का पूजन करे, सभी शक्तियों का घटमध्य में विलीन होने की भावना करे।

ॐ रश्मिरूपा महादेव्या ह्यत्र पूजित देवताः। सुन्दर्यङ्गे विलीनास्ताः सन्तु सर्वाशुभावहाः॥ षोडशवक्त्रा अष्टोत्तरभुजा श्रीमन्निर्वाण महात्रिपुरसुंदरी का ध्यान कर श्री विद्या की सर्वाधिकार विद्या निर्वाणविद्या के साथ लघु साम्राज्य मेधा के दशकूटा षोडशी मंत्र से पूजाकर सहस्राक्षरी मंत्र से पुष्पांजलि समर्पण करे। मूलबिन्दुचक्र में परापरातिरहस्य योगिनी स्वरूपिणी महात्रिपुरसुंदरी के चारों ओर मोक्षसिद्धि सर्वत्रिखण्ड मुद्रा से पूजा करे। कौलकुलाचारानुसार चक्र पूजा करे, छाग कूष्माण्ड बलि देवे। देवताओं का विसर्जन करे। अपराजिता पूजा भी सायं करे। आश्विन शुक्ल त्रयोदशी के दिन यज्ञवेदी आदि भूमण्डलों का विसर्जन करे।

॥ कात्यायनी कल्पोक्त नवरात्र विधानम् (प्राणतोषणी तंत्रे) ॥

घट स्थापन प्रतिपत् को करे, द्वितीया को पुस्तक पूजन, तृतीया को खड्ग पूजा चतुर्थी को केश शोधन। पंचमी को सूर्य बिम्ब में पूजा, षष्ठी को बिल्वमूल में पूजा, सप्तमी को सप्त या नवपत्रिका पूजन करे। अष्टमी को मूर्तिपूजा, नवमी को बलिदान दशमी को विसर्जन करे।

पूजाप्रकारोऽपि तत्रैव नन्दायां पूजयेत् कुम्भे द्वितीयायां च पुस्तके ।
तृतीयां तथा खड्गे चतुर्थ्यां केशशोधनं । पञ्चम्यां सूर्यबिम्बे च षष्ठ्यां विल्वस्य मूलके ।
सप्तम्यां पत्रिकायां तु अष्टम्यां प्रतिमासु च । ज्येष्ठानक्षत्रयुक्तायां षष्ठ्यां विल्वाभिमन्त्रणं ।
मूलाद्यपादे सप्तम्यां पत्रिकायाः प्रवेशनं । पूर्वाषाढ़ायुताष्टम्यां देवी पूज्या महोत्सवैः ।
उत्तरेण नवम्यांतु बलिभिः पूजयेच्छिवां । श्रवणान्ते दशम्यां तु प्रणिपत्य विसर्जयेत् ।

॥ षष्ठी कृत्य ॥

नित्य पूजा कर सायंकाल बिल्ववृक्ष के समीप जाये। उत्तराभिमुख हो पीठ का निर्माण करे। पंच देवों को नमस्कार करे। त्र्यम्बक मंत्र से वृक्ष को स्नान कराये, क्षीर, पंचगव्य एवं पंचामृत से स्नान कराये। त्रिगुण या पंचगुणसूत्र से वेष्टन करे। दक्षिणावर्त से पांच जगह व्रीही रखें।

संकल्पः- **अद्यामुके मास्यमुके पक्षे एतस्मिन् पुण्यप्रदेशे भवन्तमम्बिकाशिवयो प्रियतरं शाण्डिल्य गोत्रं बिल्ववृक्ष अमुकगोत्रोऽमुक देवशर्मा अमुककामनया अभिन्नवृन्तफल युगलशाखां दुर्गास्वरूपतः पूजार्थे नेतुं नक्तमेभिरम्यर्च्य वृणे।** वृक्षमूल में फल माला समर्पण करे। वेदी के उत्तर में गणेश, पूर्व में चण्ड, दक्षिण में प्रचण्ड, पश्चिम में वेताल की पूजा करें। बिल्ववृक्ष में महिषमर्दिनी का ध्यान कर मूल मंत्र से पूजा करे।

महारजतसङ्काशां पूर्णचन्द्रनिभाननां, नानारत्नसमाकीर्णां कङ्कणैः कटकैरपि ।
विभ्राजमानां दशभिर्बाहुभिः सुमनोहरैः, शरदम्भोजसङ्काश विकाशिमुखपङ्कजां ।
इन्दीवराभैर्विषमै र्लोचनैस्त्रिभिरुत्तमैः, विद्योतयन्तीं नयनैरुद्दामद्युतिदामभिः ।
त्रिशूलं करवालं च चक्रं वाणं च शक्त्यपि, चिन्तयेद् वामभागे तु खेटकं पूर्णचापकं ।
पाशांकुशं च परशुं ज्वालामालोपशोभितं, ऊर्ध्वपादं वामपादं महिषोपरिसंस्थितं ।
माहिषं छिन्नशिरसमधस्तात् परिचिन्तयेत्, खड्गचर्मधरं तत्र समुद्भूतं महासुरं ।

मूलमंत्र से आवाहन कर पाद्यादि अर्पण कर अङ्ग पूजा करे। पूर्वादिक्रम से पत्रमूल में **जयन्ति मंगला काली....**इत्यादि शक्तियों का अर्चन करे, पत्र मध्य में अष्टभैरव तथा पत्र के अग्रभाग में ब्रह्मादि देवों की अर्चा करे। वृक्ष के मूल व अग्रभाग में बेतालादि की पूजा करे-

वेतालं मणिभद्रं च यक्षकं च तथैव च। त्रिपुरान्तकं समाख्यातं कण हेतुकमेव च अग्निजिह्वरसं चैव गन्ध पुष्पैः समर्चयेत। नवग्रह इत्यादि की पूजा कर इन्द्रादिदिक्पाल व उनके अस्त्रों की पूजा करे। होम विधान कर बलि प्रदान करे। बिल्ववृक्ष बोधन करे।

ऐं रावणस्य बधार्थाय रामस्यानुग्रहाय च। अकाले ब्रह्मणा बोधो देव्यास्त्वयि कृतः पुरा ॥
अहमप्याश्विने मासि ततस्त्वां बोधयामि ते। षष्ठ्यां नक्षत्र युक्तायां सायाह्ने बोधयामि ते ॥

छठे नक्षत्र का अर्थ कृष्णपक्ष में आर्द्रा नक्षत्र में बोधन से भी है।

श्री शैलशिखरे जातः श्रीफलः श्रीनिकेतनः। नेतव्योऽसि मयागच्छ पूज्यो दुर्गास्वरूपतः ॥
अशेष सुख लाभाय नारीविभव हेतवे। नेतव्यः स्वोदिते गेहे सर्वकामप्रदो भव ॥

युग्मफल अभावे युग्मपुष्प शाखा ग्रहण कर पूजा करे।

नमस्ते बिल्ववृक्षाय सर्वकामप्रदाय च। दातव्यं स्वोदिते हस्तं पूजनीयं फलद्वयं ॥
महादेवप्रियोऽसि त्वं श्रीवृक्ष सर्वकामदः। दुर्गायज्ञ निमित्तार्थं शाखामेकं प्रयच्छ मे ॥

कुश पुष्प अक्षत दुर्वा फल अर्पण करे, शंख से अर्घ देवे, सरसों छिड़के, युग्यवस्त्र से वेष्टन करे।

॥ सप्तमी कृत्य ॥

सप्तमी को प्रातः काल बिल्ववृक्ष की अर्चा करे, कटार से १२ या ६ अंगुल की शाखा काटे।

मंत्र - ॐ छिन्धि-छिन्धि छेदय छेदय ॐ स्वाहा।

थाली या पात्र में पत्रिका रखे। तत्र चालन मंत्र - **ॐ चल चल चालय चालय शीघ्रं मंदिरं प्रविश पूजालयं स्वाहा।**

छेदन करते समय अदीक्षित व स्त्री की दृष्टि नहीं पड़नी चाहिये। पत्तिया छोटी व छिद्रयुक्त नहीं होनी चाहिये इससे दरिद्रता आती हैं। यदि छेदन काल या स्थापित करते समय पत्तियां व शाखा टूट जाये तो दुःख व मरण होता हैं अतः प्रायश्चित्त करे। मंदिर पर तोरणमाला, आम्रपत्र पुष्पमाला द्वार पर लगाये। दो घट प्रवेश समय द्वार पर स्थापित करे लालवस्त्र लपेटे, आम्रपत्र, दर्भा घट में लगाये। पार्श्व भागों में दो दीपक जलावे। स्त्रियां मंगलगान गावे। कटुत्रय व लवण युक्त व्यंजन का भोग लगावे। गृह के आंगन में स्नान वेदी पर वस्त्रादि बिछाकर उन पर बिल्वशाखा रखे। प्रांतभेद से सप्त या नवपत्रिका का पूजन करते हैं।

यथा- **माणदिंश्चैव श्रीशैले धान्यादिं मलयेगिरौ। क्रमुदादिं सागरान्ते कच्ची चैकाम्रकादिके। रम्भादिं गौड़े वङ्गे (बंगाल) च कौमारे कालरूपके।**

प्रतिपीठे यजेद वापि लक्ष्मी कामेन सुंदरि। रम्भा (केला) कच्ची (दारुहल्दी) हरिद्रा च जयंती (मेहंदी) बिल्व, दाड़िमी (अनार) अशोको माणकश्चैव (अमलतास) धान्यादि नवपत्रिका। हरिद्रा व धान्य विना मूल के ग्रहण करे। रामरम्भा समूल नहीं लेवे। राज्यरंभा, श्वेतरम्भा, सुगंधिनी ग्रहण करे वीजरम्भा (फलवाली) का त्याग करे। ३ पुत्र, एक पुत्र या मृतवत्सा के घर से ग्रहण नहीं करे। शङ्ख से स्नान कराये। दंत काष्ठ रखे। नवार्ण व दशाक्षर से पंचगव्य, पंचामृत, तीर्थोदक, सुगंधित उष्णोदक, सितोदक तीर्थोदक से स्नान कराये। वेदी के ईशान में पत्रिकायें स्थापन करे। मध्य में विल्वशाखा रखें। रम्भामूल विष्णुकांता तीनोंलताओं का वेष्टन करे। पीत वस्त्र से वेष्टन करे। कुमारीयां मंगलगान करे। यात्रा प्रवेश समय बलिकर्म करे फलादि अर्पण करे एवं स्वागत करे।

ॐ शारदीयामिमां पूजां गृहाण त्वमिहागता। स्वगतं ते महादेवि विश्वेश्वरि नमोऽस्तुते ॥
धन्योऽहं कृतकृत्योऽहं सफलं जीवितं च नः। आगताऽसि यतो दुर्गे माहेश्वरि ममाश्रमम् ॥
अर्घ्यमन्त्रं फलं पाद्यं मलयवासिनि! गृहाण वरदे देवि कल्याणं च प्रदेहि मे ॥
चण्डिके चण्डरूपे त्वं सर्वकामप्रदे शुभे! गृहाणार्घ्यमिदं भद्रे आगच्छ मम मंदिरं ॥

गृहीत्वा शारदीं पूजां मर्त्यमण्डलमागता । चण्डिके त्वां नमाम्यद्य पुष्पमर्घ्यं प्रगृह्यतां ॥
चण्डि त्वं चण्डारूपाऽसि सुरतेजो महाबले। प्रविश्य तिष्ठ मद्‌गेहे यावत् पूजां करोम्यहम् ॥

सामान्यार्घ्य स्थापन करे। गणेश मातृका नवग्रह दिक्पाल पूजन करे। मूल मंत्र से सूर्य के अर्घ्य देवे। रक्त चंदन कुंकुम से पूजा कर मनसा ध्यान करे।

जटाजूट समायुक्तामर्द्धेन्दुकृत शेखरां । नवयौवनसंयुक्तां सर्वाभरणभूषितां ।
त्रिनेत्रां पूर्णवदनां महिषासुरमर्दिनीं । त्रिशूलं च तथा चक्रं खड्गं वाणं तथैव च ।
दक्षिणे च तथा शक्तिं वामतः खेटकं धनुः । पाशांकुशं च घण्टां च नागहारगरीयसीं ।
अधस्तान्महिषं तद्वद्विशिरस्कं प्रदर्शयेत् । शिरश्छेदोद्‌भवं तद्वद् दानवं खड्गपाणिनं ।
हृदि शूलेन निर्भिन्नं निर्यदन्त्रविभूषितं। देव्यास्तु दक्षिणं पादं समं सिंहोपरिस्थितं ।
किञ्चिदूर्ध्वं तथा वाममंगुष्ठं महिषोपरि ।

तोरण के अर्घ्य देवे। मातृका कलामातृका न्यास करे। मधुयपर्कादिकाशोधन कर। दुर्गागायत्री से आठ बार रक्षण करे **ॐ दुर्गायै विद्महे नारायण्यै धीमहि धियो यो नः प्रचोदयात्।** सामान्यर्घ्यपात्र से पूजा सामग्री का प्रोक्षण करे।

ईशान में गणेश व गुरुचतुष्ट्य- गुरु परमगुरु परात्परगुरु परेमेष्ठी गुरु का पूजन करे। वेदी के या यंत्र के पूर्वादि ४ दिशाओं रक्त, श्याम, हरित व नील आभा वाले धर्म, ज्ञान, वैराग्य एवं ऐश्वर्यादिका पूजन करे। आग्नेयादि चार कोणों में धूम्र, कनकविद्युत्, कृष्ण एवं पीतवर्ण के अधर्म, अज्ञान, अवैराग्य एवं अनैश्वर्य का पूजन करे। द्वारपार्श्व में शूलखट्वाङ्ग व श्वेत भुजङ्ग को धारण करने वाला कृष्णलोचन रक्तपीत वर्ण महाकाल कापूजन करे। नन्दि कापूजन करे। करालमुख पिङ्गोर्ध्व नेत्र वाले चण्डेश का पूजन करे। कूर्म एवं शिवारूढ़ा दो कमल वाली धारण किये हुये शरत् चन्द्र की आभावाली आधारशक्ति की पूजा करें, कूर्म की पूजा करे, ब्रह्मशिला की (मूर्ति के नीचे के आसन की शिला) पूजा करे।

पृथ्वी की पूजा करे-

अधश्चक्र धरं मूर्ध्नि धारयन्तं वसुन्धरा ।
तमालश्यामालाङ्गीं च नीलेन्दीवर लोचनाम् ॥
अभ्यर्चयेद् वसुमतीं स्फुरत् सागरमेखलाम् ॥

अष्टदल मध्य में नवकेशर की कल्पना करे उसमें भूः, भुवः, स्वः, सत्, रज, तम तथा अग्नि, सूर्य, सोम मंडल की पूजा करे। **ॐ वज्रनख दंष्ट्रायुधाय महासिंहाय हुं फट् स्वाहा** से सिंह की पूजाकरे। दुर्गा का आवाहन करे।

मधुपर्क प्रदान करें, अंगपूजा करें - **ॐ आवाहिताऽसि दुर्गे त्व मृणमय्यां श्रीफलेऽपि च। स्थिरा त्वं गृहिणी भूत्वा गृहे कामप्रदा भव॥**

एहि दुर्गे! महाभागे! पत्रिकां गृह्यतामियं। तव स्थानमिदं भद्रं शरणं त्वां नमाम्यहम्। त्वं देवि! जगतां मातः! सृष्टिसंहारकारिणि! पत्रिकासु समस्तासु सान्निध्यमिह कल्पय। आयुर्देहि धनं देहि यशो राज्यं च देहि मे। सन्तुष्टा चात्र मद्‌गेहे मनोऽभीष्टं प्रसाधय।

अष्टदल के पत्रों में '**रुद्रचण्डा, प्रचण्डा, चण्डोग्रा, चण्डनायिका, चण्डा, चण्डवती, चण्डरूपा एवं चण्डिका**

पूजन कर मध्य में उग्रचण्डा' का पूजन करे। सभी देवियां रक्तवर्ण की है। पीताम्बर धारण किये हुऐ नाना आभूषणों से सुसुज्जित हैं तथा वर अभय मुद्रा धारण किये हैं। अष्टदल के अग्रभाग में ब्राह्मी माहेश्वरी इत्यादि अष्टशक्तियों का पूजन करें।

॥ ध्यानम् ॥

दण्डं कमण्डलुं पश्चादक्ष सूत्रमथाभयम् । विभ्रती कनकच्छायां ब्राह्मी कृष्णाजिनाम्बरा ॥१॥
शूलं परश्वधं क्षुरं दुन्दुभिं चन्द्रशोभितम् । वहन्ती हिमसङ्काशा ध्येया माहेश्वरी सदा ॥२॥
अंकुशं दण्ड खट्वाङ्गं पाशं च दधती करैः। ध्येया बन्धूकसङ्काशा कौमारी कामदायिनी ॥३॥
चक्रं घण्टां कपालं च शङ्खं च दधती करैः। तमालश्यामला ध्येया वैष्णवी विद्युतोज्वला ॥४॥
मुषलं करवालं च खेटकं दधती हलम् । करैश्चतुर्भिर्वाराही ध्येया कालानलच्छवि. ॥५॥
अंकुशं तोमरं विद्यां कुलिशं विभ्रती करैः । इन्द्रनीलनिभेन्द्राणी ध्येया सर्वसमृद्धिदा ॥६॥
शूलं कपालं नृशिरः कृपाणं दधती करैः । मुण्डस्त्रङ्मण्डिता ध्येया चामुण्डा रक्तविग्रहा ॥७॥
अक्षस्त्रजं रक्तस्त्रवं कपालं नीलनीरजम् । वहन्ती हेमसङ्काशा व्याघ्रस्य चर्मणोज्वला ॥८॥
रक्ताक्षीं दण्डिकां चैव नृसिंहीं शिवदूतिकां। नारायणीं कालिकाख्यां मायां चैव तु भ्रामरीं ।
अरविन्दां विशालाक्षीं भीमां चैव सरस्वतीं। अपराजितां सोमलतां अनन्तां च कपालिनीं ।
भद्रकालीं च पुरत एताः षोडशनायिकाः । चतुर्भुजाः युवत्यश्च शङ्खचक्रगदांकुशाः ।
सर्वाभरणसन्दीप्ताः सिंहस्थाः शशिशेखराः । बालाद्यास्त्र्यक्षरेणैव सम्पूज्या रक्तविग्रहाः ।

कालीविलास तंत्र में लिखा हैं घट से अष्टादश भुजा देवी का आवाहन करे। पंच देवों के पूजन पश्चात् महिषमर्दिनी की पूजा करे। कार्तिक, जया, विजया, मयूर, मूषक, सिंह, महिष, गणेश, लक्ष्मी, सरस्वती, ब्रह्मादि का पूजन करे।

जया एवं कार्त्तिक देवी के वाम भाग में तथा विजया एवं गणेश की देवी के दक्षिण भाग ५ में पूजा करें।

अथ कार्तिकेय ध्यानमष्टादशपटले देवीपुराणे

सुतप्तकनकप्रेक्षं खड्गपट्टीधरं वरं।
सोष्णीष मस्तकं देवं मयूरवरवाहनं।
ब्रह्माण्डाभ्यन्तरे वीरं ब्रह्मविष्णुशिवात्मकं।

मंत्र - **ह्रीं गुहाय कार्त्तिकेयाय सेनान्ये स्वाहा।** कार्त्तिकेय के साथ उनकी शक्ति जया तथा वाहन मयूर का ध्यान करे।

॥ अथ जया ध्यानम् ॥

तप्त काञ्चनसङ्काशां द्विभुजां लोललोचनां । कटाक्षविशिखोपेतां दिगम्बरपरिच्छदाम् ।
दिव्याभरणसंयुक्तां ध्यायेत् सिद्धिप्रदायिनीं । ध्यात्वा पाद्यादिकं दत्वा सम्पूज्य प्रजपेन्मनुम् ।

मन्त्रस्तु-**ह्रीं ह्रीं जयायै ह्रीं ह्रीं**

॥ विजया ध्यानम् ॥

दलिताञ्जनसङ्काशा द्विभुजां खञ्जनेक्षणां । कटाक्षविशिखोद्दीप्तामञ्जनाञ्चित लोचनाम् ।
दिव्याम्बरपरीधानां नानारत्नविभूषितां। ध्यायेत् तां विजयां नित्यां सर्वसिद्धिप्रदायिनीम् ।

मंत्र - **ऐं शंभुवनिता ह्रीं ऐं॥**

॥ मयूरध्यानम् ॥

नानाचित्रविचित्राङ्ग! गरुड़ाज्जननं तव। अनन्तशक्तिसंयुक्ता !

कालाहिभक्षणं तव। गरुड़स्तवं महाभाग! अतस्त्वां प्रणमाम्यहम् ।

मंत्र - ह्रीं ऐं सुलोचनाय।

॥ मूषिकध्यानम् ॥

वृषाकार! महाभाग! वृषरूप! महाबल! कर्मरूप !
वृषस्त्वं हि गणेशस्य च वाहनं ।
नमस्करोम्यहं देव! पूजासिद्धिं प्रयच्छ मे ।

मंत्र-ह्रीं ह्रीं मूषिकं वनितां शम्भवाय॥

॥ सिंह ध्यानम् ॥

सिंहस्त्वं हरिरूपोऽसि स्वयं विष्णुर्न संशयः ।
पार्वत्या वाहनस्त्वं हि अतः पूजामि त्वामहं ।

मंत्र - ह्रीं ह्रीं सिंहाय महाबलाय ह्रीं ह्रीं॥ ह्रीं ह्रीं हें महिषाय हूंहूं ह्रीं ह्रीं।।

॥ गणेश ध्यानम् ॥

लम्बोदरं महाकायं गजवक्त्रं त्रिलोचनम् ।
सर्वदेवमयं देवं पार्वतीनन्दनं भजे।

॥ लक्ष्मीध्यानम् ॥

तप्तकाञ्चनसङ्काशां द्विभुजां लोललोचनाम् ।
कटाक्षविशिखोद्दीप्तामञ्जनाञ्चित लोचनाम् ।
शुक्लाम्बरपरीधानां सिन्दूरतिलकोज्ज्वलाम् ।
शुक्लपद्मासनगतां ध्यायेन्नारायणप्रियाम् ।

मन्त्र - ह्रीं क्लीं कमलवासिन्यै क्लीं ह्रीं॥

॥ सरस्वती ध्यानम् ॥

शङ्खेन्दुकुन्दसङ्काशां द्विभुजां पद्मलोचनाम् ।
कटाक्षविशिखोद्दीप्तां दिव्याम्बरपरिच्छदाम् ।
दिव्याभरणवेशाढ्यां वागूरूपां परमां भजे ।

मन्त्र - ह्रीं ऐं सरस्वत्यै ऐं ह्रीं।

॥ ब्रह्मध्यानम् ॥

तरुणादित्यसङ्काशं चतुर्वक्त्रं चतुर्भुजम्।
चतुर्वेदमयं वक्त्रं धर्मकामार्थमोक्षदम्।

॥ सावित्री ध्यानम् ॥

तप्तकाञ्चनवर्णाभां द्विभुजां लोललोचनाम्।

दिव्या भरण वेशाढ्यां दिव्याम्बर परिच्छदाम्।
सिन्दूर तिलकोद्दीप्ता मञ्जनाञ्चित लोचनाम्।

मन्त्र - ह्रीं सां सावित्र्यै सां ह्रीं।

॥ नवपत्रिकापूजन (मत्स्यसूक्ते) ॥

रंभा पत्रिका :- रम्भां च द्विभुजां पीतां शूलपुस्तकधारिर्णीं। पूजयेत् कामवीजेन मन्त्रेणानेन शङ्करि! दुर्गे! देवि! समागच्छ सानिध्यमिह कल्पय। रम्भारूपेण मे देवि! शान्तिं कुरु नमोऽस्तु ते ॥१॥ कच्वी पत्रिका :- खड्गशूलकुशधरमभयं दधती करैः। महिषासुर युद्धे त्वं कच्वीरूपासि सुव्रते! शक्रस्यानुग्रहार्थाय आगच्छ मम मन्दिरं ॥२॥

हरिद्रा पत्रिका :- मायावीजेन सा पूज्या हरिद्रामथ चिन्तयेत्। द्विभुजां पीतवसनां त्रिनेत्रां खड्गधारिर्णीं। महिषस्थां विशालाक्षीं अम्बरं वामहस्तके हरिद्रे! वरदे! देवि! उमारूपासि सुव्रते! मम विघ्नविनाशाय पूजां गृहण सुरेश्वरि ॥३॥

जयंती पत्रिका :- जयन्तीं रक्तवसनां पीतां च चण्डमालिनीं। शूलचक्रधरां चैव सर्वालङ्कारभूषितां। निशुम्भमथने चैव सेन्द्रैर्दैवगणैरपि। पूजितासि जयन्ति! त्वमस्माकं वरदा भव ॥४॥

बिल्व पत्रिका :- विपद्धन्त्रीं च द्विभुजां महावृषभवाहिनीं! श्वेतामभीतिवरदां गगने तु समर्चयेत्। महादेवप्रियकरः सर्वदेवरतः सदा। उमाप्रीतिकरो यस्मात् तस्मात् त्वां प्रणमाम्यहं ॥५॥

दाडिमि पत्रिका :- दाड़िमीपत्रिकां रक्तां रक्ताभरणभूषितां। रक्तवस्त्रधरां सौम्यामर्द्धेन्दुकृतशेखरां। चतुर्भुजां त्रिनयनां महिषोपरिसंस्थितां। खड्गचर्मधरां स्कन्धे वामेनोत्पलपुस्तिकां। मन्दरेणैव वीजेन बालाद्येन समर्चयेत्। सिद्धमन्त्रं पुरा जातं रक्तवीजस्य सम्मुखे। उमाप्रीतिकरं यस्मात् तस्मात् त्वां प्रणमाम्यहं ॥६॥

अशोक पत्रिका :- अशोकपत्रिकां रक्तां सिदूरारुणविग्रहां। वाणचापधरां सौम्यां पद्मस्थां नागवाहनां। हरप्रीतिकरो वृक्षो ह्यशोकः पापनाशनः। उमाप्रीति करस्त्वं हि मा...ोकं सदाकुरु ॥७॥ मान पत्रिका :- श्यामाङ्गीं माणपत्रीं च नीलनीरजधारिर्णीं। महिषस्थां त्रिनेत्रां च कन्यावीजेन चार्चयेत्। पत्रे वससि कौमारि! माणवृक्षेशचीप्रिये! मम चानुग्रहार्थाय पूजां गृह्ण यथासुखं ॥८॥

धान्य पत्रिका :- धान्यवृक्षे निमग्नां च द्विभुजां श्वेतविग्रहां। श्वेतपद्मोपविष्टां च वराभयकरां शुभां। श्रीवीजेन सतारेण पूजयेत् कमलाननां। जगत्प्राणहितार्थाय ब्रह्मणा निर्मितं पुरा। उमाप्रीतिकरं धान्यं शान्तिं कुरु नमोऽस्तु ते ॥९॥

जयन्ती इत्यादि देवियों का अर्चन कर दिक्पालों का अर्चन करे। कुमुद, उत्पल, पद्म, कुन्द, शेफालिका, जवाः, वकुल, तगर ये अष्टपुष्प अर्पण करे। मंत्र जपकर १०८ बार होम कर बलिदानादि कर्म करे। प्रार्थना करे-

ॐ कदलीतरु संस्थाऽसि, विष्णोर्वृक्षःस्थलाश्रये। नमस्ते नवपत्रि! त्वं, नमस्ते चण्डनायिके ॥
ॐ कच्वि! त्वं स्थावरस्थाऽसि, सदा सिद्धिप्रदायिनी। दुर्गारूपेण सर्वत्र, स्नानेन विजयं कुरु ॥
ॐ हरिद्रे! हररूपाऽसि, शङ्करस्य सदा प्रिये। रुद्ररूपेण देवि! त्वं, सर्वशान्तिं प्रयच्छ मे ॥

ॐ जयन्ति! जयरूपाऽसि, जगतां जयकारिणि ! स्नापयामीह देवि! त्वं जयं देहि गृहे मम ॥
ॐ श्रीफल! श्रीनिकेतोऽसि, सदा विजयवर्धन! देहि मे हितकामांश्च, प्रसन्नो भव सर्वदा ॥
ॐ दाडिम्यघ-विनाशाय, क्षुन्नाशाय सदा भुवि । निर्मिता फलकामाय, प्रसीद त्वं हरप्रिये! ॥
ॐ स्थिरा भव सदा दुर्गे! अशोके शोकहारिणि! मया त्वं पूजिता दुर्गे! मामशोक सदा कुरु ॥
ॐ मानो! मान्येषु वृक्षेषु, माननीयः सुरासुरैः । स्नापयामि महादेवि! मानं देहि नमोऽस्तु ते ॥
ॐ लक्ष्मीः! त्वं धान्यरूपाऽसि, प्राणिनां प्राणदायिनी ! स्थिरात्यन्तं हि नो भूत्वा, गृहे कामप्रदा भव ॥

स्तोत्रंदुर्गां शिवां शान्तिकरीं ब्रह्माणीं ब्रह्मणः प्रिया । सर्वलोकप्रणेत्रीं च प्रणमामि सदाऽम्बिकां ।
मङ्गलां शोभनां शुद्धां निष्कलां परमां कलां । विश्वेश्वरीं विश्वमातां चण्डिकां प्रणमाम्यहं ।
ईशानमातरं देवीं सर्वलोकभयापहां । ब्रह्मेशविष्णुनमितां प्रणमामि सदा उमां ।
विश्वस्थां विश्वनिलयां दिव्यस्थाननिवासिनीं । योगिनीं योगमातां च चण्डिकां प्रणमाम्यहं ।
ईशानमातरं देवीमीश्वरीमीश्वरप्रियां । प्रणतोऽस्मि सदा दुर्गां संसारार्णवतारिणीं ।
य इदं पठति स्तोत्रं श्रृणुयाद् वापि भक्तितः । स मुक्तः सर्वपापेभ्यो मोदते दुर्गया सह ।

गीत मंगलगान जप घोष करे। कथा श्रवण करें। सायं स्नान करके पश्चिमामुख होकर "**हंस मंत्र**" से देवी का पूजन करे।

॥ अष्टमी कृत्य ॥

प्रातः काल नदी स्नान करे। सूर्य के अर्घ्य देवे। तीन प्रहर व अर्द्धरात्रि में देवीपूजा करे। ब्राह्मण अपनी गोत्र से तर्पण करे। देवी स्नान यथा क्रम से कराये।

जल से हृदय स्नान **ॐ चण्डिकायै स्वाहा, ॐ गां गौर्यै हृदयाय नमः** क्षीर से। **ॐ ऐं नेत्राभ्यां सर्वतो हृदयान्तकः** पंचगव्य से। **ह्रीं यं हृदयार्णं** शर्करा से। **ॐ ह्रीं गिरिशे** तथा मधुमंत्र से मधुस्नान। **ह्रीं शिखायै नमः** पानी से स्नान करे। **ॐ ईं भद्रकाली कवचाय हुं** तथा दधिमंत्र से। **ऐं ह्रीं गौर्यै नमः से उष्णोदक** स्नान कराये। गुड़, घृत, इक्षु रस से स्नान कर तथा नवार्ण वा दशाक्षर में गंधोदक स्नान कराये। त्रिगन्ध, त्रिशीत फलोदक, तीर्थोदक, पुष्पोदक कुशोदक स्नान कराये।

पुनः घटस्थापन कर देवि का आवाहन कर पाद्यादि अर्घ्य मधुपर्क प्रदान करे। जयन्ति मंगला काली इत्यादि शक्तियों का आवाहन करें। अष्टदल के अग्रभाग में रोचन आभावाली रुद्रचण्डा, अरुणप्रभा प्रचण्डा, कृष्णवर्णा चण्डोग्रा, श्यामवर्णा चण्डनायिका, शुक्लाभा चण्डरूपा, धूम्रवर्णा चण्डवती, पाण्डुवर्णा अतिचण्डा, पीतवर्णा चण्डिका का आवाहन कर मध्य में अग्निवर्णा उग्र चण्डा का पूजन करे। यंत्र वा भद्रपीठ के पूर्वादि अष्टदिशाओं ६४ योगनियों का पूजन करे। ब्राह्मी माहेश्वरी कौमारी इत्यादि अष्टशक्तियों का अर्चन पूर्वादि दिशाओं में करे। जयन्त्यादि शक्तियों का पूजन करे। देवी के दक्षिणप्रांत व पश्चिम प्रांत में देवियों का इस प्रकार पूजन करे।

दक्षिणप्रांतेषु देव्याः स्वाहां चैव स्वधां ततः। अम्बिकां चर्चिकां चैव तथा कात्यायनीमपि। रक्तदन्तिकां च सर्वादिमङ्गलां च ततः परं। शाकम्भरीं भ्रामरीं च शिवदूतीं ततः परं। महाकालीं च गौरीं च तर्जनीं भाविनीं तथा! महामोहां च प्रयजेत् तथा चैव भयङ्करीं। ततः पश्चिमप्रान्तेषु भीमां पद्मां शचीं तथा। मेधां चैव महामायां सावित्रीं विजयां जयां। देवसेनां धृतिं चैव पुष्टिं धृतिं च भ्रामरीं। महामायां महादेवीं महामेधां तथैव च। कामेश्वरीमुत्तरस्यां

कामदामपि चार्चयेत्। भ्रामरीं कालरात्रिं च महारात्रिं तथैव च। चक्रेश्वरीं ततश्चैव पूजयेद् भगमालिनीं। धूम्रां भीमां च शान्तां च विदारीं च महाऽम्बिकां। लक्ष्मीं चव सुपर्णां च महोग्रोमां तथादरात्। कुलदेवीं त्र्यक्षरेण मन्त्रेण च समर्चयेत्।

पूर्वादि चार दिशाओं में २-२ वटुक व अष्टदिशाओं में अष्टभैरव, मन्दिर, नंदी, सिंह मणिभद्र पूर्णभद्र इत्यादि की पूजा करे।

वटुकान पूजयेद् द्वारे द्वौ द्वौ कृत्वा विभागतः। सिद्धाख्यं चैव सन्देहं कालपुत्राख्यमेव च। क्रियाकुलनिभं चैव मन्त्रांगं देवि! पुत्रकं। मन्दरेणैव बीजेन सतारेण प्रपूजयेत्। भैरवानसिताङ्गादीन् क्षेत्रेशांश्च यजेत् क्रमात्। हेतुकं त्रिपुराङ्गं च अग्निजिह्वं तथैव च। कालास्यं च करालास्यमेकपादं च भीमकं। अनुग्रहं चोर्ध्वभागे अधश्च नासिकेश्वरं। नारसिंहेन बीजेन सतारं हृदयान्तकं। बहिः पीठे चार्चयेद् वै तेन बीजेन साधकः। जम्भकं मणिभद्रं च पूर्णभद्रं तथैव च। विरूपं च विरूपाक्षं चित्रकुण्डलमित्यपि। चित्राक्षं चित्ररूपं च केलिमालिनमेव च। वरेन्द्रं नन्दिनं सिंहं ग्रहान् लोकपतीन् यजेत्। आदित्यादिग्रहा ये च ये ग्रहाः क्रूरकर्मणः। तिथयो वासराः सर्वे तेषां हि सन्निधौ स्थिताः। ते पूजार्थमिहायान्तु पूजयिष्यामि तानहं। क्रूरकर्मण इति छान्दसत्वात् ह्रस्वः।

अस्त्रपूजा - प्रत्येक अस्त्र का स्व स्व बीज से पूजन करे। यथा- खं खड्गाय नमः चं चक्राय नमः........इत्यादि।

पंचवाण - पञ्चतत्व स्वरूपाय पंचवाणायवै नमः।

धनुष - धृतं कृष्णेन रक्षार्थं संहारार्थं हरेण च। त्रयीमूर्तिं च सगरं धनुरस्त्रं नमाम्यहम्॥ मंत्र - रामकृष्णाभ्यां धनुषे स्वाहा। जयादि शराय स्वाहा।

घण्टा - ॐ चं चन्द्रघण्टाय नमः।

महापाश (नागराज)- नागराज महापाश! अनन्त वरणाय च। निर्मितो विष्णुना यस्मादतः पाहि नमः स्वधा। चण्डिकायाः प्रदत्ताऽसि सर्वानुवाल वर्हिणी॥

छुरिका - ॐ छुरिके रक्ष मां नित्यं शांति कुरु नमोस्तुते। छुरिकायै स्वाहा॥ शिव विष्णु वनिताः (गरुड़) की पूजा करे। मंत्र जप करे दशांश होम करे। प्रसादन करे। यन्मयोपहृतं किंचित् पुष्पगन्धानुलेपनैः। तत् सर्वमुपयुञ्जीत प्रसीद वरद भव॥ पुष्टिं प्रज्ञां धृतिं मेधामारारोग्यं भूतिमेव च॥

॥ अथ षोडशोपचार मन्त्राः॥

प्रसीद जगतां मातः! संसारार्णवतारिणि! मया निवेदितं भक्त्या आसनं सफलं कुरु ॥१॥
आसनपरिमाणं तु मातृकाभेदतन्त्रे, पञ्चमपटलेचतुरंगुल विस्तारं रौप्यनिर्माणपीठकं। अलङ्कारं यथायोग्यं पुरुषस्तु निवेदयेत्। मूलप्रकृतिरूपेण सूयते सचराचरं। पूजामहं विधास्यामि स्वागतं ते महेश्वरि ॥२॥
दुर्गन्धि परमामोदं परं वागीश्वरेश्वरी। पाद्यमेतन्मया दत्तं प्रसीद भुवनेश्वरि ॥३॥
दूर्वातण्डुलसम्मिश्रं कर्पूरागुरुपूरितं। अर्घ्यं दत्तमिदं गृह्ण मत्तस्त्रिभुवनार्चिते ॥४॥
आपो नारायणः साक्षादप्सु सर्वं चराचरं। निवेदयामि ते देवि! अद्भिराचमनीयकं ॥५॥
वाजिमेधफलावाप्त्यै मया दत्तं वरानने! मधुपर्कं प्रतीच्छस्व मातर्मे भुवनेश्वरि ॥६॥

पुनराचमनीयमप्याचमनीयमन्त्रेण वा दद्यात् ॥७॥

शङ्खस्थमुदकं पुण्यं सुगन्धि सुमनोहरं । निवेदितं मया देवि! स्नानीयं प्रतिगृह्यतां ॥८॥
त्वं देवि! परमेशानि! परब्रह्मस्वरूपिणि! गृह्ण वस्त्रमिदं देवि! यज्ञसूत्रमिदं शुभे ॥९॥
ज्योतिषां ज्योतिरेकस्त्वमनादि निधनं न ते । मया दत्तमलङ्कारमलंकुरु नमोऽस्तु ते ॥१०॥
सुगन्धिं दुर्गभं नान्यं कुमुदोत्पलमालिनं । सितपीतारुणादानं गृह्ण पुष्पं वरानने ॥११॥
धूपं गुग्गुलसंयुक्तं चन्दनागुरुचर्चितं । दशाष्टाङ्गसमुद्भूतं गृहाण परमेश्वरि ॥१२॥
परं ज्योतिः परब्रह्म जगेदकं सनातनि! भूतये मम देवेशि! दीपोऽयं प्रतिगृह्यतां ॥१३॥
यद्दत्तं परया भक्त्या फलमूलादिकं मया । गृहाण परमेशानि! नैवेद्यं सुमनोहरं ॥१४॥

मातृकाभेदतन्त्रेनैवेद्यं विविधं रम्यं नानाफलसमन्वितं । शर्करासंयुतं कृत्वा पायसं च निवेदयेत् ।

मत्स्यसूक्ते अशेषजगदाधारभूते! त्रैलोक्यवन्दिते! प्रदक्षिणमहं वन्दे विद्वत्सु पादपङ्कजं ॥१५॥
धान्यमुद्गकलायस्य रजोवस्य तिलस्य च । प्रकटानेकफलयुग्रचनां निवेदयेत् ॥१६॥

प्राण् प्राणान् रक्ष यशो रक्ष पुत्रदारधनानि च । सर्वरक्षाकरी यस्मात् त्वं देवि! भुवनत्रये । बलिदान व द्रव्य दान करे । प्रार्थना करे-

॥ अथ स्तुतिः ॥

॥ नारद उवाच ॥

ॐ भगवति! भयोच्छेदेकात्यायनि च कामदे! कौशिकि त्वं महेशानि, कालिके त्वां नमाम्यहम् ॥१॥
प्रचण्डे, पुत्रदे, देवि, सुप्रीते, सुरनायिके! कुलद्योतिकरे, चोग्रे, पार्वति! त्वं प्रसीद मे ॥२॥
दुर्गोत्तारिणि, दुर्गे, त्वं सर्वाशुभनिवारिणि! सर्वे, सर्वार्थदे, देवि, भव त्वं वरदा मम ॥३॥
चण्डोग्रे, वरदे, देवि, प्रचण्डे, विजयप्रदे! धर्मार्थकामदे, देवि, कात्यायनि! नमोऽस्तु ते ॥४॥
जमान्तरसहस्त्रेषु तिर्यग्योनिगतस्य च। अघं संहर मे देवि! ज्ञानतोऽज्ञानतः कृतम् ॥५॥
शान्तिपुष्टिप्रदे, देवि, मातस्त्रैलोक्यतारिणि! नमस्यामि जगद्धात्रि! त्वामहं विल्वभाविनि ॥६॥
नमस्तेऽस्तु शिवे, देवि, सर्वव्यापिनि, शाङ्करि! निजधर्मादिकं काम्यं कल्याणं च प्रदेहि मे ॥७॥
सर्वेषां नाथभूताऽसि त्वमेवैकाकिनी यतः। तस्मान्नमामि देवेशि! प्रसन्ना वरदा भव ॥८॥
इयं सर्वेश्वरीपूजा यन्मया देवि! ते कृता। पूर्णा भवतु सा सर्वा त्वत्प्रसादान्महेश्वरि ॥९॥
जातस्य यजमानस्य गर्भस्थस्य च देहिनः। मा भूत् तत्र कुले जन्म यत्र देवी न चण्डिका ॥१०॥

अर्द्धरात्रि को अष्टमी व नवमी में पूजा करे। शिव का पूजन बलि बाहर जाकर करे। रात्रि में रक्तपुष्प अष्टपुष्पों से पूजन करे। १००० पुष्पार्चन करे। नृत्यमीत मंगलगान करे।

॥ नवमी कृत्य ॥

नवमी को पूर्व कृत्य करे दशांश होमादि विधान करे। सायं ब्राह्मण, कुमारी भोजन कराये यथा शक्ति गाय, सुवर्ण, फल, वस्त्रादि का दान करे। अपने बंधु बोधय सहित भोजन करे। शिवभक्तों का आदर सम्मान करे।

॥ दशमी कृत्य ॥

दशमी को पूर्ववत् निवृत होवे। अवनीकृतजानु करके उपहार प्रदान करे-

ॐ कालि कालि महाकालि कालिके पापनाशनि काली कराल निष्क्रान्ते, कालिके त्वां नमोऽस्तु ते। सिंहवाहिनि चामुण्डे पिनाक धनुवल्लभे! उपहारं गृहीत्वैवं प्रसीद परमेश्वरि।

देव निसर्जन कर प्रतिमा को नगर परिक्रमा करते हुये नदी सरोवर पर ले जायें। प्रतिमा को रथ से उतार कर जल में स्थापित करें।

ॐ उत्तिष्ठ देवि चामुण्डे शुभां पूजां प्रगृह्य च। व्रज त्वं स्त्रोतसि जले वृद्धौ च स्थीयतामिह। निर्माल्यधारिणी पूज्या चाण्डाली गंधचंदनैः। समर्पयित्वा मंत्रेण मंत्रमेतदुदीरयेत्। निमज्याम्मसि संपूज्या परिकालार्चिते जले। पुत्रायुर्धन वृद्धयर्थं स्थापितासि जले मया॥ यजमान स्वयं चण्डिका को जल में प्रवेश कराये। चण्डिका को न देखे न जल में नग्न प्रवेश कराये। **न वीक्षे त महेशानीं च नग्नां प्रेषयेज्जले। दशम्यां श्रवणाप्राप्ते अप्सु निक्षिप्य दारकः। अलाभे केवलायां तु न निशायां कथञ्चन। पूजोपहार द्रव्याणि आचार्याय निवेदेयेत्। तदर्द्धं च विधिज्ञाय तदर्द्धं चैव ब्राह्मणे। तच्छेषं ऋत्वजे दद्यात् परितोष च।** आचार्य ब्राह्मण ऋत्वजों को यथा विभाग दक्षिणा देवें। **पूजालयं न वीक्षेत गृहस्थः स्वं कदाचन। अप्सुनिक्षिप्य देवेशीं ब्राह्मणायोपपादयेत्। देवी स्थितगृहेणापि यो गृहं कारयेत् सुधीः। तस्य लक्ष्मीर्बलं चायुः सर्वं नश्यति तत्क्षणात्।**

॥ इति प्राणतोषिण्यां दुर्गोत्सव प्रकरण संपूर्णम् ॥

॥ अथ अश्व गज पूजन प्रयोगः॥

प्रतिपदा से लेकर नवरात्र पर्यन्त गजाश्वों का पूजन करे। वस्त्रादि अलंकारों से सुसज्जित कर गंधादि से पूजन करे। एक पिण्ड प्रतिदिन पायसान्न, घृत, गुड़, शहद एवं सुरायुक्त बनाकर गजाश्वों खिलावें। स्वाति नक्षत्र में उच्चैःश्रवा हय आया हैं। त्वाष्ट्र में गजाश्वों की पूजा नहीं करे। नवरात्र पर्यन्त उनकी सवारी नहीं करे न उनका ताड़न करे। धूपदीप नैवेद्यादि से पूजन करे।

अश्वनामानिः- १. उच्चैःश्रवा, २. मेघपुष्पक ३. क्षेमकृद् ४. बाजीराजहंस, ५. सर्वसौख्यप्रद बाजीमकरालय ६. सुलोचन ७. सुभ्रुवाह ८. कालकेश ९. सिद्धिदायक।

गज नामानिः- १. ऐरावत २. पुण्डरीक ३. कुमुद ४. वामन ५. प्रतीक ६. अंजन ७. सर्वभौम ८. विजय ९. पुष्पदंत

अष्टवसुनामानिः- १. भव २. ध्रुव ३. सोम ४. विष्णु ५. अनिल ६. अनल ७. प्रत्यूष ८. प्रभव।

॥ अश्वपूजन मंत्राः ॥

गन्धर्वकुल जातस्त्वं, मा भूयो कुलनाशकः। सत्यवाक्येन सोमस्य, ब्रह्मणो वरुणस्य च ॥१॥
प्रसादाच्च हुताशस्य, वर्गय त्वं तुरङ्गम! तेजसा चैव सूयस्य, ऋषीणां तपसा तथा ॥२॥
रूद्रस्य ब्रह्मवीर्येण, वायोश्चैव बलेन च। स्मर त्वं राजपुत्रस्त्वं, कौस्तुभं च मणिस्त्वरः ॥३॥
निर्हन्तो यदि चाछिन्नो, युद्धं याति तुरङ्गमः। रिपून् विजित्य समरे, सहभर्ता सुखी भव ॥४॥

॥ गजपूजन मंत्राः ॥

पान्तु त्वां वसवो रुद्रा, आदित्याश्च मरूद्गणाः। भर्तारं रक्ष नागेन्द्र! स्वामिनं प्रतिपालय ॥१॥
अवाप्नुहि जयं युद्धे, गमने स्वस्तिमान् भव। वस्त्रैर्नानाविधैश्चैव, पुष्पैर्गन्धैर्मनोहरैः ॥२॥
प्रथमो मत्स्यरूपी स्याद्, द्वितीयः कूर्मनायकः। तृतीयो यज्ञवाराहश्चतुर्थो नृहरिस्मृतः ॥३॥
वामनः पञ्चमः प्रोक्तो, षष्ठो भार्गवसंज्ञकः। सप्तमो जानकीनाथो, देवकी नन्दनोऽष्टमः ॥४॥
नारायणस्तु नवमो, नवनारायणा स्मृताः ॥५॥

॥ शमी पूजन प्रयोगः ॥

राजा सजधज कर शमी पूजन हेतु नगर के बाहर जब कुछ तारे उदय हों उस समय के **विजय नाम** योग में प्रस्थान करे। शमीवृक्ष के पास भूमि शुद्धकर श्वेत वस्त्र पर चावलों से अष्टदल बनाकर उस पर कुंभ स्थापित करे।

संकल्प करे- **अद्येत्यादि यात्रायां विजय सिद्ध्यर्थं गणेशमातृका वास्तु दिग्पाल पूजन, मार्गदेवता पूजन, शमीपूजन, अपराजिता पूजनञ्च करिष्ये।**

ॐ अपराजितायै नमः। दक्षिणे ॐ क्रियायै नमः। वामे उमायै नमः। इसके बाद शमीपूजन कर प्रार्थना करे।

अपराजिते! नमस्तेऽस्तु, नमस्ते विजये जये! जगन्मातः सुरेशानि! कुण्डलद्योतितानने! ॥१॥
त्वं चापराजिते देवि! शमीवृक्षस्थिते जये! राज्यं मे देहि विश्वेशि! शत्रूणां च पराजयम् ॥२॥
अमङ्गलानां शमनीं, दुःकृतस्य च शमनीम्। दुःस्वप्नशमनीं धन्यां, प्रपद्येऽहं शमीं शमाम् ॥३॥
शमी शमयते रोगान्, शमी शमयते रिपून्। शमी शमयते पापं, शमी सर्वार्थसाधिनी ॥४॥
अर्जुनस्य धनुर्धात्री, रामस्य शोकनाशिनी। लक्ष्मणप्राणदात्री च, सीताशोकशमङ्करी ॥५॥
अपराजिते! नमस्तेऽस्तु, जयदे! कामदायिनी। यात्रामहं करिष्यामि, सिद्धिं सर्वत्र मे कुरु ॥६॥
मन्त्रैर्वेदमयैश्चैव, पूजयेच्च शमीस्थिताम्। अपराजितां भद्ररूपां, विजयार्थप्रदां शिवाम् ॥७॥
क्रमेणेन्द्रस्य ककुभिः, विन्यसेत् तु पदं क्रमात्। रिपोः प्रतिकृतिं कृत्वा, पांशुना तलरूपिणीम् ॥८॥
शरेण शरपुङ्खेण, बिद्धेद् हृदयमर्मणि। दिशां विजयमन्त्राश्च, असिरूपा द्विजातिभिः ॥९॥
पाठनीयास्ततो गेहं, गच्छेच्चैव पुरोधसा। माङ्गल्यमभिषेकं च, गुणप्राशनमेव च ॥१०॥
स्वस्तिवाच्या द्विजाश्चैव, बन्दीभ्योऽभयदक्षिणां। देयाधिक्यं च रजतं, वस्त्रादिनवभूषणम् ॥११॥
परिधयं स्वयं चैव, पत्नीभ्यो देयमेव च। पुत्रादिभ्यो स्नुषादिभ्यो, मन्त्रिभ्यो देयमेव च ॥१२।
अदेयमपि तत्काले, देयं श्रद्धा पुरःसरम्। सम्भाव्य पौरान् भृत्यांश्च, तेषामुत्सर्जनं ततः ॥१३॥
ततः पुरोधसा साकं, स्वयं गच्छेच्छमीं पुनः। वामदक्षिण पार्श्वेभ्यो, गृहीत्वा मृत्तिकां ततः ॥१४॥
श्रीधरं च हिरण्यं च, पट्टकूलं समर्पयेत्। गुरुं सम्पूज्य सस्त्रीकं, ततो गच्छेद् गृहं प्रति ॥१५॥

दुग्ध व जलधारा देवे। **आसिंचिता मयादेवि सदाशांति प्रयच्छ मे।** आचार्य अभिषेक कर मांगल्य एवं आशीष प्रदान करे।

॥ खंजनदर्शन तथा शुभाशुभ फलानि ॥

दशमी को अपराह्न समय खंजन पक्षी का दर्शन हो तो उसे नमस्कार करे। प्रार्थना करें –

वासुदेव स्वरूपेण सर्वकामफलप्रद । पृथिव्यामवतीर्णोऽसि खञ्जरीट नमोस्तुते ॥
खञ्जनाय नमस्तुभ्यं सर्वाभीष्ट प्रदाय च । नीलकण्ठाय भद्राय भद्ररूपाय ते नमः ॥
भद्र त्वं देहि मे भद्रमाशां पूरय पूरक । स्वस्तिकोऽसि कुरु खञ्जरीट नमोऽस्तुते ॥
नारायण स्वरूपाथ संवत्सर सुखप्रद । नीलकण्ठ महादेव खञ्जरीट नमोऽस्तु ते ॥
देवदानव यक्षाणां नराणां पुष्टिवर्धनम् । दर्शनं तव भद्रस्य विष्णुरूप नमोस्तुते ॥

॥ शुभाऽशुभफलम् ॥

जल प्रासाद शिखरे पर्वते च जलान्ति के । दृष्टे शुभं भवेत् कीर्तिगोष्ठेषु धनवर्द्धनम् ॥
अब्जेषु नृपतिर्भूयान् तथा देवालयेषु च। तड़ागतीरे धनवान श्मशाने मरणं भवेत् ॥
कृष्णग्रीवो नीलकण्ठ श्वेतकण्ठो जनार्दनः । पीते तु पार्वती देवी धुन्वत् पक्षे तु वीक्षणम् ॥
व्याधिर्भवति देवेशि स्थिरे संपत्तिकारकं । भक्तं भुञ्जन् भवेद् रोगी श्रियं दृष्ट्वा च वासवः ॥
सुमानः कीर्तनादेव आयुषस्तु क्षयो भवेत्। तस्मात्तु खंजनं नाम कीर्तयेदविचारयन् ॥

॥ कलश एवं मूर्तिविर्सजन विधिः ॥

देवी घट में प्रधान देवता का मूलतत्व विराजमान माने घट के पास जाकर श्वांस ऊपर खींचे तथा भावना करे कि प्रधान देवता कुंभ में से अब मेरे हृदय में आकर बैठ गये हैं। मृण्मयी प्रतिमा कलश को उठाकर प्रार्थना करे।

उत्तिष्ठ देवि चण्डेशि शुभां पूजां प्रगृह्य च। कुरुष्व मम कल्याणमष्टभि शक्तिभिः सह ॥
दुर्गे देवि जगन्मातः स्थानं गच्छ पूजिते। संवत्सर व्यतीते तु पुनरागमनाय वै ॥
इमां पूजां मयादेवि यथा शक्त्युपपादितम्। रक्षार्थं त्वं समादाय व्रज स्वस्थानमुत्तमम् ॥

स्वर्णमयी प्रतिमा आचार्य को दान करे।

त्र्यैलोक्य मातर्देवि त्वं सर्वभूतदयान्विते। दानेनानेन संतुष्टा सुप्रीता वरदा भव॥

कलश या मृण्मय प्रतिमा को जल में विर्सजन कर प्रार्थना करे कि हमारे पाप रोग दोष को लेकर देवी समुद्र में चली गई हैं हमें शुभाशीष प्रदान करे।

गच्छगच्छ परं स्थानं स्वस्थानं देविचण्डिके। व्रज स्त्रोतोजलं वृद्ध्यै स्थीयतां च जले त्विह॥

॥ दक्षिण भारत मते नवदुर्गा भेदरूपाणि ॥

दक्षिण भारत में ब्राह्यादि नवदुर्गा की स्थूल रूप से उपासना करते हैं तथा दुर्गा के अन्य नवस्वरूपों की विशेष उपासना करते हैं।

प्रथमा वनदुर्गेति द्वितीया शूलिनीमता। तृतीया जातवेदा च चतुर्थी शांतिरिष्यति॥ पञ्चमी शबरी चैव षष्ठी ज्वालेति गीयते। सप्तमी लवणा चेति अष्टभ्यां आसुरी मता॥ नवमी दुर्गा दुर्गेति नवदुर्गा प्रकीर्तिताः॥

॥ १. वनदुर्गाः॥

वनदुर्गा की उपासना से व्याघ्र, सिंह, सर्प, वृश्चक हाथी वराह इत्यादि हिंसक पशुओं का भय नहीं रहता हैं। वे ही विंध्यवासिनी हैं, भक्तों को अभय प्रदान कर मंगलप्रदान करती हैं। इसका एक सिद्धस्थान चित्रकूट में हैं। धन धान्य वृद्धि हेतु निम्न मंत्र का जप करे।

१. ॐ हूं क्रौं महाभयपरिपन्थिनि वनविहारिणि दुर्गे देवि धन,धान्यं रक्ष रक्ष स्वाहा॥

२. शारदातिलक, मंत्ररत्न, मञ्जूषा, प्रपञ्चसार तंत्र, श्रीविद्यार्णवतंत्र में अन्य मंत्र दिया गया हैं।

मन्त्रः- **उत्तिष्ठ पुरुषि किं स्वपिषि भयं मे समुपस्थितं यदि शक्यमशक्यं वा तन्मे भगवति शमय स्वाहा।**

विनियोगः- **अस्य श्री वन दुर्गा मंत्रस्य आरण्यक ऋषिः, अनुष्टुप् छंदः, सर्वदुर्गतिमोचनी श्री वनदुर्गा देवता, दुं बीजं, स्वाहा शक्तिं, सर्वदुर्गति मोचनार्थे जपे विनियोगः।**

षडङ्गन्यासः- **उत्तिष्ठ पुरुषि हृदयाय नमः। किं स्वपिषि शिरसे स्वाहा। भयं मे समुपस्थितं शिखायै वषट्। यदि शक्यमशक्यं वा कवचाय हुं। तन्मे भगवति नेत्रत्रयाय वौषट्। शमय स्वाहा अस्त्राय फट्।**

वर्णन्यासः- प्रत्येक वर्ण के आगे नमः लगाकर न्यास करे। **ॐ उं नमः दक्षपादांगुलिमूले। त्तिं दक्ष गुल्फे। ष्ठं दक्षजानुनि। पुं दक्षऊरुमूले। रुं वामपादांगुलिमूले। षिं वामगुल्फे। किं वामजानुनि। स्वं उरुमूले। पिं गुदे। षिं लिङ्गे। भं मूलाधारे। यं उदरे। मे दक्ष पार्श्वे। सं वामपार्श्वे। मुं हृदि। पं दक्षस्तने। स्थिं वामस्तने। तं कण्ठे। यं दक्षकरांगुलिमूले। दिं दक्षमणिबन्धे। शं कर्पूरे। क्यं बाहुमूले। मं वामकरांगुलिमूले। शं मणिबन्धे। क्यं कपूरे। वां बाहुमूले। तं मुखे। न्मे दक्षनासापुटे। भं वामनासापुटे। गं दक्षगण्डे। वं वामगण्डे। तिं दक्षनेत्रे। शं वामनेत्रे। मं दक्षकर्णे। यं वामकर्णे। स्वां भ्रूमध्ये। हां नमः शिरसि।**

श्री विद्यार्णव तंत्र में ध्यान इस तरह हैं:-

**विद्युद्धामप्रभाभां कनकसरसिजे संस्थितां सत्रिनेत्रां, हस्ताम्भोजैर्वहन्तीमरिदर वरदाभीति संज्ञाः क्रमेण।
स्वर्णोद्यत्कान्तिवस्त्रां शशिकलित लसद्रत्नचूडां प्रसन्नां, पार्श्वोद्यत्सन्मृगेन्द्रां हृदि वनवसति दावदुर्गां स्मरेहम्॥**

इनके अलावा ४ प्रकार के अन्य ध्यान हैं प्रथम ध्यान साधना कर्म हेतु, दूसरा रक्षा हेतु, तीसरा आपदनिवारण एवं चौथा ध्यान तामस प्रयोग हेतु हैं। ध्यान मंत्र दुर्गाकल्पतरु से कुछ भिन्न हैं।

**हेमप्रख्यामिन्दु खण्डात्तमौलिं शङ्खारीष्टाभीति हस्तां त्रिनेत्राम्।
हेमाब्जस्थां पीतवस्त्रां प्रसन्नां देवीं दुर्गां दिव्यरूपां नमामि॥१॥**

अरिशङ्ख कृपाण खेटबाणान् सधनुः शूलक तर्जनीर्दधाना।
भवतां महिषोत्तमाङ्ग संस्था नवदूर्वा सदृशी श्रियेऽस्तु दुर्गा ॥२॥
चक्रदर खड्ग खेटक शरकार्मुक शूल संज्ञक कपालैः
ऋष्टिमूसलकुन्त नन्दक वलय गदा भिन्दिपाल शक्त्याख्यै।
उद्यद्विकृति भुजाढ्या महिषके सजल जलद सङ्काशा
सिंहस्था वाऽग्नि निभा पद्मस्था वाथ मरकत श्यामा ॥३॥
व्याघ्र त्वक् परिधाना सर्वाभरणान्विता त्रिनेत्रा च
अहिकलित नीलकुन्तल विलसत् किरीट शशिकला।
सर्पमयवलय नूपुरकाञ्ची केयूरहार संभिन्ना
सुरदितिजाभय भयदा ध्येया कात्यायनी प्रयोग विधौ॥

॥ आवरण पूजा प्रयोगः ॥

(१) मूल बिन्दु में देवी का ध्यान पूजन करे। (२) षट्कोण में हृदयादि षडङ्गन्यास पूजा करे। (३) अष्टदल की कर्णिका(नीचे का भाग) में प्रत्येक नाम के आगे ''ॐ'' तथा पश्चात् 'नमः' लगाकर आवाहन पूजा करें।

यथा – ॐ आर्यायै नमः। दुर्गायै। भद्रायै। भद्रकाल्यै। अंबिकायै। क्षेम्यायै। वेदगर्भायै, क्षेमङ्कर्यै। (४) अष्टदलपत्रों के मध्यभाग में ॐ चक्रायनमः। शङ्खाय। खड्गाय। खेटकाय। वाणाय। चापाय। शूलाय। ॐ कपालाय नमः। (५) अष्टदलों के पत्राग भाग में ब्राह्मी, वैष्णवी, कौमारी, नारसिंही, वाराही, महालक्ष्मी, चामुण्डा, माहेश्वरी का पूजन करे। (६) भूपूर(चतुरस्त्र) में इन्द्रादि लोकपालों व उनके आयुधों का पूजन करें।

॥ अथ प्रयोग विधानम् ॥

॥ ध्यानम् ॥

श्रिये च दुर्गां महिषोत्तमाङ्गस्थितां च दूर्वादलरुग् (भां) वहन्तीम्।
सचक्रशङ्खासिस खेटबाणचापान् भुजैस्तर्जनिकां वहन्तीम् (त्रिशूलम्) ॥१॥
शङ्ख चक्र कृपाण खेटक बाणधनूंषि शूलवत्। पुंस्कपालसऋष्टिकान् मुसलकुन्तनन्दकान् ॥२॥
सत्करैर्वलय सद्गदा भिण्डिपालकशक्तिकान्। बिभ्रतीं जलदद्युति महिषोत्तमाङ्गनिषेदुषीम् ॥३॥
पावकोल्लसितद्युति हृदि भीमसिंह (समा) गताम्। श्यामलां कमलस्थितां नयनत्रयोल्लसितां शुभाम् ॥३॥
व्याघ्रचर्म सदंशु कामहिबद्ध कुन्तल शोभिताम्। चन्द्रशोभितशेखरां सुरदानवाभयभीतिदाम् ॥४॥

॥ प्रयोगः ॥

प्रजपेत् प्रत्यहं मन्त्री स्वरक्षायै शतं ह्यथ। सहस्त्रं वा तदन्ते च प्रयोगान् कर्तुमर्हति ॥५॥ यद्यदुद्दिश्य च मनुं सहस्त्रं वायुतं जपेत्। अचिराल्लभते तत्तदसाध्यमपि साधकः ॥६॥ प्रातः स्नायी न्यासपूर्वं स्मरन् देवीमनन्यधीः। नित्यं सहस्त्रं प्रजपेन्मन्त्रं साधकसत्तमः ॥७॥ ज्वरसर्पग्रहोत्थांश्च दोषान् प्रशमयेत्सुधीः। हुनेदारण्यकतिलै राजिकाभिश्च वा हुनेत् ॥८॥ अपामार्गसमिद्भिश्च नाशयेत् सकलामयान्। अपस्मारादिकान् मन्त्री नात्र कार्या विचारणा ॥९॥ न्यग्रोधोत्थसमिद्भिर्वा सशुङ्गाभिहुनेत्सुधीः। अयुतं सर्वसम्पत्त्यै सर्वापन्मुक्तयेऽपि च ॥१०॥ ग्रहादिशान्त्यै च तया ह्यभिचारादिशान्तये। अर्कवृक्षसमुद्भूतैर्जुहुयाच्च समिद्वरैः ॥११॥ आरभ्य रविवारं च तद्द्वयं प्रत्यहं सुधीः।

दशाहतो वाञ्छितार्थसिद्धिर्भवति नान्यथा ॥१२॥

त्र्यहं वा सप्तरात्रं वा चेध्मैः सारसमुद्भवैः। एकैकं शकलं मन्त्री हुनेद्वाञ्छितसिद्धये ॥१३॥ त्रिंशच्छरान् शिताग्रांश्च निधाय जुहुयादबुधः। कटुतैलैः सहस्रं वा ह्ययुतं तदनन्तरम ॥१४॥ सम्पाततैलेन शरान् समभ्युक्ष्य यथाविधि। पूर्ववत् प्रजपेन्मन्त्रं ताञ्शरान् अथ भूपतिः ॥१५॥ शुद्धाचारश्च धीरश्च धन्वी संयतमानसः। गृहीत्वा परसेनाया मध्ये गच्छेदभीः क्षिपेत् ॥१६॥ सा धावति दिशः सर्वाः सम्भ्रान्ता विह्वला तदा। स आगत्य पुनर्भूयो गुरुं धान्यैर्धनैरपि ॥१७॥ वस्त्रालङ्करणैश्चैव तोषयेज्जयदायिनम्। अष्टाधिकशतेनाथ सञ्जप्तं शवभस्म च ॥१८॥ निक्षिपेद्यस्य शिरसि स विद्विष्टो भवेज्जनैः। देशाद् देशान्तरं चैव काकवद् भ्रमते सदा ॥१९॥ कारस्करद्रुमोत्थैश्च पत्रैर्वायुनिपातितैः। सहस्रं जुहुयात् पादरजोभिः सह वैरिणः ॥२०॥ उच्चाटोऽस्य भवेत् सद्यो, विषवृक्षसमुद्भवैः। पुष्पैर्हुनेन् सहस्रं च सेनां संस्तम्भयेत्बुधः ॥२१॥ तावद्भिस्तस्य पत्रैश्च मन्त्री सेनां निवर्त्तयेत्। विषवृक्षसमुद्भूतां शत्रोः प्रतिकृतिं शुभाम् ॥२२॥

कृत्वा प्रतिष्ठितप्राणां खण्डं खण्डं कृतैर्निशि। कृष्णपक्षचतुर्दश्यां काकोलूकवसाप्लुतैः ॥२३॥ तद्गात्रैर्विपिने होमः कर्त्तव्योऽष्टसहस्रकम्। चतुर्दशीत्रयादेवं नाशमेति रिपुर्ध्रुवम् ॥२४॥ उलूकवायसपक्षैः सवसारक्तसंयुतैः। होमाद्रिपुर्नाशमेति ह्युन्मत्तसमिधं तथा ॥२५॥ होमान्मत्तो रिपुर्नूनं भवत्येव सहस्रतः। वैरिणः प्रतिमां कृत्वा सम्यक् संस्थापितानिलाम् ॥२६॥ विषत्रिकटुकालिप्तां सम्यगुष्णे जले क्षिपेत्। प्रजपेच्च मनुं सद्यो ज्वराक्रान्तो भवेद्रिपुः ॥२७॥ दुग्धाभिषेकतः शान्तिर्भवत्यस्य न संशयः। प्रतिमां विषवृक्षोत्थां निःक्षिपेदुष्णवारिणि ॥२८॥ उन्मादश्च रिपोः सद्यः पूर्ववच्छान्तिरीरिता। सूर्यबिम्बेऽन्तरारक्तां शूलतर्जनिकाकराम् ॥२९॥ ध्यात्वायुतं प्रजप्याथ मारयेद्रिपुसञ्चयम्। असिखेटकरार्कस्था क्रुद्धा सा वनवासिनी ॥३०॥ संस्मृता मन्त्रजापे तु शमयेच्छत्रुसञ्चयम्। शरधनुष्करां सिंहस्थितां पावकसन्निभाम् ॥३१॥ संस्मृत्य मन्त्रं प्रजपन् क्षिप्रमुच्चाटयेदरीन्। कारस्करद्रुसमिधामयुतं जुहुयात्सुधीः ॥३२॥

रोगिणः करिणः सर्वे जायन्ते ह्यचिरात्सदा। विषवृक्षोत्थितैः पत्रैरमी नाशं प्रयान्ति च ॥३३॥ तद्वृक्षसुमनोभिः स्यादुच्चाटः करिणां ध्रुवम्। राजवृक्षसमिद्भिर्वा रोगा नश्यन्ति दन्तिनाम् ॥३४॥ विषवृक्षप्रसूनैश्च त्रिमध्वक्तैस्तु मानवः (वारणः) वशीभवेत्तथा शीघ्रं पत्रैरानित्यशोभितैः (कोद्भवैः) ॥३५॥ त्रिस्वाधुयुक्तैः करिणो ह्यतिमत्ता भवन्ति च। अभ्यङ्गः पञ्चगव्येन लोके रक्षाकरः परः ॥३६॥ करिणां मनुजप्तोऽयं प्रोक्तो मन्त्रविदुत्तमैः। सर्पिस्तिलानित्यकैस्तु राजिकापञ्चगव्यकैः ॥३७॥ दुग्धतण्डुलकैश्चैव प्रत्येकं च सहस्रतः। जुहुयादिभसङ्घानां वृद्धिर्भवति नान्यथा ॥३८॥

महान्तं विष (द्विज) वृक्षं च छित्वा निर्भिद्य पञ्चधा। दिक्क्रमेणैव पञ्चैवमायुधानि प्रकल्पयेत् ॥३९॥ सम्यक् शिल्पविदा शङ्खो नन्दकश्चक्रशार्ङ्गकौ। कौमोदकीति क्रमेण प्रोक्तमायुधपञ्चकम् ॥४०॥ निक्षिप्य पञ्चगव्येतु जपेन्मन्त्रसहस्रकम्। तावच्चाज्येन जुहुयात् सम्पातं तत्र पातयेत् ॥४१॥ भूयश्च पूर्वसंख्याकं जपं कुर्याद्विचक्षणः। विदध्यादायुधान् पञ्च पञ्चगव्यप्रपूरितान् ॥४२॥ मध्यायुधे स्वा(मध्यावटेष्वा) युधानि निक्षिपेत् (तत्र तत्र च) - बलिं हरेत्समीकृत्य तन्मंत्रैर्मन्त्रिणा तथा ॥४३॥ कार्या रक्षा राष्ट्रपुरग्रामाणामेवमेव च। यत्रैयं विहिता रक्षा लक्ष्मीः) तत्र च वर्धते ॥४४॥ धनधान्यसमृद्धिः स्याद्रिपुचौरभयं नच। पद्मैर्नृपं वशीकुर्यात् तत्पत्नीरुत्पलैरपि ॥४५॥ ब्राह्मणान् कुमुदैर्हुत्वा कह्लारैर्विश एव च। शूद्रांल्लवण होमेन ग्रामं जातिप्रसूनकैः ॥४६॥

चक्रशङ्खगदाम्भोजहस्तं सञ्चिन्तयेच्छुभम्। रविबिम्बे मुकुन्दं च मनुं व्यत्यस्तलिङ्गकम् ॥४७॥ प्रजपेच्चाथ पुरुषभगवत्पदयोरथ। सर्वसिद्धिकरः प्रोक्ताः प्रकारोऽयं सुमन्त्रिभिः ॥४८॥ साध्यनामाक्षरैः सम्यग्विदर्भितंमनुं

लिखेत्। यन्त्रे (पत्रे) ततः कुलालस्य करलग्नं प्रगृह्य मृत ॥४९॥ तया कृता या प्रतिमा तस्याश्च हृदि संन्यसेत्। संस्थाप्य स्वाभिमुख्ये तां सप्ताहं प्रजपेन्मनुम् ॥५०॥ सन्ध्यात्रये शतं चाष्टाधिकं वश्यो भवेत्तु सः। व्रीहीन् हुनेदष्टशतं प्रत्यहं वत्सराद्भवेत् ॥५१॥ व्रीहिमान् गोपयोभिश्च पशुमान् भवति ध्रुवम्। घृतहोमान्मन्त्रिणः स्यात् काञ्चनाप्तिर्महीयसी ॥५२॥ दध्ना सर्वसमृद्धिः स्यादन्नैरन्नसमृद्धियुक्। मधुहोमेन रत्नानां निधिर्भवति नान्यथा ॥५३॥ दूर्वाहोमेन दीर्घायुर्मन्त्री भवति निश्चितम्। श्वेतगुञ्जाः समानीय कुडवप्रमिताः शुभाः ॥५४॥ एतन्मन्त्रसुजप्ताश्च विकिरेच्छत्रुसैन्यके। स्वयं मन्त्री सुगुप्तः सन् तेनासौ वैरिणश्रम् ॥५५॥ ज्वरादिकैर्महारोगैः पीडिता स्यान्मृताचिरात्। सेनाधिपतिमुख्यानां परस्परविरोधतः ॥५६॥ एतदुपद्रवैर्नानाविधनाशं प्रयाति च .....॥

तारे शक्तिं ससाध्यां लिखतु रविदले मध्यतः पत्रमूले मर्दिन्या वर्णयुग्मं दलमनु विलिखेद्वह्निशो मूलवर्णान्। अन्त्ये प्र (चा) न्त्येकबीजं बहिरथ लिपिभिर्भूपुरद्वन्द्वसंस्थं दुर्गाया यन्त्रमेतद्युवतितनयदं सर्व रक्षाकरं स्यात् ॥५७॥ सर्वसंपत्करं नृणां सर्वसौभाग्यपुष्टिदम्। राज्यलक्ष्मीविहीनानां भूपतीनां च राज्यदम् ॥५८॥ आमयग्रस्तनृणां च रोगशान्तिकरं परम्। जपहोमाज्यसम्पातसाधितं मन्त्रमुत्तमम् ॥५९॥

रक्षा प्रयोग हेतु यदि यंत्र प्रयोग करना हो तो मध्य में "ॐ" ह्रीं पश्चात् साध्यनाम लिखे। बाहर १२ कमल का दल बनायें। १२ कमलों के नीचे के भाग (केसरों) में महिषमर्दिनि के अष्टाक्षर मंत्र के २-२ वर्ण एक दल में लिखे तो मंत्र की ३ आवृत्ति होगी। इसके बाहर २ वृत्त बनायें। दोनों वृत्तों के बीच की वीथिका में अं आं .... शं षं सं हं लं क्षं मातृका वर्ण लिखे। दो चतुरस्र से अष्टकोण चित्र....... बनाये।

अष्टदलकमलों मे दुर्गा का ध्यान करे व मंत्र जप करे। ॐ ह्रीं दुं दुर्गायै नमः। इसका बीज मंत्र दुः अथवा दुं हैं। एकाक्षरी मंत्र के कश्यपऋषि, गायत्री छन्दः दुर्गा देवता हैं।

दूर्वाश्यामां त्रिनेत्रां शूलवाणचक्र शङ्खखड्ग खेट धनुः कपालानि। दक्षिणाधः करक्रमेण धारयन्तीं ध्यायेत्।

॥ अथ वनदुर्गा स्तोत्रम् ॥

यत्कर्मधर्मनिलयं प्रवदन्ति तज्ज्ञाः जज्ञादिपुण्यमखिलं सकलं त्वयैव ।
त्वं चेतना यत इति प्रविचार्य चित्ते नित्यं त्वदीयचरणौ शरणं प्रपद्ये ॥१॥
पाथोऽधिनाथतनयापतिरेष शेषपर्यङ्कलालितवपुः पुरुषः पुराणः ।
त्वन्मोहपाशविवशो जगदम्ब सोऽपि व्याघूर्णमाननयनः शयनं चकार ॥२॥
तत्कौतुकं जननि यस्य जनार्दनस्य कर्णप्रसूतमलजौ मधुकैटभाख्यौ ।
तस्यापि यौ न भवतः सुलभौ निहन्तुं त्वन्माया कवलितौ विलयं गतौ तौ ॥३॥
यन्माहिषं वपुरपूर्वबलोपपन्नं यन्नाक नायकपराक्रम जित्वरं च ।
यल्लोकशोकजनन व्रतबद्धहार्दं तल्लीलयैव दलितं गिरिजे भवत्या ॥४॥
यो धूम्रलोचन इति प्रथितः पृथिव्यां भस्मीबभूव स रणे तव हुंकृतेन ।
सर्वासुरक्षयकरे गिरिराजकन्ये मन्ये स्वमन्युदहने कृत एष होमः ॥५॥
केषामपि त्रिदश नायक पूर्वकाणां हन्तुं न जातु सुलभाविति चण्डमुण्डौ ।

तौ दुर्मदौ सपदि चाम्बरतुल्य मूर्तेर्मातस्तवासि कुलिशात् पतितौ विशीर्णौ ॥६॥
दौत्येन ते शिव इति प्रथित प्रभावो देवोऽपि दानवपतेः सदनं जगाम ।
भूयोऽपि तस्य चरितं प्रथयां चकार सा त्वं प्रसीद शिवदूति विजृम्भितेन ॥७॥
चित्रं तदेत दरैरपि ये न जेयाः शस्त्राभि घात पतिताद्रुधिरादपर्णे ।
भूमौ बभूवुरमिताः प्रतिरक्त बीजास्तेऽपि त्वयैव गगने गिलिताः समस्ताः ॥८॥
आश्चर्यमेतदतुलं यदभूत् सुरारी त्रैलोक्य वैभव विलुण्ठनहृष्टपाणी ।
शस्त्रैर्निहत्य भुवि शुम्भ निशुम्भसंज्ञौ नीतौ त्वया जननि तावपि नाकलोकम् ॥९॥
त्वत्तेजसि प्रलयकाल हुताशनेऽस्मिंस्तस्मिन् प्रयान्ति विलयं भुवनानि सद्यः ।
तस्मिन्निपत्य शलभा इव दानवेन्द्रा भस्मीभवन्ति हि भवानि किमत्र चित्रम् ॥१०॥
तत्किं गृणामि भवतीं भवतीव्रतापनिर्वापण प्रणयिनीं प्रणमज्जनेषु ।
तत्किं गृणामि भवतीं भवतीव्रतापसम्वर्द्धन प्रणयिनीं विपदि स्थितेषु ॥११॥
वामे करे तदितरे च तथोपरिष्टात् पात्रं सुधारसयुतं वरमातुलुङ्गम् ।
खेटं गदां च दधतीं भवतीं भवानि ध्यायन्ति येऽरुणनिभां कृतिनस्त एव ॥१२॥
यद्वारुणात् परमिदं यदि मानवस्ते बीजं स्मरेदनुदिनं दहनाधिरूढम् ।
मायाङ्कितं तिलकितं तरुणेन्दुबिन्दु नादैरमन्दमिह राज्यमसौ भुनक्ति ॥१३॥
आवाहनं यजनवर्णनमग्निहोत्रं कर्मार्पणं तव विसर्जनमत्र देवि ।
मोहान्मया कृतमिदं सकलापराधं मातः क्षमस्व वरदे बहिरन्तरस्थे ॥१४॥
अन्तः स्थिताप्यखिलजन्तुषु जन्तुरूपा विद्योतसे बहिरिवाखिलविश्वरूपा ।
का भूरिशब्दरचना वचनाधिका सा दीनं जनं जननि मामव निष्प्रपञ्चम् ॥१५॥
एतत् पठेदनुदिनं दनुजान्तकारि चण्डीचरित्रमतुलं भुवि यस्त्रिकालम् ।
श्रीमान् सुखी स विजयी सुभगः कृती स्यात् त्यागी चिरन्तनवपुः कविचक्रवर्ती ॥१६॥
श्री सिद्धनाथा परनामधेयः श्रीशम्भुनाथो भुवनैकनाथः ।
तस्य प्रसादात् सकलागम श्रीः पृथ्वीधरस्तोत्रमिदं चकार ॥१७॥

॥ श्री वनदुर्गा गायत्रीकवचस्तोत्रम् ॥

ॐ हसौं ॐ भूर्भुवः स्वः ॐ ह्रीं तत्सवितुर ह्रीं वरेण्यं ह्रीं भर्गो देवस्य क्लीं धीमहि क्लीं धियो यो नः क्लीं प्रचोदयात्मिके ह्रीं प्रणव शिरसात्मिके हूँ फट् स्वाहा ॐ हसौं ॐ नमः।

ॐ सहनाववतु ॐ सहनौ भुनक्तु ॐ सहवीर्यं करवावहै। ॐ तेजस्विनावधीतमस्तु ॐ मां विद्विषावहै ॥ॐ शांतिः शांतिः शांतिः ॥

विनियोग :- ॐ अस्य श्री वनदुर्गा गायत्री महाविद्यामालामंत्रस्य ॐ किरात रूपधर ईश्वर ऋषिः। ॐ

अनुष्टुप् छंदः। ॐ अंतर्यामी नारायणः किरातरूपधरेश्वरी वनदुर्गा गायत्रीर्देवता। ॐ स्वाहा शक्तिः। ॐ हुँ बीजं। ॐ क्लीं कीलकं। ॐ श्री वनदुर्गा गायत्री प्रीत्यर्थ मा वशयज्ञा वनदुर्गा गायत्री महामन्त्र पारायणे मम धर्मार्थ काम मोक्षार्थे जपे विनियोगः।

न्यास :- ॐ हंसिनी ह्रॉं अंगुष्ठाभ्यां नमः। ॐ हंसिनी ह्रां हृदयाय नमः। ॐ शंखिनी ह्रीं तर्जनीभ्यां नमः। ॐ शंखिनी ह्रीं शिरसे स्वाहा। ॐ चक्रिणी ह्रूं मध्यमाभ्यां नमः। ॐ चक्रिणी ह्रूं शिखायै वषट्। ॐ गादिनी ह्रैं अनामिकाभ्यां नमः। ॐ गदिनी ह्रैं कवचाय हूम्। ॐ शूलिनी ह्रौं कनिष्ठिकाभ्यां नमः। ॐ शूलिनी ह्रौं नेत्रत्रयाय वौषट्। ॐ चापिनी ह्रः करतलकरपृष्ठाभ्यां नमः। ॐ चापिनी ह्रः अस्त्राय फट्। ॐ भूः र्भुवः स्वः ॐ ह्रीं ॐ तत् सवितुर ह्रीं वरेण्यं ॐ ह्रीं भर्गो देवस्य क्लीं धीमहि ॐ ह्रीं धियो योनः क्लीं प्रचोदयादात्मिके ह्रीं प्रणव शिरसात्मिके हूँ फट् स्वाहा। ॐ ह्रीं परोरजसे सावदों ॐ ह्रीं आपो ज्योति रसोऽमृतं ब्रह्म भूर्भुवः स्वरोम्। ॐ सत्यं ॐ।

॥ ध्यानम् ॥

सिंहादुत्थाय कोषाद् दड़ऽदड़ दड़ंधावमाना भवानी ।
दैत्यानां दिव्य शस्त्रैस्त तड तड तडं त्रोटयन्ती शिरांसि ॥
तेषां रक्तं पिवन्ती घुघट घट घटं तोषयन्ती पिशाचा,
त्यक्ष्चादहं हसन्ती रवरवड रवडरवडं शांभवी मां पुनातु ॥५॥

ॐ क्लीं ह्रीं क्लीं ॐ अरि शंख कृपाण खेट बाणान् सुधनुः पाश मयांबुजं दधाना। भजतां महिषोत्तमांग - संस्था वनदुर्गा सदृशी श्रियोस्तु दुर्गा। ॐ क्लीं ह्रीं क्लीं ॐ नमः ॥१॥

अरि शंख गदा बाणं खेटकं परशुं तथा। अम्बुजं पाश हस्ताभ्यां देवी दुर्गामहं भजे ।
ॐ क्लीं ह्रीं क्लीं ॐ हेमप्रख्यामिंदुखंडां तमौलिंशंखारिष्टाऽभीतिहस्तां त्रिनेत्राम् ।
हेमाब्जस्थां पीतवर्णां प्रसन्नां देवीं दुर्गां दिव्य रूपां नमामि। ॐ क्लीं ह्रीं क्लीं ॐ नमः॥

ॐ सहना भवतु ॐ सहनौभुनक्तु ॐ सहवीर्यं करवावहै। ॐ तेजस्विना वधी तमस्तु ॐ मा विद्विया वहै ॐ शांतिः शांतिः शांतिः।

सर्वस्वरूपे सर्वेशे सर्वशक्ति समन्विते । भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तुते ॥९॥

शत्रुनाश हेतु- **सर्वाबाधाप्रशमनं अथवा एवमुक्त्वा समुत्पत्य साऽऽरूढा तं महासुरम्। पादेनाक्रम्य कण्ठे च शूलेनैनमताडयत्॥** मंत्र भी पढ़े।

विशेष अनुग्रह हेतु, धनप्राप्ति हेतु बिल्वदल, वश्यकाम हेतु करवीर पुष्प, पुत्रप्राप्ति हेतु जपाकुसुम, पुष्टि के लिये तुलसीदल (परन्तु दुर्गा के तुलसी अर्पण नहीं होती हैं तुलसीदल का अर्थ मंजरीदल समझना चाहियें) महाकार्य हेतु कमल का पुष्प अर्पण करते हुये नवश्लोक पढ़े प्रति श्लोक एक पुष्प अर्पण करे। नवश्लोकों से पुष्पार्चन करने के पश्चात् प्रथम अध्याय का पाठ प्रारम्भ करे। अध्याय समाप्ति पर पुष्प, धूप, दीप पायस नैवेद्य ताम्बूल अर्पण कर नीराजन करे।

एक ब्राह्मण, कुमारी व सुवासिनी को भोजन कराये या समयान्तरेण भोजयिष्ये का संकल्प करे। इस तरह प्रति अध्याय एक एक दीपक की नौ श्लोकों से पुष्पार्चन कर उस अध्याय के देवता का (अध्याय पहले जो ध्यान मंत्र हैं उसका ध्यान मंत्र से) पूजन करे। अध्याय समाप्ति पश्चात् पुनः दीपक का गंधाक्षत पुष्प धूप दीप नैवेद्य अर्पण कर नीराजन करे पश्चात् ब्राह्मण, कुमारी, सुवासिनी भोजन का संकल्प करे। इस तरह प्रति अध्याय करे। अंत में महाप्रसादादि अर्पण कर प्रधान देवता की पूजा पूर्वाह्न में समाप्त कर अपराह्न में विसर्जन करे। यह प्रयोग ११, २४ या ५० दिन करे। प्रयोग करते समय तदंग देवता का प्रति अध्याय तर्पण करते रहे तो श्रेष्ठ हैं।

॥ इति दुर्गादीपदान प्रयोगः॥

॥ कामनानुसार दुर्गा पाठ के द्वादश क्रमभेद ॥

दुर्गा सप्तशती में तीन चरित्र है, इनको अलग-अलग क्रम से करने पर अलग-अलग कामना फल विशेष रूप से मिलता है। जो निम्न प्रकार हैं- (तंत्र ग्रंथ एवं निर्णय सिन्धु)

१. **महाविद्या क्रम** - प्रथम, मध्यम, उत्तर चरित्र - सर्वकामना हेतु।

२. **महातंत्री** - उत्तर, प्रथम, मध्यम चरित्र - शत्रुनाश, लक्ष्मी प्राप्ति हेतु।

३. **चण्डी** - उत्तर, मध्यम, प्रथम चरित्र - शत्रुनाश।

४. **महाचण्डी** - उत्तर, प्रथम, मध्यम चरित्र - शत्रुनाश, लक्ष्मी प्राप्ति हेतु।

५. **सप्तशती** - मध्यम, प्रथम, उत्तर चरित्र - लक्ष्मी व ज्ञान प्राप्ति एवं उत्कीलन।

६. **मृतसंजीवनी** - मध्यम, उत्तर, प्रथम चरित्र - आरोग्य लाभ।

७. **रूप दीपिका** - प्रथम, उत्तर, मध्यम चरित्र - विजय व आरोग्य । (**रूपं देहि जयं देहि** से संपुटित)

८. **निकुंभला** - मध्यम, प्रथम, उत्तर चरित्र - रक्षा हेतुः, विजय हेतु। (**शूलेन पाहि नो देवि** से संपुटित)

९. **योगिनी** - बालोपद्रव शमन। (प्रत्येक चरित्र से पहले सम्बधित योगनियों का पाठ एवं प्रत्येक मंत्र को व शं. षं. से सम्पुट)

१०. **विलोम (संहार क्रम)** - ७०१ वें श्लोक से प्रथम श्लोक तक विलोम क्रम से।

११. **अक्षरशः विलोम पाठ** - १३ वें अध्याय से प्रथम अध्याय तक काशी के पुराने विद्वानों के पास मिल सकती है व १०० - १२० वर्ष पहिले के छापी हुई है।

इसी तरह प्रत्येक चरित्र के पहिले भैरव नामावलि पाठ का विधान भी मिलता है। गढ़वाल क्षेत्र व अन्य सम्प्रदायों में हर अध्याय पहले भैरव नामावलि का पाठ करने का क्रम भी मिलता है।

कई विद्वान कहते है कि सप्तशती के बाहर के मंत्र का संपुट नहीं लग सकता, परन्तु योगिनी क्रम से यह साफ जाहिर है कि अन्य मंत्रों के संपुट लग सकते हैं।

स्वयं दतिया के स्वामीजी ने चीन के आक्रमण के समय बगलामुखी के संपुट से सहस्त्र चण्डी पाठ का आयोजन किया था।

दुर्गा सप्तशती के सभी दशमहाविद्याओं के मंत्र, गायत्री मंत्र, मृत्युञ्जय मंत्र, भागवत के मंत्रों का, वैदिक मंत्रों का व

अन्य कई मंत्रो का संपुट लगाया जा सकता है। दुर्गार्चनसृतिः, अनुष्ठान प्रकाश में दुर्गा के बाहर के मंत्रों के संपुट के विषय में लिखा हैं।

मेरे व्यक्तिगत अनुभव में सप्तशती क्रम (२, १, ३ चरित्रों के पाठ) से अधिक सफलता मिलती है। क्योंकि इस क्रम में पाठ का उत्कीलन भी हो जाता है।

स्वयं रावण भी निकुंभला का उपासक था वह भी सप्तशतीक्रम से पाठ "शूलेन पाहिनो पाहि" का संपुट लगाता था।

॥ १२. अथ सार्द्ध नवचण्डी प्रयोगः॥

नवसार्धं जपेद्यस्तु मुच्येत्प्राणान्तकाद्भयात् । राज्यं श्रीः सर्वसम्पत्तिः सर्वान् कामानवाप्नुयात् ॥१॥
प्रयोगोऽयं महागुह्यो देवानामपि दुर्लभः । तत्तेऽहं संप्रवक्ष्यामि सावधानाऽवधारय ॥२॥
मधुकैटभनाशं च महिषासुरघातनम् । शक्रादिस्तुतिरेवातोदेवीसूक्तं पुनस्तथा ॥३॥
नारायणी स्तुतिश्चैव फलानुकीर्तनं तथा । ततो वरप्रदानं तु ह्यर्ध पाठोऽय मुच्यते ॥४॥
अर्ध पाठस्त्वयं प्राक्तः सर्वकामफलप्रदः । अर्ध पाठेन रहितं नवपाठ फलं नहि ॥५॥

अत्रार्ध पाठे पंचमाध्याये देवा ऊचुः नमो देव्यै इत्यारभ्य ऋषिरुवाचेति पर्यन्तमिति। ब्राह्मणास्त्वत्रैकादश। तेषुनव ब्राह्मणाः पूर्ण त्रयोदशाध्याय पाठ कर्त्तारः एकोर्ध पाठ कर्ता। एकोयजुर्वेदीय षडंगाध्याय पाठकः एवमेकादश ब्राह्मणाः प्रयोग कर्त्तारः इति॥

अर्थात् दुर्गा अनुष्ठान में एकादश ब्राह्मणों का वरण करें तो नव ब्राह्मण दुर्गासप्तशती के सभी तेरह अध्यायों का पठन कर रहस्यादि पाठ करें एक ब्राह्मण यजुर्वेदीय रुद्राष्टाध्यायी का पाठ करें, एक ब्राह्मण दुर्गासप्तशती का अर्द्ध पाठ करें। अर्द्ध पाठ हेतु **कवच, अर्गला, कीलक, नवार्ण जप प्रथम चरित्र, मध्यम चरित्र के बाद पञ्चम अध्याय के देवाउचुः से प्रारंभ कर नमस्तस्यै स्तुति - या साम्प्रतम् चोद्धत्.........** । तक करने के बाद **एकादश अध्याय** पूर्ण, **त्रयोदश अध्याय** से **-देव्युवाच .... सावर्णि भविता मनुः**। पर्यन्त (वर प्रदान स्तोत्र) पढ़ें। पुनः नवार्णमंत्र जप रहस्यादि कर पठन करें।

॥ दुर्गापाठे पाठवृद्धिक्रम विचार॥

वृद्धि पाठ क्रम ५ दिन का प्रयोग होता हैं। यह क्रम बिना संपुट क्रम के ही सुलभ हैं। पहले दिन एक, दूसरे दिन दो, तीसरे दिन तीन, चौथे दिन चार पाठ करने से १० पाठ चार दिन में प्रति ब्राह्मण द्वारा करने पर १० ब्राह्मणों द्वारा शतचण्डी विधान हुआ। एक मूल पाठ के साथ में १० माला नवार्ण की अलग से जपने का विधान हैं। ५ वें दिन दशांश होम करके कुमारी ब्राह्मणभोजन करायें।

॥ दुर्गा पाठे संपुट पाठ विधिः॥

पाठ मंत्र से आगे पीछे कामना मंत्र लगाने को संपुटीकरण कहते हैं। संपुट पाठ ३ प्रकार के होते हैं। **१. उदय संपुट २. अस्त संपुट ३. अर्द्धसंपुट।**

१. "**उदय संपुट**" में कामना मंत्र सप्तशतीपाठ मंत्र के आदि व अंत में लगाया जाता हैं।

२. "**अस्तसंपुट**" बीजमंत्र या कामना मंत्र पाठ के आदि में पढे फिर दुर्गापाठ मंत्र पढे पश्चात् अंत में कामना मंत्र विलोम

रूप से उच्चारण करे। यथा- **हौं जूंसः 'ऐं मार्कण्डेय उवाच' सः जूं हौं। ॐ भूर्भुवः स्वः तत्सवितुरेवण्यम्......प्रचोदयात् ''ऐं मार्कण्डेय उवाच'' द्यादचोप्र नः यो योधि...... स्वः भुवःभूः ॐ।**

३. ''**अर्द्ध संपुट**'' कामनामंत्र दुर्गापाठ मंत्र के आदि या अंत में केवल एक बार पढें। इसका फल न्यून हैं परन्तु विपरीत प्रभाव नहीं होता हैं।

४. तंत्र मार्ग के अनुसार व्याहृति व बीजाक्षर का संपुट प्रारंभ में लोम तथा कामना मंत्र इष्ट के बाद विलोम क्रम से होता है तथा इनकी आहुति भी एक ही होती है।

५. भिन्नपाद प्रयोग - मंत्र के चरण भेद मध्य में बीजमंत्र या अन्य मंत्र के संयोजन से मंत्र उपासना या दुर्गा उपासना कि जा सकती है। इस पद्धति से प्रयोग विधि स्वतंत्र पुस्तक में प्रकाशित की जायेगी।

॥ संपुटित पाठ होमे आहुति संख्या विचारः॥

संपुटित पाठ होम में किसी आचार्य का मत हैं ''**संपुटे हवनं नास्ति**'' के अनुसार ७०० होम आहुति होगी तो किसी आचार्य के अनुसार संपुट होम आहुति संख्या २१०० होगी। आचार्य मतों का अवलोकन करने के पश्चात मेरे स्वमत का अवलोकन अवश्य करे। मूल पाठ के साथ अलग से १० माला नवार्ण की पृथक् करे।

मार्कण्डेय पुराणोक्तं दशकृत्वः सुचेतसः। नवार्ण चण्डिका मंत्रं जपेयुश्चायुत पृथक्॥

अथ दुर्गा के १० पाठ के साथ पाठ का दशांश व मंत्र जाप का दशांश होम पृथक् पृथक् करे।

संपुट होम विषये दुर्गाकल्पद्रुमे प्रयोगसंग्रहोक्त कदाचित् संपुटैयुरक्तं पठेत् सप्तशती स्तवम्। ससंपुटं पठेद्धोमे हुनेत् सप्तशताहुतीः॥ अथ संपुटित पाठ होमेऽपि आहुती संख्यां सप्तशतवत्याह।

कर्मठगुरु (प्र.सा.)- **सम्पुटे हवनं नास्ति प्रत्यहेऽपि तथैव च। नानार्थसिद्धिवैकल्पे होमन्तु विपुलं चरेत्।।**

अर्थात् संपुट का हवन नहीं करे परन्तु ऐसा बहुधा करते तो हैं। परन्तु **दुर्गाकल्पतरु** एवं **अनुष्ठान प्रकाश** में आहुति संख्या **२१००** स्पष्ट लिखी गई हैं। यथा-

होमकाले बीजसंयोगो दुर्गा मंत्रेण पृथक् हुनेत्। कामना बीज संयोगो दुर्गामंत्रेण संहुनेत् ॥१॥
दुर्गास्तवन मंत्राणां संख्यां सप्तशतं भवेत्। कामना मंत्र संख्या च शतं चैव चतुर्दश ॥२॥
मध्ये मंत्रान् सप्तशतं होमकाले तु योजयेत्। पाठे मंत्रं पुटं वाच्यं होम मंत्राः पृथक् पृथक् ॥३॥
होमसंख्या च मंत्राणां शतं वै चैकविंशतिः। पाठे बीज पुटं वाच्यं होमे बीज पुटं हुनेत् ॥४॥

स्वमतानुसारेण:- दुर्गापाठ मंत्र को अगर किसी **ऐं ह्रीं, श्रीं,** या किसी बीज मंत्र से पुटित किया जाता हैं तो पुटित कामना मंत्र के अलग होम की आवश्यकता नहीं हैं। बीज मंत्र एकाक्षरी हो या ५-७ बीजाक्षर होवे तो एक ही आहुति होगी। अतः ७०० आहुति देवे। **अस्त संपुट** में एक ही आहुति होगी क्यों कि इसमें अंत में **कामना मंत्र** या **बीजाक्षर** विलोम होगा। व्याहृति व बीजाक्षरों का संपुट मंत्र के आदि व अंत में लोम विलोम ही लगता है अतः विलोमाक्षर पृथक् होम नहीं करने पर केवल ७०० आहुति देवे। मारणादि मंत्रों में लोम कामना मंत्र फिर दुर्गा मंत्र फिर विलोमाक्षर कामना मंत्र की आहुति देने पर २१०० आहुति देवे।

प्रायः **उदय संपुट** पाठ ही करते हैं अर्थात् दुर्गा मंत्र के आदि-अंत में कामना मंत्र लोम ही लगाते हैं अतः २१०० आहुति देवे।

॥ कामना सिद्धि परत्वेन संपुटा मंत्राः ॥

कामनासिद्धि सप्तशती के श्लोक, गायत्री, दशमहाविद्या, बटुक, मृत्युञ्जय, दधिवामन, नृसिंह व पंचओंकार देवताओं के मंत्र तथा पुराणोक्त मंत्रों के संपुट से तत्कामना सिद्धि प्राप्त होती है।

सप्तव्याहृतिपूर्वकं श्लोकं कृत्वा महास्तोत्रं जपेन्मन्त्रसिद्धिः ॥१॥ अन्यच्च : **सव्याहृतिकां गायत्रीमादावन्ते वा कृत्वा श्लोकं जपेत् तदा महाफलम्** ॥२॥ अन्यच्च : **प्रतिश्लोकं व्याहृतित्रययुतां गायत्रीं जपेत् तदा महाफलम्** ॥३॥ अनयच्च : **प्रतिश्लोकमादावन्ते ''जातवेदसे सुनवास सोममरातीयतो निदहाति वेदः। स नः पर्षदतिदुर्गाणि विश्वानावेव सिन्धुं दुरितान्यग्निः'' इति ऋचं जपेत्। सर्वकामसिद्धि** ॥४॥

अन्यच्च : **ॐ भूर्भुवः स्वः ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्। जातवेदसे सुनवास सोममरातीयतो निदहाति वेदः। स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः। ॐ त्र्यम्बकं यजामहे सुगन्धिम्पुष्टिवर्धनम्। ऊर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात्। इति शताक्षरत्र्यम्बकमन्त्रेण सम्पुटीकृत्य मन्त्रं पठेत्। रोगारिक्षयमृत्यून्मूलनं सर्वापद्विनिवारणमभीप्सितप्राप्तिः** ॥५॥

अन्यच्च : प्रतिश्लोकं **शरणागतदीनार्तपरित्राणपरायणे। सर्वस्यार्त्तिहरे देवि नारायणि नमोस्तु ते।** इति श्लोकं पठेत्। सर्वकार्यसिद्धिः ॥६॥ अन्यच्च : प्रतिश्लोकं **करोतु सा नः शुभहेतुरीश्वरी शुभानि भद्राण्यभिहन्तु चापदः। इत्यर्धं पठेत् सर्वकामाप्तिः** ॥७॥ अन्यच्च : प्रतिश्लोकम्। **एवं देव्या वरं लब्ध्वा सुरथः क्षत्रियर्षभः। सूर्याज्जन्म समासाद्य सावर्णिर्भविता मनुः।** इत्याद्यन्तं पठेत् स्वाभीष्टवरप्राप्तिः ॥८॥ अन्यच्च : **दुर्गे स्मृता हरसि भीतिमशेषजन्तोः स्वस्थैः स्मृता मतिमतीव शुभां ददासि। दारिद्र्यदुःखभयहारिणी का त्वदन्या सर्वोपकारकरणाय सदार्द्रचिता।** इति श्लोकं प्रति श्लोकाद्यन्तं पठेत्। **सर्वापत्तिनिवारणं स्यात्** ॥९॥ अन्यच्च : **ॐ कांसोस्मि तां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम्। पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियम्।** इति ऋचं प्रतिश्लोकाद्यन्तं पठेत्। **लक्ष्मीप्राप्तिः** ॥१०॥

अन्यच्च : **ॐ मनृणा इत्यादि ऋचं** प्रतिश्लोकाद्यन्तं पठेत्। **ऋणपरिहारः** ॥११॥ अन्यच्च : **ॐ शब्दात्मिका सुविमलर्ग्यजुषां निधानमुद्गीथरम्य पदपाठवतां च साम्नाम्। देवि त्रयी भगवती भवभावनाय वार्ता च सर्वजगतां परमार्तिहन्त्री।** इति श्लोकं प्रतिश्लोकाद्यन्तं पठेत्। **सुखप्राप्तौ दारिद्रदुःखभयमोचने च** ॥१२॥ अन्यच्च : **सर्वबाधाविनिर्मुक्तो धनधान्यसुतान्वितः। मनुष्यो मत्प्रसादेन भविष्यति न संशयः।** इति श्लोकं प्रतिश्लोकाद्यन्तं पठेत्। **धनधान्यसुखप्राप्तिः** ॥१३॥ अन्यच्च : **या देवी सर्वभूतेषु वृत्तिरूपेण संस्थिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः।** इति श्लोकं प्रतिश्लोकाद्यन्तं पठेत्। **मनउत्सवप्राप्तिः** ॥१४॥

अन्यच्च : **ॐ धर्म्याणि देवि सकलानि सदैव कर्माण्यत्यादृतः प्रतिदिनं सुकृती करोति। स्वर्गं प्रयाति च ततो भवतीप्रसादाल्लोकत्रयेपि फलदा ननु देवि तेन।** इति श्लोकं प्रतिश्लोकाद्यन्तं पठेत्। **सकलकर्मसुकृतप्राप्तिः** ॥१५॥ अनयच्च : **ॐ त्वयैतत्पाल्यते देवि त्वमत्स्यन्ते च सर्वदा। विसृष्टौ सृष्टिरूपा त्वं स्थितिरूपा च पालने।** इति श्लोकं प्रतिश्लोकाद्यन्तं पठेत्। **सर्वकार्यसिद्धिः**॥१६॥ अन्यच्च : **ॐ देवि प्रपन्नार्तिहरे प्रसीद प्रसीद मातर्जगतोखिलस्य। प्रसीद विश्वेश्वरि पाहि विश्वं त्वमीश्वरी देवि चराचरस्य।** इति श्लोकं प्रतिश्लोकाद्यन्तं पठेत्। **सर्वापन्निवृत्तिः। सर्वकामाप्तिश्च। एषु प्रयोगेषु प्रतिश्लोकं। दीपाग्रे नमस्कारकरणे अतिशीघ्रं सिद्धिः** ॥१७॥ अन्यच्च : **ॐ रोगानशेषानपहन्सि तुष्टा रुष्टा तु कामान्सकलानभीष्टान्। त्वामाश्रितानां न विपन्नराणां त्वामाश्रिता ह्याश्रयतां प्रयान्ति।** इति श्लोकं प्रतिश्लोकाद्यन्तं पठेत्। **सकलरोगनाशः स्यात्** ॥१८॥ अन्यच्च : **उपसर्गानशेषांस्तु महामारीसमुद्भवान्। तथा त्रिविधमुत्पातं माहात्म्यं शमयेन्मम।** इति श्लोकं प्रतिश्लोकाद्यन्तं पठेत्। **सर्वबाधानाशः स्यात्** ॥१९॥ अन्यच्च : **मेधासि देवि**

विदिताखिलशास्त्रसारा दुर्गासि दुर्गभवसागरनौरसङ्गा। श्रीः कैटभारिहृदयैककृताधिवासा गौरी त्वमेव शशिमौलिकृतप्रतिष्ठा। इति श्लोकं प्रतिश्लोकाद्यन्तं पठेत्। **वाक्सिद्धिः** ॥२०॥

अन्यच्च **स्तवने : ॐ सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके। शरण्ये त्र्यम्बके गौरि नारायणि नमोस्तु ते।** इति श्लोकं प्रतिश्लोकाद्यन्तं पठेत् ॥२१॥ अन्यच्च : **(भयमोचने) ॐ ज्वालाकरालमत्युग्रमशेषासुरसूदनम्। त्रिशूलं पातु नो भीतेर्भद्रकालि नमोस्तु ते।** इति श्लोकं प्रतिश्लोकाद्यन्तं पठेत् ॥२२॥

अन्यच्च : **दुः स्वप्नपीडापरिहारे शान्तिकर्मणि सर्वत्र तथा दुःस्वप्नदर्शने। ग्रहपीडासु चोग्रासु माहात्म्यं शृणुयान्मम।** इति श्लोकं प्रतिश्लोकाद्यन्तं पठेत् ॥२३॥ अन्यच्च : **(परप्रयोगशमने) ततो निशुभं सम्प्राप्य चेतनामात्तकार्मुकः। आजघान शरैर्देवीं कालीं केसरिणं तथा।** इति श्लोकं प्रतिश्लोकाद्यन्तं पठेत् ॥२४॥

अन्यच्च : **(अपद्वेषनाशने) तयास्माकं वरो दत्तो यथापत्सु स्मृताखिलाः। भवतां नाशयिष्यामि तत्क्षणात्परमापदः।** इति श्लोकं प्रतिश्लोकाद्यन्तं पठेत् ॥२५॥ अन्यच्च : **(मारणार्थे) ॐ एवमुक्त्वा समुत्पत्त्य सारूढा तं महाऽसुरम्। पादेनाक्रम्य कण्ठे च शूलेनैनमताडयत्।** इति श्लोकं प्रतिश्लोकाद्यन्तं पठेत् ॥२६॥ अन्यच्च : **(शत्रुपरिहारे) त्रैलोक्यमेतदखिलं रिपुनाशनेन त्रातं त्वया समरमूर्धनि तेपि हत्वा। नीता दिवं रिपुगणा भयमप्यपास्तमस्माकमुन्मदसुरारिभवं नमस्ते।** इति श्लोकं प्रतिश्लोकाद्यन्तं पठेत् ॥२७॥ अन्यच्च : **(शत्रुपराभवार्थे) ॐ या देवीसर्वभूतेषु क्षान्तिरूपेण संस्थिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः** ॥२८॥ अन्यच्च : **सर्वाबाधासु घोरासु वेदनाभ्यर्दितोऽपिवा (सर्वबाधानाशने) स्मरन्ममेतच्चरितं नरो मुच्येत सङ्कटात्।** इति श्लोकं प्रतिश्लोकाद्यन्तं पठेत् ॥२९॥

अन्यच्च : **(विषमचित्तशमने) पुनरप्यतिरौद्रेण रूपेण पृथिवीतले। अवतीर्य हनिष्यामि वैप्रचित्तांस्तु दानवान्।** इति श्लोकं प्रतिश्लोकाद्यान्तं पठेत् ॥३०॥ अन्यच्च : **ॐ ज्ञानिनामपि चेतांसि देवी भगवती हि सा। बलादाकृष्य मोहाय महामाया प्रयच्छति।** इति श्लोकं प्रतिश्लोकाद्यन्तं पठेत्त्ववश्यं मोहनं च इत्यनुभवसिद्धम् ॥३१॥ अन्यच्च : **ॐ रक्तचामुण्डे तुरु तुरु अमुकं मे वशमानय स्वाहा। अनेन प्रत्यध्यायमाद्यन्तयोः पूजा सर्वान्ते अयुतं जपाः अयुतमन्त्रैश्च होमयेत् कटुतैलेन रक्तचन्दनराजिकासहस्राहुतिमन्त्रेण राजानं वशमानयेत्। मधुनाशोक पुष्पैश्च रात्रौ हुत्वा तु पूर्ववत्। चक्रवर्ती भवेद्वश्यश्चण्डीमन्त्रप्रभावतः। अन्ते शतं ब्राह्मणाः कुमार्यश्च भोजनीयाः** ॥३२॥ अन्यच्च : **(राजवश्ये) तत्किमेतन्महाभाग यन्मोहो ज्ञानिनोरपि। ममास्य च भवत्येषा विवेकान्धस्य मूढता।** इति श्लोकं प्रतिश्लोकाद्यन्तं पठेत् ॥३३॥

अन्यच्च : **(दुर्जनमोहने) ॐ सा त्वमित्थं प्रभावैः स्वैरुदारैर्देवि संस्तुता। मोहयैतौ दुराधर्षावसुरौ मधुकैटभौ।** इति श्लोकं प्रतिश्लोकाद्यन्तं पठेत् ॥३४॥ अन्यच्च : **(वैरिमोहने)ॐ सैषा प्रसन्ना वरदा नृणां भवति मुक्तये। सा विद्या परमा मुक्तेर्हेतुभूता सनातनी।** इति श्लोकं प्रतिश्लोकाद्यन्तं पठेत् ॥३५॥ अन्यच्च : **ॐ मम वैरिवशं यातः कान्भोगानुपलप्स्यते। ये ममानुगता नित्यं प्रसादधनभोजनैः।** इति श्लोक प्रतिश्लोकंसम्पुटिते श्लोकोक्तं फलम् ॥३६॥ अन्यच्च : **ॐ इत्युक्ता सा तदा देवी गम्भीरान्तः स्मिता जगौ। दुर्गा भगवती भद्रा ययेदंधार्यते जगत्। इति प्रतिश्लोकपाठे विद्याप्राप्तिः वाग्वैकृतनाशश्च** ॥३७॥ अन्यच्च : **(मनोप्सितप्राप्त्यै गतप्रयोगप्राप्त्यै च।) परितुष्टा जगद्धात्री प्रत्यक्षं प्राह चण्डिका। इत्यर्धं पठेत्** ॥३८॥ अन्यच्च : **(देवीसन्तोषप्राप्त्यै) स च वैश्यस्तपस्तेपे देवीसूक्तं परं जपन्। तौ तस्मिन्पुलिने देव्याः कृत्वा मूर्तिं महीमयीम्।** इति पठेत् ॥३९॥

अन्यच्च : **प्रतिमन्त्रं प्रणवम् (ॐ) पुटितं जपेत् शीघ्रतर कार्यसिद्धिः अत्र त्रिमध्वाक्तकमलैर्होमः। अत्र विप्रतीर्थतोयैर्वा ब्राह्मणभोजनान्ते मार्जनं कुर्यात्** ॥४०॥ अन्यच्च : **माया (ह्रीं) श्री (श्रीं) (क्लीं) पुटिते**

सर्वेष्ट सिद्धिः ॥४१॥ अन्यच्च : प्रतिश्लोकं कामबीज (क्लीं) सम्पुटितस्यैकचत्वारिंशद्दिनानि त्रिरावृतौ पुत्रप्राप्तिः एकविंशतिदिनपर्यन्तमुक्तरीत्या प्रत्यहं पञ्चावृत्त्या वशीकरणम्। आकर्षणार्थे द्विचत्वारिंशद्दिनपर्यन्तं कामपुटितस्य दशावृत्तिः ॥४२॥ अन्यच्च : माया बीज (ह्रीं) पुटितस्य फट् पल्लवसहिस्य त्रिसप्तदिनपर्यन्तं त्रयोदशावृत्तौ उच्चाटनसिद्धिः तादृशस्यैव चतुश्चत्वारिंशद्दिनपर्यन्तं सर्वोपद्रवनाशः स्यात् ॥४३॥ अन्यदेकोनपञ्चाशद्दिनपर्यन्तं प्रतिश्लोकम् (श्रीं) इति श्रीबीजसम्पुटितस्य पञ्चदशावृतौ लक्ष्मीप्राप्तिः सद्यो मोहनसिद्धिश्च ॥४४॥ अन्यत् प्रतिश्लोकम् (मैं) बीजसम्पुटितस्यशतावृत्त्या विद्याप्राप्तिः ॥४५॥

अन्यच्च : मायादौ कूर्चबीजेन सम्पुटितस्य एकादशवृत्तौ। सर्वोपद्रवनाशः स्यात् ॥४६॥ कार्यपरत्वेन सप्तशतीस्तोत्रान्तर्गतप्रति श्लोकप्रयोगेणाहः ॐ दुर्गे स्मृता हरसि भीतिमशेषजन्तोः स्वस्थैः स्मृतामतिमतीव शुभां ददासि। दारिद्र्यदुःखभयहारिणी का त्वदन्या सर्वोपकारकरणाय सदार्द्रचित्ता। अस्य केवलस्यापि श्लोकस्य कार्यानुसारेण लक्षमयुतं सहस्त्रं शतं वा जपाः सर्वापत्तिनिवारणं स्यात् ॥१॥ अन्यच्च : ततो वव्रे नृपो राज्यमविभ्रंश्यन्यजन्मनि। अत्रैव च निजं राज्यं हतशत्रुबलं बलात्। इति मन्त्रस्य लक्षजपे पुनः स्वराज्यप्राप्तिः ॥२॥

अन्यच्च : ॐ दुर्गे स्मृता हरसि भीतिमशेष जन्तोः स्वस्थैः स्मृता मतिमतीव शुभां ददासि। यदन्ति यच्च दूरके भयं विन्दति मामिह। पवमानवितज्जहि। दारिद्र्यदुःखभयहारिणि का त्वदन्या सर्वोपकारकरणाय सदार्द्रचित्ता। इति कार्यानुसारेण लक्षमयुतं सहस्त्रं शतं वा जपः सर्वापत्तिनिवारणः त्यात् ॥३॥ अन्यच्च : ॐ भगवत्या कृतं सर्वं न किञ्चिदवशिष्यते। यदयं निहतः शत्रुरस्माकं महिषासुरः। यदि चापि वरो देयस्त्वयास्माकं महेश्वरि। संस्मृतासंस्मृता त्वं नो हिंसेथाः परमापदः। यश्च मर्त्यः स्तवैरेभिस्त्वां स्तोष्यत्यमलानने। तस्य वित्तर्धिविभवैर्धन दारादिसम्पदाम्। वृद्धयेस्मत्प्रसन्ना त्वं भवेथाः सर्वदाम्बिके। इति द्वादशोत्तरशताक्षरो मन्त्रः सर्वकामदः सर्वापन्निवारणश्च ॥४॥

अन्यच्च : ॐ देवि प्रपन्नार्तिहरे प्रसीद मातर्जगतोखिलस्य। प्रसीद विश्वेश्वरि पाहि विश्वं त्वमीश्वरी देवि चराचरस्य। इति श्लोकस्य यथाकार्यं लक्षायुतसहस्त्रशतान्यतमे जपे सर्वापन्निवृत्तिः सर्वकामाप्तिश्च। इति श्लोकेन दीपाग्रे केवलमेव नमस्कारकरणे अतिशीघ्रं सिद्धिः ॥५॥ अन्यच्च : ॐ इत्थं निशम्य देवानां वचांसि मधुसूदनः। चकार कोपं शम्भुश्च भ्रुकुटीकुटिलाननौ। इति श्लोकं त्रिंशत्सहस्त्रं जपेत्। सम्पत्समृद्धिर्भवति ॥६॥ अन्यच्च : ॐ नमो देव्यै महादेव्यै शिवायै सततं नमः। नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम्। इति मन्त्रेण मासं जपः दशांशेन क्षीरसंयुतैः कमलैर्होमो वा लक्ष्मीप्राप्तिः ॥७॥ अन्यच्च : ॐ रोगानशेषानपहंसि तुष्टा रुष्टा तु कामान्सकलान भीष्टान्। त्वामाश्रितानां न विपन्नरणां त्वामाश्रिता ह्याश्रयतां प्रयान्ति। इति लक्षं जपेत् रोगनाशः स्यात् ॥८॥

अन्यच्च : इत्युक्ता सा तदा देवी गम्भीरान्तः स्मिता जगौ। दुर्गा भगवती भद्रा ययेदं धार्यते जगत्। इति लक्षं जपेत् विद्याप्राप्तिः वाग्वैकृतनाशश्च ॥९॥ अन्यच्च : ॐ हिनस्ति दैत्यतेजांसि स्वनेनापूर्य या जगत्। सा घण्टा पातु नो देवि पापेभ्यो नः सुतानिव। इत्यनेन सदीपबलिदानं घण्टाबन्धनेन बालग्रहशान्तिः ॥१०॥ अन्यच्च : ॐ इत्थं यदायदा बाधा दानवोत्था भविष्यति। तदातदाऽवतीर्याहं करिष्याम्यरिसंक्षयम्। इति श्लोकस्य लक्षजपे महामारीशान्तिः ॥११॥ अन्यच्च : ॐ सर्वाबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि। एवमेव त्वया कार्यमस्मद्वैरिविनाशनम्। इत्यस्य लक्षजपे श्लोकोक्तं फलं सर्वबाधाशमनं च ॥१२॥ अन्यच्च : ॐ एवमुक्त्वा समुपात्य सा रूढा तं महासुरम्। पादेनाक्रम्य कण्ठे च शूलनैनमताडयत्। इति लक्षं जपेत् मारणोक्तावृत्तिभिः फलसिद्धिः ॥१३॥ अन्यच्च : ॐ ज्ञानिनामपि चेतांसि देवी भगवती हि सा। बलादाकृष्य मोहाय महामाया प्रयच्छति। इति श्लोक जपमात्रेण सद्यो मोहनमित्यनुभव सिद्धम् ॥१४॥ इति। बालग्रह शांति एवं शत्रु से मैत्री हेतु – बालग्रहाभिभूतानां बालानां शांतिकारकम्।

संघातभेदे च नृणां मैत्रीकरणमुत्तमम् ॥१५ ॥ प्रेतदोषनाशार्थे – **दुर्वृत्तानामशेषाणां बलहानिकरं परम् । रक्षोभूतपिशाचानां पठनादेव नाशनम् ॥१६ ॥** मारण प्रयोग – **तीसरे अध्याय का चालीसवाँ श्लोक (एवमुक्त्वा ... ताडयत्)**

कामना सिद्धि हेतु दुर्गासप्तशती के कुछ मुख्य मंत्रों का संपुट हेतु उल्लेख हैं। दुर्गास्तोत्र के अलावा बाह्य मंत्रों को भी प्रयोग में लाया जा सकता हैं। गायत्री मंत्र, मृत्युंजय मंत्र, दशमहाविद्याओं के मंत्र, भैरवादि के मंत्रों का श्रीसूक्त की ऋचाओं का, श्रीमद्भागवत के कुछ श्लोक का भी संपुट लगाया जा सकता हैं कुछ प्रयोग मेरे स्वयं के अनुभूत हैं।

१. शत्रुस्तंभनेः– ॐ ह्लीं बगलामुखी सर्वदुष्टानां वाचं मुखं पदं स्तंभय जिह्वां कीलय बुद्धिं विनाशय ह्लीं ॐ स्वाहा।

२. लक्ष्मीप्राप्तिः– श्रीं ह्रीं ऐं भगवति बगले मे श्रियं देहि देहि स्वाहा।

३. रोगशत्रु एवं अभिचार दमन तथा लक्ष्मी प्राप्ति हेतुः– **श्रीं ह्रीं ऐं क्लीं श्री बगलानने ममरिपून् नाशय नाशय ममैश्वर्याणि देहि देहि शीघ्रं मनोवांछितं कार्यं साधय साधय ह्रीं श्रीं स्वाहा।** इस मंत्र का प्रयोग जहां कहीं राजकीय बाधा, ग्रहबाधा या प्रेतबाधा के कारण कोई व्यापार बंद की स्थिति में भी पहुँच गया हो वहां मैंने किया है लाभप्राप्त हुआ है सफलता मिली है।

४. सद्यलक्ष्मीप्राप्ति :– ततश्चाऽविरभूत् साक्षच्छ्री (साक्षात् श्री) रमा भगवत् परा। रञ्जयंती दिशः कान्त्याः विद्युत् सौदामिनी यथा ॥ इस मंत्र को बगलामुखी भक्तमंदार मंत्र से पुटित करने से जो मंत्र बनता हैं उससे संपुटित कर पाठ करने पर दयनीय स्थिति व असंभव स्थिति में भी द्रव्य लाभ होता हैं। ऐसा मेरा प्रयोगिक अनुभव हैं। मंत्रो यथा–

५. सर्वसिद्धि एवं लक्ष्मीप्राप्तिः– श्रीं ह्रीं ऐं भगवति बगले ततश्चाविरभूत् साक्षाच्छ्री रमा भगवत् परा। रञ्जयन्ती दिशः कान्त्याः विद्युत् सौदामिनी यथा मे श्रियं देहि देहि स्वाहा ॥ इस मंत्र से शत्रु, विघ्न, उपद्रव नष्ट होकर धन प्राप्ति होती हैं, ऐसा मेरा अनुभव हैं।

६. लक्ष्मीप्राप्ति व स्वर्णलाभ हेतुः– ॐ ऐं ह्रीं श्रीं आपदुद्धारणाय ह्रां ह्रीं ह्रूं अजामिल बद्धाय लोकेश्वराय स्वर्णाकर्षणभैरवाय मम दारिद्र्यं विद्वेषणाय महाभैरवाय नमः श्रीं ह्रीं ऐं।

॥ नित्यचण्डी विधानम् ॥

स्नान शुद्धि कर पूजागृह में प्रवेश करे। द्वार देहली का पूजन करे। स्थान की पूजा करे। चंदनादि से युक्त हो पवित्रीकरण कर गुरु का ध्यान करे। आसन पूजा कर गणपति स्मरण कर संकल्प करे। दिग्रक्षण करे। वरुण, दीप, गणेश, मातृका नवग्रहों का यथोपचार पूजन कर प्रधान देवता की पूजा कर दुर्गापाठ करे। दुर्गासप्तशति पाठ का संकल्प करे। कवच, अर्गला, कीलक कर रात्रि सूक्त का पाठ करे। नवार्ण जप के पहले कुञ्जिका स्तोत्र का पाठ करे। क्योंकि यह मंत्र जाग्रति हेतु हैं।

पश्चात् तीनों चरित्रों का पाठ कर नवार्ण मंत्र का जप करे, फिर देवी सूक्त व रहस्य त्रय का पाठकर क्षमा प्रार्थना कर जप पाठ फल भगवती के वाम हस्त में समर्पण करे। मासान्त में होमादि विधान करें। आर्षविधि में तो तीनों चरित्रों के पाठ के पहिले कवच, अर्गला, कीलक तथा तीनों रहस्य ये छः अंग कहे हैं। दुर्गापाठ के आदि अंत में नवार्ण जप करना चाहिये रात्रि सूक्त देवी सूक्त बाद के आचार्यों ने जोड़ा हैं। देव्यथर्वशीर्ष से देवी का स्नान अभिषेक करे, अथर्वशीर्ष का पाठ नूतन प्रतिमा की प्रतिष्ठा समय करे, प्रातःकाल उठते समय व शाम को करे। आजकल दुर्गापुस्तक में कई स्तोत्र जोड़ दिये हैं सो साधक उनको भी जरुरी समझ कर करते हैं। सप्तश्लोकी दुर्गा, १०८, ३० नामावलि व अन्यस्तोत्र तो

अधिकस्य अधिक फलं के आधार पर हैं। **बलिकर्म** वार, तिथि, पक्ष आधार पर करें। १०० पाठ होने के बाद हवन कर्म, कुमारी पूजन, बटुक पूजन करें।

॥ शतचण्डी, सहस्रचण्डीश्चलक्षचण्डी विधानम् ॥

शतचण्डी विधान व सहस्रचण्डी व लक्षचण्डी विधान हेतु पहले यजमान से हेमाद्रि संकल्प व पापघट दान तथा दशविध स्नान कराये। कुऐ या तीर्थ से वरुण योगिनी पूजन कर जल कलश यात्रा कराये मार्ग में भैरव बलि देवे। यज्ञहवन वेदी व पूजास्थल पर यज्ञमण्डप की द्वारशाखा के पास तथा १० दिशाओं में एवं देवतओं के भद्रमण्डलों के पास तथा प्रत्येक कुण्डों के पास कुंभ रखे। गणेशमातृका, वास्तु, योगिनीक्षेत्रपाल, नवग्रह एवं प्रधानवेदी अवश्य बनाये। यज्ञमण्डप एक-पांच व नवकुण्डों के परिमाप का बनाये। १०००० से अधिक मंत्र होम में वास्तु पूजन अवश्य करे। दुर्गापाठ पठन हेतु अन्य मण्डप बनाये, नित्य दशांश होम की व्यवस्था करे। पठन के ब्राह्मण एवं होम के लिये ऋत्वकों का वरण कर आचार्य ब्रह्मा का वरण करे। यज्ञीय विधान से द्वारपाल बलि देकर अग्निस्थापन कर होमकार्य प्रारंभ कराये। पूर्णाहुति पश्चात् कुमारी, वटुक, सुहासिनी व ब्राह्मण भोजन कराये यथा यथा विभाग दक्षिणा देकर आशीर्वाद ग्रहण करे। ब्राह्मण यजमान का अभिषेक करे, आशीर्वचन कहे व रक्षासूत्र बांधे आशिका प्रदान करें।

॥ अथ शतचण्डी विधानम् ॥

उक्तं च क्रोडतन्त्रे।

यदा यदा सतां हानिरात्मनो ग्लानिरेव च। तदा कार्या शतावृत्ती रिपुघ्ना भूतिवर्धना ॥१॥
दुःस्वप्न दर्शने घोरे महामारीसमुद्भवे। पुष्टिप्रदा शतावृत्तिः कार्या चायुःक्षये तथा ॥२॥
महाभये छेदयोगे दुर्भिक्षे मरणेऽपि च। कुर्यात्तत्र शतावृत्तिं देवीमाहात्म्यमुत्तमम् ॥३॥
अद्भुते च समुत्पन्ने बान्धवानां महोत्सवे। कुर्याच्चण्डीशतावृत्तिं सर्वसंपत्तिकारणम् ॥४॥
शतावृत्त्या भवेदायुः शतावृत्त्या समागमः। वश्या भवन्ति राजानः श्रियमाप्नोति संपदाम् ॥५॥
धनार्थी प्राप्नुयादर्थं पुत्रकामो लभेत्सुतम्। विद्यार्थी प्राप्नुयाद्विद्यां रोगी रोगात्प्रमुच्यते। ॥६॥
चतुर्वर्गफलावाप्तिकारणं रिपुनाशनम्। चण्डी शतावृत्तिफलं नास्ति यज्ञे वरानने ॥७॥
विधिमत्र प्रवक्ष्यामि शृणुष्व वरवर्णिनि। निमन्त्रयेत पूर्वेद्युर्विप्रान्विद्या समन्वितान् ॥८॥
अलोलुपानृजून् शान्तान् देव्या भक्तिसमन्वितान्। मंत्रोपतन्त्रतन्त्रज्ञान् शतावृत्तौ नियोजयेत् ॥९॥
उत्तराशास्थिते हंसे शुक्लपक्षे तथा शुभे। ज्ञार्केन्दुभृगुजीवेषु सुयोगे सुतिथौ तथा ॥१०॥
पातक्रक च घण्टादिदोषहीने स्थिरोदये। स्थापयेदव्रणं कुम्भमुत्तराभिमुखं स्वयम् ॥११॥
न विदध्याद्धरौ सुप्ते भूकम्पाकालवर्षणे। वज्रपाते महोत्पाते गुर्वादित्यादिके तथा ॥१२॥
महागुरौ विपन्ने च संवेशे कार्य वस्तुनः। शतावृत्त्यादियागं तु न विदध्यात्कदाचन ॥१३॥
त्रिपञ्चसप्तभिर्वाऽपि नवैकादशभि स्तथा। अदीर्घदिवसैः क्षिप्रं विदध्याच्चण्डिकामखम् ॥१४॥

अयुग्मब्राह्मणैः कार्या शतावृत्ति सुसिद्धये । त्रिपञ्चसप्तनवभिर्दिनैः पक्षेण वा पुनः ॥१५॥
देवीमाहात्म्यपठनं युग्मविप्र कृतं तु यत् । निष्फलं च भवेत्सर्वं भूतिनाशः प्रजायते ॥१६॥
अष्टमी नवमी वाऽपि यदि स्याद्वा चतुर्दशी । शतावृत्तिर्नवावृत्तिः पक्षावृत्तिः क्रमेण च ॥१७॥
शताश्वमेघगोमेघ वाजपेयफल प्रदा । अतः किं बहुनोक्तेन चण्डीपाठफलं प्रिये ॥१८॥
प्रत्येकावर्तनं देवि हयमेधेन संमितम् । त्रिरावृत्त्या लभेत्कामान्पञ्चावृत्या रिपूञ्जयेत् ॥१९॥

अथ मन्त्रमहोदधौ।

शतचण्डीविधानं तु प्रवक्ष्ये प्रीतये नृणाम् । नृपोपद्रव आपन्ने दुर्भिक्षे भूमिकम्पने ॥२०॥

॥ अथ प्रयोगः ॥

शास्त्रोक्तावधिना शंकरालये भवान्यालये वा मण्डपं वेदिमध्यं निर्माय प्रतीच्यां कुण्डं मध्ये कृत्वा कृतनित्यक्रियोऽमुककामः शतचण्डीविधानमहं करिष्य इति संकल्पं विधाय। मातृस्थापननान्दीश्राद्धे विधाय स्वस्तिवाचनं कृत्वा। अतिवृष्ट्यामनावृष्टौ परचक्रभये क्षये। सर्वे विघ्ना विनश्यन्ति शतचण्डीविधौ कृते ॥२१॥
रोगाणां वैरिणां नाशो धनपुत्रसमृद्धयः । शंकरस्य भवान्या वा प्रासादनिकटे शुभम् ॥२२॥
मण्डपद्वारवेद्याढ्य कुर्यात्सध्वजतोरणम् । तत्र कुण्डं प्रकुर्वीत प्रतीच्यां मध्यतोऽपि वा ॥२३॥
स्नात्वा नित्यकृतिं कृत्वा वृणुयाद्दश वाडवान् । जितेन्द्रयान्सदाचारान्कुलीनान्सत्यवादिनः ॥२४॥
व्युत्पन्नांश्चण्डिका पाठरतॉंल्लज्जादयावतः । मधुपर्कविधानेन वस्त्रस्वर्णादिदानतः ॥२५॥
जपार्थमासनं मालां दद्यात्तेभ्योऽपि भोजनम् । ते हविष्यान्न मश्नन्तो मन्त्रार्थगतमानसाः ॥२६॥
भूमौ शयानाः प्रत्येकं जपेयुश्चण्डिकास्तवम् । मार्कण्डेयपुराणोक्तं दशकृत्वः सुचेतसः ॥२७॥

॥ अथ कुमारिका पूजने मन्त्रादिकं कुमारीपूजनाध्याये द्रष्टव्यम् ॥

नवार्णं चण्डिकामन्त्रं जपेयुश्चायुक्तं पृथक् । यजमानः पूजयेच्च कन्यानां दशकं शुभम् ॥२८॥
वेद्यां विरचिते रम्ये सर्वतोभद्रमण्डले । घटं संस्थाप्य विधिवत्तत्रावाह्यर्चयेच्छिवम् ॥२९॥
तदग्रे कन्यकश्चापि पूजयेद्ब्राह्मणानपि । उपचारैस्तु विविधैः पूर्वोक्तावरणान्यपि ॥३०॥
एवं चतुर्दिनं कृत्वा पञ्चमे होममाचरेत् । पायसान्नैस्त्रिमध्वक्तैर्द्राक्षा - रम्भाफलैरपि ॥३१॥
मातुलिङ्गै - रिक्षुखण्डैर्नारिकेलैः पुरैस्तिलैः । जातीफलैराम्रफलै र्वन्यैर्मधुर वस्तुभिः ॥३२॥
सप्तशत्या दशावृत्त्या प्रतिश्लोके हुतं चरेत् । अयुतं च नवार्णेन स्थापिताग्नौ विधानतः ॥३३॥
कृत्वाऽऽवरण देवानां होमं तन्नाममन्त्रतः । कृत्वा पूर्णाहुतिं सम्यग्देवमग्निं विसृज्य च ॥३४॥
अभिषिञ्चेच्च यष्टार विप्रौघः कलशौदकैः । निष्कं सुवर्णमथवा प्रत्येकं दक्षिणां दिशेत् ॥३५॥
भोजयेच्च शतं विप्रान्भक्ष्यभोज्यैः पृथग्विधैः । तेभ्योऽपि दक्षिणां दत्त्वा गृह्णीयादाशिषस्ततः ॥३६॥
एवं कृते जगद्वश्यं सर्वे नश्यन्त्युपद्रवाः । राज्यं धनं यशः पुत्रानिष्टमन्यल्लभेत सः ॥३७॥

॥ अथ गोविन्दकृतकल्पवल्ल्युक्त शतचण्डीप्रयोगः॥

तत्र अनावृष्ट्याद्यखिल दुरितशान्त्यर्थं राज्यावाप्त्यादि सकलकामना सिद्ध्यर्थं यजमानः शिवालयसमीपे सुसमे भूप्रदेशे मण्डपं चिकीर्षुर्गणेश कूर्मशेषवसुधानां पूजनं कृत्वा शतचण्ड्यां षोडशहस्तं सहस्र चण्ड्यां विंशतिहस्तं मण्डपं प्रसाध्य तदाग्नेयस्तम्भे वडवागणेश कूर्मशेषवसुधानां पूजां कृत्वा ताम्रपात्रेऽर्घ्यमादाय जानुभ्यामवनीं गत्वा "आगच्छ सर्वकल्याणि वसुधे लोकधारीणि। उद्धृताऽसि वराहेण सशैलवनकानना"। मण्डपं कारयाम्यद्य त्वदूर्ध्वं शुभलक्षणम्। गृहाणार्घ्यं मया दत्तं प्रसन्ना शुभदा भवेति। भूम्यै अर्घ्यं दत्त्वा मण्डपं विधाय तन्मध्ये ईशान्यां हस्तमात्रां द्व्यङ्गुलवप्रां ग्रहवेदीं कृत्वा तत्पश्चिमे शतचण्ड्यां द्विहस्तं सहस्रचण्ड्यां चतुर्हस्तं कुण्डं स्थण्डिलं वा चतुरस्रं पद्मकुण्डं वा कुर्यात्।

कुण्डं कुण्डग्रन्थोक्तविधिना कृत्वा शतचण्ड्यां पलेन सहस्रचण्ड्यां पलपञ्चकेन मूर्त्यध्यायोक्तध्यानप्रतिपादितां महिषमर्दिनीप्रतिमां कारयित्वा प्रारम्भदिने कर्ता सपत्नीकस्तिलतैलेन कृताभ्यङ्गो भूषिताङ्गः संपूर्णकलशहस्तो भद्रं कर्णेभिरिति मण्डपं प्रदक्षिणीकृत्य पश्चिमद्वारेण प्रविश्योपविश्य देशकालौ स्मृत्वा ममामुककामनासिद्ध्यर्थं सनवग्रहमखां शतचण्डीं सहस्रचण्डीं वा ब्राह्मणद्वारा कारयिष्ये। तदङ्गतया विहितं गणेशपूजनं पुण्याहवाचनं मातृकापूजनं नान्दीश्राद्धं चाहं करिष्ये इति संकल्प्य।

तानि यथावत्कृत्वा आचार्यं वृत्वा प्रार्थयेत्- **आचार्यः सर्वदेवानां० ततो ब्रह्माणं सदस्यमृत्विजश्च वृत्वा प्रार्थयेत्। अत्र शतचण्डिजपे ऋत्विजो नव आचार्यो दशमः सहस्रचण्ड्यां शतमृत्विजः अष्टौ लोकपालाः सर्वेषां मधुपर्कादिना पूजां कृत्वा वृत्वा वस्त्रद्वयम्। आसनम्। अर्घ्यपात्रजल पात्रांगुलीयककर्णभूषणादि दद्यात्। आचार्याय तु द्विगुणम्।**

ततः **आचार्यः यदत्र संस्थितं भूतं०। इत्युक्त्वा सर्षपान्विकीर्य पञ्चगव्यैः कुशैः आपो हिष्ठेति ऋचेन मण्डपं प्रोक्ष्य स्वस्त्ययनम्।** इति मन्त्रद्वयं पठेत्।

ततः पूर्वस्याम्- **ॐ कादम्बरि गजारूढे वज्रहस्ते एह्येहि गन्धपुष्पसहितमिमं क्षीरान्नं बलिं गृहाण गृहाण ममेप्सितं कुरु कुरु स्वाहेति बलिं दत्त्वा।**

द्वारशाखयोः - **ब्राह्मयै नमः। माहेश्वर्यै नमः। चिच्छक्त्यै नमः। मायाशक्त्यै नमः। धात्रे नमः। विधात्रे नमः। शङ्खनिधये नमः। पद्मनिधये नमः। द्वारश्रियै नमः।** इति संपूज्य।

अधः वास्तुपुरुषमसिताङ्गभैरवं च संपूज्य। आग्नेय्याम्- **उल्के अजारूढे शक्तिहस्ते एह्येहि गन्धपुष्पसहितमिमं क्षीरान्नबलिं गृहाण गृहाण ममेप्सितं कुरु कुरु स्वाहा। तत्र रुरुभैरवं च संपूज्य।** दक्षिण स्याम्। **करालि महिषारूढे दण्डहस्ते एह्येहि० स्वाहा। इति बलिं दत्त्वा**

द्वारशाखयोः- **कौमार्यै नमः। वैष्णव्यै नमः। चिच्छक्त्यै नमः। मायाशक्त्यै नमः। धात्रे नमः। विधात्रे नमः। शङ्खनिधये नमः। पद्मनिधये नमः। चण्डभैरवाय नमः।** इत्यधः पूजयेत्। नैर्ऋत्यै - **रक्ताक्षि प्रेतवाहने खड्गहस्ते एह्येहि० स्वाहा।** इति बलिं दत्त्वा **क्रोधभैरवाय नमः** इति संपूज्य। पश्चिमायाम् - **कौबेरि अश्वारूढे पाशहस्ते एह्येहि० स्वाहा। इति बलिं दत्त्वा** द्वारशाखयोः। **वाराह्यै नमः। ऐन्द्र्यै नमः। चिच्छक्त्यै नमः। मायाशक्त्यै नमः। धात्रे नमः। विधात्रे नमः। शङ्खनिधये नमः। पद्मनिधये नमः।** इति संपूज्य। **उन्मत्तभैरवं च संपूज्य।** ततो वायव्यां **हरिते मृगवाहने अङ्कुशहस्ते एह्येहि० स्वाहा** इति बलिं दत्त्वा **कपाल भैरवाय नमः।** इति सम्पूज्य। उत्तरस्यां **यक्षिणि सिंहवाहने गदाहस्ते एह्येहि. स्वाहा।** इति बलिं दत्वा। द्वारशाखयोः **चामुण्डायै नमः। महालक्ष्म्यै नमः। चिच्छक्त्यै नमः। मायाशक्त्यै नमः। धात्रे नमः। विधात्रे नमः। शङ्खनिधये नमः। पद्मनिधये नमः भीषणभैरवाय नमः।** इति संपूज्य।

ईशान्यां – **कालि वृषारूढे शूलहस्ते एह्येहि० स्वाहा** इति बलिं दत्त्वा **संहारभैरवं च संपूज्य।** ईशानपूर्वयोर्मध्ये **वैष्णवि गरुडारूढे चक्रहस्ते एह्यहि० स्वाहा** इति बलिं दत्त्वा **भूमिं संपूज्य।** ततः पूजावेद्यामाग्रेय्यां **हंसवाहने अक्षसूत्रकमण्डलु हस्ते एह्येहि स्वाहा** इति बलिं दत्वा **अन्तरिक्षाय नमः। इति संपूज्य।** ततः पूजाविद्यामाग्रेय्यां **विष्णवे नमः। पूर्वस्यामिन्द्राय नमः। ईशान्यां ब्रह्मणे नमः। पश्चिमायां गणेशाय नमः। मध्ये महाकाल्यै महालक्ष्म्यै महासरस्वत्यै नमः** इति संपूज्य **बृहद्ध्वजो रक्तः सिंहाङ्कितः। ध्वजपताकोच्छ्रयणं कृत्वा। आचार्यो ग्रहवेद्यां ग्रहान् संस्थाप्य संपूज्य मध्यवेद्यां पीठे सुखासने उपविश्य।**

ॐ गुं गुरुभ्यो नमः। ॐ गं गणपतये नमः। द्वारश्रियै नमः। दुं दुर्गायै नमः। क्षं क्षेत्रपालाय नमः। ह्रः अस्त्राय फट्। वास्तुपुरुषाय नमः। श्रीमहालक्ष्म्यै नमः। इति नत्वा **पूर्वोक्तनित्यपूजापद्धतिप्रकारेण आसनादिभूतशुद्धि प्राणप्रतिष्ठान्तर्मातृकादि मूल विद्यान्यासान् पूर्वोक्तान्सर्वान्कृत्वा श्री महालक्ष्मीध्यानं कृत्वा किंचित् जपं कृत्वां देव्यै निवेद्यान्तर्यागं कृत्वा वेद्यां सर्वतोभद्रं कृत्वा तत्र देवताः स्थापयेत्।** सर्वत्तोभद्र मण्डल की पूजा करें।

मध्ये – **ब्रह्माणमुत्तरादिषु सोमादीन् वायुसोममध्यादिक्रमेण अपः वसून् रुद्रान् द्वादशादित्यान् यक्षान् सर्पान् अप्सरसः गन्धर्वान्, ब्रह्मसोममध्ये कुमारमृषभमदितिं , ब्रह्मेन्द्रयोर्मध्ये दुर्गां विष्णुं ब्रह्माग्निमध्ये स्वधां, ब्रह्मयममध्ये मृत्युं रोगं, ब्रह्मनिर्ऋतिमध्ये गणपतिं, ब्रह्मवरुणमध्ये अपः, ब्रह्मवायुमध्ये मरुतः, ब्रह्मपादमूले भूमिं तत्रैव गङ्गादिनदीः धाम्नोधाम्न इति सप्त सागरान्, बहिः सोमादिसंनिधौ क्रमेण गदां त्रिशूलं वज्रं शक्तिं दण्डं खड्गं पाशमङ्कुशं, पुनरुत्तरादिषु गौतमं भरद्वाजं विश्वामित्रं कश्यपं जमदग्निं वासिष्ठमत्रिमरुन्धतीं च पूर्वादिषु ऐन्द्रीं कौमारीं ब्राह्मीं वाराहीं चामुण्डां वैष्णवीं माहेश्वरीं वैनायकीम् इत्यावाह्य संपूज्य बलिं दत्त्वा।**

कलश स्थापन– **तन्मध्ये मही द्यौरिति भूमिं स्पृष्ट्वा धान्य मसीति सप्त धान्यानि क्षिप्त्वा तदुपरि आकलशेष्विति हैमराजतताम्रमृन्मयान्यतमं वा कलशं संस्थाप्य इमं मे वरुण इति जलेनापूर्य, गन्धद्वारामिति, गन्धं या ओषधीरिति सर्वौषधीः, काण्डात्काण्डादिति दूर्वाः, अश्वत्थे वो इति पञ्चपल्लवान्, स्योना पृथिवीति सप्त मृदः याः फलिनीरिति फलं, परिवाजपतिरिति पञ्चरत्नानि, हिरण्यगर्भ इति हिरण्यं, युवा सुवासा इति रक्तवस्त्रेण संवेष्ट्य, पूर्णा दर्वीति पात्रं निधाय तत्र रक्तवस्त्रे यन्त्रं लिखेत्।**

देवी पूजा– **तद्यथा चतुर्द्वारं चतुरस्त्रं यन्त्रं कृत्वा मध्ये त्रिकोणं कृत्वा तत्पश्चिमार्धे त्रिकोणं व्यस्तं कृत्वा पूर्वस्य पश्चिमरेखासंलग्नमन्यत्रिकोणं कृत्वा तत्कोणसंलग्नान्यन्यानि त्रिकोणानि कृत्वा तेन बहिः षट्कोणाः मध्ये षट्काश्च संपद्यन्ते। तन्मध्ये चान्यत्रिकोणमिति यन्त्रं विलिख्य शतचण्ड्यां पलेन सहस्त्रचंड्यां पञ्चपलेन तदर्धेन तदर्धार्धेन वा प्रतिमां पूर्वोक्तध्यानयुतां कारयित्वा अग्न्युत्तारणप्रतिष्ठापूर्वकं तस्मिन्कलशे यन्त्रं स्थापयित्वा। नित्यपूजाप्रकारेण पात्रासादनपूर्वकं पीठपूजनावरणदेवता पूजनयुतं श्री महालक्ष्मीपूजनं कृत्वा राजोपचारान् निवेद्य नीराजनं कृत्वा प्रदक्षिणानमस्कारान् कृत्वा चतुःषष्टियोगिनीपूजामारभेत। तत्र देव्यग्रे रक्तवस्त्रे अष्टौ पत्राणि कृत्वा तस्योपरि उपरि एवमष्टौ पत्रपंक्तीः विधाय**

६४ योगिनी पूजा– **तत्र शुक्लवर्णे शूलडमरुपाशासिधरे सवालंकारभूषिते ससैन्यजये इहागच्छागच्छेमं पायसबलिं गृहाण गृहाण स्वाहा** इत्यावाह्य संपूज्य पायसबलिं दत्वा **१ एवं विजये २ जयन्ति ३ अपराजिते ४ दिव्ययोगिनि ५ महायोगिनि ६ सिद्धयोगिनि ७ गणेश्वरि ८** इति प्रथमाष्टकम् ॥१॥

ततो गौरवर्णे अक्षमालांकुश पुस्तकवीणाधरे प्रेतासने एह्येहि इमं पायसबलिं गृहाण गृहाण स्वाहा १ एवं डाकिनि २ कालि ३ कालरात्रि ४ निशाचरि ५ टंकारिणि ६ रुद्रवेतालिनि ७ हुंकारिणि ८ इति द्वितीयाष्टकम् ॥२॥

ततो रक्तवर्णे ज्वालाशक्त्यभयवरदे ऊर्ध्वकेशि एह्येहीत्यादि प्राग्वत्स्वाहान्तमुच्चार्य इति बलिं निवेद्य १ एवं विरूपाक्षि २ शुक्लाङ्गि ३ नरभोजिनि ४ फट्कारिणि ५ वीरभद्रे ६ धूमाङ्गि ७ कलहप्रिये ८ इति तृतीयाष्टकम् ॥३॥

ततो विद्युत्सन्निभे ध्वजबाणधनुष्पाशहस्ते राक्षसि एह्येहि० स्वाहान्तमुच्चार्य इति बलिं निवेद्य १ एवं रक्ताक्षि २ विश्वरूपे ३ भयंकरि ४ वीरकौमारि ५ चण्डिके ६ वाराहि ७ मुण्डधारिणि ८ इति चतुर्थाष्टकम् ॥४॥

तत आदित्यवर्णे कमलाक्षमालाभयवरदकरे भैरवि एह्येहि० स्वाहा इति बलिं निवेद्य १ एवं ध्वाङ्क्षिणि २ धूम्राङ्गि ३ प्रेतवाराहि ४ खड्गिनि ५ दीर्घलम्बोष्ठि ६ मालिनि ७ मन्त्रयोगिनि ८ इति पञ्चमाष्टकम् ॥५॥

ततः सुनीले शङ्खचक्रगदाभयकरे कालिनि एह्येहि० स्वाहा इति बलिं निवेद्य १ एवं चक्रिणि २ कङ्कालि ३ भुवनेश्वरि ४ शटकि ५ महामारि ६ यमदूति ७ करालिनि ८ इति षष्ठाष्टकम् ॥६॥

ततोऽञ्जननिभे खड्गखेटपट्टिशपरशुहस्ते केशिनि एह्येहि० स्वाहा इति बलिं निवेद्य १ एवं मर्दिनि २ रोमजङ्घे ३ निवारिणि ४ विशालिनि ५ कार्मुकि ६ लोलि ७ अधोमुखि ८ इति सप्तमाष्टकम् ॥७॥

ततो धूम्रवर्णे कुन्तखेटभिण्डिपालमाला करे मुण्डाग्रधारिणि एह्येहि० स्वाहा इति बलिं निवेद्य १ एवं व्याघ्रि २ कांक्षिणि ३ प्रेतरूपिणि ४ धूर्जटि ५ घोरि ६ करालि ७ विषलम्बिनि ८ इति अष्टमाष्टकम् ॥८॥

इति चतुः षष्टियोगिनीबलिक्रमः।

एवं चतुः षष्टियोगिनीपूजां विधाय बलिं दत्त्वा गणपतये नमः बं बटुकाय पिंगल भासुरनेत्राय बलिं गृहाण २ भक्ष २ कन्दन २ ह्रीं ह्रूं स्वाहा। इति बटुकाय क्षेत्रपालाय च बलिं दत्त्वा भूतबलिं दद्यात्।

तत्र मन्त्रः। सर्वपीठोपपीठानि द्वारोपस्तरणेऽपि च। क्षेत्रक्षेत्रज्ञसंदोहः सर्वे दिग्भागसंस्थिताः ॥१॥ योगिनीयोगवीरेन्द्राः सर्वे यन्त्रसमागताः। नगरे त्वथवा ग्रामे अटव्यां सरितस्तटे ॥२॥ वापीकूपेषु वृक्षेषु श्मशाने च चतुष्पथे। नानारूपधरा ये च बटुरूपधराश्च ये ॥३॥ सर्वे तत्रैव संतुष्टा बलिं गृह्णन्तु मे सदा। शरणागतोऽस्म्यहं तेषां ते सर्वे मे सुखप्रदाः ॥४॥ बलिदानेन संतुष्टाः प्रयच्छन्तु ममेप्सितम्। सर्वकार्याणि कुर्वन्तु दोषांश्च घ्नन्तु मे सदा ॥५॥ इति सर्वेभ्यो बलिं दद्यात्।

ततः कुमार्यः प्रत्यहं शतं नव वा पूज्याः। तल्लक्षणादीनि कुमारीपूजनाध्याये द्रष्टव्यानि। एवं कुमारीपूजनं सुवासिनीपूजनं च विधाय। द्वितीयदिने द्विगुणं तृतीये त्रिगुणं चतुर्थे चतुर्गुणम् इति शतचण्ड्यां सहस्त्रचण्ड्यां दशोत्तरा वृद्धिः कार्या। पूजां देव्यै समर्प्य सर्वे विप्राः कृताङ्गन्यासाः शतं नवार्णमन्त्रं कवचार्गलाकीलकानि सकृज्जपित्वा सप्तशतीं जपित्वाऽन्ते रहस्यानि नवार्णं शतं जपेयुः। कवचादीनां प्रत्यावृत्तौ नावृत्तिः। एवं प्रथमे एकाऽऽवृत्तिः १ द्वितीये २ तृतीये ३ चतुर्थे ४ एवं शतसहस्त्रावृत्तयः संपद्यन्ते। नित्यं क्षीरान्न भोजनमशक्तौ हविष्यान्नं सर्वेषां प्रत्यहं शतं सहस्त्रं वा ब्राह्मणान् भोजयेत्। पञ्चमेऽह्नि होमः कार्यः। नवरात्रे तु नवम्यामेव होमः। होमस्तु नवचण्डीविद्यानोक्तप्रकारेण कार्यः। पूजास्विष्टकृदादि सर्वं तद्वत्कुर्यात्।

॥ अथ शतचण्डीसहस्त्रचण्ड्यादौ पूजासामग्री ॥

अशीतिगुञ्जाप्रमाणा कस्तूरी तावन्मानं केशरं तावज्जातीफलं तावान् कर्पूरः एतच्चतुष्टयं पलमात्रं चन्दनेन घर्षयेत् तेन पलद्वयमनुलेपनं भवति पलं तु विंशत्युत्तरत्रिंशद्गुञ्जामितं वस्त्रस्य तु मानानुक्तेः स्त्रीजनपरिधानयोग्यं ग्राह्यं गद्याणत्रयहेम निर्मितालंकाराः स्त्रीजनोचिताः गद्याणमानं तु लौकिकतौलस्यार्धं पुष्पाणि २५००० पलद्वयमितः

गुग्गुलुः दीपा विंशतिर्घृत पूरिताः कुम्भप्रमाणं घृतं कुम्भस्तु विंशतिद्रोणः द्रोणस्तु खार्याः खलु षोडशांशः कुडवद्वयमात्रं हविष्यान्नभोजनं नैवेद्यं पल चतुष्कं कुडवः शतद्वयं नागवल्लीदलं तदनुरूपं पूगीफलादिकं कर्पूरादि च ग्राह्यम्। इति पूजासामग्री। अन्यापि ग्राह्या। इति गोविन्दकृतकल्पवल्ल्युक्त शतचण्डीसहस्त्रचंडीप्रयोगः।

शान्तिसारे रुद्रयामले विशेषः।

शतचण्डीविधानं च प्रोच्यमानं शृणुष्व तत् । सर्वोपद्रवनाशार्थं शतचण्डीं समारभेत् ॥१॥
षोडशस्तम्भ संयुक्तं मण्डपं पल्लवोज्ज्वलम् । वसुकोणयुतां वेदीं मध्ये कुर्या त्रिभागतः ॥२॥
पक्वेष्टकचितां रम्यामुच्छ्राये हस्तसंमिताम् । पञ्चवर्णरजोभिश्च कुर्यान्मण्डलकं शुभम् ॥३॥
आचार्येण समं विप्रान्वरयेद्दश सुव्रतान् । ईशान्यां स्थापयेत्कुम्भं पूर्वोक्तविधिनाऽऽहरेत् ॥४॥
वारुण्यां च प्रकर्तव्यं कुण्डं लक्षणसम्मितम् । मूर्तिं देव्याः प्रकुर्वीत सुवर्णस्य पलेन वै ॥५॥
तदर्धेन तदर्धेन तदर्धेन महामते । अष्टादशभुजां देवीं कुर्याद्वाऽष्टकरामपि ॥६॥
पट्ट कूलयुगच्छन्नां वेदीमध्ये निधापयेत् । देवीं संपूज्य विधिवज्जपं कुर्युर्दश - द्विजाः ॥७॥
शतमादौ शतं चान्ते जपेन्मन्त्रं नवार्णकम् । चण्डीसप्तशतीमध्ये संपुटोऽयमुदाहृतः ॥८॥
एकं द्वे त्रीणि चत्वारि जपेद्दिनचतुष्टयम् । रूपाणि क्रमशस्तद्वत्पूजनादिकमाचरेत् ॥९॥
पञ्चमे दिवसे प्रातर्होमं कुर्याद्विधानतः । गुडूचीं पायसं दूर्वास्तिलाञ्छुक्लान्यवानपि ॥१०॥
चण्डी पाठस्य होमे तु प्रतिश्लोकं दशांशतः। होमं कुर्यादग्रहादिभ्यश्चर्वाज्यसमिधैः क्रमात् ॥११॥
हुत्वा पूर्णाहुतिं दद्याद्विप्रेभ्यो दक्षिणां क्रमात्। कपिलां गां नीलमणिं श्वेताश्वं छत्रचामरम् ॥१२॥
अभिषेकं ततः कुर्युर्यजमानस्य ऋत्विजः । एवं कृतेऽमरेशान सर्वसिद्धिः प्रजायते ॥१३॥

॥ इति श्रीह० बृ०ध० उपासनास्तबके दुर्गोपासनाध्याये शतचण्डीविधानप्रयोगकथनं ॥

॥ अथ सहस्त्रचण्डी विधानम् ॥

एतद्दशगुणं कुर्याच्चण्डीसाहस्त्रजं विधिम् । विद्यावतः सदाचारान्ब्राह्मणान्वृणुयाच्छतम् ॥१॥
प्रत्येकं चण्डिकापाठम् विदध्युस्ते दिशामितान् । अयुतं प्रजपेयुस्ते प्रत्येकं नववर्णकम् ॥२॥
पूर्वोक्ताः कन्यकाः पूज्याः पूर्वमन्त्रैः शतं शुभाः। एवं दशाहं संपाद्य होमं कुर्युः प्रयत्नतः ॥३॥
सप्तशत्याः शतावृत्या प्रतिश्लोकं विधानतः । लक्षसंख्यं नवार्णेन पूर्वोक्तैर्द्रव्यसंचयैः ॥४॥
होतृभ्यो दक्षिणां दत्त्वा पूर्वोक्तान्भोजयेद्द्विजान् । सहस्त्रसंमितान्साधून् देव्याराधनतत्परान् ॥५॥
एवं सहस्त्रसंख्याके कृते चण्डीविधौ नृणाम् । सिद्ध्यत्यभीप्सितं सर्वं दुःखौघश्च विनश्यति ॥६॥
मारीदुर्भिक्षरोगाद्या नश्यन्ति व्यसनोच्चयाः । नेमं विधिं वदेद्दुष्टे खले चौर गुरुद्रुहि ॥७॥
साधौ जितेन्द्रिये दान्ते वदेद्विधिमिमं परम् । एवं सा चण्डिका तुष्टा वक्तृञ्छ्रोतृंश्च रक्षति ॥८॥

शान्तिसार रुद्रयामले।

सहस्त्रचण्डीं विधिवच्छृणु विष्णो महामते । राज्यभ्रंशो ह्यकस्माच्चेज्जनमारे महाभये ॥९॥

गजमारेऽश्वमारे च परचक्रभये तथा । इत्यादिविविधे दुःखे क्षयरोगादिजे भये ॥१०॥
सहस्रं चण्डिकापाठं कुर्याद्वा कारयेत्तथा । जापकास्तु शतं प्रोक्ता विंशद्धस्तस्तु मण्डपः ॥११॥
भोज्याः सहस्रं विप्रेन्द्रा गोशतं दक्षिणां दिशेत् । गुरवे द्विगुणं देयं शय्यादानं तथैव च ॥१२॥
सप्तधान्यं च भूदानं श्वेताश्वं च मनोहरम् । पञ्चनिष्कमिता मूर्तिः कर्तव्या वर्धमानतः ॥१३॥
अष्टादशभुजां देवी सर्वायुधविभूषिताम् । अन्नं वारि च दातव्यं सहस्रं प्रत्यहं विभो ॥१४॥
शतं वा नियताहारः पयोमानेन वर्तयेत् । एवं यश्चण्डिका पाठं सहस्रं तु समाचरेत् ॥१५॥
तस्य स्यात्कार्यसिद्धिस्तु नात्र कार्या विचारणा ॥१६॥
अन्येऽपि विशेषाः योगिनीभैरवीवाराही तन्त्रेषु देवीकालिका पुराणयोश्चानुसंधेयाः ।
ते च प्रयोगे स्पष्टाः। वयं तु यामलाद्युक्तं नानुतिष्ठामहे यामलस्य मोहनशास्त्रत्वेनाप्रामाण्यात् ॥१७॥

इति शान्तिसारोक्ता सहस्रचण्डी।

अन्यत्र **एतद्दशगुणो विधिरयुतचण्ड्यां एतद्दशगुणो विधिर्लक्षचण्ड्यां शतब्राह्मणैरेव वा चत्वारिंशति दिनैरयुतचंडी कार्या। तत्र प्रथमदशके एकैवावृत्तिः द्वितीयदशके द्वे तृतीय तिस्रः चतुर्थे चतस्रः तैरेव तल्लक्षसंख्यं चतुःशतदिनैर्वा लक्षचण्डीत्यादि बोध्यम् ॥१८॥**

शेषं शतचण्डीवत्।

॥ दुर्गापाठे निषेध सप्ताहुतियाँ ॥

चण्डी स्तवे प्रतिश्लोकमेकाहुतिरिहेष्यते। रक्षा कवचगैमन्त्रै तत्र न कारयेत्॥ अर्थात् कवच मंत्र एवं अस्त्र शस्त्र मंत्रों का हवन नहीं होता हैं। सौभाग्य द्रव्य सिन्दुरादि का भी होम नहीं होता है मारण कर्म में अवश्य होता हैं उसमें तो अग्नि का १६वां मृतक संस्कार कुण्डानि का होता है पश्चात् विधि होम प्रारंभ होता हैं। वैसे अगर कवच सिद्ध करना हो तो गुग्गल व घृत से होम करे। क्यों कि घृत से अग्नि का आचमन होता है। अतः चतुर्थ अध्याय के **शूलेन पाहि नो देवि** इत्यादि चार मंत्रों का हवन होगा। यह मंत्र मनसा पढ़ें, मंडल पर प्रत्येक मंत्र से रक्षा व अस्त्र शक्ति का गंधोपचार से पूजन कर आहुति देते समय **नवार्ण मंत्र या श्री महालक्ष्म्यै स्वाहा** से हवन करे। इसी तरह प्रथम चरित्र में **खड्गिनी शूलिनी** मंत्र मनसापढे **श्री महाकाल्यै अस्त्र शस्त्र शक्त्यै नमः** से देवी का गंधोपचार से पूजन कर नवार्ण या **क्रीं महाकाल्यै स्वाहा** से हवन करे। अन्य दो आहुतियाँ जिनके बारे में मतभेद हो सकता हैं पांचवे अध्याय में ''**दूत उवाच**'' दो बार आया हैं इस मंत्र से आहुति देने पर फल का भाग दूत को जाता हैं अतः कर्मफल में न्यूनता आती हैं। अतः मनसा पढकर ''**ऐं सरस्वत्यै नमः**'' से आहुति प्रदान करे।

असुरों के नाम से आहुति नहीं हो इसी कारण प्रचलित सप्तशती में मधुकैटभ उवाच, महिषासुर उवाच शुंभ उवाच नहीं आया है जबकि हमने ऐसी दुर्गासप्तशती देखी है जिसमें महिष उवाच, शुंभ उवाच, इत्यादि है तथा अध्यायों की श्लोक संख्या में भी भिन्नता हैं।

॥ नमस्तस्यै नमस्तस्यादि पाठ होम विधानम् ॥

पंचम अध्याय में ये श्लोक आये हैं । कुब्जिका तंत्र के अनुसार प्रथम खण्ड २० अक्षर, दूसरा ४ अक्षर, तीसरा खण्ड अष्टाक्षरात्मक है। सात्विक, राजस एवं तामस भेद से तीन बार नमस्कार हैं। तथा **नमः** हर्ष व दैन्य भाव, विस्मय

आदि में प्रयुक्त होता है जो बार बार प्रयोग में आने से दोष नहीं आता। अतः ३ बार **नमस्तस्यै नमस्तस्यै** युक्त पाठ करे।

स्वमतानुसारेण:- मूलपाठ में तो पूरा श्लोक अनुष्टुप् छंद है तीन विभाग करके अलग अलग मंत्र संज्ञा बनादी है परन्तु संपुट पाठ में भेद हो जायेगा। एक मंत्र २० अक्षर का, दूसरा चार अक्षर का तीसरा आठ अक्षर का होगा। यह ठीक नहीं लगता। **कामना मंत्र** किस तरह लगाये इस पर विचार करना चाहिये ताकि दूसरे, तीसरे नमस्कार का भी पूर्वा से संबंध बना रहे। अतः सम्पुट पाठ समये प्रयोग विधिः-

(१) (क) या देवी सर्व भूतेषु विष्णुमायेति शब्दिता नमस्तस्यै (ख) या देवी सर्व भूतेषु विष्णुमायेति शब्दिता नमस्तस्यै (ग) या देवी सर्वभूतेषु विष्णुमायेति शब्दिता नमस्तस्यै नमो नमः। इस तरह से मंत्र विभाग मानकर संपुट लगावें तब नमस्तस्यै का संबंध पूर्वा से रहेगा, इसी तरह से संपुट होम करें।

(२) स्वमत एवं गुप्तवती टीकानुसारेण- गुप्तवती टीकानुसार देविस्तुति के ये श्लोक त्रिपदागायत्री छन्द (२४ अक्षर) हैं। अतः २४ अक्षर युक्त मंत्र ३ बार पढ़े। यथा- **या देवी सर्वभूतेषु विष्णुमायेति शब्दिता नमस्तस्यै नमो नमः।** होम समय भी प्रचलित पुस्तक के आधार पर होम करे तो एक विभाग २०, दूसरा ४, तीसरा ८ अक्षरात्मक होता हैं। तथा विभाग के अनुसार आहुति लगने से दूसरे तीसरे नमस्कार का पूर्वशक्ति से संबोधन हट जाता है। तीन नमस्कार महाकाली, महालक्ष्मी एवं महासरस्वती हेतु हैं। अतः ***मेरे अनुमान से गुप्तवती टीकानुसार पढ़कर महाकाली, महालक्ष्मी, महासरस्वती, हेतु ''इदं'' से अलग अलग त्याग करे।*** इससे मंत्राक्षर समान रहेंगे। अथवा जो पहली विधि लिखि हैं जिसमें नमस्तस्यै का पूर्वा से संबंध रहते हुये २०,२०,२४ अक्षरात्मक मंत्र बनते हैं उनसे होम कर **महाकाली, महालक्ष्मी, महासरस्वती हेतु इदं** से अलग अलग त्याग करे। २०, ४, ८ अक्षरात्मक होम में तीनों देवियों के विभाग समान नहीं है तथा मंत्र की पूर्व शक्ति से संबंध नहीं रहता है।

॥ प्रति अध्यायान्ते महाहुति विधानम् ॥

प्रति अध्याय के अन्त में आहुति समय स्त्रुक पर आहुति द्रव्य रखकर मंत्र से आहुति देवे। पश्चात् घी की आहुति इन मंत्रों से देवे। घृताहुति के मंत्र तो एक ही है, महाहुति क्रम अलग अलग हैं।

घृताहुति मंत्रः- ॐ घृतं घृतपावानः पिबत वसां वसापावानः। पिबतान्तरिक्षस्य हविरसि स्वाहा दिशः प्रदिश आद्दिशो विद्दिश उद्दिशो दिग्भ्य स्वाहा॥ अथवा:- **ॐ प्राणाय स्वाहा। ॐ पानाय स्वाहा। ॐ व्यानायस्वाहा। ॐ समानाय स्वाहा। ॐ उदानाय स्वाहा। ॐ अंबे अंबिके.....स्वाहा॥**

प्रथमोऽध्यायः- एक पान पर कपित्थफल, मधु, कमलगट्टा, गुगल, शाकल्य, गंधाक्षत्, पुष्प, लौंग, इलायची सब युग्म लेवे। सुपारी रखे घी से भिगाये एवं स्त्रुक में रखकर खड़े होकर निम्न मंत्र से आहुति देवे। **ॐ नमो देव्यै महादेव्यै....।(या) जयन्ती मंगला.....। साङ्गायै सपरिवारायै सवाहनायै सायुधायै वाग्भव बीजाधिष्ठात्र्यै महाकाल्यै महाहुतिं समर्पयामि नमः स्वाहा।**

द्वितीयोऽध्यायः- हवनीय द्रव्य पान, कमलगट्टा, गुग्गल, नारिकेलखण्ड, पुष्प, लौंग, इलायची, सुपारी शाकल्य। **ॐ नमो देव्यै....या जयन्ती मंगला....मंत्र पढ़े। सांगायै सप. सवा. सायुधाय. सशक्त्यै अष्टाविंशति वर्णात्मिकायै लक्ष्मी बीजाधिष्ठात्र्यै श्री महालक्ष्मी भुवनेश्वरी देवतायै महाहुतिं समर्पयामि नमः स्वाहा।**

तृतीयोऽध्यायः- पान, बिजोरा, चंदन, नीमगिलोय, दधि, माष, मधु, भैंसागुग्गल, कमलगट्टा, लौंग २, इलायची २ सुपारी, शाकल्य पत्र, पुष्प, फल लेकर महाहुति देवे। **मंत्रः- ॐ नमोदेव्यै....। जयन्ती मंगला......। सांगा सप.**

सवा. सश. सायु. अष्टाविंशति वर्णात्मिकायै लक्ष्मीबीजाधिष्ठात्र्यै श्रीमहालक्ष्म्यै महाहुतिं समर्पयामि नमः स्वाहा।

चतुर्थाऽध्यायः- द्रव्य- पान, शाकल्य, पायस, कमल गट्टा, बिल्वफल, लौंग, इलायची गुग्गल फल पुष्प। मंत्र **नमोदेव्यै....। जयन्ती मंगला....। सांगा. सप. सवा. सश. सायु. श्री लक्ष्मीबीज अधिष्ठात्र्यै। त्रिवर्णात्मिकायै श्री महालक्ष्म्यै महाहुतिं समर्पयामि नमः स्वाहा।**

पञ्चमोऽध्यायः- द्रव्य- पान, शाकल्य, लौंग, इलायची, सुपारी, गुगल, कमलगट्टा, कपूर, श्वेतचंदन, पुष्प, फल, बिल्वफल, बिजौरा। मंत्रः- **नमो देव्यै.....। जयन्ती मंगला.....। सांगा. सप. सवा. सश. सायु. श्रीविष्णुमायेति चतुर्विंशति देवतायै कामबीजाधिष्ठात्र्यै श्रीमहासरस्वत्यै महाहुतिं समर्पयामि नमः स्वाहा।**

षष्ठमोऽध्यायः- द्रव्य- पान, शाकल्य, कमलगट्टा, गुग्गल, भोजपत्र, कुष्माण्डखण्ड, नारंगी, नारिकेलफलखण्ड, फल, पुष्प। मंत्रः- **ॐ नमो देव्यै। जयन्ती मंगला......। सांगा. सप. सवा. सश. सायु. शताक्ष्यै श्री धूम्राक्षी देवतायै महाहुतिं समर्पयामि नमः स्वाहा।**

सप्तमोऽध्यायः- द्रव्य- पान, शाकल्य, लौंग, इलायची, सुपारी, चिरौंजी. लाजवन्ती पुष्प, कमलगट्टा, जायफल, कुष्माण्डफलखण्ड, कर्पूर। मंत्र **ॐ नमो देव्यै...। जयन्ती मंगला.....। सांगा, सप. सवा. श्रीकर्पूर बीजाधिष्ठात्र्यै श्री धूम्राक्षी काली चामुण्डा देवता महाहुतिं समर्पयामि नमः स्वाहा।**

अष्टमोऽध्यायः- द्रव्य- पान, शाकल्य, कमलगट्टा, लौंग, इलायची, सुपारी, फल, गुग्गल, कुष्माण्डफलखण्ड, लाल चंदन, मधु, पुष्प। **मंत्रः- ॐ नमो देव्यै.....। जयन्ती मंगला.....। सांगा. सप. सवा. सश. सायु. अष्टमातृकासहितायै रक्ताक्ष्यै देव्यै महाहुतिं समर्पयामि नमः स्वाहा।**

नवमोऽध्यायः- द्रव्य- पान, शाक्ल्य, लौंग, इलायची, सुपारी, कमलगट्टा, बिजौरा नींबू, कुष्माण्डखण्ड, इक्षुखण्ड, फल, बिल्वफल, मेनफल। **मंत्रः- ॐ नमो देव्यै.....। जयन्ती मंगला......। सांगा. सप. सवा. सश. सायु. श्री वाग्भव बीजाधिष्ठात्र्यै भगवति महाकाल्यै तारादेव्यै नमः महाहुतिं समर्पयामि नमः स्वाहा।**

दशमोऽध्यायः- द्रव्य- पान, शाकल्य, लौंग, इलायची, सुपारी, बिजौरा, कस्तूरी, कमलगट्टा, गुग्गल, बिल्वफल, कुष्माण्डखण्ड, फल,पुष्प, मेनसिल। मंत्रः- **ॐ नमो देव्यै.....। जयन्ती मंगला....। सांगा. सप. सवा. सश. सायु. सिंहवाहनायै शूलपाशधारिण्यै अंबिका भैरवी देव्यै महाहुतिं समर्पयामि नमः स्वाहा।**

एकदशोऽध्यायः- द्रव्य-पान, पुष्प, फल, शाकल्य, लौंग, इलायची, कर्पूर, शर्करा, कमलगट्टा, सुपारी, मिश्री, पायसान्न, गुग्गल इक्षुखण्ड, दाडिमफल। मंत्रः- **नमो देव्यै....। जयन्ती मंगला.....। सांगा. सप. सवा. सश. सायु. सर्वनारायण्यै शक्त्यै महाहुतिं समर्पयामि नमः स्वाहा।**

द्वादशोऽध्यायः- द्रव्य - पान, शाकल्य, लौंग, इलायची, सुपारी, अगर, केसर, कस्तूरी, कमलगट्टा, पत्र, पुष्प, फल, जायफल, बिल्वफल, मिश्री, पायसान्न। मंत्रः- **ॐ नमो देव्यै.....। जयन्ती....। सांगा. सप. सवा. सश. सायु. श्री बालात्रिपुरसुन्दर्यै महाहुतिं समर्पयामि नमः स्वाहा।**

त्रयोदशोऽध्यायः- द्रव्य- पान, शाकल्य, लौंग, इलायची, सुपारी, बिल्वफल, गूग्गल, कमलगट्टा, फल, शमीपत्र, कदलीफल, श्वेताऽर्कपुष्प केसर, कर्पूर, श्वेतपुष्प, नारिकेलखण्ड, पुष्प। मंत्रः- **ॐ नमो देव्यै......। जयन्ती मंगला.....। सांगा. सप. सवा. सश. सायु. श्रीमहात्रिपुरसुन्दर्यै महाहुतिं समर्पयामि नमः स्वाहा।**

॥ दुर्गा होमे स्विष्टकृद हवन विधानम् ॥

दुर्गा होम के समापन पर स्विष्टकृद् हवन से पहले ९ आहुति विशेष देवे। नन्दा, रक्तदंतिका, शाकंभरी, दुर्गा, भीमा, भ्रामरी, कालिका, शिवदूती प्रजापति इत्यादि हेतु हवन कर स्विष्टकृद् होम करे।

॥ अथ दुर्गा आवरण देवता होम ॥

स्तंभतोरणादिप्रतिष्ठापूजनं सर्वदेवोपयोगिपद्धतिमार्गेण कृत्वा तेनैवाग्निं संस्थाप्य प्रधानहोमं समाप्य चरुतिलाज्येन पुनर्होमं कुर्यात्। तत्र क्रमः -

ॐ गणपतये नमः स्वाहा इदं गणपतये न मम इति सर्वत्र ॥१॥ ॐ दुर्गायै० ॥२॥ ॐ सरस्वत्यै० ॥३॥ ॐ क्षेत्रपालाय नमः स्वाहा० ॥४॥ ॐ कादंबर्य्यै० ॥५॥ ॐ उल्कायै० ॥६॥ ॐ कराल्यै० ॥७॥ ॐ रक्तायै० ॥८॥ ॐ श्वेतकौबेर्य्यै० ॥९॥ ॐ यक्षिण्यै० ॥१०॥ ॐ काल्यै० ॥११॥ ॐ सुरश्रेष्ठायै० ॥१२॥ ॐ जं जयायै० ॥१३॥ ॐ विं विजयायै नमः स्वाहा इदं० ॥१४॥ ॐ जं जयंत्यै० ॥१५॥ ॐ अं अपराजितायै० ॥१६॥ ॐ निं नित्यायै० ॥१७॥ ॐ विं विलासिन्यै० ॥१८॥ ॐ दों दोग्घ्र्यै० ॥१९॥ ॐ अं अघोरायै० ॥२०॥ ॐ मं मंगलायै नमः ॥२१॥ ॐ धात्रे नमः ॥२२॥ ॐ विधात्रे० ॥२३॥ ॐ शंखनिधये० ॥२४॥ ॐ पद्मनिधये० ॥२५॥ ॐ द्वारश्रियै० ॥२६॥ ॐ वास्तुपुरुषाय० ॥२७॥ ॐ ऐरावताय० ॥२८॥ ॐ पुंडरीकाय० ॥२९॥ ॐ वामनाय० ॥३०॥ ॐ कुमुदाय० ॥३१॥ ॐ अंजनाय० ॥३२॥ ॐ पुष्पदंताय० ॥३३॥ ॐ सार्वभौमाय० ॥३४॥ ॐ सुप्रतीकाय० ॥३५॥ ॐ दमनकाय० ॥३६॥ ॐ पुंडरीकाय० ॥३७॥ ॐ गुग्गुलाय० ॥३८॥ ॐ कुरंटकाय० ॥३९॥ ॐ ऋग्वेदाय० ॥४०॥ ॐ यजुर्वेदाय० ॥४१॥ ॐ सामवेदाय० ॥४२॥ ॐ अथर्ववेदाय० ॥४३॥ इति होमं कृत्वा ग्रहमखं कुर्यात्। ॐ आदित्याय० ॥४४॥ ॐ सोमाय० ॥४५॥ ॐ भौमाय० ॥४६॥ ॐ बुधाय० ॥४७॥ ॐ बृहस्पतये० ॥४८॥ ॐ शुक्राय० ॥४९॥ ॐ शनैश्चराय० ॥५०॥ ॐ राहवे० ॥५१॥ ॐ केतवे० ॥५२॥ ततः ॐ रुद्राय० ॥५३॥ ॐ गौर्यै० ॥५४॥ ॐ स्कंदाय० ॥५५॥ ॐ विष्णवे० ॥५६॥ ॐ ब्रह्मणे० ॥५७॥ ॐ इंद्राय० ॥५८॥ ॐ यमाय० ॥५९॥ ॐ कालाय० ॥६०॥ ॐ चित्रगुप्ताय० ॥६१॥ ॐ अग्नये० ॥६२॥ ॐ अद्भ्यः स्वाहा इदमद्भ्यो न मम ० ॥६३॥ ॐ महाभार० ॥६४॥ ॐ इंद्राय० ॥६५॥ ॐ इन्द्राण्यै० ॥६६॥ ॐ वरुणाय० ॥६७॥ ॐ सर्पाय० ॥६८॥ ॐ ब्रह्मणे० ॥६९॥ ॐ अनंताय० ॥७०॥ ॐ वासुकये० ॥७१॥ ॐ तक्षकाय० ॥७२॥ ॐ कर्कोटकाय० ॥७३॥ ॐ पद्माय० ॥७४॥ ॐ महापद्माय० ॥७५॥ ॐ शंखपालाय नमः ॥७६॥ ॐ कंबलाय नमः० ॥७७॥ ॐ कुलिकाय० ॥७८॥ ॐ गणपतये० ॥७९॥ ॐ दुर्गायै० ॥८०॥ ॐ वायवे० ॥८१॥ ॐ आकाशाय० ॥८२॥ ॐ अश्विदेवाभ्यां० ॥८३॥ इति होमं कृत्वा पीठदेवताहोमं कुर्यात्।

ॐ ओंकारपीठादिकामरूपपीठांतेभ्योनमः स्वाहा इति पीठेभ्यो नमः ॥८४॥ ततः ॐ मं मंडूकादिपरतत्त्वांत पीठदेवताभ्यो नमः स्वाहा० ॥८५॥ इति होमं कृत्वा मंडूकादिपृथक्पृथङ्नाम्ना वा होमयेत्। तत्पश्चादावरणदेवताहोमं कुर्यात्।

तद्यथा - **ॐ गं गणपतये० ॥८६॥ ॐ क्षं क्षेत्रपालाय० ॥८७॥ ॐ पं पादुकाभ्यो० ॥८८॥ ॐ वं वटुकत्रयाय० ॥८९॥ ॐ अं अग्निमुखवेतालाय० ॥९०॥ ॐ प्रं प्रेतवाहनवेतालाय० ॥९१॥ ॐ जं ज्वालामुखवेतालाय० ॥९२॥ ॐ धूं धूम्राक्षवेतालाय० ॥९३॥ ॐ जं जयायै० ॥९४॥ ॐ विं विजयायै० ॥९५॥**

ॐ जं जयंत्यै० ॥९६॥ ॐ अं अपराजितायै० ॥९७॥ ॐ निं नित्यायै नमः स्वाहा० ॥९८॥ ॐ विं विलासिन्यै० ॥९९॥ ॐ दं दोग्घ्रै० ॥१००॥ ॐ अं अघोरायै० ॥१०१॥ ॐ मं मंगलायै० ॥१०२॥ ॐ हं हंसवाहिन्यै ब्राह्मयै विच्चे नमः स्वाहा इदं ब्राह्मयै नमः० ॥१०३॥ॐ ह्सौं वृषभवाहिन्यै माहेश्वर्य्यै विच्चे नमः स्वाहा० ॥१०४॥ ॐ क्लीं मयूरवाहिन्यै कौमार्यै विच्चे नमः स्वाहा० ॥१०४॥ ॐ श्रीं गरुडवाहिन्यै वैशाख्यै विच्चे नमः स्वाहा० ॥१०६॥ ॐ दं दंष्ट्रोद्धृतवसुंधरायै वाराह्यै नमः स्वाहा० ॥१०७॥ ॐ क्ष्रौं स्तंभोद्भवायै नारसिंह्यै विच्चे नमः स्वाहा० ॥१०८॥ ॐ लौं गजवाहिन्यै ऐन्द्र्यै विच्चे नमः स्वाहा० ॥१०९॥ ॐ ख्रें गणनाथपरिवारायै सदा रुद्रेण संयुक्तायै चंडमुण्डमंडितायै सिंहारूढायै चामुंडायै विच्चे नमः स्वाहा० ॥११०॥ ॐ ह्रीं हेमगर्भायै नंदायै विच्चे नमः स्वाहा० ॥१११॥

ॐ ह्रीं सुरक्तायै रक्तदंतिकायै विच्चे नमः स्वाहा ॥११२॥ ॐ ह्रीं नीलायै शाकंभर्यै विच्चे नमः स्वाहा ॥११३॥ ॐ ह्रीं सर्वरूपार्तिहारिण्यै दुर्गायै विच्चे नमः स्वाहा ॥११४॥ ॐ ह्रीं दंष्ट्राञ्चितमुखायै नीलपात्रशिरोधरायै भीमायै विच्चे नमः स्वाहा ॥११५॥ ॐ ह्रीं तेजोमंडलदुर्धर्षायै वरदायै भ्रामर्यै विच्चे नमः स्वाहा ॥११६॥ ॐ यं यक्षिण्यै ॥११७॥ ॐ कं कालिकायै ॥११८॥ ॐ सं सुरश्रेष्ठायै० ॥११९॥ ॐ दं दशाननायै० ॥१२०॥ ॐ रं रत्यै० ॥१२१॥ ॐ प्रं प्रीत्यै० ॥१२२॥ ॐ वं विश्वेश्वर्यै० ॥१२३॥ ॐ अं अष्टादशभुजायै मनोभवायै० ॥१२४॥ ॐ अणिम्ने० ॥१२५॥ ॐ महिम्ने० ॥१२६॥ ॐ लघिम्ने० ॥१२७॥ ॐ गरिम्णे० ॥१२८॥ ॐ प्राप्त्यै० ॥१२९॥ ॐ प्राकाम्यै० ॥१३०॥ ॐ ईशितायै० ॥१३१॥ ॐ वशितायै० ॥१३२॥ ॐ असितांगभैरवाय० ॥१३३॥ ॐ रुरुभै० ॥१३४॥ ॐ चंडभै० ॥१३५॥ ॐ क्रोधभै० ॥१३६॥ ॐ उन्मत्तभै० ॥१३७॥ ॐ कपालभै० ॥१३८॥ ॐ भीषणभै० ॥१३९॥ ॐ संहारभै० ॥१४०॥ इति होमं कृत्वा लोकपालेभ्यो जुहुयात्।

तद्यथा-लँ वज्रहस्ताय सुराधिपतये इंद्राय० ॥१४१॥ ॐ रं शक्तिहस्ताय तेजोऽधिपतये अग्नये० ॥१४२॥ ॐ मं दंडहस्ताय प्रेताधिपतये यमाय० ॥१४३॥ ॐ क्षं खड्गहस्ताय रक्षोऽधिपतये निर्ऋतये० ॥१४४॥ ॐ वं पाशहस्ताय जलाधिपतये वरुणाय० ॥१४५॥ ॐ यं अंकुशहस्ताय प्राणाधिपतये वायवे० ॥१४६॥ ॐ सं गदाहस्ताय नक्षत्राधिपतये० ॥१४७॥ ॐ हँ त्रिशूलहस्ताय विद्याधिपतये ईशानाय० ॥१४८॥ इति होमं कृत्वा ततः ॐ गुं गुरुभ्योनमः ० ॥१४९॥ ॐ पं परमगुरुभ्यो नमः स्वाहा० ॥१५०॥ ॐ पं परमेष्ठिगुरुभ्यो० ॥१५१॥ ॐ गं गणेशाय० ॥१५२॥ ॐ हं हरये० ॥१५३॥ ॐ हँ हराय० ॥१५४॥ एताभ्यो देवताभ्य एकैकाश्चरुतिलाज्याहुतयः।

ततः पूर्वोक्तसर्व न्यासं कृत्वा वह्नौ पीठपूजां कृत्वा हुताशने देवीमावाह्य पंचोपचारैः संपूज्य अग्रिमध्यभागे ॐ ह्रीं महालक्ष्म्यै विच्चे नमः स्वाहा इदं महालक्ष्म्यै न मम ॥१॥ इति सर्वत्र तद्दक्षिणभागे। ॐ ऐं महाकाल्यै विच्चे नमः स्वाहा ॥२॥ देव्या वामभागे। ॐ क्लीं महासरस्वत्यै विच्चे नमः स्वाहा ॥३॥ इति त्रिराहुतिं हुत्वा पुनस्तत्रैव देव्या दक्षिणभागे।

ॐ क्ष्रौं सिंहाय नमः स्वाहा० ॥१॥ ॐ हूं महिषाय नमः स्वाहा ॥२॥ ॐ ह्सौं ह्सैं गौरीरुद्राभ्याम्० ॥३॥ देव्याः पृष्ठभागे लक्ष्मीसान्निध्ये। ॐ लक्ष्मीहृषीकेशाभ्यां ॥४॥ देव्याः पृष्ठभागे। ॐ ऐं विरंचये० ॥५॥ इति हुत्वा पुनः ॐ हूं कं कालाय नमः ॥१॥ ॐ रुं रूद्राय नमः ॥२॥ ॐ सं सिंहाय नमः ॥३॥ ॐ मं मृत्यवे नमः ॥४॥ ॐ विं विजयाय नमः स्वाहा ॥५॥ ॐ गं गणेशाय० ॥६॥ ॐ मं महिषाय० ॥७॥ ॐ भं भैरवाय० ॥८॥ इति हुत्वा विष्णुमायादिहोमं कुर्यात्। ॐ विष्णुमायायै० ॥१॥ ॐ चेतनायै० ॥२॥ ॐ बुद्ध्यै० ॥३॥ ॐ निद्रायै० ॥४॥ ॐ क्षुधायै० ॥५॥ ॐ छायायै० ॥६॥ ॐ शक्त्यै० ॥७॥ ॐ तृष्णायै० ॥८॥ ॐ क्षांत्यै० ॥९॥ ॐ जात्यै० ॥१०॥ ॐ लज्जायै० ॥११॥ ॐ शांत्यै० ॥१२॥ ॐ श्रद्धायै० ॥१३॥ कांत्यै० ॥१४॥ ॐ लक्ष्म्यै० ॥१५॥ ॐ

धृत्यै० ॥१६॥ ॐ वृत्त्यै० ॥१७॥ ॐ श्रुत्यै० ॥१८॥ ॐ ॐ स्मृत्यै० ॥१९॥ ॐ दयायै० ॥२०॥ ॐ तुष्ट्यै० ॥२१॥ ॐ पुष्ट्यै० ॥२२॥ ॐ मात्रे० ॥२३॥ ॐ भ्रांत्यै० ॥२४॥ इति होमं कृत्वारंगहोमं कुर्यात्। अंग होम घृताहुति करें।

तद्यथा- **ॐ ह्रां हृदयायै० ॥१॥ ॐ ह्रीं शिरसे० ॥२॥ ॐ ह्रूं शिखायै० ॥३॥ ॐ ह्रैं कवचाय ० ॥४॥ ॐ ह्रौं नेत्रत्रयाय० ॥५॥ ॐ ह्रः अस्त्राय० ॥६॥ इति हुत्वा। ॐ नालाय० ॥१॥ ॐ मूलाय० ॥२॥ ॐ पद्माय० ॥३॥ ॐ महापद्माय० ॥४॥ ॐ आधारशक्तये० ॥५॥ ॐ कूर्माय० ॥६॥ ॐ शेषाय० ॥७॥ ॐ पृथिव्यै० ॥८॥** इति जुहुयात्।

ततो मूलेन शतमेकादशाधिकमाज्याहुतीर्हुत्वा पायसतिलपलाश पुष्पसर्षपपूगीफल लाजदूर्वांकुर यव बिल्वफल रक्तचंदन गुग्गुलद्रव्याणि मितमिश्रपायसमेव वा प्रयोगोक्तद्रव्येण वा अर्गलाकीलकरहस्यैः प्रतिश्लोकं हुत्वा कृतस्य जपस्य दशांशेन प्रतिश्लोकं सप्तशतीमंत्रेणोक्तद्रव्याणि तिलपायसं वा जुहुयात्। कवचाहुतिनिषेधः। अध्यायसमाप्तौ महाहुतिं मंत्रेण हुत्वा उवाचस्थले च पत्रपुष्पफलैर्होमः। यद्वा ''नमो देव्यै०'' इत्यनेन नवार्णेन वा जपदशांशहोमः। एवं होमं कृत्वा पुष्पाजलिं च दत्त्वा जयजयशब्दान्कारयेत्। ततः पुनः प्रधानहोमं कृत्वा ततोऽग्निपूजनं ग्रहपूजनं पीठे वरुणदेवतापूजनं च कृत्वा इंद्रादिदशदिक्पालेभ्यो बलिं निवेद्य मेखलोपरि अद्भिः परिषिच्यात्मनि पावकं योजयित्वा छागाद्यपशुमाषभक्तकूष्मांडानां नारिकेलस्य वा बलिं दत्त्वा पूर्णाहुतिं दद्यात्।

॥ इति आवरण देवता होमः॥

॥ अथ बलि प्रकरणम् ॥

समयाचार तंत्र में कहा है कि साधक पहले बलि प्रदान करे पश्चात् भोजन करे। उत्तराम्नाय में मातंगी उपासना अंतर्गत पहले भोजन करे पश्चात् बलि प्रदान करे। अष्टमी नवमी की संधि में बलि का फल उत्तम है। ब्राह्मण क्षीरान्न, शाल्यन्न पायस बलि देवे। **प्रदद्याच्च गवाक्षीरं दुग्धाम्राम्लान् निवेदयेत्। शाल्यन्नं वाथ समधु ससरं खण्डमोदकम्।** राजा पशु की, वैश्य ब्रीहिकी तथा शूद्र भी पशु बलि देवे।

वर्जनीय पशवः- काकोलं कलविङ्कं च राजहंसं च शारिकम्। शुकं गृध्रं च काकोलं मयूरं चित्रकं तथा। अश्वं च वेणुपृष्ठं च कृष्णपारावतं च यत्। वृहत् कपोतकं चैव खञ्जरीटं तथैव च। वकं चैव बलाकं च प्रयत्नेन विवर्जयेत्।

बल्यन्तरमाह तत्रैवः- रम्भा जातीबीजपूरं सुगन्धि परिमिश्रितं। मिश्रीकृत्य बलिं दद्यादष्टभ्यां च विशेषतः। रोग, कृत्या, पर सैन्य-ग्रहारिष्ट निवारण हेतु चतुष्पथ पर अर्द्धरात्रि में बलि प्रदान करें।

बलिमंत्रः- ॐ उग्रतारे विकटदंष्ट्रे परमोक्षं मोहय मोहय खादय खादय पचपच ये मां हिंसतुमुद्यता योगिनीचक्रे तान दारय हुं फट् स्वाहा। सर्वविद्यामाकर्षयाकार्षय छेदय छेदय हन हन कपाले गृहण् गृहण् स्वाहा।

अर्धरात्रे पंचाब्दं सर्वलक्षणोपेतं छागादिपशुमानीय। ''ॐ वाराही यमुना गंगा करतोया सरस्वती। कावेरी चंद्रभागा च सिन्धुभैरवसागराः ॥१॥ अजस्नाने महेशानि सान्निध्यमिह कल्पय। पशुपाशविनाशाय हेमकूटस्थिताय च ॥२॥ पराय परमेष्ठिने हुंकाराय च मूर्तये।'' इति पठित्वा मूलेन स्नापयित्वा सिंदूरमाल्यादिनालंकृत्य देव्यग्रे निधाय गंधमिश्रिताार्घ्योदकेन मूलेन त्रिःसंप्रोक्ष्य कृतांजलिः प्रार्थयेत् -

"छाग त्वं बलिरूपेण महाभाग्यादुपस्थितः। प्रणमामि सदा भक्त्या रूपिणं बलिरूपिणम् ॥१॥ चंडिका प्रीतिकामस्य दातुरापद्विनाशिने। चंडिकाबलिरूपाय बले तुभ्यं नमो नमः ॥२॥ यज्ञार्थे पशवः सृष्टाः स्वयमेव स्वयंभुवा। अतस्त्वां घातयिष्यामि तस्माद्यज्ञे वधोऽवधः ॥३॥" इति संप्रार्थ्य पार्श्वपूजां कुर्यात्।

तद्यथा-पार्श्वे ॐ जयंत्यै नमः ॥१॥ ॐ मंगलायै नमः ॥२॥ ॐ काल्यै नमः ॥३॥ ॐ भद्रकाल्यै नमः ॥४॥ ॐ मानस्तोकायै नमः ॥५॥ ॐ विजयायै नमः ॥६॥ ॐ अपराजितायै नमः ॥७॥ मध्ये - ॐ अनंतायै नमः ॥८॥ इति संपूज्य प्रत्यंतं पूजयेत्।

तद्यथा- ॐ रुधिरवदनायै नमः इति शिरसि॥१॥ ॐ चंडिकायै नमः इति कपोले ॥२॥ ॐ चन्द्रार्काभ्यां नमः इति चक्षुषोः ॥३॥ ॐ बृहस्पतये नमः इति कर्णयोः ॥४॥ ॐ सरस्वत्यै नमः इति नासायाम् ॥५॥ ॐ उग्रदंतिकायै नमः इति जिह्वायाम् ॥६॥ ॐ महादंतिकायै नमः इति ग्रीवायाम् ॥७॥ ॐ पृथिव्यै नमः इति उदरे ॥८॥ ॐ धर्माय नमः इति जंघाचतुष्टये ॥९॥ इति संपूज्य जलं गृहीत्वा च संकल्पं कुर्यात् -

संकल्प :- "ह्रीं श्रीं वरुणमंडलाधिष्ठितविग्रहायै पशुरूप चंडिकायै इमं पशुं प्रोक्षामि स्वाहा" इति पशुं संप्रोक्ष्य। ततस्तिलकुशजलान्यादाय देशकालौ संकीर्त्य अमुकगोत्रः श्री अमुक शर्माहं छाग समसंख्याकपंचवर्षावच्छिन्नश्रीमद्दुर्गादेव्याः प्रीतिकामोऽहमेताञ्छागान्वह्नि दैवतान्भगवति श्री दुर्गे देवि तुभ्यं घातयिष्ये। इति संकल्प्य खड्गपूजां कुर्यात्।

तद्यथा- खड्गं पुरतो निधाय "ॐ कृष्णं पिनाकपाणिं च कालरात्रिस्वरूपिणम्। उग्रं रक्तास्यनयनं रक्तमाल्यानुलेपनम् ॥१॥ रक्तांबरधरं चैव पाशहस्तं कुटुंबिनम्। पीयमानं च रुधिरं भुंजानं क्रव्यसंहतिम्। रसना त्वं चंडिकायाः सुरलोकप्रसाधिका॥२॥" इति खड्गं ध्यात्वा।

ॐ ह्रीं ह्रीं खड्ग आँ कालिकालि वज्रेश्वरी लोहदंडाय नमः इति गंधादिभिस्त्रिः संपूज्य खड्गोपरि सिंदूरादिना ह्रीं कारं विलिख्य। ॐ खड्गाय नमः इति संपूज्य बलिकर्णे पशुगायत्रीं श्रावयेत्।

तत्रमंत्रः- ॐ ह्रीं बलिरूपाय विद्महे देवीप्रियाय धीमहि। तन्नः पशु प्रचोदयात्। इति बलिकर्णे श्रावयित्वा खड्गं हस्तेनादाय प्रार्थयेत्। तद्यथा-

ॐ असिर्विशसनः खड्गस्तीक्ष्णधारो दुरासदः। श्रीगर्भो विजयश्चैव धर्मपाल नमोऽस्तु ते ॥१॥
इत्यष्टौ तव नामानि स्वयमुक्तानि वेधसा। नक्षत्रं कृत्तिका ते तु गुरुर्देवो महेश्वरः ॥२॥
रोहिण्यश्च शरीरं ते धाता देवो जनार्द्दनः। पिता पितामहो देवस्त्वं मां पालय सर्वदा ॥३॥
नीलजीमूत संकाशस्तीक्ष्णदंष्ट्रः कृशोदरः। भावशुद्धो मर्षणश्च अतितेजास्तथैव च ॥४॥
इयं येन धृता क्षोणी हतश्च महिषासुरः। तीक्ष्णधाराय शुद्धाय तस्मै खड्गाय ते नम ॥५॥
चंडिकारसनासि त्वमेकघातेन घातय ॥६॥"

इति खड्गं संप्रार्थ्य

हे वज्रासुरनाशाय देवकार्यार्थतत्पर। पशुं छिन्धि स्वयं शीघ्रं खड्गनाथ नमोऽस्तु ते ॥१॥
यज्ञार्थे पशवः सृष्टा यज्ञार्थे पशुघातनम्। अतस्त्वां घातयिष्यामि तस्माद्यज्ञे वधोऽवधः ॥२॥

इति पठित्वा पशुपाशाय विद्महे विप्रकर्णाय धीमहि। तन्नश्छागः प्रचोदयात्। मूलं पठित्वा श्रीदुर्गे देवि इमं छागबलिं तुभ्यमहं प्रददे। इति बलिस्कंधे खड्गं दत्त्वा सकलं रुधिरं मुंडं च देव्यग्रे कृत्वा समभागेन संपूर्णं परमं

कक्दिर्पयेन्मांससमीपजं दीपम्। क्रौं क्रौं नमो नमः अनेन प्रतिमुण्डं दद्यात्ततस्तर्पयेदेभिः।

रक्त से चामुण्डा का तर्पण करें।

ॐ चामुंडां तर्पयामि नमः इति पूर्वे ॥१॥ **ॐ योगिनीं तर्पयामि नमः** इति दक्षिणे ॥२॥ **ॐ डाकिनीं तर्पयामि नमः** इति पश्चिमे ॥३॥ **ॐ भैरवीं तर्पयामि नमः** इति उत्तरे ॥४॥ **ॐ विदारिकां तर्पयामि नमः** इति आग्नेय्याम् ॥५॥ **ॐ पापराक्षसीं तर्पयामि नमः** इति नैर्ऋत्ये ॥६॥ **ॐ पूतनां तर्पयामि नमः** इति वायव्ये ॥७॥ **ॐ कालिकां तर्पयामि नमः** इत्यैशान्याम् ॥८॥ **इति मांसेन संतर्प्य। ॐ अद्य पंचवर्षावच्छिन्नश्रीदुर्गादेव्याः प्रीतिकाम इदं छागरुधिरं समुण्डं विष्णु दैवतं भगवति श्रीदुर्गे देवि तुभ्यमहं प्रददे** इति देवी समर्प्य ततः शेषेण -

ॐ बलिं गृह्णंत्विमं देवा आदित्या वसवस्तथा। मरुतो येऽश्विनौ रुद्राः सुपर्णाः पन्नगा ग्रहाः ॥१॥
असुरायातुधानाश्च पिशाचोरगराक्षसाः । डाकिन्यो यक्षवेताला योगिन्यः पूतनाः शिवाः ॥२॥
जृंभिकाः सिद्धगंधर्वा मल्ला विद्याधरा नगाः। दिक्पाला लोकपालाश्च ये च विघ्नविनाशकाः ॥३॥
जगतां शांतिकर्तारो ब्रह्माद्याश्च महर्षयः। मा विघ्नो मा च मे पापं मा संतु परिपंथिनः ॥४॥
सौम्या भवंतु तृप्ताश्च भूतप्रेताः सुखावहाः ॥५॥

इति विनिवेद्य स्नात्वा तिलकं धृत्वा **खड्गिनी शूलिनीत्येकेन स्तुत्वा** नमस्कृत्य पुष्पांजलिं दत्त्वा **''रूपं देहि यशो देहि भगं भगवति दहि मे। पुत्रान्देहि धनं देहि सर्वकामांश्च देहि मे।''** इति प्रार्थयेत्।

॥ इति पशुबलिः ॥

॥ भैरव बलि प्रयोगः॥

विनियोग :-(हस्ते जलमादाय) **अस्मिन् हवनाख्य कर्मणः साङ्गतासिद्ध्यर्थ दिक्पालदेवतानां, स्थापित देवतानां पूजन पूर्वकं बलिदानं करिष्ये।**

(१) यज्ञ वेदी के पास दशों दिशाओं में, पात्र में दीपक में या ताम्बूलादिपत्र पर दधिमाष, चावल, पूप, बलि रखें, सिन्दूर से चर्चित करें, वर्ति रखें प्रज्वलित करें। इसी तरह सब मंडलों के आगे बलि रखें। ब्रह्मादि देवताओं के लिये प्रतिष्ठाभास्कर व रुद्रकल्पद्रुम, प्रतिष्ठामयूख में पायस बलि का विधान लिखा हैं। परन्तु आजकल बलि देते नहीं हैं।

(१) दिक्पाल देवता बलिदान–

सभी देवताओं के नाम मंत्र या वैदिक मंत्रों से पूजन करें। **अमुक अमुक देवताया बलिद्रव्याय नमः।** पूर्वादि क्रमेण कुण्ड की दशों दिशाओं में हाथ में जल ले लेवे और अनामिका व अंगुष्ठ के संयोग से जल छोड़ें। (प्रत्येक बलि पर)

पूर्वे - **ॐ इन्द्राय साङ्गायै सपरिवाराय सवाहनाय सायुधाय सशक्तिकाय इमं सदीपमाष भक्त बलिं समर्पयामि।** (हाथ में गंधाक्षत पुष्प लेकर छोड़ें) **भो इन्द्र स अनुचरेभ्यो नमः। दिशं रक्ष बलिं भक्ष मम सकुटुम्बस्याभ्युदयं कुरु। आयुः कर्ता, क्षेमकर्ता, शान्तिकर्ता, पुष्टिकर्ता, तुष्टिकर्ता, निर्विघ्नकर्ता वरदोभव।** (इस विधि से सर्वत्र करें।)

आग्नेयां - **अग्नि साङ्ग. सप. सवा. नमः.। भो अग्ने अग्नेरनुचरेभ्यो दिशं रक्ष.।**

दक्षिणस्यां - **यमाय नमः, यमानुरेभ्यो नमः.। भो यम दिशं रक्ष.।।**

नैऋत्यां - **नैर्ऋतये नमः, नैऋतेरनुचरेभ्यो नमः.। भो नैऋते दिशं रक्ष.॥**

पश्चिमायां - **वरुणाय नमः, वरुणस्यानुचरेभ्यो नमः.। भो वरुण दिशं रक्ष.॥**

वायव्यां - **वायवे नमः, वायोरनुचरेभ्यो नमः.। भो वायो दिशं रक्ष....॥**

उत्तरस्यां - **कुबेराय नमः, कुबेरानुचरेभ्यो नमः.। भो कुबेर दिशं रक्ष....॥**

ऐशान्यां - **ऐशान्यामीश्वराय नमः ईश्वरानुचरेभ्यो नमः। भो ईश्वर दिशं रक्ष....॥**

उर्ध्वं - **ब्रह्मणे नमः, ब्रह्मणोनुचरेभ्यो नमः.। भो ब्रह्म दिशं रक्ष....॥** अधो - **विष्णवे नमः. विष्णोरनुचरेभ्यो नमः। भो विष्णो दिशं रक्ष....॥ गणेश बलिं** - **गणपतिं साङसप. नमः। भो गणपते दिशं रक्ष....॥ मातृका बलिं - वसोर्द्धारा सहित स गणेश गौर्याद्यावाहित मातृभ्यः साङ्गा. सप. सश. नमः। ऐतेभ्योसर्वेभ्योमातृभ्यो इमं बलिं= गृहीत मम सकुटुम्बस्याभ्युदयं कुरु आयुकर्ता तुष्टि......॥**

ग्रह बलिं - **भो भो आदित्याद्यावाहित देवताः इमं बलिं गृह्णीत मम सकुटुम्बस्या.....॥**

ग्रह बलिम् - **सूर्याय गुडौदनम्। सोमायघृतपायसम्। कुजाय मसूरान्नम्। बुधाय क्षीरौदनम्। बृहस्पतये दध्योदनम् शुक्राय घृतौदनम्। शनैश्चराय तिला पिष्टं कृच्छान्ना वा। राहवे पायसम। केतवे चित्रौदनम्। अनेभ्य पायस बलीन्दद्यात्।**

वास्तु बलिं - **भो वास्तुपुरुषाद्यावाहित देवताः इमं बलिं गृह्णीत मम सकुटुम्बस्य सप. आयुकर्ता पुष्टि -।**

योगिनी बलिं - **भो चतुषष्टियोगिन्यै नमः इमं बलिं गृह्णीत मम सकुटुम्बस्य सप. आयुकर्ता पुष्टि. -।**

क्षेत्रपाल बलिं - **हस्ते जलमादाय-यद्याख्यहवन कर्मणः साङ्गतासिद्ध्यर्थं क्षेत्रपालाय पूजन पूर्वकं बलिदानं करिष्ये।**

एक बड़े मृतिका पात्र को लेकर प्रोक्षण करें उसमें सिन्दूर से त्रिकोण षट्कोण बनायें बलिद्रव्य रखें। चौमुखा बनाये दीप प्रज्वलित करें। सुपारी रखें उस पर क्षेत्रपाल का आवाहन करें पूजन करें।

प्रार्थना करें- **ॐ नमामि क्षेत्रपाल त्वां भूतप्रेतगणाधिप। पूजां बलिं गृहाणे मं सौम्यो भवतु सर्वदा। आयुरारोग्यम्मे देहि निर्विघ्नं कुरु सर्वदा। मां विघ्न माऽस्तु मे पापं मा सन्तु परिपन्थिनः। सौम्या भवन्तु तृप्ताश्च भूतप्रेताः सुखावहाः।**

यं यं यं यक्षरूपं दशशिव वदनं भूमिकम्पायमानं। सं सं सं संहार मूर्ति शिर मुकुट जटा शेखरं चन्द्रबिम्बम्। दं दं दं दीर्घकेशं विकृत नखमुखं चोर्ध्वरेखाकपालं। पं पं पं पापनाशो प्रणतपशुपतिं भैरवं क्षेत्रपालं। ॐ नमः क्षेत्रपाल चित्र तुरङ्गवाहन सर्वभूत प्रेत पिशाच शाकिनी डाकिनी बेतालादि परिवृत दध्योदन प्रिय सकल शक्ति सहित इमां पूजां गृहाण।

कौलीरे चित्र कूटे हिमगिरिशिखरे कान्त जालन्धरे वा। सौराष्ट्रे सिन्धुदेशे मगधपुरवरे कौसले वा कलिंगे। कर्णाटे कौंकणे वा भृगुषु पुरवरे कान्य कुब्जे स्थिता वा। ते सर्वे यज्ञ रक्षां करण कृतधियः पान्तु वः क्षेत्रपालाः। ॐ ह्रीं बटुकाय आपदुद्धारणाय कुरु कुरु बटुकाय ह्रीं ॐ।

पुनः प्रार्थना करें- **ॐ क्षेत्रपालाय शाकिनी डाकिनी भूतप्रेत वेताल पिशाच सहिताय इमं बलिं समर्पयामि।**

भोः क्षेत्रपाल दिशं रक्ष बलिं भक्षय मम यजमानस्य सकुटुम्बस्य आयुः कर्ता क्षेमकर्ता शांतिकर्ता पुष्टिकर्ता तुष्टिकर्ता वरदोभव॥

अब पात्र को उठाकर यजमान की ओर ७ बार आवृत्त कर बिना पुछे मुड़े बाहर पात्र को चौराहे पर रखावें और उसके पीछे एक ब्राह्मण द्वार तक, जल के छींटे देवे, शांति पाठ करें। पात्र रखकर आनेवाला हाथ पैर धोकर आवे।

रुद्रकलश व ब्रह्मा बलि – इनके पायस बलि प्रदान करें। **भो रुद्रकलश देवेभ्यो दिशं रक्ष बलिं भक्ष सम कुटुम्बस्य आयुकर्त्ता तुष्टि.-। भो ब्रह्मादि देवेभ्यो दिशं रक्ष बलिं भक्ष मम सकुटुम्बस्य आयुकर्ता तुष्टि।**

प्रधान बलिं- रुद्र विष्णु दुर्गादि मंडलों पर पायस बलि देवे। दुर्गा होमे विशेष मुख्यतः कुष्माण्ड बलि देवें। शत्रु की माषपिष्ठी से आकृति बनायें। गेहूं वा मैदा के आटे से पशु आकृति तेल में पकाकर बनायें व उसको लाल रंग की शक्कर की चासनी में डूबोकर तैयार करें। या कुष्माण्ड पर सिन्दूर से मुख आदि आकृति बनाये। पात्र में ढककर लाये। वस्त्र हटा ले, स्मरण रहे, देवि के सामने रखते समय, बलि से पहिले अंग भंग नहीं होना चाहिये वर्ना अनिष्ट हो जायेगा।

खड्गपूजा- **ॐ कालि कालि वज्रेश्वरि लौहदण्डाय नमः।** खड्ग के मूल, मध्य व अग्र भाग में **हुँ वागीश्वरी ब्रह्माभ्यां नमः, हुँ लक्ष्मीनारायणाभ्यां नमः, हुँ उमामहेश्वराभ्यां नमः। सर्वेषां देवानाम् गंधादिभिः संपूज्य।** प्रार्थना करें- **ॐ खड्गाय खड्गधाराय शक्तिकार्यार्थ तत्पर पशुं छिन्द्यर्ता शीघ्रं खड्नाथ नमोस्तुते।**

अब पशु व कुष्माण्ड का सामान्य जल से मूल मंत्र से ३ बार प्रोक्षण करें, ''हुँ'' से अवगुण्ठन कर धेनुमुद्रा दिखावें। **एतत् पाद्य छागपशवे नमः** से पाद्यादि से पशु की पूजा करें।

मंत्र पढ़े- **''ॐ पशुपाशाय विद्महे विश्वकर्मणे धीमहि तन्नो जीवः प्रचोदयात्।''**

विनियोग : – **अद्येत्यादि श्रीमहादुर्गा देव्याः प्रीतिकामः इमं कुष्माण्ड, छागपशुं श्री महादुर्गादेव्यै अहम् सम्प्रददे।** फिर हाथ जोड़े। **ॐ बलिं ग्रह्ण महादेवि पशुं कुष्माण्ड सर्वगुणान्वितम्। यथोक्तेन विधानेन तुभ्यमस्तु समर्पितम्॥ अं हं फट्॥** से पशु के कंधे पर धीरे से खड्ग छुआवें। निम्न मंत्र से शिरच्छेदन करें। **ॐ स्फुर स्फुर कुंभ कुभं सुनु सुनु, गुलु गलु, धुनु धुनु मारय मारय विद्रावय विद्रावय विदारय विदारय कंपय कंपय कंपातय कंपातय पूरय पूरय ॐ ह्रीं ॐ हुँ फट् फट् हुँ मर्दय मर्दय हूँ।**

शिर को एक थाली में रखें देवी के सामने रखें। छाग के शिर चार वर्तिका का दीप रखकर भी आरती करते हैं। शेष भाग को बाहर दे देवे। स्नान करके शुद्ध होवें।

॥ अथ महिषमर्दिनी मंत्र प्रयोगः॥

अष्टाक्षर मंत्रः– महिषमर्दिनि स्वाहा।

नवाक्षर मंत्राः – ॐ महिषमर्दिनि स्वाहा ॥१॥ ह्रीं महिषमर्दिनि स्वाहा ॥२॥ स्त्रीं महिषमर्दिनि स्वाहा ॥३॥ हुं महिषमर्दिनि स्वाहा ॥४॥ हुं महिषमर्दिनि स्वाहा ॥५॥ क्लीं महिषमर्दिनि स्वाहा ॥६॥ ऐं महिषमर्दिनि स्वाहा ॥७॥

दशाक्षर मंत्रः – ॐ महिषमर्दिनि स्वाहा ह्रीं (हिन्दी तंत्र सारे) ॥१॥ ॐ ह्रीं महिषमर्दिनि स्वाहा ॥२॥ क्लीं ॐ महिषमर्दिनि स्वाहा ॥३॥ क्लीं महिषमर्दिनि स्वाहा (हिन्दी तंत्र सारे) ॥४॥ इनके ऋषि अष्टाक्षर के समान हैं।

मेरुतंत्र में मंत्रोद्धार:- **महिषमर्दिनीत्युक्त्वा स्वाहान्तोऽष्टक्षरो मनुः। ऋषि मार्कण्डेय, छन्द गायत्री, देवतासुरासुरनुता देवी महिषमर्दिनी कहा हैं।** मंत्र महार्णव व शारदातिलक के अनुसार अष्टाक्षरी मंत्र विधान इस प्रकार हैं।

॥ महिषमर्द्दिनी मंत्र प्रयोगः॥

मंत्रो यथा शारदातिलके - **महिषमर्द्दिनि स्वाहा**॥ इत्यष्टाक्षरमंत्रः।

विनियोग :- **ॐ अस्य श्री महिषमर्द्दिनीमंत्रस्य नारद ऋषिः। गायत्री छंदः। महिषमर्द्दिनी देवता। सर्वेष्टसिद्धये जपे विनियोगः।**

ऋष्यादिन्यास :- **ॐ नारदऋषये नमः शिरसि ॥१॥ गायत्रीच्छंदसे नमोः मुखे ॥२॥ महिषमर्द्दिनीदेवतायै नमो हृदि ॥३॥ विनियोगाय नमः सर्वांगे ॥४॥** इति ऋष्यादिन्यासः।

करन्यास :- **महिषहिंसिके हुं फट् अंगुष्ठाभ्यां नमः ॥१॥ महिषश (त्रो) त्त्रीशाङ्गि हुंफट् तर्जनीभ्यां नमः ॥२॥ महिषं भीषय भीषय हुंफट् मध्यमाभ्यां नमः ॥३॥ महिषं हन हन देवि हुंफट् अनामिकाभ्यां नमः ॥४॥ महिषसूदिनि हुंफट् कनिष्ठिकाभ्यां नमः ॥५॥** इति करन्यास॥

हृदयादिन्यास :- **महिषहिंसिके हुं फट् हृदयाय नमः ॥१॥ महिषश (त्रो) त्त्रीशाङ्गि हुं फट् शिरसे स्वाहा ॥२॥ महिषं भीषय भीषय हुंफट् शिखायै वषट् ॥३॥ महिषं हन हन देवि हुं फट् कवचाय हुम् ॥४॥ महिषसूदिनि हुं फट् अस्त्राय फट् ॥५॥** इति पचांगन्यासः।

इति न्यासविधिं कृत्वा ध्यायेत्।

॥ अथ ध्यानम्॥

गारुडोपलसन्निभां मणिमौलिकुंडलमंडितां नौमि भालविलोचनां महिषोत्तमांगनिषेदुषीम् ।
चक्रशंखकृपाणखेटकबाण कार्मुकशूलकांस्तर्ज्जनीमपि बिभ्रतीं निजबाहुभिः शशिशेखराम् ॥१॥

एवं ध्यात्वा सर्वतोभद्रमंडले **'मं मंडूकादिपरतत्वांतपीठदेवताभ्यो नमः'** इति पीठदेवताः संपूज्य पीठशक्तीः पूजयेत्। तद्यथा पूर्वादिक्रमेण - **ॐ जयायै नमः ॥१॥ ॐ विजयायै नमः ॥२॥ ॐ अजितायै नमः ॥३॥ ॐ अपराजितायै नमः ॥४॥ ॐ नित्यायै नमः ॥५॥ ॐ विलासिन्यै नमः ॥६॥ ॐ दोग्ध्यै नमः ॥७॥ अघोरायै नमः ॥८॥** मध्ये **ॐ मंगलायै नमः ॥९॥**

इति पीठशक्तीः संपूज्य स्वर्णादिनिर्मितं यंत्रमग्न्युत्तारणपर्वकं **'ह्रीं आधारशक्तये नमः'** इति पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य तत्र प्राणप्रतिष्ठां च कृत्वा पुनर्ध्यात्वामूलेन मूर्तिं प्रकल्प्य आवाहनादिपुष्पांतैरुपचारैः संपूज्य देव्याज्ञां गृहीत्वा आवरणपूजां कुर्यात् ।

॥ श्री महिषमर्दिनी यन्त्रम् ॥

प्रथमावरणम् :- तत्र क्रमःषट्कोणकेसरेषु अग्निकोणे **महिषहिंसिके हुं फट् हृदयाय नमः ॥१॥** निर्ऋतिकोणे **महिषश (त्रो) त्त्रीशाङ्गि हुं फट् शिरसे स्वाहा ॥२॥** वायुकोणे **महिषं भीषय भीषय हुं फट् शिखायै वषट् ॥३॥** ईशानकोणे **महिषं हन हन देवि हुंफट् कवचाय हुं ॥४॥** देवीपश्चिमे **महिषसूदिनि हुंफट् अस्त्राय फट् ॥५॥** इति पंचांगानि पूजयेत्।

द्वितीयावरणम् :- ततोऽष्टदलेषु पूज्यपूजकयोर्मध्ये प्राचीं प्रकल्प्य पूर्वादिक्रमेण- **ॐ आं दुर्गायै नमः। दुर्गाश्रीपादुकां पूजयामि तर्पयामि नमः**

॥१॥ इति सर्वत्र। **ॐ ईं वरवर्णिन्यै नमः। वरर्णिनीश्रीपा० ॥२॥ ॐ ऊं आर्य्यायै नमः। आर्य्याश्रीपा० ॥३॥ ॐ ऋं कनकप्रभायै नमः। कनकप्रभाश्रीपा० ॥४॥ ॐ लृं कृत्तिकायै नमः। कृत्तिकाश्रीपादु० ॥५॥ ॐ ऐं अभयप्रदायै नमः। अभयप्रदाश्रीपा० ॥६॥ ॐ औं कन्यायै नमः। कन्याश्रीपा० ॥७॥ ॐ अः सरूपायै नमः। सुरूपाश्रीपा० ॥८॥** इत्यष्टौ शक्तीः पूजयेत्।

तृतीयावरणम् :- पत्राग्रेषु पूर्वादिक्रमेण। **यं चक्राय नमः ॥१॥ रं शंखाय नमः ॥२॥ लं खड्गाय नमः ॥३॥ वं खेटकाय नमः ॥४॥ शं बाणाय नमः ॥५॥ षं धनुषे नमः ॥६॥ सं शूलाय नमः ॥७॥ हं कपालाय नमः ॥८॥** इत्यस्त्राणि पूजयेत्।

ततो भूपुरे इन्द्रादीन् वज्रादींश्च पूजयेत्। इत्यारवणपूजां कृत्वा धूपादिनीराजनांतं संपूज्य जपं कुर्य्यात्। अस्य पुरश्चरणमष्टलक्षजपः। तत्सहस्रं होमः। तत्तद्दशांशेन तर्पणमार्जनब्राह्मणभोजनानि कुर्यात्। एवं कृते मंत्रः सिद्धो भवति। सिद्धे मंत्रे मंत्री प्रयोगान् साधयेत्। तथाचअष्टलक्षं जपेन्मंत्रं तत्सहस्रं तिलैः शुभैः। वशयेत्तिलहोमेन नरान्नरपतीनपि ॥१॥ सिद्धार्थैर्जुहुयान्मंत्री रोगान्मुच्येत तत्क्षणात्। पद्मैर्हुत्वा जयेच्छत्रून्दूर्वाभिः शांतिमाप्नुयात् ॥२॥ पलाशकुसुमैर्वृष्टिर्धान्यैर्धान्यश्रियं व्रजेत्। काकपक्षैः कृतो होमो द्वेषं वितनुते नृणाम् ॥३॥ मरीचहोमान्मरणं रिपुराप्नोति सर्वथा। क्षुद्रादिचोरभूताद्यान्ध्यात्वा देवी विनाशयेत् ॥४॥

॥ इति महिषमर्दिनीमंत्रप्रयोग ॥

॥ अथ महिषमर्दिनी कवचम् ॥

अथ वक्ष्ये महादेवी कवचं सर्वकामदम् । यस्य प्रसादमासाद्य भवेत्साक्षात्सदाशिवः ॥१॥
ॐकारं पूर्वमुच्चार्य मन्त्री मन्त्रस्य सिद्धये । प्रपठेत्कवचं नित्यं मन्त्रवर्णस्य सिद्धये ॥२॥

विनियोगः- **ॐ महिषर्दिन्याः कवचस्य भगवान्महाकाल ऋषिः, अनुष्टुप् छन्दः, आद्या शक्तिः, महिषमर्दिनी देवता चतुर्वर्गफल प्राप्तये जपे विनियोगः।**

क्लीं पातु मस्तके देवी कामिनी कामदायिनी । मकारे पातु मां देवी चक्षुर्युग्मं महेश्वरी ॥३॥
हिकारे पातु वदने हिंगुलासुर नायिका । षकारे पातु मां श्वेता जिह्वायां त्वपराजिता ॥४॥
मकारे पातु मां देवी मर्दिनी सुरनायिका । र्दिकारे पातु मां देवी सावित्री कालनाशिनी ॥५॥
निकारे पातु मां नित्या हृदये वासपार्श्वयोः । नाभौ लिङ्गे गुदे कण्ठे कर्णयोः पार्श्वयोस्तथा ॥६॥
शिखायां कवचे पादे मुखजङ्घायुगे तथा । सर्वाङ्गे पातु मां स्वाहा सर्वशक्तिसमन्विता ॥७॥
कामाद्या पातु मां स्वाहा सर्वाङ्गे पातु मर्द्दिनी । दशाक्षरी महाविद्या सर्वाङ्गे पातु मर्दिनी ॥८॥
मर्दिनी पातु सततं मर्दिनी रक्षयेत्सदा । राजस्थाने तथा दुर्गे सिंहव्याघ्रभयादिषु ॥९॥
श्मशाने प्रान्तरे दुर्गे नौकायां वह्निमध्यतः । दुर्गा पातु सदा देवी आर्या पातु सदाशिवा ॥१०॥
प्रभा पातु महेशानी गगने पातु सर्वदा । कृत्तिका पातु सततमभया सर्वदाऽवतु ॥११॥
प्रभा पातु महामाया माया पातु सदा मम । नन्दिनी पातु सततं सुप्रभा सर्वदाऽवतु ॥१२॥
विजया पातु सर्वत्र देव्यङ्गे नवशक्तयः । शक्तयः पातु सततं मुद्राः पातु सदा मम ॥१३॥

जया पातु सदा सूक्ष्मा विशुद्धा पातु सर्वदा । डाकिन्यः पातु सततं सिद्धाः पातु सदा मम ॥१४॥
सर्वत्र सर्वदा पातु देवी महिषमर्दिनी । इति ते कथितं दिव्यं कवचं सर्वकामदम् ॥१५॥
यत्र तत्र न वक्तव्यं गोपितव्यं प्रयत्नतः । गोपितं सर्वतन्त्रेषु विश्वसारे प्रकाशितम् ॥१६॥
सर्वत्र सुलभा विद्या कवचं दुर्लभं महत् । शठाय भक्तिहीनाय निन्दकाय महेश्वरि ॥१७॥
न्यूनाङ्गे ह्यतिरिक्ताङ्गे क्रूरे मिथ्यातिभाषिणि । न स्तवं दर्शयेद्दिव्यं कवचं सुरदुर्लभम् ॥१८॥
यत्र तत्र न वक्तव्यं शंकरेण च भाषितम् । दत्त्वा तेभ्यो महेशानि नश्यन्ति सिद्धयः क्रमात् ॥१९॥
मन्त्राः पराङ्मुखा यान्ति शापं दत्त्वा सुदारुणम् । अशुभं च भवेत्तस्य तस्माद्यत्नेन गोपयेत् ॥२०॥
गोरोचना कुकुमेन भूर्जपत्रे महेश्वरि । लिखित्वा शुभयोगेन ब्राह्मैन्द्रे वैधृतौ तथा ॥२१॥
आयुष्मत्सिद्धियोगे च बालवे कौलवेपि वा । वाणिजे श्रवणायां च रेवत्यां वा पुनर्वसौ ॥२२॥
उत्तरात्रययोगेषु तथा पूर्वात्रयेषु च । अश्विन्यां वाऽथ रोहिण्यां तृतीया - नवमीतिथौ ॥२३॥
अष्टम्यां वा चतुर्दश्यां षष्ठ्यां वा पंचमीतिथौ । अमायां वा पूर्णिमायां निशायां प्रान्तरे तथा ॥२४॥
एकलिङ्गे श्मशाने च शून्यागारे शिवालये । गुरुणावैष्णवैर्वापि स्वयम्भू कुसुमैस्तथा ॥२५॥
शुक्लैर्वा रक्तकुसुमैश्चन्दनै रक्तसंयुतैः । शवाङ्गारचितावस्त्रे लिखित्वा धारयेत्पुनः ॥२६॥
तस्य सर्वार्थसिद्धिः स्याच्छंकरेणैव भाषितम् । कुमारीं पूजयित्वा च देवीसूक्तं निवेद्य च ॥२७॥
पठित्वा पूजयेद्विप्रान्धनवान्वेद पारगान् । आखेटकमुपाख्यानं कुमार्यैव दिनत्रयम् ॥२८॥
तदा धरेन्महारक्षां कवचं सर्वकामदम् । नाधयो व्याधयस्तस्य दुःखशोकैर्भयं क्वचित् ॥२९॥
वादी मूको भवेद्दृष्ट्वा राजा च सेवकायते । मासमेकं पठेद्यस्तु प्रत्यहं नियतः शुचिः ॥३०॥
दिवा भवेद्धविष्याशी रात्रौ शक्ति परायणः । षट्सहस्त्र प्रमाणेन प्रत्यहं प्रजपेत्सदा ॥३१॥
षणमासैर्वा त्रिभिर्मासैर्विद्वरो भवति ध्रुवम् । अपुत्रो लभते पुत्रं निर्धनो धनमाप्नुयात् ॥३२॥

अरोगी वलवान्श्चैव राजा च दासतामियात् ।
रजस्वलाभगे नित्यं जपेद्विद्यां समाहितः ।
एवं यः कुरुते धीमान्स एव श्रीसदाशिवः ॥३३॥

॥ इति श्रीविश्वसारतन्त्रे महिषमर्द्दिन्यां कवचं समाप्तम् ॥

॥ अथ शत्रु संहारणी आर्द्रपटी दुर्गा प्रयोगः॥

शत्रुसंहार क्रम में आर्द्रपटी दुर्गा का प्रयोग भीषण हैं। गीले वस्त्र पर शत्रुनाम से प्रयोग किया जाता हैं। जब तक वस्त्र सूखता हैं उतनी देर में शत्रु का प्राणान्त हो जाता हैं। पूजा आवरण चण्डिका अथवा श्मशान कालीवत् करे।

मंत्रो यथा -(विद्यार्णवतंत्रे) **ॐ नमो भगवति चामुण्डे रक्तवाससी अप्रतिहतरूप पराक्रमे अमुकं वधाय विचेतसे स्वाहा।**

शत्रु की प्रतिमा बनाये नीलवस्त्र को छाग रक्त से भिगोकर प्रतिमा के लपेटे समुद्र वा नदीतीर पर उषरभूमि पर दक्षिणाभिमुख होकर ऊपर हाथ करके जप करे जब तक वस्त्र सूखेगा तब तक शत्रु के प्राण शुष्य हो जायेगें। परन्तु पहले मंत्र सिद्ध करना चाहिये बलिकर्म तथा स्वरक्षा कर्म पूर्ण करना चाहिये।

(रावणोड्डीश तंत्रेऽपि)- क्रीं नमो भगवति आर्द्रपटेश्वरि हरितनीलपटे कालि आर्द्रजिह्व चांडालिनि रुद्राणि कपालिनि ज्वालामुखि सप्तजिह्वे सहस्त्रनयने एहि एहि अमुकं ते पशुं ददामि अमुकस्य जीवं निकृन्तय एहि तज्जीवितापहारिणि हुं फट् भूर्भुवः स्वः फट् रुधिरार्द्रवसाखादिनि मम शत्रून् छेदय छेदय शोणितं पिब पिब हुं फट् स्वाहा। (इत्येक विंशोत्तर शताक्षरो मंत्रः)

१०८ मंत्र नित्य एक महिने तक करने पर शत्रु का मारण हो जाता हैं। अथवा कृष्णपक्ष की अष्टमी से लेकर कृष्णा चतुर्दशी पर्यन्त शत्रु के नाम सहित प्रतिदिन १०८ मंत्र जप करे। अंतिम दिन शत्रु के पाँव तले की मृत्तिका लाकर शत्रु की पुतली बनावे नीले वस्त्र से लपेटे, मंत्रपूर्वक प्राणप्रतिष्ठा करे, काली का पूजन करे, बकरे का बलिदान देकर उसके रक्त में वस्त्र को भिगोकर उस वस्त्र को पुतली के ऊपर उढ़ा देवे और मंत्र का जप करे और मंत्र का जप करे तो कृष्ण के समान बलि शत्रु भी यमपुर चला जावेगा।

॥ अथ विद्वेषण कारिणी घर्मटिका दुर्गा ॥

इसे भद्रकाली का ही रूप मानते हैं, अतः भद्रकाली पूजन कर मंत्र जप करें।

मंत्रो यथा- **घ्रीं घर्मटिके घर्मटिके मर्कटिके मर्कटिके घोरे (घोराघोरयोः) विद्वेषकारिणि अमुकामुकयोः विद्वेषय विद्वेषय हुं फट् स्वाहा।** जिनमें विद्वेषण करना हो उनके पुत्तल बनाकर एक दूसरे की विपरीत दिशा में रखे जप करे पश्चात् उनको निर्जन स्थान में अधोमुख विपरीत दिशा में गाड़ देवे तो उनमें विद्वेषण होवें।

॥ वज्रप्रस्तारिणी महाविद्या ॥

इस विद्या का प्रयोग शत्रुसंघ को विदीर्ण कर अपनी ओर आकर्षित करने का हैं। यह वश्यप्रयोग कठिन कार्यों को सरल कर देता है।

द्वादशाक्षरी मंत्रः- ऐं ह्रीं नित्यक्लिन्ने मदद्रवे स्वाहा। इस मंत्र की साधना से मेघनाद ने इन्द्र को बांध लिया था। इसकी साधना वाममार्गी हैं। महानिर्वाण तंत्र में कहा हैं कि शून्यशिवालय में रजोधर्म युक्त पद्मिनी जाति की युवति के वराङ्ग (त्रिकोण) की पूजा करे।

विनियोगः- **अस्य मंत्रस्य अङ्गिरस ऋषि, त्रिष्टुप्छन्दः वज्रप्रस्तारिणी देवता अमुक कार्य सिद्ध्यर्थे जपे विनियोगः।**

॥ ध्यानम् ॥

रक्ताब्धौ रक्तपोते रविदल कमलाभ्यन्तरे संनिषण्णाम् ।
रक्ताक्षीं रक्तमौलिस्फुरित शशिकलां स्मेरवक्त्रां त्रिनेत्राम् ॥
बीजापूरेषु पाशांकुश मदनधनुः सत्कपालानि ।
हस्तैर्बिभ्राणामानताङ्गीं स्तनभरन मितामम्बिकामाश्रयामः ॥

आवाहनादि कर पञ्च पुष्पाञ्जलि प्रदान करे। आवरण पूजा करे यथा-

॥ श्री वज्रप्रस्तारिणी यन्त्रम् ॥

१. मूल बिन्दु में प्रधान देवता की पूजा करे।

२. (षट्कोण में) प्रथम चारों कोणों में बाद में मध्य व दिक्षु दिशा में **ॐ हृदयाय नमः** इत्यादि षडङ्गपूजन करे।

३. (षट् कोण के बाहर) द्वादश दल में- **ॐ हृल्लेखायै नमः, ॐ क्लेदिन्यै नमः, ॐ क्लिन्नायै नमः, ॐ क्षोभिण्यै नमः, ॐ मदनावत्यै नमः, ॐ मैखलायै नमः, ॐ द्राविण्यै नमः, ॐ वेगवत्यै नमः, ॐ स्मरायै नमः, ॐ मोहिन्यै नमः, ॐ नित्यक्लिन्नयै नमः, ॐ मदद्रवे नमः**। इन बारह शक्तियों का पूजन करे। सभी शक्तियां **कपोलोत्पलधारिण्यः शक्तयो रक्तविग्रहाः** के अनुरूप ध्यान वाली हैं।

४. (दलों के बाहर अष्टदल में) **ब्राह्मी, वैष्णवी, कौमारी, माहेश्वरी, वाराही, नारसिंही, कमला एवं चामुण्डा** का पूजन करे। अगर अष्टदल नहीं बनाया हो तो भूपूर तीन रेखाओं का बनावें। एक रेखा में आठों दिशाओं में ब्राह्मयादि का पूजन करे।

५. भूपूर की दूसरी रेखा में इन्द्रादिलोकपालों का एवं तीसरी रेखा में उनके आयुधों का पूजन करे। एक लाख जप करके घृतासिक्त राजवृक्ष की समिधा से होम करे।

विशेष प्रयोगः- तृतीय भाग 'देवी खण्ड उत्तरार्द्ध' में अवलोकन करें।

॥ श्री विध्यवासिनी विधानम् ॥

शास्त्रों में श्री विन्ध्यवासिनी के अनेक व्रिगहों का उल्लेख मिलता है। महाकाली, महलक्ष्मी, महासरस्वती रूप में आप पूज्या है। (विष्णुयामलोक्त)-

॥ महाकाली ॥

(शारदा तिलके)

हेमाचले तटे रम्ये कल्पवृक्षोपशोभिते । दिव्योद्यनं चिन्तयेच्च विशालं हेम भूतलम् ॥
कृशानुरूपं वप्रेण करालेन समावृताम् । तन्मध्ये चिन्तयेद् दिव्यं विचित्रं मणिमण्डपम् ॥
तस्मिन् सिंहासनेऽम्भोजकर्णिकायां विचिन्तयेत् । दंष्ट्रां करालाट्टहासं कृष्णवर्णं भयानकम् ॥
अतितीव्रमुखं सिंहं ज्वलदग्निशिखोपमम् । तस्योपरिष्टात् तां देवी कोटि-बालार्क - सन्निभाम् ॥
चक्रासिवाण - शूलाख्यान् दधतीं दक्षिणैर्भुजैः । शङ्खचक्रधनुर्वाण - तर्जनीर्वामबाहुभिः ॥
चन्द्रखण्ड - समायुक्तामिति भीमत्रिलोचनाम् । ऊर्ध्वं ज्वलत्केश पाशामशेषाहरणोन्मुखीम् ॥
अङ्गाद्यावृत्ति -संयुक्तामस्त्र शस्त्रपरीवृताम् । इन्द्रादिलोकपालैश्च सेवितां विन्ध्यवासिनीम् ॥

॥ महालक्ष्मी ॥

रत्नकौस्तुभ - प्राकारे रत्नसिंहासनस्थिताम् । रत्नचिन्तामणेर्दीप्तौ रत्नानां पूर्णभासुरे ॥
रत्नाङ्गीं रत्नवक्त्राभां रत्नज्योत्स्ना - प्रसारिणीम् । रत्नगां रत्नचूडाभां रत्नद्वीपनिवासिनीम् ॥
नवयौवनसम्पन्नां त्रिनेत्रां च चतुर्भुजाम् । वराभयासि - शङ्खं च धृतां भक्तेष्टदां वराम् ॥
कलाकोटिपरिभ्रान्तां रत्नहारावली - युताम् । सेव्यमानां सुर स्त्रीभिः स्तुतामिन्द्राद्याखण्डलैः ॥
सदाऽऽर्द्रचित्तां विश्वेशीं पराम्बां लोकपालिकाम् । ध्याये कल्पतरोर्मूले विन्ध्येशीं विष्णुपूजिताम् ॥

॥ महासरस्वती ॥

शुक्लाङ्गीं शुक्लकूटभां, शुक्लपुष्पप्रियां वराम् । कोटिशुभ्रेन्दु संकाशां मुक्तामालामलङ्कृताम् ॥
पीठे चिन्तामणेर्दीप्तौ करचूडाप्रभाभराम् । ज्योत्स्ना रत्नस्फुरद् - देहां मन्दहास - युताननाम् ॥
महासरस्वतीं देवीं मणिद्वीपेश्वरीं पराम् । सर्वाद्यां बालिकां नित्यां मणिदोलन - संस्थिताम् ॥
वक्त्राब्जेऽङ्गुष्ठधृत् मूलं कराब्जाभ्यां पदाब्जयोः । पिबन्तीं शोभितां शुभ्रां ब्रह्मानन्दस्वरूपिणीम् ॥
सेवितां देव - देवैश्च संस्तुतां सर्वसिद्धिदाम् । आदिरूपां महामायां ध्याये विन्ध्यवासिनीम् ॥

हरिवंशपुरण एवं श्रीदुर्गोपासनाकल्पद्रुम में धृति, मेधा, श्री, सिद्धि, विद्या, सन्ध्या, नारायणी, रात्रि, कालरात्रि, आर्या, कात्यायनी, त्रिलोक जननी, कौशिकी, नीलकौशेय वासिनी, आदि कई नाम देवी स्तुति में दिए है तथा इन्हे घण्टानिनाद बहुला भी कहा गया है।

महाभारत (विराट् पर्व, २३) के अन्तर्गत श्रीविन्ध्यवासिनी के स्वरूप का अतिसुन्दर वर्णन किया गया है, वे चार भुजाए, चार वक्त्रों वाली एवं उदयमान सूर्य के समान आकार वाली, पूर्णचन्द्र निभानना, मयूर पिच्छिल का जिसका वलय है, केयूर, आङ्गद, कुण्डल, श्रोणि सूत्रादि आभूषणों को धारण करने वाली एवं पाश, धनु, महाचक्र को धारण करने वाली है जो त्रैलोक्य की रक्षार्थ विन्ध्यगिरि पर शाश्वत रूप से निवास करती है। वह देवी सभी का कल्याण करती है।

विन्ध्यवासिनी को कहीं **सिंहस्था** कहा गया है तो कहीं **सौवर्णाम्बुज मध्यस्था** कहा गया है कहीं **गजारूढ़ा** कहा है। यथा देवी नाम विलास में -

गजारूढा निजबन्ध - स्वाच्छन्द्यानन्द - सुन्दरी ।
अवन्धुरं सुदुर्बन्धं छिन्धि त्वं विन्ध्यवासिनी ॥

॥ अथ विंध्यवासिनी मंत्र प्रयोगः ॥

श्री विंध्यवासिनी पीठ में त्रिशक्तिरूप महालक्ष्मी, महाकाली, महासरस्वती का पूजन होता है।

अष्टाक्षर मन्त्र :- ॐ ह्रीं महालक्ष्म्यै नमः ॥

विनियोग :- ॐ **अस्य श्रीविन्ध्यवासिनी विशालाक्षी महालक्ष्मी अष्टाक्षरमन्त्रस्य श्री सदाशिव ऋषिः, पंक्तिश्छन्दः, श्रीमहालक्ष्मीर्देवता, ह्रीं बीजं, ॐ शक्तिः, चतुर्वर्ग सिद्ध्यर्थे जपे विनियोगः।**

ऋष्यादिन्यास – श्रीसदाशिवऋषये नमः शिरसि, पंक्तिश्छन्दसे नमः मुखे, विशालाक्षी श्रीमहालक्ष्मीदेवतायै नमः हृदि, ह्रीं बीजाय नमः गुह्ये, ॐ शक्तये नमः पादयोः, चतुर्वर्ग सिद्ध्यर्थे जपे विनियोगायः नमः सर्वाङ्गे।

॥ ध्यानम् ॥

ध्याये देवीं विशालाक्षीं तप्तजाम्बूनदप्रभाम् । द्विभुजामम्बिकां चण्डीं खड्गखर्परधारिणीम् ॥
नानालङ्कारसुभगां रक्ताम्बरधरां शुभाम् । सदा षोडशवर्षीयां प्रसन्नास्यां त्रिलोचनाम् ॥१॥
मुण्डमालावली रम्यां पीनोन्नतपयोधराम् । वरदातां महादेवीं जटामुकुटमण्डिताम् ॥
शत्रुक्षयङ्करीं देवीं साधकाभीष्टदायिकाम् । सर्वसौभाग्यजननीं महासम्पत्प्रदां स्मरे ॥२॥

॥ स्तोत्रम् ॥

ॐ नमः कल्याणदे देवि! नमः शङ्करवल्लभे! नमस्ते विन्ध्यवासिन्यै, महालक्ष्म्यै, नमो नमः ॥
नमो मायागृहीताङ्गि! नमः कारुण्यरूपिणि! माहेश्वरि! नमस्तुभ्यं, महालक्ष्म्यै नमो नमः ॥
महामाये, शिवपत्नि, दुर्गारूपे, हरप्रिये! वाञ्छादात्रि, सुरेशानि! महालक्ष्म्यै नमो नमः ॥
प्रोद्यत्भानुसहस्राभे, नयनत्रयभूषिते! चन्द्रचूड़े , महादेवि! महालक्ष्म्यै नमो नमः ॥
विचित्रवसने, देवि! अन्नदानरतेऽनघे! शिवनृत्यकृता मोहे! महालक्ष्म्यै नमो नमः ॥
साधकाभीष्टदे, देवि! भवदुःखविनाशिनि! कुचभारनते देवि! महालक्ष्म्यै नमो नमः ॥
षट्कोणयन्त्रमध्यस्थे, षडङ्गयुवतीमये! ब्रह्माण्यादि स्वरूपायै, महालक्ष्म्यै नमो नमः ॥
इन्द्रार्चितपादाम्बुजे, रुद्राणीरूपधारिणि! सर्वसम्पत्प्रदे, देवि! महालक्ष्म्यै नमो नमः ॥

॥ फलश्रुति ॥

पूजाकाले पठेद्यस्तु, स्तोत्रमेतत् समाहितः । तस्य गेहे स्थिरा लक्ष्मी, जायते नात्र संशयः ॥
प्रातःकाले पठेद्यस्तु मन्त्रराजपुरश्चरम् । तस्य सर्वं समृद्धिर्वर्धमाना दिने दिने ॥
यस्मै कस्मै न दातव्यं न प्रकाश्यं कदाचन। प्रकाशात् कार्यहानिः स्यात्, तस्माद्यत्नेन गोपयेत् ॥
विन्ध्यक्षेत्रे महाक्षेत्रे, स्थित्वा यः शुचिमानसः। नित्यं तु प्रजपेद्भक्त्या, सिद्धयस्तस्य दासिकाः ॥

॥ अथ श्रीविन्ध्यवासिनी भद्रकाली प्रयोगः॥

पञ्चदशाक्षर मन्त्र :- ॐ हौं कालि महाकालि किले किले फट् स्वाहा

विनियोग- ॐ अस्य श्रीविन्ध्यवासिनी भद्रकाली पञ्चदशाक्षरमन्त्रस्य श्रीभैरवः ऋषिः। उष्णिक् छन्दः, श्रीभद्रकाली देवता, क्रीं बीजम्, हूं शक्तिः, क्रीं कीलकम्, ममाभीष्टसिद्ध्यर्थे जपे विनियोगः।

ऋष्यादिन्यास- ॐ श्रीभैरवऋषये नमः शिरसि, उष्णिक् छन्दसे नमः मुखे, श्रीभद्रकाली देवतायै नमः हृदि, क्रीं वीजाय नमः गुह्ये, हूं शक्तये नमः पादयोः, क्रीं कीलकाय नमः नाभौ, ममाभीष्टसिद्ध्यर्थे जपे विनियोगाय नमः सर्वाङ्गे।

॥ ध्यानम् ॥

क्षुत्क्षामा कोटराक्षी मसिमलिनमुखी मुक्तकेशी रूदन्ती। नाहं तृप्ता वदन्ती जगदखिलं ग्रासमेकं करोमि ॥
हस्ताभ्यांधारयन्ती ज्वलदनलशिखासन्निभं पाशमुग्रं। दन्तैर्जम्बूफलाभैः परिहरतु भयं पातुमां भद्रकाली ॥

॥ स्तोत्रम् ॥

ॐ महाकालि, महारूपे, गरुडासनसंस्थिते! शंखचक्रगदापद्मपाणे, ह्रींकारि च नमोऽस्तु ते ॥
सहस्राक्षि, महादेवि, वज्रप्रहरणायुधे! ऐरावतसमारूढ़े, इन्द्राणि! च नमोऽस्तु ते ।।
अनेकदैत्यसैन्यानां, मधुकैटभनाशिनि! ज्वालामुखि! नमस्तुभ्यं, विन्ध्ये कृतनिकेतने ॥
महाभीमे महादंष्ट्रे, ललज्जिह्वे, महाभये! महारूपे, महासत्त्वे, भद्रकालि! नमोऽस्तु ते ॥
त्रिपुरा भैरवी विद्या, हंसी वागीश्वरी शिवा। महाघोरा महारात्रि, कालरात्रि त्रिलोचना ॥
भद्रकाली करालाक्षी महाकाली तिलोत्तमा। काली कराल-वक्त्रान्ता कामाक्षी च महाशुभा ॥
महिषासुरसेनानी चिक्षुरादिमहासुरा । निशुम्भशुम्भ दैत्यानां, नाशिनी त्वं नमोऽस्तु ते ॥
नमस्ते विन्ध्यवासिन्यै, यन्त्रस्थायै नमो नमः। नमस्ते चोर्ध्व वक्त्रायै, सर्वेष्टं देहि मे सदा ॥

॥ फलश्रुति ॥

इदं स्तोत्रं महापुण्यं, कालिकाया सुमङ्गलम्। योऽधीते शुद्धमनसा, लप्स्यति स परां गतिम् ॥
पुत्रपौत्रा सर्वधनाः, आयुवर्धनमेव च । सर्वान् कामान्लभेन्मर्त्यो, नात्र कार्या विचारणा ॥
यः स्थित्वा विन्ध्यक्षेत्रेऽस्मिन्, स्तोत्रमेतज्जपेद्रहः। तस्मै सा कालिका देवी, मन ईप्सितदायिनी ॥

॥ विंध्यवासिनी सरस्वती मन्त्र प्रयोगः॥

एकादशाक्षर मंत्र – ऐं ह्रीं ऐं ह्रीं ॐ सरस्वत्यै नमः

विनियोग– ॐ अस्य श्रीविन्ध्यवासिनीवाक्स्वरूपा महासरस्वती एकादशाक्षर मन्त्रस्य श्रीनारायण ऋषिः, पंक्तिश्छन्दः, वाक्स्वरूपा महासरस्वती देवता, ऐं बीजं, चतुर्वर्गसिद्ध्यर्थे जपे विनियोगः।

ऋष्यादिन्यास– श्रीनारायणऋषये नमः शिरसि, पंक्तिश्छन्दसे नमः मुखे, वाक्स्वरूपामहासरस्वतीदेवतायै नमः हृदि, ऐं वीजाय नमः गुह्ये, चतुर्वर्गसिद्ध्यर्थे जपे विनियोगाय नमः सर्वाङ्गे।

॥ ध्यानम् ॥

अथ ध्यानं प्रवक्ष्यामि, सरस्वत्या सुमङ्गलम्। एवं ध्यायति यो मर्त्यः, सर्ववाञ्छितमाप्नुयात् ।
श्वेताब्जे श्वेतयोने रविदल कमलाभ्यन्तरे सन्निषण्णाम्। श्वेताङ्गीं श्वेतमौलिस्फुरच्छशि कलामष्टबाहुं भजामि ॥१॥
श्वेताभ्राभां कटाक्षैररिकुल भयदां मौलिबद्धेन्दुरेखां। शङ्खं चक्रं कृपाणं त्रिशिखमपि करैरुद्, वहन्तीं त्रिनेत्रां ।
सिंहस्कन्धाधिरूढां त्रिभुवनमखिलं तेजसा पूरयन्तीं। ध्याये नित्यं भवानीं त्रिदशपरिवृतां सेवितां सिद्धसङ्घैः ॥२॥

॥ स्तोत्रम् ॥

ॐ नमस्ते वाक्प्रदे देवि! नमो विन्ध्याधिवासिनि। नमो निर्वाणदायिनि! भोगदायै नमो नमः ॥
कामदा त्वं महादेवी, सर्वाभीष्टफलप्रदा। सर्वेषां मंगलानां त्वमाश्रया परमा शिवा ॥
अम्बिका त्वं महादानी, सोमसूर्याग्निलोचना । आदित्यरूपाष्टभुजा, महातत्त्वप्रकाशिनी ॥
श्वेतपङ्कजवर्णाभां, श्वेताभरणभूषिताम् । श्वेतमाल्याम्बरधरां, भजे तां जगदम्बिकाम् ॥
महासिंहगता देवि! बीजरूपा सनातनी । अकारादि क्षकारान्ता, सर्वविद्या विशारदा ॥

सृष्टिकर्त्री त्वमेवादौ, स्थितिकर्त्री तथैव च। संहारकर्त्री त्वं माया, चादिरूपा सनातनी ॥
जगत्सर्वं त्वयि प्रोतं, सूत्रे मणिगणा इव। त्वत्तत्त्वं न विदुः साक्षाद्, देवा इन्द्रपुरोगमाः ॥

॥ फलश्रुति ॥

इदं स्तोत्रं तु यो मर्त्यो, पठेद्भक्त्या समाहितः। विद्यां श्रियं परां कीर्तिं, लभते नात्र संशयः ॥
कुले न जायते तस्य, दरिद्री कलहोऽपि वा। महापातकजान् दोषान्मुच्यते पुण्यभाक् भवेत् ॥
बहुलां श्रियमाप्नोति, सात्विको पुण्यहेतुकी। गुरुवक्त्राद् लभेद्यस्तु, नान्यथा मुनिपुङ्गव! ॥

॥ श्रीविन्ध्यवासिनी यन्त्रार्चनम् ॥

विन्दुस्त्रिकोणं षट्कोणं वृत्तमष्टदलं तथा, षोडशारं ततः पश्चात् चतुर्विंशदलं ततः।
भूपुरद्वारसहितं महायन्त्रं प्रकीर्तितम्, विन्दौ तु संस्थिता देवी ब्रह्मरूपेण सर्वदा ॥
पूर्वकोणे त्रिकोणेऽस्य महालक्ष्मीर्व्यवस्थिता, प्रत्यग्दिशि मुखं कृत्वा भक्तानां भयहारिणी।
नानाऽम्बरधरा देवी नानाभूषणभूषिता, तत्कोणे संस्थितां महालक्ष्मीं तु सर्वे स्तुवन्ति ॥
प्रत्यक् कोणेमुखंकृत्वाउत्तरस्य दिशि स्थिता, सा मायाऽष्टभुजा शक्तिरीश्वरी सर्वमोहिनी।
साधयत्यखिलान् कामान् स्वभुजैरष्ट संज्ञकैः, दिग्भिरष्टाभिरवती स्वभक्तान् बाहुरष्टभिः ॥
यन्त्रस्य दक्षिणे कोणे मुखमूर्ध्वं विधाय सा, महाकाली महारूपा संस्थिता परमेश्वरी।
तां स्तुवन्ति महासिद्धाः योगीशाः निर्मलात्मनः, सर्वैस्त्रिविष्टपैः सार्द्धं शाम्भवीं कालिकां शिवाम् ॥
पूर्वकोणे रतिदेवी संस्थिता परमेश्वरी, याम्यकोणे महाकाल्याः निकटे प्रीतिनामिका।
संस्थिता सा महाशक्तिः कोणे तु पश्चिमे तथा, विजयानामिका शक्तिः स्थिता वाण्याः समीपके ॥
तदग्रे कोणषट्के तु शक्तयः संस्थितास्त्विमाः, ज्ञातव्याः संक्रमेणैव सर्वाघौघनिवारकाः।
डाकिनी शाकिनी चैव लाकिनी काकिनी तथा, शाकिनी हाकिनी चैव शक्तयः षड्डुदाहृताः ॥
वृत्ताष्टदले च ब्राह्मीत्याद्यास्ताः लोकमातरः। संस्थितास्तत्र वसतां हिताय जगतां तथा ॥

॥ विंध्यवासिनी प्रयोग ॥

सप्तशती के मंत्र "**नंदगोपगृहे...........विंध्याचल निवासिनी**" के अनुसार आप ही "**नन्दजा**" हैं। स्कंद पुराणान्तर्गत "**विंध्य पुराणखण्ड**" में विंध्यवासिनी महालक्ष्मी का "**विशालाक्षी**" रूप में यंत्रार्चन स्तोत्र दिये है। अन्य ग्रंथो के अनुसार आप ही "**शूलिनी देवी**" है। **आपही कात्यायनी है**। महाकाली महालक्ष्मी महासरस्वती रूप में आपका अर्चन विंध्यक्षेत्र में होता है।

॥ विंध्यवासिनी यंत्रार्चनम् ॥

बिन्दु, त्रिकोण, षट्कोण, वृत्त, अष्टदल, षोडशदल, चौबीस दल एवं चार द्वार युक्त भूपुर बनायें। चतुर्थी युक्त नाम मंत्रों से आवाहन, तथा प्रथमा से पादुका पूजन करें।

प्रथमावरणम्- बिन्दु मध्य में देवी का आवाहन करें। "**त्रिकोण**" में अग्रभाग में पश्चिमाभिमुखी "**महालक्ष्मी**" तथा देवी के दक्षिण भाग में पश्चिमाभिमुखी अष्टभुजा "**ईश्वरी माया शक्ति**" तथा वाम भाग में उर्ध्वमुखी "**महाकाली**" का पूजन करें। महालक्ष्मी के पास "**रति देवी**" महाकाली के पास "**प्रीतिदेवी**" तथा माया शक्ति महासरस्वती

॥ श्री विंध्यवासिनी यन्त्रम् ॥

के पास "**विजया देवी** " की पूजा करें।

द्वितीयावरणम्- (षट्कोणे)- देवी के चारों ओर हृदयादि षडङ्गपूजा करें। षट्कोण में - डाकिनी, शाकिनी, लाकिनी, काकिनी, राकिनी, और हाकिनी की पूजा करें।

तृतीयावरणम्-(अष्टदले)- ब्राह्मी, माहेश्वरी, कौमारी, वैष्णवी, वाराही, नारसिंही, ऐन्द्री एवं चामुण्डा का पूजन करें।

चतुर्थावरणम्- (अष्टदलाग्रे)- अष्टभैरव का पूजन करें। असिताङ्गभैरवाय नमः। रुद्र चण्ड, क्रोध, उन्मत्त, कपाली, भीषण, संहार भैरवाय नमः।

पंचमावरणम्- (षोडशदले)- पाशिनी, कामिनी, मोदिनी, विमला। अरुणा, जयिनी, सर्वा, ईश्वरी। अनङ्ग कुसुमा, अनङ्ग मेखला, अनङ्गमदना, अनङ्गरेखा। अनङ्गवेगिनी, अनङ्गाकुला, अनङ्गमालिनी, एवं अंकुशा का पूजन करें।

षष्ठमावरणम्- (चतुर्विंशति दले)- विष्णुमाया, चेतना, बुद्धि, निद्रा, क्षुधा, छाया। शक्ति, तृष्णा। क्षांति, जाति, लज्जा, शान्ति। श्रद्धा, कान्ति, लक्ष्मी, वृत्ति,। धृति, स्मृति। दया, पुष्टि, माता, भ्रान्ति, व्याप्ति एवं चिति की पूजा करें।

सप्तमावरणम्- (भूपुरे)- पूर्वादि क्रम से चारों द्वारों में- **गणेश, कार्तिकेय, पुष्पदन्त**, एवं "**कार्तन** " का पूजन करें। दशों दिशाओं में **इन्द्रादि लोकपालों** का उनके आयुधों सहित पूजन करें।

भूपुर में देवी के चारों ओर- आनन्द भैरव, कपाल भैरव,, सिद्धनाथ, एवं रुरु भैरव का पूजन करें।

सिद्धिदायिनी ६४ योगिनीयों की स्तोत्र नामावलि, ५२ भैरवनामावलि (अन्यत्र वर्णित है) से पूजन करें।

॥ श्री महाविद्यास्तोत्रम् ॥

सङ्कल्प- ॐ तत्सत् अद्यैतस्य ब्रह्मणोऽह्नि द्वितीय प्रहरार्द्धे श्वेतवराहकल्पे जम्बूद्वीपे भरतखण्डे आर्यावर्त्तदेशे अमुकपुण्यक्षेत्रे कलियुगे कलिप्रथमचरणे अमुकसम्वत्सरे अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकगोत्रोत्पन्नो अमुकनामत्रिविधदोषोपशमनार्थं सकलारिष्टग्रह जन्मदुःखध्वंसनपूर्वक भूतप्रेत पिशाच राक्षसब्रह्म राक्षस वेताल तथा कुलदेवतायाः शान्त्यर्थं कष्ट निवारणार्थं ज्वराधिजन्म दुःख व्याधि कृमि ध्वंसन पूर्वकं महाशान्तिकामः श्रीमहाविद्यायाः सकलरसानुकूल महाशान्तिक नाम स्तोत्रपाठमहं करिष्ये। तेनैव स्तोत्रेण दशदिनपर्यन्तम् अहोरात्र हवनमहं करिष्ये।

मंत्र - ॐ नमो भगवते महाविद्यायै नमः।

विनियोग :- ॐ अस्य श्रीमहाविद्यामन्त्रस्य श्रीअघोरार्यमा ऋषिः। गायत्रीत्रिष्टुप् जगतीछन्दांसि। परमात्मा श्री कालिका देवता। श्री महामाहेश्वरी विद्या। माया वीजं। त्रिशक्तित्रिमुद्रा शक्तिः। श्री महाविद्याप्रीत्यर्थे (मम सकलदुरितक्षयार्थे, सकलजनवश्यार्थे, सकलकार्य सिद्ध्यर्थे, मोहनार्थे, मनोऽर्पितकामना सिद्ध्यर्थे, सकलफलप्राप्त्यर्थे प्राप्तसंरक्षणार्थे, शीघ्रसकलकामना सिद्ध्यर्थे सर्वाशापरिपूरणार्थे, धनधान्यान्न वस्त्रालङ्कारादिसमृद्ध्यर्थे) जपे पाठे विनियोगः।

ऋष्यादिन्यास :- श्री अघोरार्यमाऋषये नमः शिरसि। गायत्रीत्रिष्टुप्जगती छन्दोभ्यः नमः मुखे। परमात्मा श्रीकालिकादेवतायै नमः हृदि। श्री महामाहेश्वरीविद्यायै नमः कण्ठे। मायावीजाय नमः लिङ्गे। त्रिशक्तित्रिमुद्राशक्तये नमः नाभौ। श्री महाविद्याप्रीत्यर्थे जपे पाठे विनियोगाय नमः अञ्जलौ।

करन्यासः- अं अंगुष्ठाभ्यां नमः। ऐं तर्जनीभ्यां नमः। ह्रीं मध्यमाभ्यां नमः। श्रीं अनामिकाभ्यां नमः। क्लीं कनिष्ठिकाभ्यां नमः। महाविद्यायै करतलकरपृष्ठाभ्यां नमः।

अङ्गन्यासः- अं हृदयाय नमः। ऐं शिरसे स्वाहा। ह्रीं शिखायै वषट्। श्रीं क्वचयोः हुं। क्लीं नेत्रत्रयाय वौषट्। महाविद्यायै अस्त्राय फट्।

उत्कीलनमन्त्रः- ॐ ऐं ह्रीं वाग्वादिनी सर्वमन्त्राणां सर्वयन्त्राणामुत्कीलनकरी सर्वसुख मुखनकरीस्वाहा।

॥ ध्यानम् ॥

पञ्चवक्त्रां च लम्बोष्ठीं, नयनत्रयशोभिताम्। रक्तदंष्ट्रां करालास्यां, कृष्णाजिन्मृगरूपिणीम् ॥
रक्तवस्त्रां दशभुजामायुधैः परिशोभिताम्। खड्गं च मुशलं शूलं, भल्लं वाणं च दक्षिणे ॥
धनुः पाशं च डमरुं शक्तिं खेटं तथोत्तरे। बिभ्राणां सिंहपृष्ठस्थां, ध्यायेत् तां हृत् शिरोरुहे ॥
आरुणीं वारुणीं चैव, सर्वोपद्रवनाशिनीम्। उल्कामुखीं रुद्रजटीं नागपृष्ठशिरोधरीम् ॥

पूजामन्त्रः- ॐ ऐं ह्रीं श्रीं क्लीं कुलकुण्डस्वामिनि! स्वाहा। ॐ आत्मरक्षां कुरुकुरु, परविद्यां छिन्धिछिन्धि परयन्त्रं स्फोटयस्फोटय, ॐ कुण्डस्वामिनि! स्वाहा॥

मूलमन्त्रः- ॐ ऐं ह्रीं श्रीं क्लीं महाविद्यायै स्वाहा। उक्त 'मूल मन्त्र' का १०८ जप करने के बाद 'माला मन्त्र' का जप करना चाहिए।

यथा- ॐ ह्रौं हंसक्षमल्वयवरा हंसक्षमल्वयवरीं श्रीं श्रीं ह्रीं याचकः सर्वाराध्य सर्वशुद्धनार्थं सर्वगुरु स्वयं

गुरुनाथ हंसक्षमल्वय सं हंसक्षमल्वपरि हंसक्षमल्वयपरां श्रीशम्भु गुरु श्रीं ह्रीं हसौं ऐं क्लीं सोऽहं सौं श्रीं ह्रीं मूलादिब्रह्मरन्ध्रान्तं विषतनीयसीमुद्यदादित्यरुचिरां स्मरेत् शुभशान्तये। ॐ महाविद्यां प्रवक्ष्यामि, महादेवेन निर्मितां। चिन्तितां किन्तरूपेण, मात्रा हृदयनन्दिनीं॥ उत्तमां सर्वविद्यां, सर्वभूतवशकरीं। सर्वपापक्षयकरीं, सर्वशत्रुनिवारिणीम्॥

॥ होममन्त्र ॥

ॐ ह्रां हंसः कुलकार्यकरीं, कुलकरीं, गोत्रकरीं, पुत्रकरीं, पुष्टिकरीं, तुष्टिकरीं, धनकरीं, धान्यकरीं, वृद्धिकरीं, उत्साहबलवर्धिनीं, भूतानां प्रभञ्जिनीं, शोषिणीं, मोहिनीं, द्राविणीं, दुष्टयन्त्रप्रभञ्जिनीं, पुत्रपौत्रादिवर्द्धिनीं, आयुरारोग्यैश्वर्याभिवर्धिनीं, सर्वभूतस्तम्भिनीं, सर्वाकर्षिणीं, सर्वलोकवशकरीं, सर्वजनवशकरीं, सर्वयन्त्रप्रमोदिनीं, एकाहिकं, द्व्याहिकं, त्र्याहिकं, चातुर्थिकं, पञ्चाहिकं, षष्ठ्याहिकं, सप्ताहिकं, अष्टाहिकं, अर्धमासिकं, षाण्मासिकं, साम्वत्सारिकं, वातिकं, पैत्तिकं, श्लैष्मिकं, सान्निपातिकम्, कुष्ठरोगजठररोगमुख रोगप्रमेहरोगशुक्रविशिभयं विस्फोटकादिविनाशनाय स्वाहा। ॐ वेतालादिज्वर, मुहूर्त्तज्वरादि वसज्वर रात्रीज्वर, सन्ध्याज्वर, सन्ततज्वर, राक्षसज्वर, अग्निज्वर, प्रस्वेदज्वर, विषमज्वर, तीव्रज्वर, मायाप्रयोगाभिचारिकज्वर, दृष्टिज्वर, पाण्डुज्वर, अस्मादादिज्वरप्रयोगाद्धि विनाशनाय स्वाहा। ॐ ब्रह्माण्डशूल, शिरशूल, शिरऽर्धशूल, अक्षिशूल, घ्राणशूल, कर्णशूल, दन्तशूल, गलशूल, गण्डशूल, हृदयशूल, कुक्षिशूल, पृष्ठशूल, कटिशूल, नाभिशूल, उदरशूल, हस्तशूल, उरूशूल, पादशूल, पादार्धशूल, सर्वशूलविनाशनाय स्वाहा। ॐ सर्वव्याधि विनाशनाय स्वाहा, सर्वशत्रुविनाशनाय स्वाहा। सर्वविस्फोटकविनाशनाय स्वाहा। ॐ आत्मरक्षा, परमात्मरक्षा, मित्ररक्षा, अग्निरक्षा, प्रत्यग्निरक्षा पराग्निवातोरक्षा, चौररक्षातेषां सकलं बध्नामि नमः स्वाहा। ॐ हरदेहिनीं नमः स्वाहा। ॐ इन्द्रदेहिनीं नमः स्वाहा। ॐ स्वस्व ब्रह्माण्डदण्डं विश्रामय, विश्रामय, विष्णुदण्डम्। ॐ ज्वरज्वर, ईश्वरकुमारदण्डम्, ॐ प्रहरप्रहरानुदण्डम्, हिलिमिलि मायादण्डम्, नित्यं नित्यं विश्रामय। विश्रामवारुणी, शूलिनी, गारुड़ी रक्ष रक्ष स्वाहा। ॐ नदीनां पुलिने जाता, पर्वते वा वनान्तरे। रुद्रस्य हृदये जाता, विद्याऽहं कामरूपिणी स्वाहा। ॐ ज्वल ज्वल देहस्य देहेन सकललोहपिङ्गली कठिनप्रेरिका, किलि, किलि, किलिकं महादण्डम् कुमारदण्डम्, नृत्य नृत्य विष्णुवन्दितम्, हंसिनीं शङ्खिनीं, चक्रिणीं, गदिनीं, शूलिनीं रक्ष रक्ष स्वाहा।

ॐ ह्रां स्वाहा, ॐ ह्रां ह्रां स्वाहा। ॐ ह्रीं स्वाहा, ॐ ह्रीं ह्रीं स्वाहा। ॐ ह्रूं स्वाहा, ॐ ह्रूं ह्रूं स्वाहा। ॐ ह्रें स्वाहा, ॐ ह्रें ह्रें स्वाहा। ॐ ह्रैं स्वाहा, ॐ ह्रैं ह्रैं स्वाहा। ॐ ह्रों स्वाहा, ॐ ह्रों ह्रों स्वाहा। ॐ ह्रौं स्वाहा, ॐ ह्रौं ह्रौं स्वाहा। ॐ ह्रं स्वाहा, ॐ ह्रं ह्रं स्वाहा। ॐ ह्रः स्वाहा, ॐ ह्रः ह्रः स्वाहा। ॐ क्रां स्वाहा, ॐ क्रां क्रां स्वाहा। ॐ क्रीं स्वाहा, ॐ क्रीं क्रीं स्वाहा। ॐ क्रूं स्वाहा, ॐ क्रूं क्रूं स्वाहा। ॐ क्रें स्वाहा, ॐ क्रें क्रें स्वाहा। ॐ क्रैं स्वाहा, ॐ क्रैं क्रैं स्वाहा। ॐ क्रों स्वाहा, ॐ क्रों क्रों स्वाहा। ॐ क्रौं स्वाहा, ॐ क्रौं क्रौं स्वाहा। ॐ क्रं स्वाहा, ॐ क्रं क्रं स्वाहा। ॐ क्रः स्वाहा, ॐ क्रः क्रः स्वाहा। ॐ कं स्वाहा, ॐ कं कं स्वाहा। ॐ खं स्वाहा, ॐ खं खं स्वाहा। ॐ गं स्वाहा, ॐ गं गं स्वाहा। ॐ घं स्वाहा, ॐ घं घं स्वाहा। ॐ ङं स्वाहा, ॐ ङं ङं स्वाहा। ॐ चं स्वाहा, ॐ चं चं स्वाहा। ॐ छं स्वाहा, ॐ छं छं स्वाहा। ॐ जं स्वाहा, ॐ जं जं स्वाहा। ॐ झं स्वाहा, ॐ झं झं स्वाहा। ॐ ञं स्वाहा, ॐ ञं ञं स्वाहा। ॐ टं स्वाहा, ॐ टं टं स्वाहा। ॐ ठं स्वाहा, ॐ ठं ठं स्वाहा। ॐ डं स्वाहा, ॐ डं डं स्वाहा। ॐ ढं स्वाहा, ॐ ढं ढं स्वाहा। ॐ णं स्वाहा, ॐ णं णं स्वाहा। ॐ तं स्वाहा, ॐ तं तं स्वाहा। ॐ थं स्वाहा, ॐ थं थं स्वाहा। ॐ दं स्वाहा, ॐ दं दं स्वाहा। ॐ धं स्वाहा, ॐ धं धं स्वाहा। ॐ नं स्वाहा, ॐ नं नं स्वाहा। ॐ पं स्वाहा, ॐ पं पं स्वाहा। ॐ फं स्वाहा, ॐ फं फं स्वाहा। ॐ बं स्वाहा, ॐ बं बं स्वाहा। ॐ भं स्वाहा,

ॐ भं भं स्वाहा। ॐ मं स्वाहा, ॐ मं मं स्वाहा। ॐ यं स्वाहा, ॐ यं यं स्वाहा। ॐ रं स्वाहा, ॐ रं रं स्वाहा। ॐ लं स्वाहा, ॐ लं लं स्वाहा। ॐ वं स्वाहा, ॐ वं वं स्वाहा। ॐ शं स्वाहा, ॐ शं शं स्वाहा। ॐ षं स्वाहा, ॐ षं षं स्वाहा। ॐ सं स्वाहा, ॐ सं सं स्वाहा। ॐ हं स्वाहा, ॐ हं हं स्वाहा। ॐ क्षं स्वाहा, ॐ क्षं क्षं स्वाहा। ॐ त्रं स्वाहा, ॐ त्रं त्रं स्वाहा। ॐ ज्ञं स्वाहा, ॐ ज्ञं ज्ञं स्वाहा। ॐ नमो भगवते रुद्राय स्वाहा। ॐ भूः स्वाहा, ॐ भुवः स्वाहा। ॐ स्वः स्वाहा, ॐ भूर्भुवः स्वः स्वाहा। ॐ ब्रह्मणे नमः स्वाहा। ॐ विष्णवे नमः स्वाहा। ॐ रुं रुद्राय नमः स्वाहा। ॐ रुद्रादित्याय नमः स्वाहा। ॐ नमो भगवते रुद्राय सर्वभूतानां सर्वविषाणां सर्व दुष्टानां निग्रहं कुरुकुरु स्वाहा। ॐ आदित्याय नमः स्वाहा। ॐ सोमाय नमः स्वाहा। ॐ अङ्गारकाय नमः स्वाहा। ॐ बुधाय नमः स्वाहा। ॐ वृहस्पतये नमः स्वाहा। ॐ शुक्राय नमः स्वाहा। ॐ शनैश्चराय नमः स्वाहा। ॐ राहवे नमः स्वाहा। ॐ केतवे नमः स्वाहा। ॐ श्लेषाय नमः स्वाहा।

ॐ दुर्गे महाशान्तिकपतङ्ग भूतप्रेतपिशाचराक्षस ब्रह्मराक्षससर्ववेतालसर्ववृश्चिक भयविनाशनाय स्वाहा। ॐ नमो भगवते रुद्राय स्वाहा। ॐ ह्रां ह्रीं ह्रूं ह्रें ह्रैं ह्रों ह्रौं ह्रं ह्रः हूं फट् स्वाहा। ॐ क्रां क्रीं क्रूं क्रें क्रैं क्रों क्रौं क्रं क्रः स्वाहा। ॐ शिं शिवाय नमः स्वाहा। ॐ सूं सूर्याय नमः स्वाहा। ॐ सों सोमाय नमः स्वाहा। ॐ मं मङ्गलाय नमः स्वाहा। ॐ बुं बुधाय नमः स्वाहा। ॐ वृं वृहस्पतये नमः स्वाहा। ॐ शुं शुक्राय नमः स्वाहा। ॐ शं शनैश्चराय नमः स्वाहा। ॐ रां राहवे नमः स्वाहा। ॐ कें केतवे नमः स्वाहा। ॐ महाशान्तिकभूतप्रेतपिशाच राक्षसब्रह्मराक्षससर्ववेतालसर्व वृश्चिकभयविनाशनाय स्वाहा। ॐ नमो भगवते रुद्राय स्वाहा। ॐ नमो भैरवाय स्वाहा। ॐ नमो गणेशाय स्वाहा। ॐ नमो दुर्गायै स्वाहा। ॐ सिं सिंह शार्दूल गजेन्द्रग्रहसर्व व्याघ्रादि मृगादि बध्नामि नमः स्वाहा। ॐ बां बाहुं बध्नामि नमः स्वाहा। ॐ नें नेत्रं बध्नामि नमः स्वाहा। ॐ श्रों श्रोत्रं बध्नामि नमः स्वाहा। ॐ पां पादं बध्नामि नमः स्वाहा। ॐ आं आंसां बध्नामि नमः स्वाहा। ॐ सं सर्वं नमः स्वाहा। ॐ बं बन्धनं कुरु कुरु स्वाहा। ॐ शतयोजन विस्तीर्णं रुद्रो वदति मण्डलम्। तद् बन्धनं कुरु कुरु स्वाहा। ॐ नमो भगवते रुद्राय स्वाहा। ॐ नमो भैरवाय स्वाहा। ॐ नमो गणेश्वराय स्वाहा। ॐ नमो दुर्गायै स्वाहा। ॐ भूतपिशाचान्, असुरग्रहान्, डाकिनीग्रहान्, अपस्मारग्रहान्, कामलकग्रहान्, भूतग्रहान्, प्रेतग्रहान्, कस्मलग्रहान्, अतिविश्वासग्रहान्,नाशय नाशय स्वाहा। ॐ ग्लां ग्लीं ग्लूं ग्लें ग्लैं ग्लों ग्लौं ग्लं ग्लः गणपतये स्वाहा। ॐ क्षां क्षीं क्षूं क्षें क्षैं क्षों क्षौं क्षं क्षः क्षेत्रपालाय स्वाहा। ॐ स्त्रां स्त्रीं स्त्रूं स्त्रें स्त्रैं स्त्रों स्त्रौं स्त्रं स्त्रः सूर्याय स्वाहा। ॐ गं गन्धर्वाय स्वाहा। ॐ यं यक्षाय स्वाहा। ॐ ह्रीं तक्षकआस्तीक कर्कोटक द्रावलिक शङ्खपद्मक कुलिक महाशङ्खचूड़ वासुकिनागकुले श्रीं श्रीं ल्वौं ह्रौं हूं फट् स्वाहा। ॐ ऐं ह्रीं हनुमते रामदूताय लङ्काविध्वंसनाय अञ्जनीगर्भसम्भूताय त्रीन्त्रिंशत्शाकिनीसायशाकिनी डाकिनीयक्षिणीविध्वंसनाय भूतप्रेतपिशाचमर्दनाय, किलि किलि, वुवुकारेण विभीषणे, रक्षेशाय, ह्रीं श्रीं ग्लौं ह्रौं हूं फट् स्वाहा। ॐ नमो हनुमते महाबलपराक्रमाय, मम परस्य च चतुर्वर्णभूतप्रेतपिशाचशाकिनी डाकिनीयक्षिणीपूतनामारिकामहामारी कृत्यायक्षराक्षसभैरवीं, वेतालग्रहब्रह्मग्रहराक्षसआदित्यान् कुवा वीक्षणेन हन हन, जृम्भय जृम्भय, निराशय निराशय, वारय वारय, बन्धय बन्धय, नुद नुद, धुन धुन, मां रक्ष रक्ष, महामाहेश्वर, रुद्रावताराय हां हां हां, घें घें घें हूं फट् स्वाहा। ॐ ऐं श्रीं ह्रां ह्रीं हूं स्फ्रें, ह्स्त्रौं हस्फ्रें ह्सों द्रों ॐ हनुमते मम क्षयकुष्ठगण्डमालास्फोटक क्षतज्वरएकाहिकं द्व्याहिकं त्र्याहिकं चातुर्थिकं सम्भवज्वर, सान्निपातिकज्वर, भूतज्वर, मन्त्रज्वर, शूलभगन्दरमूत्र कृच्छ्रकपालकर्णशूल, अक्षिशूलउदरशूल, हस्तशूल, पादशूलार्दितसर्वान् व्याधीन् क्षणेन भिन्धि भिन्धि, छिन्धि छिन्धि, नाशय नाशय, निष्कृन्तय निष्कृन्तय, छेदय छेदय, भेदय भेदय वीर हनुमान! ह्रां ह्रां हूं हूं घें घें ह्रीं ह्रीं हूं हूं फट् स्वाहा।

ॐ ऐं ह्रीं क्रां क्रौं सुग्रीवाय वानरराजाधिराजाय किलि वुवुकारेण, हिलिहिलि, मिलिमिलि, शाकिनी

डाकिनी यक्षिणी भूतप्रेतपिशाचान् प्रणाशय प्रणाशय, सुग्रीव वीर! छिन्धि छिन्धि भिन्धि भिन्धि, सिन्धि सिन्धि, त्रोटय त्रोटय, त्राटय त्राटय, सर्वग्रहान् हन हन, पच पच, आग्रय आग्रय। ॐ ऐं ह्रीं ह्रीं क्रीं हों भूं स्भूं हूं हूं फट् स्वाहा। ॐ ऐं ह्रीं क्लीं ऐं सकलेश्वरि, सुरासुरवन्दिते, श्रीत्रिपुरे! ऐं ह्रों क्रूं क्रूं हूं फट् स्वाहा। ॐ रक्तचामुण्डे, नरकपाले उल्कोपरि परिवारे श्मशानप्रिये! सर्वसकलभक्षरुधिरमांसभोजनप्रिये! सिद्धविद्याधरवन्दितचरणे! असुरासुरगणसेविते! दहनपुरन्दरे! विष्णुस्तुते! विश्वेश्वरि, पूजिते, त्रैलोक्यादिआधारमूले! विश्वजननि, आनन्दस्वरूपिणि, विश्वसृष्टिस्वरूपे, महाविद्ये! भैरवरूपिणि, स्वर्गमृत्युपातालविनाशिनि, कल्पे, रुद्रकुक्षि, विनिर्गतशरीरे, षोडशकलापरिपूर्णे, दानवस्वरूपेण दशदिशि इन्द्रउच्छिन्दे। ऐं ह्रीं अस्मिन् मण्डले प्रवेशय प्रवेशय, शत्रुमुखं स्तम्भय स्तम्भय, अन्य भूतं भक्षय भक्षय, अरिसैन्यं विध्वंसय विध्वंसय, ब्रह्म राक्षसान् उत्सादय उत्सादय, परविद्यां निवारय निवारय, कुयन्त्रं भञ्जय भञ्जय, ज्वरं नाशय नाशय, विषं निर्विषं कुरु कुरु, परसङ्कटं दह दह, पच पच, मथ मथ, मर्दय मर्दय, सर्वदुष्टजनं भक्षय भक्षय, मम मनोरथान् पूरय पूरय, अतीतानां गतवार्त्ता वर्तमानं कथय कथय, ऐं ह्रीं छिन्धि छिन्धि, भिन्धि भिन्धि, सिन्धि सिन्धि, त्रोटय त्रोटय, सर्वग्रहान् शक्तिशत्रून् भस्मी कुरु कुरु, इन्द्रवज्रेण, ब्रह्मपातेन, बन्ध बन्ध, रुद्रशालेन छेदय छेदय, ऐं ह्रीं श्रीं क्लीं ह्रों ह्रौं क्रों क्रौं ग्लौं स्वौं श्रीं हूं फट् स्वाहा। ॐ हरिभ्यां नमः स्वाहा। !

ॐ ह्रां ह्रीं हूं हें हैं ह्रीं ह्रौं हं हः हूं फट् स्वाहा। ॐ क्रां क्रीं क्रूं क्रें क्रैं क्रों क्रौं क्रं क्रः स्वाहा। ॐ नमो भगवते रुद्राय स्वाहा। ॐ नमो भैरवाय स्वाहा। ॐ नमो गणेश्वराय स्वाहा। ॐ नमो दुर्गायै स्वाहा। ॐ गन्धाय नमः स्वाहा । ॐ गन्धपादाय नमः स्वाहा। ॐ पञ्चोत्तर शतकोटिसहस्त्रगजान् बन्ध बन्ध, शान्तिं कुरु कुरु, भूतप्रेतपिशाचशाकिनीडाकिनी यक्षिणी कूष्माण्डवासिनी चातुर्थिकचौरराजा दुष्टपुरुषादीन् तेषां दिशां बध्नामि, पातालं बध्नामि, अन्तरिक्षं बध्नामि, घ्राणं बध्नामि, भ्रू बध्नामि, श्रोत्रं बध्नामि, मुखं बध्नामि, वाचं बध्नामि, जिह्वां बध्नामि, शब्दं बध्नामि, हृदयं बध्नामि, पञ्चाशत्कोटि सहस्त्रानन्तयोजनविस्तीर्णो रुद्रो वदति मण्डलं। तस्य श्रीरुद्रमण्डलं बन्ध बन्ध, रक्ष रक्ष, माचल माचल, माक्रम्य माक्रम्य स्वाहा।

त्रिदश मणि मुकुट कोटि निघृष्ट चरणारविन्दे। गायत्रि सावित्रि सरस्वति महासन्ध्ये महाबाण कृताभरणे॥ भैरव रूप धारिणि। प्रकट सुदंष्ट्रोग्रवदने। घोरे घोरासने नयनोज्वल ज्वाल सहस्त्र परिवृत्ते। महाट्टहास धवलीकृत दिगन्तरे। दिवाकर सहस्त्र परिवृत्ते। कामरूप धारिणि। महामणिद्योतित शशिप्रभा भासित सकलदिगन्तरे। सर्वायुध परिपूर्णे। कपाल हस्ते । गजगामिन्यौतरिण्ये। भूत वेताल परिवृत्ते प्रकम्पित चराचरे। मधुकैटभ महिषासुर धूम्रलोचन चण्ड मुण्ड रक्तबीज निशुम्भ शुम्भादि दैत्यनिष्कण्टिके कालरात्रि महामाये। शिवे नित्ये। त्रिभुवन धराधरे। वाम ज्येष्ठे वरदे रौद्रयम्बिके। कालिकल विकारिणि। बल प्रमथिनि सर्वभूतदमनि। मनोन्मय्या धारिणि। ब्राह्मि माहेश्वरि कौमारि वैष्णवि। वाराहि नारसिंहीन्द्राणि। चामुण्डे। माहेन्द्रि शिवदूति महाकाली महालक्ष्मी महासरस्वतीतित्रिस्थिते। ॥ नाद मध्ये स्थिते। महोग्रविषो रगफणा मणि मुकुट रत्न ज्वालावलिते महाहिहार भूषित पाद बाहु कण्ठोत्तमांगे। माला कुले। नवरत्ननिधि कोशे। शब्द स्पर्श रूप रस गन्धाकाशवाक् पाणि पाद पायूपस्थ श्रोत्रत्वक् चक्षु जिह्वा। घ्राण मध्यस्थिते। चक्षुष्मति। महाविषोपविघ्ने। महाज्वालानले। महाभैरवस्तुते। सर्व सिद्धिप्रदे। निर्मले निष्कले नाभ्या धारादि संस्थिते। पर ज्योतिः स्वरूपे॥ सोम सूर्याग्नि मण्डल परिवृत्ते ऊद्‌र्ध्व विशुद्धान्तक प्रभे विनिगर्त ब्रह्म विष्णु रुद्र दैवते। परे अपरे। प्रभाभासित चराचरे। पंचविंशति तत्वावबोधिनि महाशून्यागमे। पतिबन्धु संस्थिते अधऊद्‌र्ध्व संस्थिते। भुक्ति मुक्तिप्रदे। निर्गुणे। ॠग्यजुः सामाथर्वणि पठिते। एह्योहि भगवति। स्थूल सूक्ष्मपरे हुँकार निरुपिते। परमकारुणिके। महाज्वालामणे महिषोपरिस्थिते गन्धर्व विद्या-धरार्च्यिते। भुजङ्गमहिमे। जृम्भिणि क्षोभिणि। वशीकरणि। जृम्भे। मोहे। क्षोभे। बीजपञ्चक मध्यस्थिते। महायोगिनि। महाज्वर क्षेत्र नायिके। यक्ष राक्षस महाज्वर क्षेत्र विषोप विघ्ने। गन्धर्व विद्याधराराधिते। ओंकार श्रीङ्कारहस्ते आंक्रींमग्नि पात्रे। द्रां शोषय शोषय। प्लुं प्लावय प्लावय। क्लीं ब्रीं सुकुमारय सुकुमारय। प्लुं शांतय शांतय। सीमुन्मादयोन्मादय ग्लौं मोहय मोहय। ह्रीं मां ह्रीं मावेशयावेशय। श्रीं प्रवेशय प्रवेशय। स्त्रीं कर्षय कर्षय। हुं हुं हुं फट् अतीतानागत वर्तमानान्दिशं विदिशम्। ऐं ह्रीं श्रीं श्रावय श्रावय। सर्वं प्रवेशय प्रवेशय। त्रैलोक्यंवशवर्ति। ऐं कांरवशीकुरुष्व। ऐं ह्रीं स्त्रीं द्रावय द्राबय। सर्वं प्रवेशय प्रवेशय। ऐंकारचित्तांवशं कुरु कुरु । ऐं ह्रीं श्रीं हां हीं हूं हैं हौं हः। ऐं ह्रीं श्रीं स्त्रां स्त्रीं स्त्रूं स्त्रैं स्त्रौं स्त्रः। मम सर्वकार्य्याणि साधय साधय हुं फट् स्वाहा। एक विंशति वारन्तु पठेदेवं जपेतु वा राजद्वारे स्मशाने च विदेशे शुत्रु मण्डले ॥१॥ भूताग्नि रणमध्ये च सर्वकार्याणि साधयेत्। चण्डिका हृदयं गुह्यं त्रिसन्ध्ये कीर्तयेद् द्विजः ॥२॥ सर्वकामप्रदं नृणां भुक्तिं मुक्तिं च विन्दन्ति।

॥ इति श्रीरुद्रयामले सप्तशती हृदयं सम्पूर्णम् ॥

॥ अथ दुर्गास्तवः ॥

उक्तं च हरिवंशे ।

॥ वैशम्पायन उवाच ॥

आर्यास्तवं प्रवक्ष्यामि यथोक्तमृषिभिः पुरा । नारायणीं नमस्यामि देवीं त्रिभुवनेश्वरीम् ॥१॥
त्वं हि सिद्धिर्धृतिर्मेधा श्रीर्विद्या सन्नतिर्मतिः । संध्या रात्रिः प्रभा निद्रा कालरात्रिस्तथैव च ॥२॥
आर्या कात्यायनी देवी कौशिकी ब्रह्मचारिणी । जननी सिद्धसेनानीरुग्रचारिमहातपाः ॥३॥
जया च विजया चैव पुष्टिश्च त्वं क्षमा दया । ज्येष्ठा यमस्य भगिनी नीलकौशेयवासिनी ॥४॥
बहुरूपा विरूपा च अनेकविधचारिणी । विरूपाक्षी विशालाक्षी भक्तानां परिरक्षिणी ॥५॥
पर्वताग्रेषु घोरेषु नदीषु च गृहेषु च । वासस्तव महादेवि वनेषूपवनेषु च ॥६॥
शबरैर्बर्बरैश्चैव पुलिंदैरभिपूजिता । मयूरपक्षध्वजिनी लोकान्क्रमसि सर्वशः ॥७॥
कुक्कुटैश्छागलैर्मेषैः सिंहैर्व्याघ्रैः समाकुला । घंटानिनादबहुला विश्रुता विंध्यवासिनी ॥८॥
शूलिनी पट्टिशयुता सूर्यचन्द्रपताकिनी । नवमी कृष्णपक्षस्य शुक्लस्यैकादशी तथा ॥९॥
भगिनी बलदेवस्य रजनी कलहप्रिया । आवासः सर्वभूतानां निष्ठा च परमा गतिः ॥१०॥
नंदगोपसुता चैव देवानां विजयावहा । चीरवासा सुवासाश्च रात्रिः संध्या त्वमेव च ॥११॥
प्रकीर्णकेशी मृत्युश्च तथा मांसौदनप्रिया । लक्ष्मीरलक्ष्मरूपेण दानवानां वधाय च ॥१२॥
सावित्री चैव वेदानां माता मंत्रगणस्य च । अंतर्वेदी च यज्ञानामृत्विजश्चैव दक्षिणा ॥१३॥
सिद्धिः सांयात्रिकाणां तु वेला त्वं सागरस्य च । यक्षाणां प्रथमा यक्षी नागानां सुरसेति च ॥१४॥
कन्यानां ब्रह्मचर्या त्वं सौभाग्यं प्रमदासु च । ब्रह्मचारिण्यथो दीक्षा शोभा च परमा तथा ॥१५॥
ज्योतिषां त्वं प्रभा देवि नक्षत्राणां च रोहिणी । राजद्वारेषु तीर्थेषु नदीनां संगमेषु च ॥१६॥
पूर्णा च पूर्णिमा चंद्रे कृत्तिवासा इति स्मृता । सरस्वती च वाल्मीकेः स्मृतिर्द्वैपायनस्य च ॥१७॥
कर्षकाणां च सीतेति भूतानां धरणिस्तथा । ऋषीगां धर्मबुद्धिस्तु देवानां मानसी तथा ॥१८॥
सुरादेवीति भूतेषु स्तूयसे त्वं स्वकर्मभिः । इन्द्रस्य चारुदृष्टिस्त्वं सहस्रनयनेति च ॥१९॥
तापसानां च देवि त्वमरणिश्चाग्निहोत्रिणाम् । क्षुधा च सर्वभूतानां तृप्तिस्त्वं दैवतेषु च ॥२०॥
स्वाहा तृप्तिर्धृतिर्मेधा वसूनां त्वं वसूमती । आशा च मानुषाणां तु तुष्टिश्च कृतकर्मणाम् ॥२१॥
दिशश्च विदिशश्चैव तथा ह्यग्निशिखा प्रभा । शकुनी पूतना च त्वं रेवती वसुदारुणा ॥२२॥
निद्रा च सर्वभूतानां मोहिनी क्षत्रिया तथा । विद्यानां ब्रह्मविद्या च त्वमोंकारो वषट् तथा ॥२३॥
नारीणां पार्वती च त्वं पौराणीमृषयो विदुः । अरुंधत्येकभर्त्रीणां प्रजापतिवचो यथा ॥२४॥
पर्यायनामभिर्दिव्यैरिंद्राणी चेति विश्रुता । त्वया व्याप्तमिदं सर्वं जगत्स्थावरजंगमम् ॥२५॥
संग्रामेषु च सर्वेषु अग्निप्रज्वलितेषु च । नदीतीरेषु चोरेषु कांतारेषु भयेषु च ।
प्रवासे राजबंधे च शत्रूणां च प्रदर्शने ॥२६॥

प्रयाणाद्येषु सर्वेषु त्वं हि रक्षा न संशयः । त्वयि मे हृदयं देवि त्वयि चित्तं मनस्त्वयि ॥२७॥
रक्ष मां सर्वपापेभ्यः प्रसादं कर्तुमर्हसि । इमं तव स्तवं दिव्यमिति व्यासप्रकल्पितम् ॥२८॥
यः पठेत्प्रातरुत्थाय शुचिः प्रयतमानसः । त्रिभिर्मासैः कांक्षितं च फलं वै संप्रयच्छसि ॥२९॥
षड्भिर्मासैर्वरिष्ठं तु वरमेकं प्रयच्छसि । अर्चिता नवभिर्मासैर्दिव्यं चक्षुः प्रयच्छसि ॥३०॥
संवत्सरेण सिद्धिं तु यथाकामं प्रयच्छसि । सत्यं ब्रह्म च दैवं च द्वैपायनवचो यथा ॥३१॥
नृणां बंधं वधं घोरं पुत्रनाशं धनक्षयम् । व्याधिं मृत्युभयं चैव पुजिता शमयिष्यसि ॥३२॥
भविष्यसि महाभागे वरदा कामरूपिणी । मोहयित्वा च तं कंसमेका त्वं भोक्ष्यसे जगत् ॥३३॥
अहमप्यात्मनो वृतिं विधास्ये गोषु गोपवत् । स्ववृद्ध्यर्थमहं चैव करिष्ये कंसगोपनम् ॥३४॥
एवं तु स समादिश्य गतोंऽतर्धानमीश्वरः । सा चापि तं नमस्कृत्य तथास्त्विवति विनिश्चिता ॥३५॥

॥ इति श्रीहरिवंशोक्तः श्रीआर्य्यास्तवः समाप्तः ॥

॥ श्री दुर्गास्तोत्रम् ॥

उक्तं च ब्रह्मवैवर्तपुराणे प्रकृतिखंडे अंतिमेऽध्याये ।

पुरा स्तुता सा गोलोके कृष्णेन परमात्मना । संपूज्य मधुमांसेन प्रीतेन रासमंडले ॥१॥
मधुकैटभयोर्युद्धे द्वितीये विष्णुना पुरा । तत्रैव काले सा दुर्गा ब्रह्मणः प्राणसंकटे ॥२॥
चतुर्थे संस्तुता देवी भक्ता च त्रिपुरारिणा । पुरा त्रिपुरयुद्धे च महाघोरतरे रणे ॥३॥
पंचमे संस्तुता देवी वृत्रासुरवधे तथा । शक्रेण सर्वैर्देवैश्च घोरे च प्राणसंकटे ॥४॥
तदा मुनींद्रैर्मुनिभिर्मानवैः सुरथादिभिः । संस्तुता पूजिता सा च कल्पे कल्पे परात्परा ॥५॥
स्तोत्रं च श्रूयतां ब्रह्मन्सर्वविघ्नविनाशनम् । सुखदं मोक्षदं सारं भवाब्धेः पारकारकम् ॥६॥

॥ श्रीकृष्ण उवाच ॥

त्वमेव सर्वजननी मूलप्रकृतिरीश्वरी । त्वमेवाद्या सृष्टिविधौ स्वेच्छया त्रिगुणात्मिका ॥७॥
कार्यार्थे सगुणा त्वं च वस्तुतो निर्गुणा स्वयम् । परब्रह्मस्वरूपा त्वं सत्या नित्यस्वरूपिणी ॥८॥
निजस्वरूपा परमा भक्तानुग्रहविग्रहा । सर्वस्वरूपा शर्वाणी सर्वाधारा परात्परा ॥९॥
सर्वज्ञा सर्वतोभद्रा सर्वमङ्गलमङ्गला । सर्वज्ञानप्रदा देवी सर्वज्ञा सर्वभाविनी ॥१०॥
त्वं स्वाहा देवदाने च पितृदाने स्वधा स्वयम् । दक्षिणा सर्वदाने च सर्वकर्मणि संततम् ॥११॥
निद्रा त्वं च दया त्वं च तृष्णा त्वं चात्मनश्च मे । तत्क्षांतिः शांतिरीशा च कांतिस्तुष्टिश्च शाश्वती ॥१२॥
श्रद्धा पुष्टिश्च तंद्रा च लज्जा शोभा प्रभा सदा । सतां संपत्स्वरूपा श्रीर्विपत्तिरसतामिह ॥१३॥
प्रीतिरूपा पुण्यवतां पापिनां कलहांकुरा । शश्वत्कर्ममयी शक्तिः सर्वदा सर्वजीविनाम् ॥१४॥
देवेभ्यः संपदां दात्री धातुर्धात्री कृपामयी । कुलायः सर्वदेवानां सर्वासुरविनाशिनी ॥१५॥
योगनिद्रा योगरूपा योगदात्री च योगिनाम् । माहेश्वरी च ब्रह्माणी विष्णुमाया च वैष्णवी ॥१६॥

भद्रदा भद्रकाली च सर्वलोकभयंकरी । ग्रामे ग्रामे ग्रामदेवी गृहदेवी गृहे गृहे ॥१७॥
महायुद्धे महामारी दुष्टसंहाररूपिणी । रक्षास्वरूपा शिष्टानां मातेव हितकारिणी ॥१८॥
ब्राह्मण्यरूपा विप्राणां तपस्या च तपस्विनाम् । विद्या विद्यावतां त्वं च बुद्धिर्बुद्धिमतां सती ॥१९॥
मेधा स्मृतिस्वरूपा च प्रतिभा प्रतिभावताम् । राज्ञां प्रतापरूपा च विशां वा विट्स्वरूपिणी ॥२०॥
इत्यात्मना कृतं स्तोत्रं दुर्गायाः स्वर्गकारणम् । पूजाकाले पठेद्यो हि सिद्धं तद्वाञ्छितं भवेत् ॥२१॥
वंध्या वा काकवंध्या वा मृतवत्सा च दुर्भगा । श्रुत्वा स्तोत्रं वर्षमेकं सुपुत्रं लभते ध्रुवम् ॥२२॥
कारागारे महाघोरे यो बद्धो दृढबंधने । श्रुत्वा स्तोत्रं मासमेकं बन्धनान्मुच्यते ध्रुवम् ॥२३॥
यक्ष्मग्रस्तो गलत्कुष्ठी महाशूली महाज्वरी । श्रुत्वा स्तोत्रं वर्षमेकं सद्यो रोगात्प्रमुच्यते ॥२४॥
राजद्वारे श्मशाने च महारण्ये रणस्थले । हिंस्रजंतुसमीपे तु श्रुत्वा स्तोत्रं प्रमुच्यते ॥२५॥
महादरिद्रो मूर्खश्च वर्षं स्तोत्रं पठेत्तु यः । विद्यावान्धनवांश्चैव स भवेन्नात्र संशयः ॥२६॥

॥ इति श्रीब्रह्मवैवर्तांतर्गतप्रकृतिखंडोक्तं दुर्गास्तोत्रं समाप्तम् ।

॥ श्रीदुर्गाष्टाक्षर स्तोत्रम् ॥

उक्तं च देवीरहस्यतन्त्रे पंचाशत्तमे पटले ।

॥ भैरव उवाच ॥

अधुना देवि वक्ष्यामि दुर्गास्तोत्रं मनोहरम् । मूलमन्त्रमयं दिव्यं सर्वसारस्वतप्रदम् ॥१॥
दुर्गार्तिशमनं पुण्यं साधकानां जयप्रदम् । दुर्गाया अंगभूतं तु स्तोत्रराजं परात्परम् ॥२॥

विनियोगः – ॐ अस्य श्रीदुर्गास्तोत्रराजस्य महेश्वर ऋषिः । अनुष्टुप्छन्दः । श्रीदुर्गाष्टाक्षरात्मिका देवता । दुं बीजम् । पराशक्तिः । नमः कीलकम् । धर्मार्थकाममोक्षार्थे दुर्गास्तोत्रपाठे विनियोगः ।

ऋष्यादिन्यास :– ॐ महेश्वर ऋषये नमः शिरसि । अनुष्टुप्छन्दसे नमो मुखे । श्रीदुर्गाष्टाक्षरात्मिका देवतायै नम हृदि । दुं बीजाय नमो नाभौ । ह्रीं शक्तये नमो गुह्ये । नमः कीलकाय नमः पादयोः । विनियोगाय नमः सर्वाङ्गे । इति ऋष्यादिन्यासः ।

ध्यानं कुर्यात्–

दूर्वानिभां त्रिनयनां विलसत्किरीटां शंखाब्जखड्गशर खेटकशूलचापान् ।
संतर्जनीं च दधतीं महिषासनस्थां दुर्गां नवारकुलपीठगतां भजेऽहम् ॥३॥

तारं हारं मंत्रमालां सुबीजं ध्यायेदंतर्यो बलं बालकांतः ।
तस्य स्मारंस्मारमंघ्रिद्वयीं द्राग्रंभा याति स्वर्गतः कामवश्या ॥४॥

मायां जपेद्यस्तव मंत्रमध्येदुर्गे सदादुर्गतिखेदखिन्नः ॥
भवेत्स भूमौ नृपमौलिमालामाणिक्य निर्घृष्ट पदारविंदः ॥५॥

चाक्रिकं यदि जपेत्तवांबिके चक्रमध्यगत ईश्वरेश्वरि ।

साधको भवति चक्रवर्तिनां नायको नयविलासकोविदः ॥६॥
चक्रिबीजमपरं स्मरेच्छिवे योऽरिवर्गविहिताहितव्यथः ।
आजिमंडलगतो जयेद्रिपून्वाजिवारणरथाश्रितो नरः ॥७॥
दूर्वाबीजं यो जपेत्प्रेतभूमौ सायं मायाभस्मनालिप्तकायः ।
गीर्वाणानां नायको देव मंत्री मुक्त्वा राज्यं प्राज्यमाद्यं करोति ॥८॥
वायव्यबीजं यदि साधको जपेत्प्रियाकुचद्वंद्वविमर्द्दनक्षमः ।
समस्तकांताजननेत्रवागुरा विलासहंसो भविता स पार्वति ॥९॥
विश्वं विश्वेश्वरि यदि जपेत्कामवेलाकलार्तो रात्रौ मात्राक्षरविलसितन्यास ईशानि मातः ।
तस्य स्मेराननसरसिजभ्राजमानांग लक्ष्मीर्वश्याऽवश्यं सुरपुरवधूमौलिमालोर्वशी स्यात् ॥१०॥
भूगेहांचितसत्रिवृत्तविलसन्नागारवृत्तां चितव्यग्रारोल्लासिता -
ऽग्निकोणविलसच्छ्री बिंदुपीठस्थिताम् ।
ध्यायेच्चेतसि शर्वपत्नि भवतीं
माध्वीरसाघूर्णितां यो मंत्री स भविष्यति स्मरसमः स्त्रीणां धरण्यां दिवि ॥११॥
दुर्गास्तवं मनुमयं मनुराजमौलिमाणिक्यमुत्तमशिवांगरहस्यभूतम् ।
प्रातः पठेद्यदि जपावसरेऽर्चनायां भूमौ भवेत्स नृपतिर्दिवि देवनाथः ॥१२॥
इति स्तोत्रं महापुण्यं पंचांगैकशिरोमणिम् । यः पठेदर्धरात्रे तु तस्य वश्यं जगत्त्रयम् ॥१३॥

॥ इति श्रीदेवीरहस्यतंत्रोक्तं श्रीदुर्गाष्टाक्षरस्तोत्रं समाप्तम् ॥

॥ अथ श्री गर्भचण्डी ॥

(गौड मतेन लघुचण्डी पाठक्रमः)

तंत्रसाधना के अनुसार बीजाक्षरों का संपुट लोम- विलोम लगता है

॥ गर्भकवचम् ॥

ॐ ऐं ह्रीं क्लीं नमः शूलेन पाहिनो देवि पाहि खड्गेन चाम्बिके । घण्टास्वनेन नः पाहि चापज्या निःस्वनेन च । मः न क्लीं ह्रीं ऐं ॐ ॥१॥ ॐ ऐं ह्रीं क्लीं नमः प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे । भ्रामेणनात्मशूलस्य उत्तरस्यां तथेश्वरि । मः न क्लीं ह्रीं ऐं ॐ ॥२॥ ॐ ऐं ह्रीं क्लीं नमः सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते । यानि चात्यर्थघोराणि तै रक्षास्मांस्तथा भुवम् । मः न क्लीं ह्रीं ऐं ॐ ॥३॥ ॐ ऐं ह्रीं क्लीं नमः खड्गशूलगदादीनि यानि चास्त्राणि तेऽम्बिके । करपल्लव सङ्गीनि तैरस्मान् रक्ष सर्वतः । मः न क्लीं ह्रीं ऐं ॐ ॥४॥

॥ गर्भऽर्गला ॥

ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः ॐ एतत् ते वदनं सौम्यं लोचनत्रय भूषितम् ।
पातु नः सर्वभूतेभ्यः कात्यायनि नमोस्तुते । मः न च्चेवि यैडामुंचा क्लीं ह्रीं ऐं ॐ ॥१॥

ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः। ज्वालाकराल मृत्युग्रमशेषासुर सूदनम् ।
त्रिशूलं पातु नो भीतेर्भद्रकालि नमोऽस्तुते । मः न च्चेवि यैडामुंचा क्लीं ह्रीं ऐं ॐ ॥२॥
ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः हिनस्ति दैत्यतेजांसि स्वनेनापूर्य या जगत् ।
सा घण्टा पातु नो देवि पापेभ्यो नः सुतानिव मः न च्चेवि यैडामुंचा क्लीं ह्रीं ऐं ॐ ॥३॥
ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः असुरास्रग् वसापङ्कचर्चितस्ते करोज्वलः ।
शुभाय खड्गो भवतु चण्डिके त्वां नता वयम्। मः न च्चेवि यैडामुंचा क्लीं ह्रीं ऐं ॐ ॥४॥

॥ गर्भशाप विमोचनमुत्कीलनं च ॥

मूलमन्त्र से विन्यास, ध्यान व मानसोपचार से पूजन करें। मूल मन्त्रं - **ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे क्लीं ह्रीं ऐं ॐ नमः स्वाहा** का यथाशक्ति जाप करें समर्पण पश्चात् उत्कीलन करें यथा -

ॐ ह्रीं श्रीं क्लीं चण्डि सकलमन्त्राणां शापविमोचनं कुरु कुरु स्वाहा। तीन बार जपें। **ॐ श्रीं ह्रीं क्लीं चण्डि सप्तशतिके सर्वमन्त्राणां उत्कीलनं कुरु कुरु स्वाहा।** तीन बार जपें।

॥ गर्भरात्रि सूक्तम् ॥

ॐ ऐं ह्रीं क्लीं नमः ब्रह्मोवाच मः न क्लीं ह्रीं ऐं ॐ ॥१॥ ॐ ऐं ह्रीं क्लीं नमः त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कारः स्वरात्मिका। सुधा त्वमक्षरे नित्ये त्रिधा मात्रात्मिका स्थिता मः न क्लीं ह्रीं ऐं ॐ ॥२॥ ॐ ऐं ह्रीं क्लीं नमः अर्द्धमात्रास्थिता नित्या यानुच्चार्या विशेषतः। त्वमेव सन्ध्या सावित्री त्वं देवि जननी परा॥ मः न क्लीं ह्रीं ऐं ॐ ॥३॥

॥ अथ गर्भचण्डी ॥

विनियोग :- **ॐ अस्य श्री गर्भचण्डीमाला मन्त्रस्य श्रीब्रह्मा विष्णु महेश्वरादि ऋषयः। गायत्र्युष्णिगनुष्टुप् छंदांसि। श्रीशक्तिस्वरूपिणी महाचण्डी देवता। ऐं बीजं। ह्रीं कीलकं। क्लीं शक्तिः। मम चतुर्विध पुरुषार्थ सिद्ध्यर्थे जपे विनियोगः।**

ऋष्यादिन्यास :- **ॐ अस्य श्री गर्भचण्डीमाला मन्त्रस्य श्रीब्रह्मा विष्णु महेश्वरादि ऋषिभ्यो नमः शिरसि। गायत्र्युष्णिगनुष्टुप् छंदोभ्यो नमः मुखे। श्रीशक्तिस्वरूपिणी महाचण्डी देवतायै नमः हृदि। ऐं बीजाय नमः गुह्ये। क्लीं शक्तये नमः पादयोः। ह्रीं कीलकाय नमः नाभौ। मम चतुर्विध पुरुषार्थ सिद्ध्यर्थे जपे विनियोगाय नमः सर्वाङ्गे।**

षडङ्गन्यास	करन्यास	अङ्गन्यास
ॐ ह्रां	अंगुष्ठाभ्यां नमः।	हृदयाय नमः।
ॐ ह्रीं	तर्जनीभ्यां नमः।	शिरसे स्वाहा ।
ॐ ह्रूं	मध्यमाभ्यां नमः।	शिखायै वषट्।
ॐ ह्रैं	अनामिकाभ्यां नमः	कवचाय हुम्।
ॐ ह्रौं	कनिष्ठिकाभ्यां नमः	नेत्रत्रयाय वौषट्।
ॐ ह्रः	करतलकरपृष्ठाभ्यां नमः	अस्त्राय फट्।

॥ ध्यानम् ॥

शुद्ध स्फटिक सङ्काशां रवि विम्बाननां शिवाम् । अनेक शक्तिसंयुक्तां सिंहपृष्ठे निषेदुषीम् ॥
अङ्कुशं चाक्षसूत्रं च पाशपुस्तक धारिणीम् । मुक्ताहार समायुक्तां चण्डीं ध्याये चतुर्भुजाम् ॥
सितेन दर्पणाब्जेन वस्त्रालंकार भूषितम् । जटाकलाप संयुक्तां सुस्तनीं चन्द्रशेखराम् ॥
कटकैः स्वर्ण रत्नाढ्यैर्महावलय शोभिताम् । कम्बुकण्ठीं सु ताम्रोष्ठीं सर्पनूपुरधारिणीम् ॥
केयूर मेखलाद्यैश्च द्योतयंतीं जगत्त्रयम् । एवं ध्याये महाचण्डीं सर्वकामार्थ सिद्धिदाम् ।

चतुष्टयमुद्रा प्रदर्शनम् :- १ पाश, २ अङ्कुश, ३ अक्षसूत्र, ४ पुस्तक मुद्राणि प्रदर्शयेत्।

॥ अथ पाठः॥

ॐ ऐं ह्रीं क्लीं नमः ब्रह्मोवाच मः न क्लीं ह्रीं ऐं ॐ ॥१॥ ॐ ऐं ह्रीं क्लीं नमः यच्च किञ्चित् क्वचिद् वस्तु सदसद् वाखिलात्मिके। तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयसे तदा। मः न क्लीं ह्रीं ऐं ॐ ॥२॥ ॐ श्रीं नमः सम्मानिता ननादोच्चैः साट्टहासं मुहुर्मुहुः। तस्या नादेन घोरेण कृत्स्नमापूरितं नमः। मः न श्रीं ॐ ॥३॥ ॐ श्रीं नमः अर्द्धनिष्क्रान्त एवासौ युध्यमानो महाऽसुरः तया महाऽसिना देव्या शिरश्छित्वा निपातितः॥ मः न श्रीं ॐ ॥४॥ ॐ श्रीं नमः दुर्गे स्मृता हरसि भीतिमशेष जन्तोः स्वस्थैः स्मृता मतिमतीव शुभां ददासि। दारिद्र्य दुःख भय हारिणि का त्वदन्या सर्वोपकार करणाय सदाऽऽर्द्रचित्ता। मः न श्रीं ॐ ॥५॥ ॐ क्लीं नमः इन्द्रियाणामधिष्ठात्री भूतानां चाखिलेषु या। भूतेषु सततं तस्यै व्याप्तिदेव्यै नमो नमः। मः न क्लीं ॐ ॥६॥ ॐ क्लीं नमः इत्युक्तः सोऽभ्यधावत् तामसुरो धूम्रलोचनः। हुङ्कारेणैव तं भस्म सा चकाराम्बिका ततः। मः न क्लीं ॐ ॥७॥ ॐ क्लीं नमः भृकुटी कुटिलात् तस्याः ललाटफलकाद् द्रुतम्। काली कराल वदना विनिष्क्रान्ताऽसि पाशिनी। मः न क्लीं ॐ ॥८॥ ॐ क्लीं नमः ब्रह्मेश गुहविष्णूनां तथेन्द्रस्य च शक्तयः। शरीरेभ्यो विनिष्क्रम्य तद्रूपैश्चण्डिकां ययुः। मः न क्लीं ॐ ॥९॥ ॐ क्लीं नमः अट्टाट्टहासमशिवं शिवदूती चकार ह। तैः शब्दैरसुरास्त्रेसुः शुम्भः कोपं परं ययौ। मः न क्लीं ॐ ॥१०॥ ॐ क्लीं नमः एकैवाहं जगत्यत्र द्वितीया का ममापरा? पश्यैता दुष्ट मय्येव विशन्त्यो मद्विभूतयः। मः न क्लीं ॐ ॥११॥ ॐ क्लीं नमः सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते। भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोस्तु ते। मः न क्लीं ॐ ॥१२॥

ॐ क्लीं नमः देव्युवाच मः न क्लीं ॐ ॥१३॥ ॐ क्लीं नमः सर्वाबाधा विनिर्मुक्तो धनधान्य सुतान्वितः। मनुष्योमत् प्रसादेन भविष्यति न संशयः। मः न क्लींॐ ॥१४॥ ॐ क्लीं नमः यत् प्रार्थ्यते त्वया भूप त्वया च कुलनन्दन। मत्तस्तत् प्राप्यतां सर्वं परितुष्टा ददामि तत्। मः न क्लीं ॐ ॥१५॥

॥ जय जय श्रीमार्कण्डेय पुराणे सावर्णिके मन्वन्तरे देवी माहात्म्ये सत्याः सन्तु मनसः कामाः॥

॥ श्रीगर्भदेवी सूक्तम्॥

ॐ क्लीं नमः नमो देव्यै महादेव्यै शिवायै सततं नमः। नमः प्रकृत्यै भद्रायै नियताः प्रणतः स्मताम्। मः न क्लीं ॐ ॥१॥ ॐ क्लीं नमः रौद्रायै नमो नित्यायै गौर्य्यै धात्र्यै नमो नमः। ज्योत्स्नायै चेन्दुरूपिण्यै सुखायै सततं नमः। मः न क्लीं ॐ ॥२॥ ॐ क्लीं नमः कल्याण्यै प्रणतां वृद्ध्यै सिद्ध्यै कूर्म्यै नमो नमः। नैर्ऋते भूभृतां लक्ष्म्यै शर्वाण्यै ते नमो नमः। मः न क्लीं ॐ ॥३॥ ॐ क्लीं नमः दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै। ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः। मः न क्लीं ॐ ॥४॥ ॐ क्लीं नमः अति सौम्याति रौद्रायै नतास्तस्यै नमो नमः। नमो जगत् प्रतिष्ठायै देव्यै कृत्यै नमो नमः। मः न क्लीं ॐ ॥५॥

॥ गर्भरहस्य त्रयम् ॥

ॐ ह्रीं नमः गुरूपदेशविधिना पूजनीया प्रयत्नतः। मन्त्रोद्धार प्रयत्नेन ज्ञातव्या सा नृपात्मजः। मः न ह्रीं ॐ ॥१॥ ॐ श्रीं नमः प्रदक्षिणां नमस्कारान् कृत्वा मूर्ध्नि कृताञ्जलिः। क्षमापयेज्जगद्धात्रीं मुहुर्मुहुरतन्द्रितः। मः न श्रीं ॐ ॥२॥ ॐ क्लीं नमः जगन्मातुश्चण्डिकाया कीर्तिता कामधेनवः। मेधां प्रज्ञां तथा श्रद्धां धारणां कान्तिमेव च। मः न क्लीं ॐ ॥३॥

॥ गर्भ सूत्र त्रयम् ॥

ॐ ऐं नमः ब्रह्म सरस्वती सूक्तं लक्ष्मीसूक्तं जनार्दनम् ह्रीं ॐ ॥ इस मन्त्र के एक लाख जप करें तथा सिद्ध करें। श्रीं श्रीं श्रीं ॐ नमः।

॥ इति श्रीगर्भचण्डी सम्पूर्णम् ॥

॥ अथ रुद्रचंडी पाठः ॥

उक्तं च रुद्रयामले।

॥ श्रीशंकर उवाच ॥

चंडिकाहृदयं न्यस्य शरणं यः करोत्यपि।
अनंतफलमाप्नोति देवीचंडीप्रसादतः।
घोरचंडी महाचण्डी चंडमुडविखंडिनी ॥१॥
चतुर्वक्त्रा महावीर्य्या महादेवविभूषिता।
रक्तदंता वरारोहा महिषासुरमर्दिनी।
तारिणी जननी दुर्गा चंडिका चंडविक्रमा ॥२॥
गुह्यकाली जगद्धात्री चंडी च यामलोद्भवा। श्मशानवासिनी देवी घोरचंडी भयानका ॥३॥
शिवा घोरा रुद्रचंडी महेशी गणभूषिता। जाह्नवी परमा कृष्णा महात्रिपुरसुंदरी ॥४॥
श्रीविद्या परमाविद्या चंडिका वैरिमर्दिनी। दुर्गा दुर्गशिवा घोरा चंडहस्ता प्रचंडिका ॥५॥
माहेशी बगला देवी भैरवी चंडविक्रमा। प्रमथैर्भूषिता कृष्णा चामुंडा मुंडमर्दिनी ॥६॥
रणखंडा चंद्रघंटा रणे रामवरप्रदा। मारणी भद्रकाली च शिवा घोरा भयानका ॥७॥
विष्णुप्रिया महामाया नंदगोपगृहोद्भवा। मंगला जननी चंडी महाक्रुद्धा भयंकरी ॥८॥
विमला भैरवी निद्रा जातिरूपा मनोहरा। तृष्णा निद्रा क्षुधा माया शक्तिर्मायामनोहरा ॥९॥
तस्यै देव्यै नमो या वै सर्वरूपेण संस्थिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१०॥
इमां चंडीं जगद्धात्रीं ब्राह्मणस्तु सदा पठेत्। नान्यस्तु संपठेद्देवि पठने ब्रह्महा भवेत् ॥११॥
यः शृणोति धरायां च मुच्यते सर्वपातकैः। ब्रह्महत्या च गोहत्या स्त्रीवधोद्भवपातकम् ॥१२॥
श्वश्रूगमनपापं च कन्यागमनपातकम्। तत्सर्वं पातकं दुर्गे मातुर्गमनपातकम् ॥१३॥

सुतस्त्रीगमनं चैव यद्यत्पापं प्रजायते । परदारकृतं पापं तत्क्षणादेव नश्यति ॥१४॥
जन्मजन्मांतरात्पापाद्गुरुहत्यादिपातकात् । मुच्यते मुच्यते देवि गुरुपत्नीसुसंगमात् ॥१५॥
मनसा वचसा पापं यत्पापं ब्रह्महिंसने । मिथ्याजन्यं च यत्पापं तत्पापं नश्यति क्षणात् ॥१६॥
श्रवणं पठनं चैव यः करोति धरातले । स धन्यश्च कृतार्थश्च राजा राजाधिपो भवेत् ॥१७॥
रविवारे यदा चंडीं पठेदागमसंमताम् । नवावृत्तिफलं तस्य जायते नात्र संशयः ॥१८॥
सोमवारे यदा चंडीं पठेद्यस्तु समाहितः । सहस्रावृत्तिपाठस्य फलं जानीहि सुव्रत ॥१९॥
कुजवारे जगद्धात्रीं पठेदागमसंमताम् । शतावृत्तिफलं तस्य बुधे लक्षफलं ध्रुवम् ॥२०॥
गुरौ यदि महामाये लक्षयुग्मफलं ध्रवम् । शुक्रे देवि जगद्धात्रि चंडीपाठेन शांकरी ॥२१॥
ज्ञेयं तुल्यफलं दुर्गे यदि चंडीसमाहितः । शनिवारे जगद्धात्रि कोट्यावृत्तिफलं ध्रुवम् ॥२२॥
अत एव महेशानि यो वै चंडीं समभ्यसेत् । स सद्यश्च कृतार्थः स्याद्राजराजाधिपो भवेत् ॥२३॥
आरोग्यं विजयं सौख्यं वस्त्ररत्नप्रवालकम् । पठनाच्छ्रवणाच्चैव जायते नात्र संशयः ॥२४॥
धनं धान्यं प्रवालं च वस्त्रं रत्नविभूषणम् । चंडीश्रवणमात्रेण कुर्यात्सर्वं महेश्वरी ॥२५॥
यः करिष्यत्यविज्ञाय रुद्रयामलचंडिकाम् । पापैरेतैः समायुक्तो रौरवं नरकं व्रजेत् ॥२६॥
अश्रद्धया च कुर्वंति ते च पातकिनो नराः । रौरवं नरकं कुंडं कृमिकुंडं मलस्य वै ॥२७॥
शुक्रस्य कुडं स्त्रीकुंडं यांति ते ह्यचिरेण वै । ततः पितृगणैः सार्धं विष्ठायां जायते कृमिः ॥२८॥
शृणु देवि महामाये चंडीपाठं करोति यः । गंगायां चैव यत्पुण्यं काश्यां विश्वेश्वराग्रतः ॥२९॥
प्रयागे मुंडने चैव हरिद्वारे हरेर्गृहे । तस्य पुण्यं भवेद्देवि सत्यं दुर्गे रमे शिवे ॥३०॥
त्रिगयायां त्रिकाश्यां वै यच्च पुण्यं समुत्थितम् । तच्च पुण्यं तच्च पुण्यं तच्च पुण्यं न संशयः ॥३१॥
भवानी च भवानी च भवानी चोच्यते बुधैः । भकारस्तु भकारस्तु भकारः केवलः शिवः ॥३२॥
वाणी चैव जगद्धात्री वरारोहे भकारकः । प्रेतवद्देवि विश्वेशि भकारः प्रेतवत्सदा ॥३३॥
आरोग्यं च जयं पुण्यं नातः सुखविवर्धनम् । धनं पुत्रजरारोग्यं कुष्ठं गलितनाशनम् ॥३४॥
अर्धांगरोगान्मुच्येत दद्रुरोगाच्च पार्वति । सत्यं सत्यं जगद्धात्रि महामाये शिवे शिवे ॥३५॥
चण्डे-चण्डि महारावे चण्डिका व्याधिनाशिनी । मन्दे दिने महेशानि विशेषफलदायिनी ॥३६॥
सर्वदुःखाद्विमुच्येत भक्तया चण्डीं शृणोति यः । ब्राह्मणो हितकारी च पठेन्नियतमानसः ॥३७॥
मङ्गलं मङ्गलं ज्ञेयं मङ्गलं जयमङ्गलम् । भवेद्धि पुत्रपौत्रैश्च कन्यादासादिभिर्युतः ॥३८॥
तत्त्वज्ञानेन निधन काले निर्वाणमाप्नुयात् । मणिदानोद्भवं पुण्यं तुलाहिरण्यके तथा ॥३९॥
चण्डीश्रवणमात्रेण पठनाद्ब्राह्मणोऽपि च । निर्वाणमेति देवेशि महास्वस्त्ययने हितः ॥४०॥
सर्वत्र विजयं याति श्रवणाद्ग्रहदोषतः । मुच्यते च जगद्धात्रि राजराजाधिपो भवेत् ॥४१॥

अन्यच्च-

महाचंडी शिवा घोरा महाभीमा भयानका । कांचनी कमला विद्या महारोगविमर्दिनी ॥४२॥

गुह्यचंडी घोरचंडी चंडी त्रैलोक्यदुर्लभा । देवानां दुर्लभा चंडी रुद्रयामलसंमता ॥४३॥
अप्रकाश्या महादेवी प्रिया रावणमर्दिनी । मत्स्यप्रिया मांसरता मत्स्यमांसबलिप्रिया ॥४४॥
मदमत्ता महानित्या भूतप्रमथसंगता । महाभागा महारामा धान्यदा धनरत्नदा ॥४५॥
वस्त्रदा मणिराज्यादिसदाविषयवर्धिनी । मुक्तिदा सर्वदा चंडी महाविपद्विनाशिनी ॥४६॥
इमां हि चंडीं पठते मनुष्यः शृणोति भक्त्या परमां शिवस्य ।
चण्डीं धरण्यामतिपुण्ययुक्तां स वै न गच्छेत्परमंदिरं किम् ॥४७॥
जप्यं मनोरथं दुर्गे तनोति धरणीतले । रुद्रचंडीप्रसादेन किं न सिध्यति भूतले ॥४८॥

मंत्र महार्णव पेज ३७१ से अन्यच्च –

रुद्रध्येया रुद्ररूपा रुद्राणी रुद्रवल्लभा । रुद्रशक्ती रुद्ररूपा रुद्राननसमन्विता ॥१॥
शिवचंडी महाचंडी शिवप्रेतगणान्विता । भैरवी परमाविद्या महाविद्या च षोडशी ॥२॥
सुंदरी परमा पूज्या महात्रिपुरसुंदरी । गुह्यकाली भद्रकोली महाकालविमर्दिनी ॥३॥
कृष्णा तृष्णास्वरूपा सा जगन्मोहनकारिणी अतिमात्रा महालज्जा सर्वमंगलदायिनी ॥४॥
घोरतंद्री भीमरूपा भीमा देवी मनोहरा । मंगला बगला सिद्धिदायिनी सर्वदा शिवा ॥५॥
स्मृतिरूपा कीर्तिरूपा योगीन्द्रैरपि सेविता । भयानका महादेवी भयदुःखविनाशिनी ॥६॥
चंडिका शक्तिहस्ता च कौमारी सर्वकामदा । वाराही च वराहास्या इन्द्राणी शक्रपूजिता ॥७॥
माहेश्वरी महेशस्य महेशगणभूषिता । चामुंडा नारसिंही च नृसिंहरिपुमर्दिनी ॥८॥
सर्वशत्रुप्रशमनी सर्वारोग्यप्रदायिनी । इति सत्यं महादेविसत्यं सत्यं वदाम्यहम् ॥९॥
नैवशोको नैवरोगो नैवदुःखं भयं तथा । आरोग्यं मंगलं नित्यं करोति शुभमंगलम् ॥१०॥
महेशानि वरारोहेब्रवीमि सदिदं वचः । अभक्ताय न दातव्यं मम प्राणाधिकं शुभम् ॥११॥
तव भक्त्या प्रशांताय शिवविष्णुप्रियाय च । दद्यात्कदाचिद्देवेशि सत्यं सत्यं महेश्वरि ॥१२॥
अनंतफलमाप्नोति शिवचंडीप्रसादतः । अश्वमेघं वाजपेयं राजसूयशतानि च ॥१३॥
तुष्टाश्च पितरो देवास्तथा च सर्वदेवताः । दुर्गेयं मृन्मयी ज्ञानं रुद्रयामलपुस्तकम् ॥१४॥
मन्त्रमक्षरसंज्ञानां करोत्यपि नराधमः । अत एव महेशानि किं वक्ष्ये तव सन्निधौ ॥१५॥
लंबोदराधिकश्चंडीपठनाच्छ्रवणात्तु यः । तत्त्वमस्यादिवाक्येन मुक्तिमाप्नोतिदुर्लभाम् ॥१६॥

॥ इति श्रीरुद्रयामले देवीश्वरसंवादे रुद्रचंडी समाप्ता ।

॥ अथ परशुरामकृत श्रीदुर्गा स्तोत्रम् ॥

॥ परशुराम उवाच ॥

श्रीकृष्णस्य च गोलोके परिपूर्णतमस्य च । आविर्भूता विग्रहतः परा सृष्ट्युन्मुखस्य च ॥१॥
सूर्यकोटिप्रभायुक्ता रत्नालंकारभूषिता । वह्निशुद्धांशुकाधाना सस्मिता सुमनोहरा ॥२॥
नवयौवनसंपन्ना सिंदूरबिंदुशोभिना । ललिता कवरीभारमालतीमाल्यमंडिता ॥३॥
अहोऽनिर्वचनीया त्वं चार्वी मूर्तिं च बिभ्रती । मोक्षप्रदा मुमुक्षूणां जगत्कर्ता विधिः स्वयम् ॥४॥
मुमोह क्षणमात्रेण दृष्ट्वा त्वां सर्वमोहिनीम् । रासे संभूय सहसा सस्मिता राधिता पुरा ॥५॥
सद्भिः ख्याता तेन राधा मूलप्रकृतिरीश्वरी । कृष्णस्त्वां सहसाज्ञाय वीर्याधानं चकार ह ॥६॥
ततोऽडमंभसो जज्ञे यतो भूतो महाविराट् । यस्यैव लोमकूपेषु ब्रह्मांडान्यखिलानि च ॥७॥
तच्छृंगारश्रमेणैव त्वन्निश्वासो बभूव ह । ततस्त्वं पंचधाभूय पंचमूर्तीश्च बिभ्रती ॥८॥
प्राणाधिष्ठात्री या मूर्तिः कृष्णस्य परमात्मनः । कृष्णप्राणाधिकां राधां तां वदंति पुराविदः ॥९॥
वेदाधिष्ठात्री या मूर्तिर्वेदशास्त्रप्रसूरपि । तां सावित्रीं शुद्धरूपां प्रवदंति मनीषिणः ॥१०॥
ऐश्वर्याधिष्ठात्री मूर्तिर्या शांतिः शांतिस्वरूपिणी । लक्ष्मीं वदंति संतस्तां शुद्धसत्त्वस्वरूपिणीम् ॥११॥
रागाधिष्ठात्री या देवी शुक्लमूर्तिः सतां प्रसूः । सरस्वतीं तां शास्त्रज्ञाः प्रवदंति बुधा भुवि ॥१२॥
बुद्धिर्विद्या सर्वशक्तिर्ज्या मुक्तिरधिदेवता । सर्वमंगलरूपा त्वं सर्वमंगलकारिणी ॥१३॥
सर्वमंगलबीजस्य शिवस्य मंदिरेऽधुना । शिवे शिवस्वरूपा त्वं लक्ष्मीर्नारायणांतिके ॥१४॥
सरस्वती च सावित्री वेदसूर्ब्रह्मणः प्रिया । राधा रासेश्वरस्यैव परिपूर्णतमस्य च ॥१५॥
परमानंदरूपासि छाया चंद्रस्य रोहिणी । शची शक्रस्य कामस्य कामिनी रतिरीश्वरी ॥१६॥
वरुणानी जलेशस्य वायोः स्त्री प्राणवल्लभा । वह्नेः प्रिया या स्वाहा च कुबेरस्य च सुंदरी ॥१७॥
यमस्य च सुशीला वै नैर्ऋतस्य च कोटवी । ईशानस्य शशिकला शतरूपा मनोःप्रिया ॥१८॥
देवहूतिः कर्दमस्य वशिष्ठस्याप्यरुंधती । अदितिर्देवमाता या मुद्रागस्त्यमुनेः प्रिया ॥१९॥
अहल्या गौतमस्यापि सर्वाधारा वसुंधरा । गंगा च तुलसी चापि पृथिव्यां याः सरिद्वराः ॥२०॥
एताः सर्वाश्च या अन्याः सर्वास्त्वत्कलयांबिके । गृहलक्ष्मीर्गृहे नृणां राजलक्ष्मीश्च राजसु ॥२१॥
तपस्विनां तपस्या त्वं गायत्री ब्राह्मणस्य च । सतां सत्यस्वरूपा त्वं ह्यसतां कलहांकुरा ॥२२॥
ज्योतीरूपा निर्गुणस्य शक्तिस्त्वं सगुणस्य च । सूर्ये प्रभास्वरूपा त्वं दाहिका च हुताशने ॥२३॥
जले सत्यस्वरूपा च शोभारूपा निशाकरे । त्वं भूमौ गंधरूपा च गगने शब्दरूपिणी ॥२४॥
स्मृतिर्मेधा च बुद्धिर्वाग्ज्ञानशक्तिर्विपश्चिताम् । कृष्णेन विद्या या दत्ता सर्वज्ञानप्रसूः शुभा ॥२५॥
शूलिने कृपया सा त्वं यतो मृत्युंजयः शिवः । सृष्टिपालनसंहारशक्तयस्त्रिविधाश्च याः ॥२६॥
ब्रह्मविष्णुमहेशानां सा त्वमेव नमोऽस्तु ते ॥२७॥
मधुकैटभभीत्या च त्रस्तो धाता प्रकंपितः । स्तुत्वा मुमोच यां देवीं तां मूर्ध्ना प्रणमाम्यहम् ॥२८॥

मधुकैटभयोर्युद्धे प्राप्तोऽसौ विष्णुरीश्वरीम् । बभूव शक्तिमान्स्तुत्वा यां दुर्गां तां नमाम्यहम् ॥२९॥
त्रिपुरस्य महायुद्धे सरथे पतिते शिवे । यां तुष्टुवुः सुराः सर्वे तां दुर्गां प्रणमाम्यहम् ॥३०॥
विष्णुना वृषरूपेण स्वयं शंभुः समुत्थितः । जघान त्रिपुरं स्तुत्वा यां दुर्गां तां नमाम्यहम् ॥३१॥
कालचक्रं च जगति शश्वद् भ्रमति वेगतः । मृत्युश्चरति जंत्वोघे तां दुर्गां प्रणमाम्यहम् ॥३२॥
स्त्रष्टा सृजति सृष्टं च पाता पाति यदाज्ञया । संहर्ता हरते काले तां दुर्गां प्रणमाम्यहम् ॥३३॥
ज्योतिःस्वरूपो भगवाञ्छ्रीकृष्णो निर्गुणः स्वयम् । यया विना न शक्तश्च सृष्टिं कर्तुं नमामि ताम् ॥३४॥
रक्ष रक्ष जगन्मातस्त्वपराधान्क्षमस्व मे । शिशूनामपराधेन जातु माता न कुप्यति ॥३५॥
इत्युक्त्वा पर्शुरामश्च प्रणम्य तां रुरोद च । तुष्टा दुर्गा संभ्रमेण चाभयं सा वरं ददौ ॥३६॥
अमरो भव रे पुत्र वत्स सुस्थिरतां व्रज । मम प्रसादात्सर्वत्र जयोऽस्तु तव संततम् ॥३७॥
सर्वांतरात्मा भगवांस्तुष्टोऽस्तु सततं हरिः । भक्तिर्भवतु ते कृष्णे शिवदे च शिवे गुरौ ॥३८॥
इष्टदेवे गुरौ यस्य भक्तिर्भवति शाश्वती । तं हंतुं नहि शक्ता वै रुष्टाश्च सर्वदेवताः ॥३९॥
श्रीकृष्णस्य च भक्तस्त्वं शिष्यस्त्वं शंकरस्य च । गुरुपत्न्याश्च भक्तो हि कस्त्वां हंतुं महेश्वरः ॥४०॥
अहो न कृष्णभक्तानामशुभं विद्यते क्वचित् । अन्यदेवेषु भक्ता वा न भक्ता वा निरंकुशाः ॥४१॥
चंद्रमा बलवांस्तुष्टो येषां भाग्यवतां भृगो । तेषां तारागणा रुष्टाः किं कुर्वंति च दुर्बलाः ॥४२॥
यस्य तुष्टः सभायां चेन्नरदेवो महान्सखा । तस्य किं वा करिष्यंति रुष्टा भृत्याश्च दुर्बलाः ॥४३॥
इत्युक्त्वा पार्वती तुष्टा दत्त्वा रामाय चाशिषम् । जगन्मातुः पुरस्तूर्णं जयशब्दो बभूव ह ॥४४॥
कण्वशाखोक्तस्तोत्रं च पूजाकाले हि यः पठेत् । यात्राकाले च प्रातर्वा वांछितार्थं लभेत सः ॥४५॥
पुत्रार्थी लभते पुत्रं कन्यार्थी लभते सुताम् । विद्यार्थी लभते विद्यां प्रजार्थी लभते प्रजाम् ॥४६॥
भ्रष्टराज्यो व्रजेद्राज्यं धनं भ्रष्टधनो व्रजेत् । यस्य तुष्टो गुरुर्देवो राजानो बांधवास्तथा ॥४७॥
तस्य तुष्टाश्च वरदाः स्तोत्रराजप्रसादतः । दस्युग्रस्तोऽहिसंग्रस्तः शत्रुग्रस्तो भयानकः ॥४८॥
व्याधिग्रस्तो भवेन्मुक्तः स्तोत्रस्मरणमात्रतः । राजद्वारे श्मशाने च कारागारे च बंधने ॥४९॥
जलराशौ निमग्नश्च मुक्तो भवति मानवः । स्वामिभेदे पुत्रभेदे मित्रभेदेऽतिदारुणे ॥५०॥
स्तोत्रस्मरणमात्रेण वांछितार्थं लभेत सः । कृत्वा हविष्यं वर्षं च स्तोत्रराजं श्रृणोति यः ॥५१॥
भक्त्या दुर्गां च संपूज्य महावंध्या प्रसूयते । लभते सा दिव्यपुत्रं ज्ञानिनं चिरजीविनम् ॥५२॥
असौभाग्या च सौभाग्यं षण्मासश्रवणाद् व्रजेत् । नवमासं काकवंध्या मृतवत्सा च भक्तितः ॥५३॥
स्तोत्रराजं या श्रृणोति सा पुत्रं लभते ध्रुवम् । कन्यामाता पुत्रहीना पंचमासं श्रृणोति या ॥५४॥
घटे संपूज्य दुर्गां च सा पुत्रं लभते ध्रुवम् ॥५५॥

॥ इति श्रीपरशुरामप्रोक्तं दुर्गास्तोत्रं समाप्तम् ॥

(१)॥ श्री मार्कंडेयप्रोक्त लघुदुर्गासप्तशती ॥

ॐ वींवींवीं वेणुहस्ते स्तुतिविधवटुके हां तथा तानमाता स्वानंदेनंदरूपे अविहतनिरुते भक्तिदे मुक्तिदे त्वम्।
हंसः सोहं विशाले वलयगतिहसे सिद्धिदे वाममार्गे, ह्रीं ह्रीं ह्रीं सिद्धलोके कष कष विपुले वीरभद्रे नमस्ते ॥१॥
ॐ ह्रींकारं चोच्चरंती ममहरतु भयं चर्ममुंडे प्रचंडे खां खां खां खड्गपाणे ध्रकध्रकध्रकिते उग्ररूपे स्वरूपे ।
हुंहुंहुंकारनादे गगनभुवि तथा व्यापिनी व्योमरूपे, हंहंहंकारनादे सुरगणनमिते राक्षसानां निहंत्रि ॥२॥
ऐं लोके कीर्तयंती मम हरतु भयं चंडरूपे नमस्ते, घ्रां घ्रां घ्रां घोररूपे घघघघघटिते घर्घरे घोररावे ।
निर्मांसे काकजंघे घसितनखनखाधूम्रनेत्रे त्रिनेत्रे, हस्ताब्जे शूलमुंडे कलकुलकुकुले श्रीमहेशी नमस्ते ॥३॥
क्रीं क्रीं क्रीं ऐं कुमारी कुहकुहमखिले कोकिले, मानुरागे मुद्रासंज्ञत्रिरेखां कुरु कुरु सततं श्रीमहामारि गुह्ये ।
तेजोंगे सिद्धिनाथे मनुपवनचले नैव आज्ञा निधाने, ऐंकारे रात्रिमध्ये शयितपशुजने तंत्रकांते नमस्ते ॥४॥
ॐ व्रां व्रीं व्रुं व्रूं कवित्ये दहनपुरगते रुक्मरूपेण चक्रे त्रिः शक्त्या युक्तवर्णादिककरनमिते दादिवंपूर्णवर्णे ।
ह्रींस्थाने कामराजे ज्वल ज्वल ज्वलिते कोशितैस्तास्तुपत्रे स्वच्छंदं कष्टनाशे सुरवरवपुषे गुह्यमुंडे नमस्ते ॥५॥
ॐ घ्रां घ्रीं घ्रूं घोरतुंडे घघघघघघघे घर्घरान्यांघ्रिघोषे, ह्रीं क्री द्रं द्रौं च चक्र र र र र रमिते सर्वबोधप्रधाने ।
द्रीं तीर्थे द्रीं तज्येष्ठ जुगजुगजजुगे म्लेच्छदे कालमुंडे, सर्वांगे रक्तघोरामथनकरवरे वज्रदंडे नमस्ते ॥६॥
ॐ क्रां क्रीं क्रूं वामभित्ते गगनगडगडे गुह्ययोन्याहिमुंडे, वज्रांगे वज्रहस्ते सुरपतिवरदे मत्तमातंगरूढे ।
सूतेजे शुद्धदेहे ललललललिते छेदिते पाशजाले, कुंडल्याकाररूपे वृषवृषभहरे ऐंद्रि मातर्नमस्ते ॥७॥
ॐ हुंहुंहुंकारनादे कषकषवसिनी मांसि वैतालहस्ते, सुंसिद्धर्षैः सुसिद्धिर्ढढढढढढढः सर्वभक्षी प्रचंडी ।
जूं सः सौं शांतिकर्मे मृतमृतनिगडे निःसमे सीसमुद्रे, देवि त्वं साधकानां भवभयहरणे भद्रकाली नमस्ते ॥८॥
ॐ देवि त्वं तुर्यहस्ते करधृतपरिघे त्वं वराहस्वरूपे, त्वं चेंद्री त्वं कुबेरी त्वमसि च जननी त्वं पुराणी महेंद्री ।
ऐं ह्रीं ह्रीं कारभूते अतलतलतले भूतले स्वर्गमार्गे, पाताले शैलभृंगे हरिहरभुवने सिद्धिचंडी नमस्ते ॥९॥
हंसि त्वं शौंडदुःखं शमितभवभये सर्वविघ्नांतकार्ये, गांगींगूंगैंषडंगे गगनगटितटे सिद्धिदे सिद्धिसाध्ये ।
क्रूंक्रूंमुद्रागजांशो गसपवनगते त्र्यक्षरे वै कराले, ॐ हीं हूं गां गणेशी गजमुखजननी त्वं गणेशी नमस्ते'' ॥१०॥

॥ इति मार्कण्डेयकृतलघुसप्तशतीदुर्गास्तोत्रं समाप्तम् ॥

अन्यच्च – (२) लघु सप्तशती (गुप्त सप्तशती)

सर्वप्रथम कुञ्जिका स्तोत्र का पाठ करें पश्चात् इस स्तोत्र को पढ़ें :-

ॐ ब्रीं ब्रीं ब्रीं वेणु हस्ते स्तुत सुर बटुकैर्हां गणेशस्य माता ।
स्वानन्दे नन्दरूपे अनहतनिरते मुक्तिदे मुक्तिमार्गे ॥
हंसः सोहं विशाले वलयगति हसे सिद्ध देवी समस्ता ।
हीं हीं हीं सिद्ध लोके कच रुचि विपुले वीरभद्रे नमस्ते ॥१॥

ॐ ह्रींङ्कारोच्चारयन्ती मम हरति भयं चण्डमुण्डौ प्रचण्डे ।
खां खां खां खड्ग पाणे ध्रक ध्रक ध्रकिते उग्ररूपे स्वरूपे ॥

हुँ हुँ हुङ्कार नादे गगन भुवि तले व्यापिनी व्योमरूपे ।
हं हं हङ्कार नादे सुरगण नमिते चण्डरूपे नमस्ते ॥२॥
ऐं लोके कीर्तयन्ती मम हरतु भयं राक्षसान् हन्यमाने ।
घ्रां घ्रां घ्रां घोर रूपे घघ घघ घटिते घर्घरे घोर रावे ॥
निर्मांसे काकजङ्घे घसित नख नखा धूम्रनेत्रे त्रिनेत्रे ।
हस्ताब्जे शूलमुण्डे कुल कुल कुकुले सिद्धहस्ते नमस्ते ॥३॥
ॐ क्रीं क्रीं क्रीं ऐं कुमारी कुह कुह - मखिले कोकिलेमानुरागे ।
मुद्रासंज्ञ त्रिरेखा कुरु कुरु सततं श्रीमहामारि गुह्ये ॥
तेजोङ्गे सिद्धिनाथे मनुपवन चले नैव आज्ञा निधाने ।
ऐङ्कारे रात्रिमध्ये स्वपित पशुजने तंत्रकान्ते नमस्ते ॥४॥
ॐ व्रां व्रीं व्रूं व्रैं कवित्वे दहनपुर - गते रुक्मिरूपेण चक्रे ।
त्रिः शक्त्या युक्तवर्णादिक करनमिते दादिवं - पूर्व - वर्णे ॥
ह्रीं स्थाने कामराजे ज्वल ज्वल ज्वलिते कोशिनि - कोशपत्रे ।
स्वच्छन्दे कष्टनाशे सुरवर - वपुषे गुह्यमुण्डे नमस्ते ॥५॥
ॐ घ्रां घ्रीं घ्रूं घोरतुण्डे घघ-घघ घघघे घर्घरान्याङ्घ्रिघोषे ।
ह्रीं क्रीं द्रूं द्रोञ्च चक्रे रर - रर रमिते सर्वज्ञाने प्रधाने ॥
द्रीं तीर्थेषु च ज्येष्ठे जुग-जुग जजुगे म्लीं पदे कालमुण्डे ।
सर्वाङ्गे रक्तधोरा - मथन - करवरे वज्रदण्डे नमस्ते ॥६॥
ॐ क्रां क्रीं क्रूं वामनमिते गगन गडगडे गुह्य योनिस्वरूपे ।
वज्राङ्गे वज्रहस्ते सुरपति वरदे मत्त मातङ्गरूढे ॥
स्वस्तेजे शुद्धदेहे लललल ललिते छेदिते पाशजाले ।
कुण्डल्याकाररूपे .वृष वृषभ ध्वजे ऐन्द्रि मातर्नमस्ते ॥७॥
ॐ हुँ हुँ हुङ्कारनादे विषमत्रशकरे यक्ष वैताल नाथे ।
सुसिद्ध्यर्थे सुसिद्धेः ठठ ठठ ठठठः सर्वभक्षे प्रचण्डे ॥
जूं सः सौं शान्ति कर्मेऽमृत मृतहरे निःसमे सं समुद्रे ।
देवि त्वं साधकानां भव-भव वरदे भद्रकाली नमस्ते ॥८॥
ब्रह्माणी वैष्णावी त्वं त्वमसि बहुचरा त्वं वराहस्वरूपा ।
त्वं ऐन्द्री त्वं कुबेरी त्वमसि च जननी त्वं कुमारी महेन्द्री ॥
ऐं ह्रीं क्लींङ्कार भूते वितलतल तले भूतले स्वर्गमार्गे ।
पाताले शैलभृङ्गे हरि हर भुवने सिद्धचण्डी नमस्ते ॥९॥
हं लं क्षं शौण्डिरूपे शमित भव भये सर्वविघ्नान्त विघ्ने ।

हं लं क्षं शौण्डिरूपे शमित भव भये सर्वविघ्नान्त विघ्ने ।
गां गीं गूं गैं षडङ्गे गगन गति-गते सिद्धिदे सिद्धसाध्ये ॥
वं क्रं मुद्रा हिमांशोर्प्रहसतिवदने त्र्यक्षरे ह्सैं निनादे ।
हां हूं गां गीं गणेशी गजमुखजननी त्वां महेशीं नमामि ॥१०॥

॥ इति श्रीमार्कण्डेय पुराणोक्त लघुसप्तशती ॥

॥ दुर्गा खड्ग स्तवन ॥

मार्कण्डेयपुराणोक्त यह स्तोत्र पाठान्तर भेद के साथ कवच व स्तव के नाम से भी अन्यत्र उल्लिखित है।

चामुण्डाप्रेतगा विकृता चाऽहिभूषणा, दंष्ट्राली क्षीणदेहाचगर्ताक्षी कामरूपिणी ।
दिग्बाहुः क्षामकुक्षि मुसलं चक्रचामरे, अंकुशं बिभ्रती खड्गं दक्षिणे चाथ वामके ।
खेटं पाशं धनुर्दण्डं कुठारं चापि बिभ्रती ॥
या देवी खड्ग हस्ता सकलजनपदा व्यापिनी विश्वदुर्गा ।
श्यामाङ्गी शुक्लपाशाब्धिजगण गणिता ब्रह्मदेहार्ध वासा ॥
ज्ञानानां साधयन्ती तिमिर विरहिता ज्ञान दिव्य प्रबोधा ।
सा देवी दिव्यमूर्तिर्प्रदहतु दुरितं मुण्डचण्डे प्रचण्डे ॥१॥
ॐ हां हीं हूं वर्मयुक्ते शवगमन गतिर्भीषणे भीमवक्त्रे ।
क्रां क्रीं क्रूं क्रोधमूर्तिर्विकृत स्तन मुखे रौद्र दंष्ट्राकराले ॥
कं कं कंकाल धारी भ्रमसि जगदिदं भक्षयन्ती ग्रसन्ती ।
हुंकारोच्चारयन्ती प्रदहतु दुरितं चण्डमुण्डे प्रचण्डे ॥२॥
ॐ ह्रां ह्रीं ह्रूं रुद्ररूपे त्रिभुवन नमिते पाशहस्ते त्रिनेत्रे ।
रां रीं रूं रङ्ग रंगे किले किलित रवे शूल हस्ते प्रचण्डे ॥
लांलींलूं " " लम्बजिह्वे हसति कहकहा शुद्धघोराट्टहासैः ।
कंकाली कालरात्रिः प्रदहतु दुरितं चण्ड मुण्डेप्रचण्डे ॥३॥
ॐ घ्रां घ्रीं घ्रूं घोररूपे घघ-घघ घटितैः घर्घराराव घोरे ।
निर्मांसे शुष्कजङ्घे पिबति नरवसा धूम्रधूम्रायमाने ॥
ॐ द्रां द्रीं द्रूं द्रावयन्ती सकलभुवि तले यक्ष गन्धर्व नागान् ।
क्षां क्षीं क्षूं क्षोभयन्ती प्रदहतु दुरितं चण्ड मुण्डे प्रचण्डे ॥४॥
ॐ भ्रां भ्रीं भ्रूं भद्रकाली हरिहर नमिते रुद्रमूर्ते विकर्णे ।
चन्द्रादित्यौ च कर्णौ शशि मुकुट शिरो वेष्ठिता केतुमालाम् ॥
स्त्रक् सर्वौ चोरगेन्द्रौ शशिकरण - निभा तारकाः हारकण्ठे ।
सा देवी दिव्य मूर्तिः प्रदहतु दुरितं चण्ड मुण्डे प्रचण्डे ॥५॥
ॐ खं खं खं खड्गहस्ते वर कनकनिभे सूर्यकान्ति स्वतेजा ।

विद्युज्ज्वालावलीनां भव निशित महाकर्त्रिका दक्षिणेन ॥
वामेहस्ते कपालं वर विमल सुरापूरितं धारयन्ती ।
सा देवी दिव्यमूर्तिः प्रदहतु दुरितं चण्ड मुण्डे प्रचण्डे ॥६॥
ॐ हुँ हुँ फट् कालरात्रीं पुर-सुर मथनीं धूम्रमारी कुमारी ।
ह्रां ह्रीं ह्रूं हन्ति दष्टान् किलित किल किला - शब्दअट्टाट्टहासे ।
हा हा भूत-प्रभूते किल किलित मुखा, कीलयन्ती ग्रसन्ती ।
हुंकारोच्चारयंती प्रदहतु दुरितं चण्ड मुण्डे प्रचण्डे ॥७॥
ॐ ह्रीं श्रीं क्रीं कपालीं परिजन सहिता चण्डि चामुण्ड नित्ये ।
रं रं रंकारशब्दे शशिकर धवले कालकूटे दुरन्ते ॥
हुँ हुँ हुंकार-कारि सुरगण नमिते कालकारी विकारी ।
त्र्यैलोक्यं वश्यकारी प्रदहतु दुरितं चण्ड मुण्डे प्रचण्डे ॥८॥
वन्दे दण्ड प्रचण्डा डमरु डिमि डिमा घण्ट टंकारनादे ।
नृत्यन्ती ताण्डवैषा थथ थइ विभवैर्निर्मला मन्त्रमाला ।
सुक्षौ कुक्षौ वहन्ती खर खरिता खा चार्चिनि प्रेतमाला ।
उच्चैस्तैश्चाट्टहासैः हह हसित रवा चर्ममुण्डा प्रचण्डे ॥९॥
ॐ त्वं ब्राह्मी त्वं च रौद्री स च शिखिगमना त्वं च देवी कुमारी ।
त्वं चक्री चक्रहासा घुर-घुरित रवा त्वं वराहस्वरूपा ॥
रौद्रे त्वं चर्ममुण्डा सकल भुवितले संस्थिते स्वर्गमार्गे ।
पाताले शैलशृङ्गे हरि हर नमिते देवि चण्डी नमस्ते ॥१०॥
रक्ष त्वं मुण्डधारी गिरि गुह विवरे निर्झरि पर्वते वा ।
संग्रामे शत्रुमध्ये विश विषम विषे संकटे कुत्सिते वा ॥
व्याघ्रे चौरे च सर्पेऽप्युदधि भुवितले वह्निमध्ये च दुर्गे ।
रक्षेत् सा दिव्यमूर्तिः प्रदहतु दुरितं मुण्ड चण्डे प्रचण्डे ॥११॥
इत्येवं बीजमन्त्रैः स्तवनमति शिवं पातक व्याधि नाशम् ।
प्रत्यक्षं दिव्यरूपं ग्रहगण मथनं मर्दनं शाकिनीनाम् ॥
इत्येवं वेद वेद्यं सकलभयहरं मन्त्र शक्तिश्च नित्यम् ।
मन्त्राणां स्तोत्रकं यः पठति स लभते प्रार्थितां मन्त्र सिद्धिम् ॥१२॥
चं चं चं चन्द्रहासा चचम चमचमा चातुरी चित्तकेशी ।
यं यं यं योगमाया जननि जगहिता योगिनी योगरूपा ॥
डं डं डं डाकिनीनां डमरुक सहिता डोल हिण्डोल डिम्भा ।
रं रं रं रक्तवस्त्रा सरसिज नयना पातु मां देवि दुर्गा ॥१३॥

॥ इति मार्कण्डेय विरचितं चण्डिका स्तोत्रम् ॥

॥ श्रीमार्कण्डेय पुराणोक्त चंडिका स्तोत्रम् ॥

यह स्तोत्र कई जगह पाठान्तर भेद से चामुण्डा कवच के नाम से प्रकाशित हो चुका है **इसके ऋषि ब्रह्मा। छन्द अनुष्टुप्। देवता चामुण्डा। ऐं बीज। ह्रीं शक्ति। क्लीं कीलक कहा है।**

॥ ध्यानम् ॥

चामुण्डा प्रेतगा विकृता चाऽहि भूषणा ।
दंष्ट्राली क्षीण-देहा च गर्ताक्षी कामरूपिणी ॥
दिग्बाहुः क्षामकुक्षि मुसलं चक्र-चामरे ।
अङ्कुशं विभ्रती खड्गं दक्षिणे चाथ वामके ॥
खेटं-पाशं-धनुर्दण्डं कुठारं चापि बिभ्रती ॥

या देवी खड्गहस्ता सकलजनपदव्यापिनी विश्वदुर्गा, श्यामांगी शुक्लपाशा द्विजगणगणिता ब्रह्मदेहार्धवासा ।
ज्ञानानां साधयित्री यतिगिरिगमनज्ञानदिव्यप्रबोधा, सा देवी दिव्यमूर्तिः प्रदहतु दुरितं चंडमुंडा प्रचंडा ॥१॥
ॐ ह्रां ह्रीं ह्रूं चर्ममुंडे शवगमनहते भीषणे भीमवक्त्रे, क्रां क्रीं क्रूं क्रोधमूर्तिर्विकृतकुच मुखे रौद्रदंष्ट्राकराले ।
कं कं कंकालधारि भ्रमसि जगदिदं भक्षयंती ग्रसंती, हुंकारं चोच्चरंती प्रदहतु दुरितं चंडमुंडा प्रचंडा ॥२॥
ॐ ह्रां ह्रीं ह्रूं रुद्ररूपे त्रिभुवननमिते पाशहस्ते त्रिनेत्रे, रां रीं रूं रंगरंगे किलिकिलितरवे शूलहस्ते प्रचंडे ।
लां लीं लूं लंबजिह्वे हसति कहकहाशुद्धघोराट्टहासे, कंकाली कालरात्रिः प्रदहतु दुरितं चंडमुंडा प्रचंडा ॥३॥
ॐ घ्रां घ्रीं घ्रूं घोररूपे घघघघघटितैर्घुर्घुरारावघोरे, निर्मांसी शुष्कजंघे पिबतु नरवसाधूम्रधूम्रायमाने ।
ॐ द्रां द्रीं द्रूं द्रावयंती सकलभुवि तथा यक्षगंधर्वनागान्क्षां, क्षीं क्षूं क्षोभयंती प्रदहतु दुरितं चंडमुंडा प्रचंडा ॥४॥
ॐ भ्रां भ्रीं भ्रूं चंडगर्वे हरिहरनमिते रुद्रमूर्तिश्च कीर्तिश्चंद्रादित्यौ च कर्णौ जडमुकुटशिरोवेष्टिता केतुमाला ।
स्त्रक्सर्वौ चोरगेंद्रौ शशिकिरणनिभा तारकाहारकंठा, सा देवी दिव्यमूर्तिः प्रदहतु दुरितं चंडमुंडा प्रचंडा ॥५॥
ॐ खंखंखं खड्गहस्ते वरकनकनिभे सूर्यकांते स्वतेजोविद्युज्ज्वालावलीनां नवनिशितमहाकृत्तिका दक्षिणे च ।
वामे हस्ते कपालं वरविमलसुरापूरितं धारयंती, सा देवी दिव्यमूर्तिः प्रदहतु दुरितं चंडमुंडा प्रचंडा ॥६॥
ॐ हुं हुं फट् कालरात्री रु रु सुरमथनी धूम्रमारी कुमारी, ह्रां ह्रीं ह्रूं हत्तिशोरौक्षपितुकिलकिलाशब्द अट्टाट्टहासे ।
हाहाभूतप्रसूते किलिकिलितमुखा कीलयंती ग्रसंती, हुंकारं चोच्चरंती प्रदहतु दुरितं चंडमुंडा प्रचंडा ॥७॥
ॐ भृंगी काली कपालीपरिजनसहिते चंडि चामुंडनित्या, रों रो रोंकारनित्ये शशिकरधवले कालकूटे दुरंते ।
हुंहुंहुंकारकारी सुरगणनमिते कालकारी विकारी, वश्ये त्रैलोक्यकारी प्रदहतु दुरितं चंडमुंडा प्रचंडा ॥८॥
ॐ वंदे दंडप्रचंडा डमरुरुणिमणिष्टोपटंकारघंटैर्नृत्यंती, याट्टपातैरटपटविभवैर्निर्मला मंत्रमाला ।
सुक्षौ कक्षौ वहंती खरखरितसखाचार्चिनि प्रेतमालामुच्चैस्तैश्चाट्टहासैर्घुरुघुरितरवा चर्ममुंडा प्रचंडा ॥९॥
ॐ त्वं ब्राह्मी त्वं च रौद्री शवशिखिगमना त्वं च देवी कुमारी त्वं चक्री चक्रहस्ता घुरघुरितरवा त्वं वराहस्वरूपा ।
रौद्रे त्वं चर्ममुंडा सकलभुवि परे संस्थिते स्वर्गमार्गे, पाताले शैलभृंगे हरिहरनमिते देवि चंडे नमस्ते ॥१०॥
ॐ रक्ष त्वं मुंडधारी गिरिवरविवरे निर्झरे पर्वते वा संग्रामे, शत्रुमध्ये विश विश भविके संकटे कुत्सिते वा ।
व्याघ्रे चौरे च सर्पेऽप्युदधिभुवि तथा वह्निमध्ये च दुर्गे, रक्षेत्सा दिव्यमूर्तिः प्रदहतु दुरितं चंडमुंडा प्रचंडा ॥११॥

इत्येवं बीजमंत्रैः स्तवनमतिशिवं पातकव्याधिनाशं प्रत्यक्षं दिव्यरूपं ग्रहगणमथनं मर्दनं शाकिनीनाम् ।
इत्येवं वेगवेगं सकलभयहरं मंत्रशक्तिश्च नित्यं मंत्राणां स्तोत्रकं यः पठति स लभते प्रार्थितां मंत्रसिद्धिम् ॥१२॥

॥ इति श्रीमार्कंडेयविरचितं चंडिकास्तोत्रं समाप्तम् ॥

॥ अथ श्रीदुर्गा शतनामात्मक स्तोत्र प्रारंभः ॥

(उक्तं च विश्वसारतन्त्रे)

॥ ईश्वर उवाच ॥

शतनाम प्रवक्ष्यामि शृणुश्व कमलानने । यस्य प्रसाद मात्रेण दुर्गा प्रीता सदा भवेत् ॥१॥
ॐ सती साध्वी भवा प्रिया भवानी भवमोचिनी । आर्य्या दुर्गा जया आद्या त्रिनेत्रा शूलधारिणी ॥२॥
पिनाकधारिणी चित्रा चन्द्रघण्टा महातपा । मनोबुद्धिरहंकारश्चितरूपा चिता चितिः ॥३॥
सर्वमन्त्रमयी सत्या सत्यानन्दस्वरूपिणी । अनन्ता भाविनी भाव्या भवा भव्या सदगतिः ॥४॥
शम्भुपत्नी देवमाता चिन्तारत्ना प्रिया सदा । सर्वविद्या दक्षकन्या दक्षयज्ञविनाशिनी ॥५॥
अर्पणा चैकपर्णा च पाटला पाटलावती । पट्टाम्बर परीधाना कलमञ्जीररंजिनी ॥६॥
अमेय विक्रमाक्रूरा सुन्दरी कुलसुन्दरी । वनदुर्गा च मातङ्गी मतङ्गमुनि पूजिता ॥७॥
ब्राह्मी माहेश्वरी चैन्द्री कौमारी वैष्णवी तथा । चामुण्डा चैव वाराही लक्ष्मीश्च पुरुषाकृतिः ॥८॥
विमलोत्कर्षिणी ज्ञाना क्रिया सत्या च वाक्प्रदा । बहुला बहुलप्रेमा सर्ववाहन वाहना ॥९॥
निशुम्भशुम्भहनिनी महिषासुरमर्दिनी । मधुकैटभहन्त्रि च चण्डमुण्डविनाशिनी ॥१०॥
सर्वाऽसुरविनाशा च सर्वदानवघातिनी । सर्वशास्त्रमयी विद्या सर्वास्त्रधारिणी ॥११॥
अनेकशस्त्रहस्ता च अनेकास्त्रविधारिणी । कुमारी चैव कन्या च कौमारी युवतीः यतिः ॥१२॥
अप्रौढा चैव प्रौढा च वृद्धमाता बलप्रदा । य इदं च पठेत्स्तोत्रं दुर्गानामशताष्टकम् ॥१३॥
नासाध्यं विद्यते देवि त्रिषु लोकेषु पार्वति । धनं धान्यं सुताज्जयां हयं हस्तिनमेव च ॥१४॥
चतुर्वर्ग तथा चान्ते विन्देन्मुक्तिं च शाश्वतीम् । कुमारीः पूजयित्वा च ध्यात्वा देवी सुरेश्वरीम् ॥१५॥
पूजयेत्परया भक्त्या पठेन्नाशताष्टकम् । तस्य सिद्धिर्भवेद्देवि सर्वैः सुरवैरिरपि ॥१६॥
राजानो दासतां यान्ति राज्यश्रियमवाप्नुयात् । गोरोचनालक्तक कुंकुमेन सिन्दूरकर्पूर मधुत्रयेण ॥
विलिख्यं यन्त्रं विधिना विधिज्ञो भवेत्सदाधारणतः पुरारिः । भौममायां निशाभागे चन्द्रेशतभिषां गते ।
विलिख्य पठन्स्तोत्रं स भवेत्संपदो पदम् ॥१८॥

(इति श्रीविश्वसार तन्त्रे दुगाऽष्टोत्तर शतनामात्मक स्तोत्रं सम्पूर्णम्)

॥ अथ दुर्गा सहस्त्रनाम स्तोत्रम् ॥

उक्तं च देवीरहस्यतंत्रे चैकोनपंचाशत्तमे पटले ।

॥ भैरव उवाच ॥

अधुना शृणु वक्ष्यामि दुर्गासर्वस्वमीश्वरि । रहस्यं सर्वदेवानां दुर्लभं यमिनामपि ॥१॥
श्रीदुर्गातत्त्वमुद्दिष्टं सारं त्रैलोक्यकारणम् । मंत्रनामसहस्त्रं च दुर्गायाः पुण्यदं परम् ॥२॥
यत्पठित्वा शिवे धृत्वा देवीनामसहस्त्रकम् । अश्वमेधायुतं पुण्यं लोके सौभाग्यवर्धनम् ॥३॥
श्रेयस्करंविश्ववंद्यं सर्वदेवनमस्कृतम् । गुह्यं गोप्यतमं देवि पठनात्सिद्धिदायकम् ॥४॥

विनियोग :- ॐ अस्य श्रीदुर्गानामसहस्त्रस्य श्रीमहेश्वर ऋषिरनुष्टुप्छंदः, श्रीदुर्गा देवता, दुं बीजं, ह्रीं शक्तिः, ॐ कीलकं धर्मार्थकाममोक्षार्थे सहस्त्रनामपाठे विनियोगः।

ऋष्यादिन्यास :- ॐ महेश्वरऋषये नमः शिरसि ॥१॥ अनुष्टुप्छंदसे नमो मुखे ॥२॥ श्रीदुर्गादेवतायै नमो हृदि ॥३॥ हुं बीजाय नमो नाभौ ॥४॥ ह्रीं शक्तये नमो मुखे ॥५॥ ॐ कीलकाय नमः पादयोः ॥६॥ विनियोगाय नमः सर्वांगे ॥७॥

ॐ ह्रीं दुर्गा जगन्माता भद्रिका भद्रकालिका । प्रचंडा चंडिका चंडी चंडमुंडनिषूदिनी ॥५॥
अनसूया त्रुटिस्तारा कृत्तिका कुब्जकालया । प्रलयस्थितिसंभूतिविभूतिर्भयनाशिनी ॥६॥
महामाया महाविद्या मूलविद्या चिदीश्वरी । मदालसा मदोत्तुगा मदिरा मदनप्रिया ॥७॥
अतिव्यालप्रसूः पुण्या पवित्रा परमेश्वरी । आदिदेवी कला कांता त्रिपुरा जगदीश्वरी ॥८॥
मनोन्मनी महालक्ष्मीः सिद्धलक्ष्मी सरस्वती । सरित्कादंबरी गोधा गुह्यकाली गणेश्वरी ॥९॥
गणांबिका जया तापी तपना तापहारिणी । तपोमयी दुरालंभा दुष्टग्रहनिवारिणी ॥१०॥
दुःखघ्नी सुखदा माध्वी परमामृतसूः सुरा । सुधा सुधांशुनिलया प्रलयानलसन्निभा ॥११॥
समस्तसंपदंभोजविलया कलिकालया । विद्येश्वरी विश्वमयी विराट्छंदोगतिर्मतिः ॥१२॥
धृतिश्च दांभिकी दोला लोपामुद्रा पटीयसी । गरिष्ठारिष्टहा दुष्टा कृशा काशी कुलाकुला ॥१३॥
अकुलस्था पदन्यासा न्यासरूपा विरूपिणी । विरूपाक्षी कोटराक्षी कुलकांतापराजिता ॥१४॥
अजिता कुलिका लंपा लंपटा त्रिपुरेश्वरी । त्रितयी वेदविन्यासा संन्यासा सुमतिर्भया ॥१५॥
अभया स्वर्मुखी देवी महौषधिरलंबुषा । चपला चण्डिका चण्डी चण्डमुण्डनिषूदिनी ॥१६॥
चपलाक्षी मदाविष्टा मदिरारुणलोचना । पुरी त्रिपुरसूराद्या रमा रामा मनोरमा ॥१७॥
संध्या संध्याभ्रशीला च शाला श्यामपयोधरा । शशांकमुकुटा श्यामा सुरा सुन्दरलोचना ॥१८॥
विषमाक्षी विशालाक्षी वशा वागीश्वरी शिला । मनःशिला च कस्तूरी मृगनाभिर्मृगेक्षणा ॥१९॥
मृगारिवाहना साध्वी मानदा मत्तभाषिणी । नारसिंही वामदेवी वामा वामश्रुतिप्रिया ॥२०॥
पुण्या पुण्यगतिः पुण्या पुत्री पुण्यजनप्रिया । चामुण्डा चोग्रमुण्डा च महाचण्डतमा उमा ॥२१॥
तमस्विनी प्रभा ज्योत्स्ना महाज्योतिःस्वरूपिणी । स्वरूपा सद्गतिः साध्वी सदसद्रूपराजिता ॥२२॥

सृष्टिस्थितिः क्षेमकरी क्षामा क्षामोन्नतस्तनी । क्षोणी क्षयकरी क्षीणा शवस्था शिववल्लभा ॥२३॥
दंतुरा दाडिमप्रीतिर्दया दांभिकसूदिनी । राक्षसी डाकिनी योग्या योगिनी योगवल्लभा ॥२४॥
कबंधा कंदरा कृत्या कृत्तिका कंटकांतका । कलंकरहिता काली कंपा काश्मीरवल्लभा ॥२५॥
काशी कीर्तिप्रदा कांची काश्मीरी कोकिलस्वना । प्रभावती महारौद्री रुद्रपत्नी रुजापहा ॥२६॥
रतिः स्तुतिस्तुरी तुर्या तोतुला तलवासिनी । तपःप्रिया सरिच्छ्रेष्ठा पंगुपुत्री यमस्वसा ॥२७॥
यामी यमांतका याम्या यमुना स्वर्णदी तडित् । नारायणी विश्वमाता भवानी पापनाशिनी ॥२८॥
विगता विगतप्रश्ना कृशा कृष्टासिधरिणी । वारी वराम्बरधरा वरदा वीरसूदिनी ॥२९॥
वीरसूर्वामनाकारा दीर्घसूत्रा दयावती । दरी धनप्रिया धात्री धात्री वल्ली महोदरी ॥३०॥
गणेश्वरी गणा कांची कांचीकिंकिणिघंटिका । माया मायावती मत्ता प्रमत्ता प्रवरेश्वरी ॥३१॥
पौरन्दरी शची सीता शीतातपस्वभावजा । स्वाभाविकगुणा गुण्या गांभीर्यगुणभूषणा ॥३२॥
सूतिः सूर्यकला सुप्ता सप्तसप्ततिरूपिणी । तेजस्विनी सदानंदा सभासंतोषवर्धिनी ॥३३॥
तर्पणा कर्षणा होत्री संकल्पा शुभमंत्रिका । दर्भा द्रोणिकला शांता समिधा सुरवेदिका ॥३४॥
धूम्राहुतिश्चरमतिश्चामीकररुचिश्चिता । दिव्यानलेश्वरी नीला कालानलसरस्वती ॥३५॥
अपर्णा सुफला यज्ञा सभया निर्भयाभया । भीमस्वना भर्गशिखा भास्वती भाकरा विभा ॥३६॥
विभावरी नदी नंद्या नद्यावर्तप्रवर्तिनी । पृथ्वीधरा विषधरा विश्वगर्भा प्रवर्तिका ॥३७॥
विश्वमाया विश्वबाला विश्वंभरविलासिनी । उरगेशा पद्मनाभा पद्मनाभप्रसूः प्रजा ॥३८॥
तोरणा तुलसी दीक्षा दक्षा दाक्षायणी द्युतिः । संपुटा शयना शय्या शासना शमनांतका ॥३९॥
श्यामाकवर्णा शार्दूली शष्पनीतांशुवल्लभा । स्तुत्या प्रणीता नियतिः कंपना कंपहारिणी ॥४०॥
चंपका भूधरा चीना दीना दीनजनप्रिया । वसुंधरा वासवेशी वसुनाथा वटेश्वरी ॥४१॥
समुद्रासंगमा पूर्णा तरला तरुवासिनी । पार्वती पामरी मान्या माननीया मधुप्रिया ॥४२॥
माधवी मधुपानस्था मंदिरा मंदुरा मृगी । ममर्षाभिरुषा रेवा रेवती रमणी रमा ॥४३॥
ऋद्धिहस्ता सिद्धिहस्ता चान्नपूर्णा महेश्वरी । अणुरूपा जगज्ज्योतिः समस्तासुरघातिनी ॥४४॥
गारुडी गगनालंबा लंबमानकचप्रिया । पीतांबरा पीतपुष्पा पूतना गीतवल्लभा ॥४५॥
बलाका जगदंता च जरा जयवरप्रदा । प्रीतिः कठोरवदना करालरदना रमा ॥४६॥
जिह्वाहस्ता च बगला प्रणया विनयप्रदा । कीरी करालदेहा च शेमुषी मक्षिका मषी ॥४७॥
उत्तीर्णा तर्णिका तीक्ष्णा श्लक्ष्णा कामेश्वरी शिवा । शिवपत्नी सरोजाक्षी पद्महस्ता सरस्वती ॥४८॥
तथ्या पथ्यकरी रथ्या रथस्था विततस्वरा । महती रागिणी मार्गी शुचिहासा हरीश्वरी ॥४९॥
हरिद्रलांशुलसिता लक्ष्मीनायकसुंदरी । अंबालिकांबा देवेशी ह्यनद्याग्निशिखा श्रुतिः ॥५०॥
अलसाल्पगतिश्चांत्यानंतानंतगुणाश्रया । आद्या चादित्यसंकाशा ह्यादित्यकुलसुंदरी ॥५१॥
आत्मरूपाधिशमिनी चादिमायादिदेवता । इंद्रप्रसूरिनद्योतिरिनाग्निशशिलोचना ॥५२॥

उमा उर्वी उरुभुजा उत्तुंगा चोक्षवाहजा । उत्तंका चोत्तमा ध्येया उल्लासा चोरुगर्विणी ॥५३॥
ऊष्मा ऊर्णा च गुर्वंगी ऊर्ध्वाक्षी ऊर्ध्वमस्तका । ऋद्धिश्चर्वा ऋवर्णेशी ऋणहर्त्री च वार्तकी ॥ ५४॥
ऋद्धिजा चारुवस्त्रा च ऋणिवासा महालसा । लृकारा लृक्वुरा लीना लृकारवरधारिणी ॥५५॥
एणांकमुकुटा चेहा चारुचंद्रकला कला । ऐंकारगतिरैश्वर्यदायिनी चेश्वरी गतिः ॥ ५६॥
ॐकारबीजरूपा च औत्रिकी बीजधारिणी । अंबिका लंपिकांबा च अस्वरोद्गाररूपिणी ॥५७॥
काली च भद्रकाली च कालिका कालवल्लभा । कदंबनिलया कंथा कांचीमंडनमंडिता ॥५८॥
कलंकरहिता कूर्पा कांचनाभा करीरगा । कनकाचलवासा च कारुण्याकुलमानसा ॥५९॥
कुलस्था कौलिनी कल्या कुरुकुल्ला कपालिनी । कपालकुलनिर्विण्णा क्रेंकरा कंजलोचना ॥६०॥
खंजनाक्षी खड्गधरा खेटकायुधभूषणा । खर्पराढ्या च खलहा खेटिनी खेचरी खगा ॥६१॥
खगायुधा खगगतिः खकाराशरभूषणा । गणाध्यक्षा गजगतिर्गणेशजननी गदा ॥६२॥
गोधा गदाधरप्राज्या गगनेशी महीमला । घुर्घुरा घटभूर्घूका घुसृणाभा घनेश्वरी ॥६३॥
घनसारप्रिया साम्या घवर्णरुतभूषणा । चांद्री चंद्रस्तुता चार्वी चंद्रिका चंडनिःस्वना ॥६४॥
चंचरीकस्वना देवी चंचच्चामीकरांगदा । छत्रिकाच्छुरिका छच्छा छत्रचामरभूषणा ॥६५॥
ज्रीकारी जलजिह्वा च जृंभिका जलयोगिनी । जटाजूटधरा जातिर्जातीपुष्पसमानना ॥६६॥
जलेश्वरी जगद्ध्येया जानकी जननी जटा । झंझाझरी झरत्कारी जरत्कांची त्वकिंकिणी ॥६७॥
झिटिका झंपकृज्झंपा झंपत्रासनिवारिणी । ञणुरूपा ञक्वहस्ता ञकाराक्षरसंमता ॥६८॥
टंकायुधा महातथ्या टंकारा करुणा सती । ठक्वुरा ठत्करा ठानी डिंडीरवसना डला ॥६९॥
ढंडानिलमयी ढंडा ढणत्कारकरा ढसा । णांतानणी णीलायुधा णवर्णाक्षरभूषणा ॥७०॥
तरुणी तुंदिला तोदा तामसी तामसप्रिया । ताम्राननना ताम्रकरा ताम्रांबरधरा तुला ॥ ७१॥
तापत्रयहरी तापी तैलासक्ता तिलोत्तमा । स्थाणुपत्नी स्थली स्थ— स्थितिः स्थैर्यधरा स्थुला ॥७२॥
दंतिनी दंतुरा दावी देवकी देवनायिका । दामिनी दमिनी दंड्या दंडहस्ता दुरानतिः ॥७३॥
दुर्वारा दुर्गतिर्द्राक्षी द्राक्षा द्रविडवासिनी । दूरस्था दुंदुभिध्वाना दरदा दरनाशिनी ॥७४॥
दुःखघ्नी च द्रुगा त्रष्ट्री दया दांभिकनाशिनी । धर्म्या धर्मप्रसूर्धन्या धनदा धातृवल्लभा ॥७५॥
धनुर्धरा धनुर्वल्ली धनुष्कवरदायिनी । धूमाली धूम्रवदना धूमश्रीर्धूम्रलोचना ॥७६॥
नलिनी नर्तकी नांतानंगा नलिनलोचना । निर्मला निगमाचारा निम्नगा नगजा नमिः ॥७७॥
नीलग्रीवा निरीहा च नीपोपवनवासिनी । निरंजनजनिर्जन्या निद्रालुर्नीरवासिनी ॥७८॥
नटिनी नाट्यनिरता नवनीतप्रियानिला । नारायणी निराकारा निर्लेपा नित्यवल्लभा ॥७९॥
पद्मावती पद्मकरा पुत्रदा पुत्रवत्सला । परोत्तरा पुरी पाठा पीनश्रोणिः पुलोमजा ॥८०॥
पुष्पिणी पुस्तककरा पटुः पाटीरवाहना । पापघ्नी पद्मिनी पाली पली परमसुंदरी ॥८१॥
पिशाची च पिशाचघ्नी पानपात्रधरा पुटा । पूर्णिमा पंचमी पौत्री पुरूरववरप्रदा ॥८२॥

पंचयज्ञा पंचशरी पंचाशन्मनुवल्लभा । पांचली पंचपुत्रा च पूर्णा पूर्णमनोरथा ॥८३॥
फलिनी फलदात्री च फलहस्ता फणिप्रिया । फिरंगहा स्फीतमतिः स्फीतिः स्फीतिमती स्फुरा ॥८४॥
बलमाया बलस्तन्या बिल्वसेना बलाबला । बगलेश्वरपूज्या च बलिनी बलवर्धिनी ॥८५॥
बुद्धमाता बौद्धमतिर्बद्धा बंधनमोचिनी । भगिनी भगमाला च भगलिङ्गामृतस्त्रवा ॥८६॥
भीमेश्वरी च भेरुण्डा भगेशी भगमर्षिणी । भगलिंगस्थिता भग्या भाग्यदा भगमालिनी ॥८७॥
मत्ता मनोहरा मेना मैनाकजननी मुरी । मुरली मानवी मोक्री मनस्विजनमोदिता ॥८८॥
मत्तमातंगगा माद्री मरालगतिमंजुला । यज्ञेश्वरीश्वरीयज्ञा यजुर्वेदप्रियाश्रिता ॥८९॥
यशोवती यतिस्था च यतिस्थायतिवल्लभा । यवनी यौवनस्था च यवा यक्षजनाश्रया ॥९०॥
यज्ञसूत्रप्रदा ज्येष्ठा यज्ञभूर्यूपमालिनी । रंजिता राजपत्नी च राजसूयफलप्रदा ॥९१॥
रजोवती रजश्चित्रा राज्यदा राज्यवर्धिनी । राज्ञी रात्रिंचरेशानी रोगघ्नी त्रिपुरेश्वरी ॥९२॥
ललिता ललितालापा लोपा ललनलालसा । लाटीरद्रुममासा च लाटीरद्रुमवर्तिनी ॥९३॥
लंका ललज्जटाजूटा लंघिता सुरसुंदरी । लोकेशवरदा लीना लयकर्त्री महालया ॥९४॥
वेदिर्विनग्ना वाणी च वेणा वेणुर्वनेश्वरी । वंद्यमाना ववर्णाढ्या वाराही वीरमातृका ॥९५॥
शंखिनो शंख वलया शंखायुधधरा शमा । शशिमंडलमध्यस्था शीतलांबुनिवासिनी ॥ ९६॥
श्मशानस्था महाघोरा श्मशाननिलयेश्वरी । सिंधुः सूत्रधरा सत्रा समस्तकुलचारिणी ॥९७॥
सप्तमी सात्त्विकी सत्त्वा सूत्रस्थासुरसूदिनी । सुरेश्वरी संपदाद्या समस्ताचल चारिणी ॥ ९८॥
समदा संमसिः संमा सवना सवनेश्वरी । हंसी हरिप्रिया हास्या हरिनेत्रा हरांबिका ॥९९॥
हेषा हटीश्वरी हीरा हलिनी हलदायिनी । हे हाहा हारवा हाला हालाहलहताशया ॥१००॥
क्षेमा क्षेमप्रदा क्षामा क्षौमांबरधराक्षया । क्षितिः क्षीरप्रिया लक्ष्या क्षितिभृत्क्षणदा क्षुधा ॥१०१॥
क्षत्रिया ब्राह्मणी क्षेत्रा क्षपा क्षंबीजमंडिता । लक्ष्यबीजस्वरूपा च क्षकाराक्षरमातृका ॥१०२॥
दुर्गाद्यनाशिनी दूर्वा दुर्गमा दुर्गनाशिनो । दुर्गा दुर्गार्तिनाशनी ॐ ह्रीं दुं बीजमंडिता ॥१०३॥
इति नामसहस्रं तु मंत्रगर्भं महाफलम् । दुर्गाया दुर्गतिहरं सर्वदेवनमस्कृतम् ॥१०४॥
सर्वमंत्रमयं दिव्यं देवदानवपूजितम् । श्रेयस्करं महापुण्यं महापातकनाशनम् ॥१०५॥
यः पठेत्पाठयेद्वापि शृणोति श्रावयेत्तथा । स महापातकैर्मुक्तो देवदानवसेवितः ॥१०६॥
इहलोके सुखं भुक्त्वा परत्र त्रिदिवं व्रजेत् । दुर्गानामसहस्रं तु मूलमंत्रैकसाधनम् ॥१०७॥
अर्धरात्रे पठेद्वीरो मधुरं भवसेवितम् । त्रिवारं वर्मपूर्वं तु भवेद्वागीशसन्निभः ॥१०८॥
यः पठेद्देवि मध्याह्ने स्त्रीयुतो मुक्तकुंतलः । तस्य वैरिकुलं त्रस्येद्दर्शनादेव नश्यति ॥१०९॥
दहनादिव देवेशि पतंगकुलमद्रिजे । यः पठेद्वेतसीमूले सायं पूजितभैरवः ॥११०॥
तस्यास्यकुहराद्वाणी निःसरेद्गद्यपद्यभाक् । यः पठेत्सततं देवि शयने स्त्रीरताकुलः ॥१११॥
स भवेद्वैरिविध्वंसी धनेन धनदोपमः । वाग्भिर्वागीशसदृशः कवित्वेन सितोपमः ॥११२॥

ॐ ह्रीं ह्रीं शक्ति रां रां राकिनि लां लां लाकिनि ह्रां ह्रां हाकिनि कां कां काकिनि क्षिस क्षिस वद वद उत्तरतत्त्वविग्रहे कराल स्वरूपे आदिविद्ये महाकालमहिषि क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं दक्षिणकालिके क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहा ॐ ऐं ह्रीं श्रीं ॐ क्रीं हूं ह्रीं मम पुत्रान् रक्ष रक्ष ममोपरि दुष्टबुद्धिम् दुष्ट प्रयोगान् कुर्व्वन्ति कारयन्ति करिष्यन्ति तान् हन हन मम मन्त्रसिद्धिं कुरु कुरु मम दुष्टं विदारय विदारय मम दारिद्र्यं हन हन पापं मथ मथ आरोग्यं कुरु कुरु आत्मतत्वं देहि देहि हंसः सोहम् क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहा नवकोटिस्वरूपे आद्ये आदिविद्ये अनिरुद्धसरस्वति स्वात्मचैतन्यं देहि देहि मम हृदये तिष्ठ तिष्ठ मम मनोरथं कुरु कुरु स्वाहा।

॥ अथ श्रीकाली कर्पूर स्तोत्रम् ॥

इस स्तोत्र में कई मंत्रों का मंत्रोद्धार है एवं इस पर कई भाष्य व टीकाएं हो चुकी है। यह स्तोत्र कर्पूर की तरह सुगंधित अर्थात् आनंददायी स्तोत्र है एवं भगवती ''कर-पूर'' कर तरह साधक को शीघ्र सद्य हो दक्षिणा फल प्रदान करती है।

कर्पूरंमध्यमान्त्यस्वरपरिरहितं सेन्दुवामाक्षि युक्तं । वीजं ते मातरेतत्त्रिपुरहर वधु त्रिः कृतं ये जपन्ति ॥
तेषांगद्यानिपद्यानिचमुखकुहरा दुल्लसन्त्येव वाचः । स्वच्छन्दं ध्वान्तधाराधररुचि रुचिरे सर्वसिद्धिं गतानाम् ॥१॥
ईशानः सेन्दुवामश्रवणपरिगतो वीजमन्यन्महेशि । द्वन्द्वं ते मन्दचेता यदि जपति जना वार मेकं कदाचित् ॥
जित्वा वाचामधीशं धनदमपिचिरं मोह यन्नम्बुजाक्षी । वृन्दं चन्द्रार्द्ध चूडे प्रभवति स महाघोर वाणावतंसे ॥२॥
ईशोवैश्वानरस्थः शशधर विलसद् वाम नेत्रेण युक्तो । वीजं ते द्वन्द्वमन्यद्विगलित चिकुरे कालिके ये जपन्ति ॥
द्वेष्टारं घ्नन्ति ते च त्रिभुवनमपि ते वश्यभावं नयन्ति । सृक्वद्वन्द्वास्त्रधाराद्वयधरवदने दक्षिणे कालिके ति ॥३॥
ऊर्ध्वे वामे कृपाणं करकमलतले छिन्नमुण्डं तथाधः । सव्ये चाभीर्वरं च त्रिजगदघहरे दक्षिणे कालिके च ॥
जप्त्वैतन्नाम ये वा तव मनुविभवं भावयन्त्येतदम्ब । तेषामष्टौ करस्थाः प्रकटितरदने सिद्धयस्त्र्यम्बकस्य ॥४॥
वर्गाद्यं वह्निसंस्थं विधुरति वलितं तत्त्रयं कूर्च युग्मं । लज्जाद्वन्द्वं च पश्चात् स्मितमुखितदधष्ठ द्वयं योजयित्वा ॥
मातर्ये ये जपन्ति स्मरहरमहिलेभावयन्तःवरूपं । ते लक्ष्मी लास्य लीला कमल दलदृशः कामरूपा भवन्ति ॥५॥
प्रत्येकं वा त्रयं वा द्वयमपि च परं वीजमत्यन्त गुह्यं । त्वन्नामना योजयित्वा सकलमपि सदा भावयन्तो जपन्ति ॥
तेषां नेत्रारविन्दे विहरति कमला वक्त्रशुभ्रांशुबिम्बे । वाग्देवी देवमुण्डस्त्रगतिशयलसत् कण्ठिपीनस्तनाढये ॥६॥
गतासूनां बाहु प्रकरकृतकाञ्ची परिलसन्नितम्बां दिग्वस्त्रां त्रिभुवन विधात्रीं त्रिनयनाम् ।
श्मशानस्थे तल्पे शवहृदि मकालसुरत प्रसक्तांत्वां ध्यायन् जननि जडचेता अपि कविः ॥७॥
शिवाभिर्घोराभिः शवनिवहमुण्डास्थिनिकरैः, परं सङ्कीर्णायां प्रकटित चितायां हरवधूम् ।
प्रविष्टां सन्तुष्टामुपरिसुरतेनाति युवति, सदात्वां ध्यायन्ति क्वचिदपि न तेषां परिभवः ॥८॥
वदामस्ते किं वा जननि वयमुच्चैर्जडधियो न धीता नापीशो हरिरपि नतेवेत्ति परयम् ।
तथापि त्वद्भक्तिर्मुखरयति चास्माकमसिते, तदेतत् क्षन्तव्यं न खलु पशुरोषः समुचितः ॥९॥
समन्तादापीनस्तनजघनधृग् यौवनवती, रतासक्तो नक्तं यदि जपति भक्तस्तव मनुम् ।
विवासास्त्वां ध्यायन् गलित चिकुरस्तस्त वशगाः, समस्ताः सिद्धौघा भुवि चिरतरं जीवति कविः ॥१०॥
समाः सुस्थीभूतां जपति विपरीतां यदि सदा, विचिन्त्य त्वां ध्यायन्नतिशयमहाकाल सुरताम् ।
तदा तस्य क्षौणीतल विहारभाणस्य विदुषः, कराम्भोजे वश्या हरवधु महासिद्धि निवहाः ॥११॥
प्रसूते संसारं जननि जगतीं पालयति च, समस्तं क्षित्यादि प्रलय समये संहरति च ।
अतस्त्वं धातापिं त्रिभुवनपतिः श्रीपतिरहो, महेशोऽपि प्रायः सकलमपि किं स्तौमि भवतीं ॥१२॥
अनेके सेवन्ते भवदधिक गीर्वाणनिवहान्, विमूढास्ते मातः किमपिं नहि जानन्ति परमम् ।
समाराध्यामाद्यां हरिहरविरिञ्च्यादि विबुधैः, प्रपन्नोऽस्मि स्वैरं रतिरसमहानन्द निरताम् ॥१३॥
धरित्री कीलालं शुचिरपि समीरोऽपि गगनं, त्वमेका कल्याणी गिरिशरमणी कालि सकलम् ।
स्तुतिः का ते मातस्तव करुणया मामगतिकं, प्रसन्ना त्वं भूया भवमनु न भूयान्मम जनुः ॥१४॥

॥ अथ श्रीकाली कर्पूर स्तोत्रम् ॥

इस स्तोत्र में कई मंत्रों का मंत्रोद्धार है एवं इस पर कई भाष्य व टीकाएं हो चुकी है। यह स्तोत्र कर्पूर की तरह सुगंधित अर्थात् आनंददायी स्तोत्र है एवं भगवती ''कर-पूर'' कर तरह साधक को शीघ्र सद्य हो दक्षिणा फल प्रदान करती है।

कर्पूरंमध्यमान्त्यस्वरपरिरहितं सेन्दुवामाक्षि युक्तं । वीजं ते मातरेतत्त्रिपुरहर वधु त्रिः कृतं ये जपन्ति ॥
तेषांगद्यानिपद्यानिचमुखकुहरा दुल्लसन्त्येव वाचः । स्वच्छन्दं ध्वान्तधाराधररुचि रुचिरे सर्वसिद्धिं गतानाम् ॥१॥
ईशानः सेन्दुवामश्रवणपरिगतो वीजमन्यन्महेशि । द्वन्द्वं ते मन्दचेता यदि जपति जना वार मेकं कदाचित् ॥
जित्वा वाचामधीशं धनदमपिचिरं मोह यन्नम्बुजाक्षी । वृन्दं चन्द्रार्द्ध चूडे प्रभवति स महाघोर वाणावतंसे ॥२॥
ईशोषैश्वानरस्थः शशधर विलसद् वाम नेत्रेण युक्तो । वीजं ते द्वन्द्वमन्यद्विगलित चिकुरे कालिके ये जपन्ति ॥
द्वेष्टारं घ्नन्ति ते च त्रिभुवनमपि ते वश्यभावं नयन्ति । सृक्कद्वन्द्वास्त्रधाराद्वयधरवदने दक्षिणे कालिके ति ॥३॥
ऊर्ध्वे वामे कृपाणं करकमलतले छिन्नमुण्डं तथाधः । सव्ये चाभीर्वरं च त्रिजगदघहरे दक्षिणे कालिके च ॥
जप्त्वैतन्नाम ये वा तव मनुविभवं भावयन्त्येतदम्ब । तेषामष्टौ करस्थाः प्रकटितरदने सिद्धयस्त्र्यम्बकस्य ॥४॥
वर्गाद्यं वह्निसंस्थं विधुरति वलितं तत्त्रयं कूर्च युग्मं । लज्जाद्वन्द्वं च पश्चात् स्मितमुखितदधष्ठ द्वयं योजयित्वा ॥
मातर्ये ये जपन्ति स्मरहरमहिलेभावयन्तःवरूपं । ते लक्ष्मी लास्य लीला कमल दलदृशः कामरूपा भवन्ति ॥५॥
प्रत्येकं वा त्रयं वा द्वयमपि च परं वीजमत्यन्त गुह्यं । त्वन्नामना योजयित्वा सकलमपि सदा भावयन्तो जपन्ति ॥
तेषां नेत्रारविन्दे विहरति कमला वक्त्रशुभ्रांशुबिम्बे । वाग्देवी देवमुण्डस्त्रगतिशयलसत् कण्ठिपीनस्तनाढये ॥६॥
गतासूनां बाहु प्रकरकृतकाञ्ची परिलसन्नितम्बां दिग्वस्त्रां त्रिभुवन विधात्रीं त्रिनयनाम् ।
श्मशानस्थे तल्पे शवहृदि मकालसुरत प्रसक्तांत्वां ध्यायन् जननि जडचेता अपि कविः ॥७॥
शिवाभिर्घोराभिः शवनिवहमुण्डास्थिनिकरैः, परं सङ्कीर्णायां प्रकटित चितायां हरवधूम् ।
प्रविष्टां सन्तुष्टामुपरिसुरतेनाति युवति, सदात्वां ध्यायन्ति क्वचिदपि न तेषां परिभवः ॥८॥
वदामस्ते किं वा जननि वयमुच्चैर्जडधियो न धीता नापीशो हरिरपि नतेवेत्ति परयम् ।
तथापि त्वद्भक्तिर्मुखरयति चास्माकमसिते, तदेतत् क्षन्तव्यं न खलु पशुरोषः समुचितः ॥९॥
समन्तादापीनस्तनजघनधृग् यौवनवती, रतासक्तो नक्तं यदि जपति भक्तस्तव मनुम् ।
विवासास्त्वां ध्यायन् गलित चिकुरस्तस्त वशगाः, समस्ताः सिद्धौघा भुवि चिरतरं जीवति कविः ॥१०॥
समाः सुस्थीभूतां जपति विपरीतां यदि सदा, विचिन्त्य त्वां ध्यायन्नतिशयमहाकाल सुरताम् ।
तदा तस्य क्षौणीतल विहारभाणस्य विदुषः, कराम्भोजे वश्या हरवधु महासिद्धि निवहाः ॥११॥
प्रसूते संसारं जननि जगतीं पालयति-च, समस्तं क्षित्यादि प्रलय समये संहरति च ।
अतस्त्वं धातापिं त्रिभुवनपतिः श्रीपतिरहो, महेशोऽपि प्रायः सकलमपि किं स्तौमि भवतीं ॥१२॥
अनेके सेवन्ते भवदधिक गीर्वाणनिवहान्, विमूढास्ते मातः किमपिं नहि जानन्ति परमम् ।
समाराध्यामाद्यां हरिहरविरिञ्च्यादि विबुधैः, प्रपन्नोऽस्मि स्वैरं रतिरसमहानन्द निरताम् ॥१३॥
धरित्री कीलालं शुचिरपि समीरोऽपि गगनं, त्वमेका कल्याणी गिरिशरमणी कालि सकलम् ।
स्तुतिः का ते मातस्तव करुणया मामगतिकं, प्रसन्ना त्वं भूया भवमनु न भूयान्मम जनुः ॥१४॥

श्मशानस्थः सुस्थो गलित चिकुरो दिक्पटधरः, सहस्त्रस्त्वर्काणां निजगलितवीर्येण कुसुमम् ।
जपंस्त्वप्रत्येकं मनुमपि तव ध्यान निरतो, महाकालि स्वैरं स भवति धरित्रीपरिवृढः ॥१५॥
गृहे सम्मार्जन्या परिगलित वीर्यं हि चिकुरं, समूलं मध्याह्ने वितरति चितायां कुजदिने ।
समुच्चार्य प्रेम्ना मनुमपि सकृत् कालि सततं, गजारूढो याति क्षिति परिवृढः सत्कविवरः ॥१६॥
सुपुष्पैराकीर्णं कुसुमधनुषो मन्दिर महो, पुरोध्यायं ध्यायं यदि जपति भक्तस्तव मनुम् ।
स गंधर्व श्रेणीपतिरपि कवित्वामृतनदी, नदीनः पर्यन्ते परमपदलीनः प्रभवतिं ॥१७॥
त्रिपञ्चारे पीठ शवशिवहृदि स्मेरवदनां, महाकालेनोच्चैर्मदनरसलावण्य नियताम् ।
समासक्तो नक्तं स्वयमपि रतानन्दनिरतो, जनो यो ध्यायेत्त्वामयि जननि स स्यात् स्मरहरः ॥१८॥
सलोमस्थि स्वैरं पललमपि मार्जारमसिते, परञ्चौष्ट्रं मैषं नरमहिष योश्छारमपि वा ।
बलिं ते पूजायामपि वितरतां मर्त्यवसतां, सतां सिद्धिः सर्वा प्रतिपदमपूर्वं प्रभवति ॥१९॥
वशी लक्षं मन्त्रं प्रजापति हविष्याशनरतो, दिवा मातर्युष्मच्चरण युगलध्यान निपुणः ।
परं नक्तं नग्नो निधुवनविनोदेन च मनुं, छवेल्लक्षं स स्यात् स्मरहर समानः क्षितितले ॥२०॥
इदं स्तोत्रं मातस्तव मनुसमुद्धारण जनुः, स्वरूपाख्यं पादाम्बुजयुगल प्जाविधियुतम् ।
निशार्द्धं वा पूजासमयमधि वा यस्तु पठति, प्रलापस्तस्यापि प्रसरति कवित्वामृतरसः ॥२१॥
कुरङ्गाक्षीवृकं तमनुसरसि प्रेमतरलं, वशस्तस्य क्षौणीपतिरपि कुबेरप्रतिनिधिः ।
रिपुः कारागारं कलयति च तं केलिकलया, चिरं जीवन्मुक्तः स भवति च भक्तः प्रतिजनुः ॥२२॥

॥ इति श्रीमहाकाल विरचितं स्वरूपाख्यं श्रीकाली कर्पूर स्तोत्रम् समाप्तम् ॥

॥ अथ श्री काली क-कारादि शतनाम् स्तोत्र ॥

श्रृणु देवि जगद्वन्धे स्तोत्रमेतदनुमत्तमम् । पठनाच्छ्रव[illegible]दस्य सर्वसिद्धीश्वरो भवेत् ॥
असौभाग्य प्रशमनं सुखसम्पद्विवर्धनम् । अकालमृत्यु हरणं सर्वापद्विनिवारणम् ॥
श्रीमदाद्या कालिकायाः सुखसान्निध्यकारणम् । स्तवस्यास्य प्रसीदेन त्रिपुरारिरहं प्रिये ॥
स्तोत्रस्याय ऋषिर्देवि सदाशिव उदाहृतः । छन्दो ऽनुष्टुप्देवताद्या कालिका परिकीर्तिता ॥
धर्मकामार्थमोक्षेषु विनियोगः प्रकीर्तितः ॥

इस स्तोत्र के ऋषि सदाशिव है छन्द अनुष्टुप है देवता आद्याकाली है तथा धर्म काम अर्थ और माक्ष की प्राप्ति में इसका विनियोग है।

॥स्तोत्रम्॥

ह्रीं काली श्रीं कराली च क्रीं कल्याणी कलावती । कमला कलिदर्पघ्नी कपर्दीश कृपान्विता ॥
कालिका कालमाता च कालानल समद्युतिः । कपर्दिनी करालास्या करुणामृतसागरा ॥
कृपामयी कृपाधारा कृपापारा कृपागमा । कृशानुः कपिला कृष्णा कृष्णानन्दविवर्द्धिनी ॥

कालरात्रिः कामरूपा कामपाश विमोचिनी । कादम्बिनी कलाधारा कलिकल्मषनाशिनी ॥
कुमारी पूजन प्रीता कुमारी पूजकाल्या । कुमारी भोजनानन्दा कुमारीरूपधारिणी ॥
कदम्बवनसञ्चारा कदम्बवनवासिनी । कदम्बपुष्पसन्तोषा कदम्बपुष्पमालिनी ॥
किशोरी कलकण्ठा च कलनादनिनादिनी । कादम्बरी पानरता तथा कादम्बरीप्रिया ॥
कपालपात्र निरता कंकालमाल्य धारिणी । कमलासन सन्तुष्टा कमलासन वासिनी ॥
कमलालय - मध्यस्था कमलामोद - मोदिनी । कलहंसगतिः क्लैव्यनाशिनी कामरूपिणी ॥
कामरूपकृतावासा कामपीठ विलासिनी । कमनीया कल्पलता कमनीय विभूषणा ॥
कमनीय गुणाराध्या कोमलाङ्गी कृशोदरी । कारणामृत सन्तोषा कारणानन्द सिद्धिदा ॥
कारणानन्दजापेष्टा कारणार्चन हर्षिता । कारणार्णव सम्मग्ना कारणव्रत पालिनी ॥
कस्तूरीसौरभा मोदा, कस्तूरी तिलकोज्ज्वला । कस्तूरी पूजनरता कस्तूरी पूजनप्रिया ॥
कस्तूरी दाहजननी, कस्तूरी मृगतोषिणी । कस्तूरीभोजन प्रीता, कर्पूरामोद मोदिता ॥
कर्पूरमालाभरणा कर्पूरचदनोक्षिता । कर्पूरकारणाह्लादा कर्पूरामृत - पायिनी ॥
कर्पूरसागर - स्नाता कर्पूरसागरालया । कूर्चबीजजपप्रीता कूर्चजाप परायणा ॥
कुलीना कौलिकाराध्या कौलिक प्रियकारिणी । कुलाचारा कौतुकिनी कुलमार्ग प्रदर्शिनी ॥
काशीश्वरी कष्टहर्त्री काशीश्वर दायिनी । काशीश्वरी कृतामोदा काशीवर मनोरमा ॥
कमलञ्जीरचरणा क्कणत्काञ्चीविभूषणा । काञ्चनाद्रिकृतागारा काञ्चनाचल कौमुदी ॥
कामबीज जपानन्दा कामबीज स्वरूपिणी । कुमतिघ्नी कुलीनार्तिनाशिनी कुल कामिनी ॥
क्रीं ह्रीं श्रीं मंत्रवर्णेन कालकण्टक घातिनी ॥
इत्याद्याकालिका देव्याः शतनाम प्रकीर्तितम् । ककारकूटघटितं कालीरूप स्वरूपकम् ॥
पूजाकाले पठेद्यस्तु कालिकाकृतमानसः । मंत्रसिद्धि र्भवेदाशु तस्य काली प्रसीदति ॥
बुद्धि विद्या च लभते गुरोरादेशमात्रतः । धनवान् कीर्तिमान् भूयाद्दानशीलो दयान्वितः ॥
पुत्रपौत्र सुखैश्वर्यैर्मोदते साधको भुवि । भौमावास्या निशाभागेमपञ्चक समन्वितः ॥
पूजयित्वा महाकालीमाद्यां त्रिभुवनेश्वरीम् । पठित्वा शतनामानि साक्षात्कालीमयो भवेत् ॥
नासाध्यं विद्यते तस्य त्रिषु लोकेषु किञ्चन । विद्यायां वाक्पतिः साक्षात् धने धनपतिर्भवेत् ॥
समुद्र इव गाम्भीर्ये बले च पवनोपमः । तिग्मांशुरिव दुष्प्रेक्ष्यः शशिवच्छुभदर्शनः ॥
रूपे मूर्तिधारः कामो योषितां हृदयङ्गमः । सर्वत्र जयमाप्नोति स्तवस्यायः प्रसादतः ॥
यं यं कामं पुरस्कृत्य स्तोत्रमेतदुदीरयेत् । तं तं काममवाप्नोति श्रीमदाद्याप्रसादतः ॥
रणे राजकुले द्यूते विवादे प्राणसंकटे । दस्युग्रस्ते ग्रामदाहे सिंहव्याघ्रावृते तथा ॥
अरण्ये प्रान्तरे दुर्गे ग्रहराज भयेऽपि वा । ज्वरदाहे चिरव्याधौ महारोगादि संकुले ॥

बालग्रहादि रोगे च तथा दुःस्वप्नदर्शने । दुस्तरे सलिले वापि पोते वातविपद्गते ॥
विचिन्त्य परमां मायामाद्यां कालीं परात्पराम् । यः पठेच्छतनामानि दृढ़भक्ति समन्वितः ॥
सर्वापद्भयो विमुच्येत देवि सत्यं नं संशयः । न पापेभ्यो भयं तस्य न रोगोभ्यो भयं क्वचित् ॥
सर्वत्र विजयस्तस्य न कुत्रापि पराभवः । तस्यदर्शन मात्रेण पलायन्ते विपदगणाः ॥
स वक्ता सर्वशास्त्राणां स भोक्ता सर्वसम्पदाम् । स कर्ता जाति धर्माणं ज्ञातीनां प्रभुरेव सः ॥
वाणी तस्य वसेद्वक्त्रे कमला निश्चला गृहे । तन्नाम्ना मानवाः सर्वे प्रणमन्ति ससम्भ्रमा ॥
दृष्ट्या तस्य तृणायन्ते ह्यणिमाद्यष्ट सिद्धयः । आद्याकाली स्वरूपाख्यं शतनाम प्रकीर्तितम् ॥
अष्टोत्तरशतावृत्या पुरश्चर्यास्यि गीयते । पुरस्क्रियान्वितं स्तोत्रं सर्वाभीष्टफलप्रदम ॥
शतनामस्तुति मिमामाद्याकाली स्वरूपिणीम् । पठेद्वा पाठयेद्वापि श्रृणुयाच्छ्रावयेदपि ॥
सर्वपापविनिर्मुक्तो ब्रह्मसायुज्य माप्नुयात् ॥

॥ अथ काली ककारादि सहस्रनाम स्तोत्रम् ॥

इस स्तोत्र में कई मंत्रों का मंत्रोद्धार है। यथा - १. ॐ मधुमती स्थावर जंगमाकर्षिणी ठं ठं स्वाहा। २. ॐ ह्रीं पद्मावति त्रैलोक्य वार्ता कथय कथय स्वाहा। ३. ॐ मतसंजीवनी मृतमुथापयोत्थाय स्वाहा। ४. ह्रीं स्वप्न वाराहि कालि स्वप्ने अमुकस्यामुकमं देहि क्रीं स्वाहा। ५. ऐं घोरे आसापघोरे हूं घोररूपे महाघोरे भीममुखी भीषणयमुष्य ऐं ऐं शिवे फट् फट् स्वाहा।

कैलासशिखरे रम्ये नानादेवगणावृते । नानावृक्षलताकीर्णे नानापुष्पैरलंकृते ॥१॥
चतुर्मण्डलसंयुक्ते श्रृंगारमण्डपे स्थितम् । समाधौ संस्थितं शांतं क्रीडन्तं योगिनी प्रियम् ॥२॥
तत्र मौनधरं दृष्ट्वा देवी पृच्छति शंकरम् ।

॥ देव्युवाच ॥

किं त्वया जप्यते देव किं त्वया स्मर्य्यते सदा ॥३॥
सृष्टिः कुत्र विलीनास्ति पुनः कुत्र प्रजायते । ब्रह्माण्डकारणं यत्तत् किमाद्यं कारणं महत् ॥४॥
मनोरथमयी सिद्धिस्तथा वांछामयी शिव । तृतीया कल्पनासिद्धिः कोटिसिद्धीश्वरत्वकम् ॥५॥
शक्तिपाताष्टदशकं चराचरपुरीगतिः । महेन्द्रजालमिन्द्रादिजालानां रचना तथा ॥६॥
अणिमाद्यष्टकं देव पराकायप्रवेशनम् । नवीनसृष्टिकरणं समुद्रशोषणं तथा ॥७॥
अमायां चन्द्रसंदर्शोदिवा चन्द्रप्रकाशनम् । चन्द्राष्टकं चाष्टदिक्षु तथा सूर्याष्टकं शिव ॥८॥
जले जलमयत्वं च वह्नौ वह्निमयत्वकम् । ब्रह्मविष्ण्वादिनिर्माणमिन्द्राणां कारणं करे ॥९॥
पातालगुटिका यक्षवेतालपंचकं तथा । रसायनं तथा गुप्तिस्तथैव चाखिलांजनम् ॥१०॥
महामधुमती सिद्धिस्तथा पद्मावती शिव । तथा भोगवती सिद्धिर्यावत्यः संति सिद्धयः ॥११॥
केन मंत्रेण तपसा कलौ पापसमाकुले । आयुष्यं पुण्यरहिते कथं भवति तद्वद ॥१२॥

॥ श्रीशिव उवाच ॥

विना मंत्रं विना स्तोत्रं विनैव तपसा प्रिये । विना बलिं विना न्यासं भूतशुद्धिं विना प्रिये ॥१३॥
विना ध्यानं विना यंत्रं विना पूजादिना प्रिये । विना क्लेशादिभिर्देवि देहदुःखादिभिर्विना ॥१४॥
सिद्धिराशु भवेद्येन तदेव कथ्यते मया । शून्ये ब्रह्माण्डगोले तु पंचाशच्छून्यमध्यके ॥१५॥
पंचशून्यस्थिता तारा सर्वान्ते कालिका स्मृता । अनन्तकोटिब्रह्माण्ड राजदन्ताग्रके शिवे ॥१६॥
स्थाप्य शून्यालयं कृत्वा कृष्णवर्णं विधाय च । महानिर्गुणरूपा च वाचातीता परा कला ॥१७॥
क्रीडायां संस्थिता देवी शून्यरूपा प्रकल्पयेत् । सृष्टेरारंभकार्ये तु दृष्ट्वा छाया तया यदा ॥१८॥
इच्छाशक्तिस्तु सा जाता तया कालो विनिर्मितः । प्रतिबिम्बं तत्र दृष्टं जाता ज्ञानाभिधा तु सा ॥१९॥
इदमेतत्किं विशिष्टं जातं विज्ञानकं मुदा। तदा क्रियाभिधा जाता तदीक्षातो महेश्वरि ॥२०॥
ब्रह्माण्डगोले देवेशि राजदंतस्थितं च यत् । सा क्रिया स्थापयामास स्वस्वस्थानक्रमेण च ॥२१॥
तत्रैव स्वेच्छया देवि सामरस्यपरायणा । तदिच्छा कथ्यते देवि यथावदवधारय ॥२२॥
युगादिसमये देवि शिवं परगुणोत्तमम् । तदिच्छानिर्गुणं शांतं सच्चिदानन्दविग्रहम् ॥२३॥
शाश्वतं सुन्दरं शुक्लं सर्वदेवयुतं वरम् । आदिनाथं गुणातीतं काल्यां संयुतमीश्वरम् ॥२४॥
विपरीतरतं देवं सामरस्य परायणम् । पूजार्थमागतं देवगंधर्वाप्सरसाङ्गणम् ॥२५॥
यक्षिणीं किन्नरीमन्यामुर्वश्याद्यां तिलोत्तमाम् । वीक्ष्य तं मायया प्राह सुन्दरी प्राणवल्लभा ॥२६॥
त्रैलोक्य सुन्दरी प्राणस्वामिनी प्राणरंजिनी । किमागतं भवत्याऽद्य मम भाग्यार्णवो महान् ॥२७॥
उक्त्वा मौनधरं शंभुं पूजयंत्यप्सरोगणाः ।

॥ अप्सरस ऊचुः ॥

संसारात्तारितं देव त्वया विश्वजनप्रिय ॥२८॥
सृष्टेरारंभकार्यार्थमुद्युक्तोऽसि महाप्रभो । वेश्याकृत्यमिदं देव मंगलार्थप्रगायनम् ॥२९॥
प्रयाणोत्सवकाले तु समारंभे प्रगायनम् । गुणाद्यारंभकालो हि वर्त्तते शिवशङ्कर ॥३०॥
इन्द्राणीकोटयः संति तस्याः प्रसवबिंदुतः । ब्रह्माणी वैष्णवी चैव माहेशी कोटिकोटयः ॥३१॥
तव सामर सानन्द दर्शनार्थं समुद्भवाः । संजाताश्चाग्रतो देव चास्माकं सौख्य सागर ॥३२॥
रतिं हित्वा कामिनीनां नान्यत्सौख्यं महेश्वर । सा रतिर्दृश्यतेऽस्माभिर्महत्सौख्यार्थ कारिका ॥३३॥
एवमेतत्तु चास्माभिः कर्त्तव्यं भर्तृणा सह । एवं श्रुत्वा महादेवो ध्यानावस्थितमानसः ॥३४॥
ध्यानं हित्त्वा मायया तु प्रोवाच कालिकां प्रति । कालि कालि प्रिये रुण्डमाले भैरववादिनि ॥३५॥
शिवारूपधरे क्रूरे घोरदंष्ट्रे भयानके । त्रैलोक्यसुन्दरकरी सुन्दर्य्यः संति मेऽग्रतः ॥३६॥
सुन्दरीवीक्षणं कर्म कुरु कालि प्रिये शिवे । ध्यानं मुञ्च महादेवि ता गच्छंति गृहं प्रति ॥३७॥
तव रूपं महाकालि महाकालप्रियंकरम् । एतासां सुन्दरं रूपं त्रैलोक्यप्रियकारकम् ॥३८॥
एवं मायाप्रभाविष्टो महाकालो वदन्निति । ततः कालवचः श्रुत्वा कालं प्राह च कालिका ॥३९॥

माययाच्छाद्य चात्मानं निजस्त्रीरूपधारिणी । इतः प्रभृति स्त्रीमात्रंभविष्यति युगे युगे ॥४०॥
वल्याद्यौषधयो देव दिवा वल्लीस्वरूपताम् । रात्रौ स्त्रीरूपमासाद्य रतिकेलिं परस्परम् ॥४१॥
अज्ञानं चैव सर्वेषां भविष्यति युगे युगे । एवं शापं च दत्त्वा तु पुनः प्रोवाच कालिका ॥४२॥
विपरीतरतिं कृत्वा चिंतयंति भजंति ये । तेषां वरं प्रदास्यामि नित्यं तत्र वसाम्यहम् ॥४३॥
इत्युक्त्वा कालिका विद्या तत्रैवांतरधीयत् । त्रिंशत्त्रिखर्वषड्वृन्दन वत्यर्बुदकोटयः ॥४४॥
दर्शनार्थं तपस्तेपे सा वै कुत्र गता प्रिया । मम प्राणप्रिया देवी हाहा प्राणप्रिये शिवे ॥४५॥
किं करोमि क्वगच्छामि चेत्येवं भ्रमसंकुलः । तस्याः काल्या दया जाता मम चिंतापरः शिवः ॥४६॥
यंत्रप्रस्तारबुद्धिस्तु काल्यादत्तातिसत्वरम् । यंत्रयागं तदारभ्य पूर्वं बिन्दुत्वगोचरम् ॥४७॥
श्रीचक्रयंत्रप्रस्तार रचनाभ्यासतत्परः । इतस्ततो भ्राम्यमाणस्त्रैलोक्यं चक्रमध्यकम् ॥४८॥
चक्रपारदर्शनार्थं कोट्यर्बुदयुगं गतम् । भक्तप्राणप्रिया देवी महाश्रीचक्रनायिका ॥४९॥
तत्र बिन्दौ परं रूपं सुन्दरं सुमनोहरम् । रूपं जातं महेशानि जाग्रत् त्रिपुरसुन्दरि ॥५०॥
रूपं दृष्ट्वा महादेवो राजराजेश्वरोऽभवत् । तस्याः कटाक्षमात्रेण तस्या रूपधरः शिवः ॥५१॥
विनाशृंगारसंयुक्ता तदा जाता महेश्वरी । विना कल्यंशतो देवि जगत्स्थावरजंगमम् ॥५२॥
न शृङ्गारो न शक्तित्वं क्वापि नास्ति महेश्वरी । सुन्दर्या प्रार्थिता काली तुष्टा प्रोवाच कालिका ॥५३॥
सर्वासां नेत्रकेशे च ममांशोऽत्र भविष्यति । पूर्वावस्थासु देवेशि ममांशस्तिष्ठति प्रिये ॥५४॥
सावस्था तरुणाख्या तु तदंतेनैव तिष्ठति । मद्भक्तानां महेशानि सदातिष्ठति निश्चितम् ॥५५॥
शक्तिस्तु कुण्ठिता जाता तथा रूपं न सुन्दरम् । चिंताविष्टा तु मलिना जाता तत्र च सुन्दरी ॥५६॥
क्षणं स्थित्वा ध्यानपरा कालीचिंतनतत्परा । तदा काली प्रसन्नाऽभूत्क्षणार्द्धेन महेश्वरि ॥५७॥
वरं ब्रूहि वरं ब्रूहि वरं ब्रूहीति सादरम् ।

॥ सुन्दर्य्युवाच ॥

ममसिद्धिवरं देहि वरोऽयं प्रार्थ्यते मया ॥५८॥
तादृगुपायं कथय येन शक्तिर्भविष्यति ।

॥ श्रीकाल्युवाच ॥

मम नामसहस्त्रं च मया पूर्वं विनिर्मितम् ॥५९॥
मत्स्वरूपं ककाराख्यं महासाम्राज्यनामकम् । वरदानाभिधं नामक्षणार्द्धाद्वरदायकम् ॥६०॥
तत्पठस्व महामाये तव शक्तिर्भविष्यति । ततः प्रभृति श्रीविद्या तन्नामपाठतत्परा ॥६१॥
तदेव नामसाहस्त्रं सुन्दरीशक्तिदायकम् । कथ्यते नामसाहस्त्रं सावधानमनाः शृणु ॥६२॥
सर्वसाम्राज्यमेधाख्यनाम साहस्त्रकस्य च । महाकाल ऋषिः प्रोक्त उष्णिक् छन्दः प्रकीर्तितम् ॥६३॥
देवतादक्षिणा काली मायाबीजं प्रकीर्तितम् । हूँ शक्तिः कालिकाबीजं (क्रीं)कीलकं परिकीर्तितम् ॥६४॥
ध्यानं च पूर्ववत्कृत्वा साधय स्वेष्टसाधनम् ।

कालिकावरदानादिस्वेष्टार्थे विनियोगतः ॥
कीलकेन षडङ्गानि षड्दीर्घाब्जेन कारयेत् ॥६५॥

विनियोग :- ॐ अस्य श्रीसर्वसाम्राज्य मेधानामकालीरूपककारात्मक सहस्त्रनामस्तोत्र मंत्रस्य महाकाल ऋषिः, अनुष्टुप् छंदः, श्रीदक्षिणमहाकाली देवता, ह्रीं बीजं, हूँ शक्तिः, क्रीं कीलकं, कालीवरदानाद्यऽखिलेष्टार्थे पाठे विनियोगः।

ऋष्यादिन्यास :- ॐ महाकालऋषये नमः शिरसि, अनुष्टुप् छंदसे नमः मुखे, श्रीदक्षिणमहाकालीदेवतायै नमः हृदये, ह्रीं बीजाय नमः गुह्ये, हूँ शक्तये नमः पादयोः, क्रीं कीलकाय नमो नाभौ, विनियोगाय नमः सर्वाङ्गे। इति ऋष्यादिन्यासः।

करांगन्यास :- ॐ क्रां अंगुष्ठाभ्यां नमः। ॐ क्रीं तर्जनीभ्यां नमः। ॐ क्रूं मध्यमाभ्यां नमः। ॐ क्रैं अनामिकाभ्यां नमः। ॐ क्रौं कनिष्ठिकाभ्यां नमः। ॐ क्रः करतलकरपृष्ठाभ्यां नमः। इति करांगन्यासः।

हृदयादिषडङ्गन्यास :- ॐ क्रां हृदयाय नमः। ॐ क्रीं शिरसे स्वाहा। ॐ क्रूं शिखायै वषट्। ॐ क्रैं कवचाय हुम्। ॐ क्रौं नेत्रत्रयाय वौषट्। ॐ क्रः अस्त्राय फट्। इति हृदयादिषडङ्गन्यासः।

॥ अथ ध्यानम् ॥

ॐ करालवदनां घोरां मुक्तकेशीं चतुर्भुजाम्। कालिकां दक्षिणां दिव्यां मुण्डमालाविभूषिताम्।
सद्यश्छिन्नशिरः खड्गवामोर्ध्वाधः कराम्बुजाम्। अभयं वरदं चैव दक्षिणाधोर्ध्वपाणिकाम्।
महामेघप्रभां श्यामां तथा चैव दिगंबराम्। कण्ठावसक्त मुण्डालीगलद्रुधिरचर्चिताम्।
कर्णावतंसतानीत शवयुग्मभयानकाम्। घोरदंष्ट्राकरालास्यां पीनोन्नतपयोधराम्।
शवानां करसंघातैः कृतकांचीं हसन्मुखीम्। सृक्काद्वयगलद्रक्त धाराविस्फुरिताननाम्।
घोररूपां महारौद्रीं श्मशानालयवासिनीम्। दंतुरां दक्षिणव्यापिमुक्तलम्बकचोच्चयाम्।
शवरूपमहादेवहृदयोपरि संस्थिताम्। शिवाभिर्घोररूपाभिश्चतुर्दिक्षु समन्विताम्।
महाकालेन सार्द्धोर्द्धमुपविष्टरतातुराम्। सुखप्रसन्नवदनां स्मेराननसरोरुहाम् ॥
एवं संचिंतयेद्देवीं श्मशानालयवासिनीम् ॥६६॥

॥ अथ स्तोत्रम् ॥

ॐ क्रोंकाली क्रूँकराली चकल्याणी कमला कला।कलावती कालढ्या च कलापूज्या कलात्मिका ॥६७॥
कलादृष्टा कलापुष्टा कलामस्ता कलाकरा। कलाकोटिसमाभासा कलाकोटिप्रपूजिता ॥६८॥
कलाकर्म कलाधारा कलापारा कलागमा। कलाधारा कमलिनी ककारा करुणा कविः ॥६९॥
ककारवर्णसर्वांगी कलाकोटिप्रभूषिता। ककारकोटिगुणिता ककारकोटिभूषणा ॥७०॥
ककारवर्णहृदया ककारमनुमण्डिता। ककारवर्णनिलया काकशब्दपरायणा ॥७१॥
कवीरास्फालनरता कमलाकरपूजिता। कमलाकरनाथा च कमलाकररूपधृक् ॥७२॥
कमलाकरसिद्धिस्था कमलाकरपारदा। कमलाकरमध्यस्था कमलाकरतोषिता ॥७३॥

कथंकारपरालापा कथंकारपरायणा । कथंकारपदांतस्था कथंकारपदार्थभूः ॥७४॥
कमलाक्षी कमलजा कमलाक्षप्रपूजिता । कमलाक्षवरोद्युक्ता ककारा कर्बुराक्षरा ॥७५॥
करतारा करच्छिन्ना करश्यामा करार्णवा । करपूज्या कररता करदा करपूजिता ॥७६॥
करतोया करामर्षा कर्मनाशा करप्रिया । करप्राणा करकजा करका करकांतरा ॥७७॥
करकाचलरूपा च करकाचलशोभिनी । करकाचलपुत्री च करकाचलतोषिता ॥७८॥
करकाचलगेहस्था करकाचलरक्षिणी । करकाचलसम्मान्या करकाचलकारिणी ॥७९॥
करकाचलवर्षाढ्या करकाचलरंजिता । करकाचलकांतारा करकाचलमालिनी ॥८०॥
करकाचलभोज्या च करकाचलरूपिणी । करामलकसंस्था च करामलकसिद्धिदा ॥८१॥
करामलकसंपूज्या करामलकतारिणी । करामलककाली च करामलकरोचिनी ॥८२॥
करामलकमाता च करामलकसेविनी । करामलकबद्धयेया करामलकदायिनी ॥८३॥
कञ्जनेत्रा कञ्जगतिः कञ्जस्था कञ्जधारिणी । कञ्जमालाप्रियकरी कञ्जरूपा च कञ्जजा ॥८४॥
कञ्जजातिः कञ्जगतिः कञ्जहोमपरायणा । कञ्जमण्डलमध्यस्था कञ्जाभरणभूषिता ॥८५॥
कञ्जसंमाननिरता कञ्जोत्पत्तिपरायणा । कञ्जराशिसमाकारा कञ्जारण्यनिवासिनी ॥८६॥
करञ्जवृक्षमध्यस्था करञ्जवृक्षवासिनी । करञ्जफलभूषाढ्या करञ्जवनवासिनी ॥८७॥
करञ्जमालाभरणा करवालपरायणा । करवालप्रत्दृष्टात्मा करवालप्रिया गतिः ॥८८॥
करवालप्रिया कंथा करवालविहारिणी । करवालमयी कर्म्मा करवालप्रियंकरी ॥८९॥
कबन्धमालाभरणा कबन्धराशिमध्यगा । कबन्धकूटसंस्थाना कबन्धानंतभूषणा ॥९०॥
कबन्धनादसंतुष्टा कबंधासनधारिणी । कबंधगृहमध्यस्था कबन्धवनवासिनी ॥९१॥
कबंधकाञ्चीकरणी कबंधराशिभूषणा । कबंधमाला जयदा कबंधदेहवासिनी ॥९२॥
कबंधासनमान्या च कपालाकल्पधारिणी । कपालमालामध्यस्था कपालव्रततोषिता ॥९३॥
कपालदीपसंतुष्टा कपालदीपरूपिणी । कपालदीपवरदा कपालकज्जलस्थिता ॥९४॥
कपालमाला जयदा कपालजपतोषिणी । कपालसिद्धिसंदृष्टा कपालभोजनोद्यता ॥९५॥
कपालव्रतसंस्थाना कपालकमलालया । कवित्वामृतसारा च कवित्वामृतसागरा ॥९६॥
कवित्वसिद्धिसंतृदृष्टा कवित्वादानकारिणी । कविपूज्या कविगतिः कविरूपा कविप्रिया ॥९७॥
कविब्रह्मानन्दरूपा कवित्वव्रततोषिता । कविमानससंस्थाना कविवाञ्छाप्रपूरिणी ॥९८॥
कविकण्ठस्थिता कं ह्रीं कं कं कं कविपूर्तिदा । कज्जला कज्जलादानमानसा कज्जलप्रिया ॥९९॥
कपालकज्जलसमा कज्जलेशप्रपूजिता । कज्जलार्णवमध्यस्था कज्जलानन्दरूपिणी ॥१००॥
कज्जलप्रियसंतुष्टा कज्जलप्रियतोषिणी । कपालमालाभरणा कपालकरभूषणा ॥१०१॥
कपालकरभूषाढ्या कपालचक्रमण्डिता । कपालकोटिनिलया कपालदुर्गकारिणी ॥१०२॥

कपालगिरिसंस्थाना कपालचक्रवासिनी । कपालपात्र संतुष्टा कपालार्घ्यपरायणा ॥१०३॥
कपालार्घ्यप्रियप्राणा कपालार्घ्यवरप्रदा । कपालचक्ररूपा च कपालरूपमात्रगा ॥१०४॥
कदली कदलीरूपा कदलीवनवासिनी । कदलीपुष्प संप्रीता कदलीफलमानसा ॥१०५॥
कदलीहोम संतुष्टा कदलीदर्शनोद्यता । कदलीगर्भमध्यस्था कदलीवनसुन्दरी ॥१०६॥
कदम्बपुष्पनिलया कदंबवनमध्यगा । कदंबकुसुमामोदा कदंबवन तोषिणी ॥१०७॥
कदंबपुष्पसंपूज्या कदंबपुष्पहोमदा । कदंबपुष्पमध्यस्था कदंबफलभोजिनी ॥१०८॥
कदंबकाननांतःस्था कदंबाचलवासिनी । कक्षपा कक्षपाराध्या कक्षपासनसंस्थिता ॥१०९॥
कर्णपूरा कर्णनासा कर्णाढ्या कालभैरवी । कलप्रीता कलहदा कलहा कलहातुरा ॥११०॥
कर्णयक्षी कर्णवार्ता कथिनी कर्णसुन्दरी । कर्णपिशाचिनी कर्णमञ्जरी कपिकक्षदा ॥१११॥
कविकक्षविरूपाढ्या कविकक्षस्वरूपिणी । कस्तूरीमृगसंस्थाना कस्तूरीमृगरूपिणी ॥११२॥
कस्तूरीमृगसंतोषा कस्तूरीमृगमध्यगा । कस्तूरीरसनीलांगी कस्तूरीगंधतोषिता ॥११३॥
कस्तूरीपूजकप्राणा कस्तूरीपूजकप्रिया । कस्तूरीप्रेमसंतुष्टा कस्तूरीप्राणधारिणी ॥११४॥
कस्तूरीपूजकानन्दा कस्तूरीगंधरूपिणी । कस्तूरीमालिकारूपा कस्तूरीभोजनप्रिया ॥११५॥
कस्तूरीतिलकानन्दा कस्तूरीतिलकप्रिया । कस्तूरीहोमसंतुष्टा कस्तूरीतर्पणोद्यता ॥११६॥
कस्तूरीमार्जनोद्युक्ता कस्तूरीचक्रपूजिता । कस्तूरीपुष्पसंपूज्या कस्तूरीचर्वणोद्यता ॥११७॥
कस्तूरीगर्भमध्यस्था कस्तूरीवस्त्रधारिणी । कस्तूरिकामोदरता कस्तूरीवनवासिनी ॥११८॥
कस्तूरीवनसंरक्षा कस्तूरीप्रेमधारिणी । कस्तूरीशक्तिनिलया कस्तूरीशक्तिकुण्डगा ॥११९॥
कस्तूरीकुण्डसंस्नाता कस्तूरीकुण्डमज्जना । कस्तूरीजीवसंतुष्टा कस्तूरीजीवधारिणी ॥१२०॥
कस्तूरीपरमामोदा कस्तूरीजीवनक्षमा । कस्तूरीजातिभावस्था कस्तूरीगंधचुम्बना ॥१२१॥
कस्तूरीगंधसंशोभाविराजित कपालभूः । कस्तूरीमदनांतःस्था कस्तूरीमदहर्षदा ॥१२२॥
कस्तूरीकवितानाढ्या कस्तूरीगृहमध्यगा । कस्तूरीस्पर्शकप्राणा कस्तूरीविन्दकांतका ॥१२३॥
कस्तूर्य्यामोदरसिका कस्तूरीक्रीडनोद्यता । कस्तूरीदाननिरता कस्तूरीवरदायिनी ॥१२४॥
कस्तूरीस्थापनासक्ता कस्तूरीस्थानरंजिनी । कस्तूरीकुशलप्रश्ना कस्तूरीस्तुतिवन्दिता ॥१२५॥
कस्तूरीवंदकाराध्या कस्तूरीस्थानवासिनी । कहरूपा कहाढ्या च कहानन्दा कहात्मभूः ॥१२६॥
कहपूज्या कहात्याख्या कहहेया कहात्मिका । कहमालाकण्ठभूषा कहमंत्रजपोद्यता ॥१२७॥
कहनामस्मृतिपरा कहनामपरायणा । कहपरायणरता कहदेवी कहेश्वरी ॥१२८॥
कहहेतुकहानन्दा कहनादपरायणा । कहमाता कहांतःस्था कहमंत्रकहेश्वरा ॥१२९॥
कहज्ञेया कहाराध्या कहध्यानपरायणा । कहतंत्रा कहकहा कहचर्यापरायणा ॥१३०॥
कहाचारा कहगतिः कहताण्डवकारिणी । कहारण्या कहगतिः कहशक्तिपरायणा ॥१३१॥

कहराज्यनता कर्म्मसाक्षिणी कर्मसुन्दरी । कर्मविद्या कर्मगतिः कर्मतंत्रपरायणा ॥१३२॥
कर्ममात्रा कर्मगात्रा कर्मधर्मपरायणा । कर्मरेखानाशकर्त्री कर्मरेखाविनोदिनी ॥१३३॥
कर्मरेखामोहकरी कर्मकीर्तिपरायणा । कर्मविद्या कर्मसारा कर्माधारा च कर्मभूः ॥१३४॥
कर्मकारी कर्महारी कर्मकौतुकसुन्दरी । कर्मकाली कर्मतारा कर्मच्छिन्ना च कर्मदा ॥१३५॥
कर्मचाण्डालिनी कर्मवेदमाता च कर्मभूः । कर्मकाण्डरतानंता कर्मकाण्डानुमानिता ॥१३६॥
कर्मकाण्डपरीणाहा कमठी कमठाकृतिः । कमठाराध्यहृदया कमठाकण्ठसुन्दरी ॥१३७॥
कमठासनसंसेव्या कमठी कर्मतत्परा। करुणाकरकांता च करुणाकरवन्दिता ॥१३८॥
कठोराकरमाला च कठोरकुचधारिणी । कपर्दिनी कपटिनी कठिना कंकभूषणा ॥१३९॥
करभोरूः कठिनदा करभा करभालया । कलभाषामयी कल्पा कल्पनाकल्पदायिनी ॥१४०॥
कमलस्था कलामाला कमलास्या क्वणत्प्रभा । ककुद्मिनी कष्टवती करणीयकथार्चिता ॥१४१॥
कचार्चिता कचतनुः कचसुन्दरधारिणी । कठोरकुचसंलग्ना कटिसूत्रविराजिता ॥१४२॥
कर्णभक्षप्रिया कन्दा कथाकन्दगतिः कलिः । कलिघ्नी कलिदूती च कविनायकपूजिता ॥१४३॥
कणकक्षानियंत्री च सदा कविवरार्चिता । कर्त्री च कर्तृका भूषाकारिणी कर्णशत्रुपा ॥१४४॥
करणेशी करणपा कलवाचा कलानिधिः । कलना कलनाधारा कलनाकारिकाकरा ॥१४५॥
कलज्ञेया कर्कराशिः कर्कराशिप्रपूजिता । कन्याराशिः कन्यका च कन्यकाप्रियभाषिणी ॥१४६॥
कन्यकादानसंतुष्टा कन्यकादानतोषिणी । कन्यादानकरानन्दा कन्यादातृगृहेष्टदा ॥१४७॥
कर्षणा कक्षदहना कामिता कमलासना । करमालानंदकर्त्री करमालाप्रभूषिता ॥१४८॥
करमालाशयानन्दा करमालासमागमा । करमालासिद्धिदात्री करमालाकरप्रिया ॥१४९॥
करप्रिया कररता करदानपरायणा । कलानन्दा कलिगतिः कलिपूज्या कलिप्रसूः ॥१५०॥
कलनादनिनादस्था कलनादवरप्रदा । कलनादसमाजस्था कहोला च कहोलदा ॥१५१॥
कहोलगेहमध्यस्था कहोलवरदायिनी । कहोलकविताधारा कहोलऋषिमानिता ॥१५२॥
कहोलमानसाराध्या कहोलवाक्यकारिणी । कर्तृरूपा कर्तृमयी कर्तृमाता च कर्तरी ॥१५३॥
कनीया कनकाराध्या कनीनकमयी तथा । कनीयानन्दनिलया कनकानन्दतोषिता ॥१५४॥
कनीयक करा काष्ठा कथार्णवकरीकरी । करिगम्या करिगतिः करिध्वजपरायणा ॥१५५॥
करिनाथप्रिया कण्ठा कथानकप्रतोषिता । कमनीया कमनका कमनीयविभूषणा ॥१५६॥
कमनीयसमाजस्था कमनीयव्रतप्रिया । कमनीयगुणाराध्या कपिला कपिलेश्वरी ॥१५७॥
कपिलाराध्यहृदया कपिलाप्रियवादिनी । कहचक्रमंत्रवर्णा कहचक्रप्रसूनका ॥१५८॥
कएईल् ह्रीं स्वरूपा च कएईलह्रींवरप्रदा । कएईल् ह्रीं सिद्धिरात्री कएईलह्रींस्वरूपिणी ॥१५९॥
कएईलह्रीं मंत्रवर्णा कएईल् ह्रीं प्रसूकला । कवर्गा च कपाटस्था कपाटोद्घाटनक्षमा ॥१६०॥

कंकाली च कपाली च कंकालप्रियभाषिणी । कंकालभैरवाराध्या कंकालमानसंस्थिता ॥१६१॥
कंकालमोहनिरता कंकालमोहदायिनी । कलुषघ्नी कलुषहा कलुषार्तिविनाशिनी ॥१६२॥
कलिपुष्पा कलादाना कशिपुः कश्यपार्चिता । कश्यपा कश्यपाराध्या कलिपूर्णकलेवरा ॥१६३॥
कलेवरकरी कांची कवर्गा च करालका । करालभैरवाराध्या करालभैरवेश्वरी ॥१६४॥
कराला कलनाधारा कपर्दीशवरप्रदा । कपर्दीशप्रेमलता कपर्दिमालिकायुता ॥१६५॥
कपर्दिजपमालाढ्या करवीरप्रसूनदा । करवीरप्रियप्राणा करवीरप्रपूजिता ॥१६६॥
कर्णिकारसमाकारा कर्णिकारप्रपूजिता । करीषाग्निस्थिता कर्षा कर्षमात्रसुवर्णदा ॥१६७॥
कलशा कलशाराध्या कषाया करिगानदा । कपिला कलकण्ठी च कलिकल्पलता मता ॥१६८॥
कल्पमाता कल्पलता कल्पकारी च कल्पभूः । कर्पूरामोदरुचिरा कर्पूरामोदधारिणी ॥१६९॥
कर्पूरमालाभरणा कर्पूरवासपूर्तिदा । कर्पूरमालाजयदा कर्पूरार्णवमध्यगा ॥१७०॥
कर्पूरतर्पणरता कटकाम्बरधारिणी । कपटेश्वरसंपूज्या कपटेश्वररूपिणी ॥१७१॥
कटुः कपिध्वजाराध्या कलापपुष्पधारिणी । कलापपुष्परुचिरा कलापपुष्पपूजिता ॥१७२॥
क्रकचा क्रकचाराध्या कथंब्रूमाकरालता । कथंकारविनिर्मुक्ता काली कालक्रिया क्रतुः ॥१७३॥
कामिनी कामिनीपूज्या कामिनी पुष्पधारिणी । कामिनीपुष्पनिलया कामिनीपुष्पपूर्णिमा ॥१७४॥
कामिनीपुष्पपूजार्हा कामिनीपुष्पभूषणा । कामिनीपुष्पतिलका कामिनीकुण्डचुम्बना ॥१७५॥
कामिनीयोगसंतुष्टा कामिनीयोगभोगदा । कामिनीकुण्डसम्मग्ना कामिनीकुण्डमध्यगा ॥१७६॥
कामिनीमानसाराध्या कामिनीमानतोषिता । कामिनीमानसंचारा कालिका कालकालिका ॥१७७॥
कामा च कामदेवी च कामेशी कामसंभवा । कामभावा कामरता कामार्ता काममञ्जरी ॥१७८॥
काममञ्जीररणिता कामदेवप्रियांतरा । कामकाली कामकला कालिका कमलार्चिता ॥१७९॥
कादिका कमला काली कालानलसमप्रभा । कल्पांतदहना कांता कांतारप्रियवासिनी ॥१८०॥
कालपूज्या कालरता कालमाता च कालिनी । कालवीरा कालघोरा कालसिद्धा च कालदा ॥१८१॥
कालाञ्जनसमाकारा कालञ्जरनिवासिनी । का[illegible]ऋद्धिः कालवृद्धिः कारागृहविमोचिनी ॥१८२॥
कादिविद्या कादिमाता कादिस्था कादिसुन्दरी । काशी काञ्ची च काञ्चीशा काशीशवरदायिनी ॥१८३॥
क्रांबीजा चैव क्रीं बीजा हृदयाय नमस्स्मृता । काम्या काम्यगतिः काम्यसिद्धिदात्री च कामभूः ॥१८४॥
कामाख्या कामरूपा च कामचापविमोचिनी । कामदेवकलारामा कामदेवकलालया ॥१८५॥
कामरात्रिः कामदात्री कांताराचलवासिनी । कामरूपाकामगतिः कामयोगपरायणा ॥१८६॥
कामसम्मर्दनरता कामगेहविकासिनी । कालभैरवभार्या च कालभैरवकामिनी ॥१८७॥
कालभैरवयोगस्था कालभैरवभोगदा । कामधेनुः कामदोग्ध्री काममाता च कांतिदा ॥१८८॥
कामुका कामुकाराध्या कामुकानन्दवर्द्धिनी । कार्तवीर्या कार्त्तिकेया कार्त्तिकेयप्रपूजिता ॥१८९॥

कार्या कारणदा कार्य्यकारिणी कारणांतरा । कांतिगम्या कांतिमयी कात्या कात्यायनी च का ॥१९०॥
कामसारा च काश्मीरा काश्मीराचारतत्परा । कामरूपाचाररता कामरूपप्रियंवदा ॥१९१॥
कामरूपाचारसिद्धिः कामरूपमनोमयी । कार्तिकी कार्तिकाराध्या कांचनारप्रसूनभूः ॥१९२॥
कांचनारप्रसूनाभा कांचनारप्रपूजिता । कांचरूपा कांचभूमिः कांस्यपात्रप्रभोजिनी ॥१९३॥
कांस्यध्वनिमयी कामसुन्दरी कामचुंबना । काशपुष्पप्रतीकाशा कामद्रुमसमागमा ॥१९४॥
कामपुष्पा कामभूमिः कामपूज्या च कामदा । कामदेहा कामगेहा कामबीजपरायणा ॥१९५॥
कामध्वजसमारूढा कामध्वजसमास्थिता । काश्यपी काश्यपाराध्या काश्यपानन्ददायिनी ॥१९६॥
कालिन्दी जलसंकाशा कालिन्दीजलपूजिता । कामदेवपूजानिरता कामदेवपरमार्थदा ॥१९७॥
कर्म्मणा कर्म्मणाकारा कामकर्मणकारिणी । कार्म्मणत्रोटनकरी काकिनी कारणाह्वया ॥१९८॥
काव्यामृता च कालिङ्गा कालिङ्गमर्दनोद्यता । कालागरुविभूषाढ्या कालागरुविभूतिदा ॥१९९॥
कालागरुसुगंधा च कालागरुप्रतर्पणा । कावेरीनीरसंप्रीता कावेरीतीरवासिनी ॥२००॥
कालचक्रभ्रमाकारा कालचक्रनिवासिनी । कानना काननाधारा कारुः कारुणिकामयी ॥२०१॥
काम्पिल्यवासिनी काष्ठा कामपत्नी च कामभूः । कादम्बरीपानरता तथा कादम्बरीकला ॥२०२॥
कामवंद्या च कामेशी कामराजप्रपूजिता । कामराजेश्वरी विद्या कामकौतुकसुन्दरी ॥२०३॥
काम्बोजजा काञ्छिनदा कांस्यकाञ्चनकारिणी । काञ्चनाद्रिसमाकारा काञ्चनाद्रिप्रदानदा ॥२०४॥
कामकीर्तिः कामकेशी कारिकाकांतराश्रया । कामभेदी च कामार्तिनाशिनी कामभूमिका ॥२०५॥
कालनिर्णाशिनी काव्यवनिता कामरूपिणी । कायस्था कामसंदीप्तिः काव्यदा कालसुन्दरी ॥२०६॥
कामेशी कारणवरा कामेशीपूजनोद्यता । काञ्चीनूपुरभूषाढ्या कुंकुमाभरणान्विता ॥२०७॥
कालचक्रा कालगतिः कालचक्रमनोभवा । कुन्दमध्या कुन्दपुष्पा कुन्दपुष्पप्रिया कुजा ॥२०८॥
कुजमाता कुजाराध्या कुठारवरधारिणी । कुञ्जरस्था कुशरता कुशेशयविलोचना ॥२०९॥
कुनठी कुररी कुद्रा कुरंगी कुटजाश्रया । कुंभीनसविभूषा च कुंभीनसवधोद्यता ॥२१०॥
कुंभकर्णमनोल्लासा कुलचूडामणिः कुला । कुलालगृहकन्या च कुलचूडामणिप्रिया ॥२११॥
कुलपूज्या कुलाराध्या कुलपूजापरायणा । कुलभूषा तथा कुक्षिः कुररीगणसेविता ॥२१२॥
कुलपुष्पा कुलरता कुलपुष्पपरायणा । कुलवस्त्रा कुलाराध्या कुलकुण्डसमप्रभा ॥२१३॥
कुलकुण्डसमोल्लासा कुलपूजापरायणा । कुण्डपुष्पप्रसन्नास्या कुण्डगोलोद्भवात्मिका ॥२१४॥
कुण्डगोलोद्भवाधारा कुण्डगोलमयी कूहूः । कुण्डगोलप्रियप्राणा कुण्डगोलप्रपूजिता ॥२१५॥
कुण्डगोलमनोल्लासा कुण्डगोलवरप्रदा । कुण्डदेवरता क्रुद्धा कुलसिद्धिकरा परा ॥२१६॥
कुलकुण्डसमाकारा कुलकुण्डसमानभूः । कुण्डसिद्धिः कुण्डऋद्धिः कुमारीपूजनोद्यता ॥२१७॥
कुमारीपूजकप्राणा कुमारीपूजकालया । कुमारीकामसंतुष्टा कुमारीपूजनोत्सुका ॥२१८॥

कुमारीव्रतसंतुष्टा कुमारीरूपधारिणी । कुमारीभोजनप्रीता कुमारी च कुमारदा ॥२१९॥
कुमारमाता कुलदा कुलयोनिः कुलेश्वरी । कुललिंगा कुलानन्दा कुलरम्या कुतर्कधृक् ॥२२०॥
कुंती च कुलकांता च कुलमार्गपरायणा । कुल्ला च कुरुकुल्ला च कुल्लुका कुलकामदा ॥२२१॥
कुलिशांगी कुब्जिका च कुब्जिकानन्दवर्द्धिनी । कुलीना कुञ्जरगतिः कुञ्जरेश्वरगामिनी ॥२२२॥
कुलपाली कुलवती तथैव कुलदीपिका । कुलयोगेश्वरी कुण्डा कुंकुमारुणविग्रहा ॥२२३॥
कुंकुमानन्दसंतोषा कुंकुमार्णववासिनी। कुंकुमा कुसुमप्रीता कुलभूः कुलसुन्दरी ॥२२४॥
कुमुद्वती कुमुदिनी कुशला कुलटालया । कुलटालयमध्यस्था कुलटासंगतोषिता ॥२२५॥
कुलटाभवनो द्युक्ता कुशावर्ता कुलार्णवा । कुलार्णवाचाररता कुण्डली कुण्डलाकृतिः ॥२२६॥
कुमतिश्च कुलश्रेष्ठा कुलचक्रपरायणा । कूटस्था कूटदृष्टिश्च कुंतला कुंतलाकृतिः ॥२२७॥
कुशलाकृतिरूपा च कूर्चबीजधरा च कूः । कुं कुं कुं कुं शब्दरता क्रुं क्रुं क्रुं क्रुं परायणा ॥२२८॥
कुं कुं कुं शब्दनिलया कुक्कुरासंगवासिनी। कुकुरासङ्गसंयुक्ता कुकरानंतविग्रहा ॥२२९॥
कूर्चारंभा कूर्चबीजा कूर्चजापपरायणा । कुचस्पर्शनसंतुष्टा कुचालिंगमहर्षदा ॥२३०॥
कुमतिघ्नी कुबेरार्चा कुचभूः कुलनायिका । कुगायना कुचधरा कुमाता कुन्ददंतिनी ॥२३१॥
कुगेया कुहराभासा कुगेया कुघ्नदारिका । कीर्तिः किरातिनी क्लिन्ना किन्नरा किन्नरीक्रिया ॥२३२॥
क्रींकारा क्रींजपासक्ता क्रीं हूँ स्त्रीं मंत्ररूपिणी । किर्मीरितदृशापांगी किशोरी च किरीटिनी ॥२३३॥
कीटभाषा कीटयोनिः कीटमाता च कीटदा । किंशुका कीरभाषा च क्रियासाराक्रियावती ॥२३४॥
कींकीं शब्दपरा क्लांक्लींक्लूंक्लैंक्लौं मंत्ररूपिणी । कांकींकूंकैं स्वरूपाच कः फट् मंत्रस्वरूपिणी ॥२३५॥
केतकी भूषणानन्दा केतकीभरणान्विता । कैकदा केशिनी केशीकेशिसूदनतत्परा ॥२३६॥
केशरूपा केशमुक्ता कैकेयी कौशिकी तथा । कैरवा कैरवाह्लादा केशरा केतुरूपिणी ॥२३७॥
केशवाराध्यहृदया केशवासक्तमानसा । क्लैब्यविनाशिनी क्लैं च क्लैं बीजजपतोषिता ॥२३८॥
कौशल्या कोशलाक्षी च कोशा च कोमला तथा । कोलापुरनिवासा च कोलासुरविनाशिनी ॥२३९॥
कोटिरूपा कोटिरता क्रोधिनी क्रोधरूपिणी । केका च कोकिला कोटिः कोटिमंत्रपरायणा ॥२४०॥
कोट्यानंत मंत्रयुक्ता कैरूपा केरलाश्रया । केरलाचारनिपुणा केरलेन्द्रगृहस्थिता ॥२४१॥
केदाराश्रमसंस्था च केदारेश्वरपूजिता । क्रोधरूपा क्रोधपदा क्रोधमाता च कौशिकी ॥२४२॥
कोदण्डधारिणी क्रौंचा कौशल्या कौलमार्गगा । कौलिनी कौलिकाराध्या कौलिकागारवासिनी ॥२४३॥
कौतुकी कौमुदी कौला कुमारी कौरवार्चिता । कौण्डिन्या कौशिकी क्रोधा ज्वालाभासुररूपिणी ॥२४४॥
कोटिकालानलज्वाला कोटिमार्तण्डविग्रहा । कृत्तिका कृष्णवर्णा च कृष्णा कृत्या क्रियातुरा ॥२४५॥
कृशाङ्गी कृतकृत्या च क्रः फट्स्वाहास्वरूपिणी । क्रौंक्रौंहूंफट् मंत्रवर्णा क्रीं ह्रीं हूं फट्नमः स्वधा ॥२४६॥
क्रीं क्रीं ह्रीं ह्रीं तथा हूँ हूँ फट्स्वाहा मंत्ररूपिणी । इतिश्रीसर्वसाम्राज्य मेधानामसहस्रकम् ॥२४७॥

॥फलश्रुति ॥

सुन्दरीशक्तिदानाख्यस्वरूपाभिधमेव च । कथितं दक्षिणाकाल्याः सुंदर्य्यै प्रीतियोगतः ॥२४८॥
वरदान प्रसङ्गेन रहस्यमपि दर्शितम् । गोपनीयं सदा भक्त्या पाठनीयं परात्परम् ॥२४९॥
प्रातर्मध्याह्नकाले च मध्यार्द्धरात्रयोरपि । यज्ञकाले जपांते च पठनीयं विशेषतः ॥२५०॥
यः पठेत्साधको धीरः कालीरूपो हि वर्षतः । पठेद्वा पाठयेद्वापि शृणोति श्रावयेदपि ॥२५१॥
वाचकं तोषयेद्वापि स भवेत्कालिकातनुः । सहेलं वा सलीलं वा यश्चैनं मानवः पठेत् ॥२५२॥
सर्वदुःखविनिर्मुक्तस्त्रैलोक्यविजयी कविः । मृतवंध्या काकवंध्या कन्यावंध्या च वंध्यका ॥२५३॥
पुष्पवंध्या शूलवंध्या शृणुयात्स्तोत्रमुत्तमम् । सर्वसिद्धिप्रदातारं सत्कविं चिरजीविनम् ॥२५४॥
पाण्डित्यकीर्तिसंयुक्तं लभते नात्र संशयः । यं यं काममुपस्कृत्य कालीं ध्यात्व । जपेत्स्तवम् ॥२५५॥
तं तं कामंकरे कृत्वा मंत्री भवति नान्यथा । योनिपुष्पैर्लिंगपुष्पैः कुण्डगोलोद्भवैरपि ॥२५६॥
संयोगामृतपुष्पैश्च वस्त्रदेवीप्रसूनकैः । कालीपुष्पैः पीठतोयैर्य्योनिक्षालनतोयकैः ॥२५७॥
कस्तूरी कुंकुमैर्देवीं नखकालागरुक्रमात् । अष्टगंधैर्धूपदीपै र्यवयावकसंयुतैः ॥२५८॥
रक्तचंदनसिन्दूरै र्मत्स्यमांसादिभूषणैः । मधुभिः पायसैः क्षीरैः शोधितैः शोणितैरपि ॥२५९॥
महोपचारै रक्तैश्च नैवेद्यैः सुरसान्वितैः । पूजयित्वा महाकालीं महाकालेन लालिताम् ॥२६०॥
विद्याराज्ञीं कुल्लुकाञ्च जप्त्वा स्तोत्रं जपेच्छिवे । कालीभक्तस्त्वेकचित्तः सिन्दूरतिलकान्वितः ॥२६१॥
ताम्बूलपूरितमुखो मुक्तकेशो दिगम्बरः । शवयोनिस्थितो वीरः श्मशाने सुरतान्वितः ॥२६२॥
शून्यालये बिन्दुपीठे पुष्पाकीर्णे शिवावने । शयानोत्थः प्रभुंजानः कालीदर्शनमाप्नुयात् ॥२६३॥
तत्र यद्यत्कृतं कर्म तदनंतफलं भवेत् । ऐश्वर्ये कमला साक्षात् सिद्धौ श्रीकालिकाम्बिका ॥२६४॥
कवित्वे तारिणीतुल्यः सौन्दर्य्ये सुन्दरीसमः । सिंधोर्द्धारासमः कार्ये श्रुतौ श्रुतिधरस्तथा ॥२६५॥
वज्रास्त्रमिव दुर्द्धर्षस्त्रैलोक्यविजयास्त्रभृत् । शत्रुहंता काव्यकर्ता भवेच्छिवसमः कलौ ॥२६६॥
दिग्विदिक् चन्द्रकर्त्ता च दिवारात्रिविपर्य्ययी । महादेवसमो योगी त्रैलोक्यस्तंभकः क्षणात् ॥२६७॥
गाने तु तुंबुरुः साक्षाद्दाने कर्णसमो भवेत् । गजाश्वरथपत्तीनामस्त्राणामधिपः कृती ॥२६८॥
आयुष्येषु भुशुण्डी च जरापलितनाशकः । वर्षषोडशवांभूयात् सर्वकाले महेश्वरि ॥२६९॥
ब्रह्माण्डगोले देवेशि न तस्य दुर्लभं क्वचित् । सर्वं हस्तगतं भूयान्नात्र कार्या विचारणा ॥२७०॥
कुलपुष्पयुतं दृष्ट्वा तत्र कालीं विचिंत्य च । विद्याराज्ञीं तु संपूज्य पठेन्नामसहस्त्रकम् ॥२७१॥
मनोरथमयी सिद्धिस्तस्य हस्ते सदा भवेत् । परदारान्समालिंग्य सम्पूज्य परमेश्वरीम् ॥२७२॥
हस्ताहस्तकया योगं कृत्वा जप्त्वा स्तवं पठेत् । योनिं वीक्ष्य जपेत्स्तोत्रं कुबेरादधिको भवेत् ॥२७३॥
कुण्डगोलोद्भवं गृह्य वर्णाक्तं होमयेन्निशि । पितृभूमौ महेशानि विधिरेखां प्रमार्जयेत् ॥२७४॥
तरुणीं सुन्दरीं रम्यां चंचलां कामगर्विताम् । समानीय प्रयत्नेन संशोध्य न्यासयोगतः ॥२७५॥

प्रसूनमंचे संस्थाप्य पृथिवीं वशमानयेत् । मूलचक्रं तु संभाव्य देव्याश्चरणसंयुतम् ॥२७६॥
सम्पूज्य परमेशानीं संकल्प्य तु महेश्वरि । जप्त्वा स्तुत्वा महेशानीं प्रणवं संस्मरेच्छिवे ॥२७७॥
अष्टोत्तरशतैर्य्योनिं प्रमंत्र्याचुंब्य यत्नतः । संयोगीभूय जप्तव्यं सर्वविद्याधिपो भवेत् ॥२७८॥
शून्यागारे शिवारण्ये शिवदेवालये तथा । शून्यदेशे तडागे च गङ्गागर्भे चतुष्पथे ॥२७९॥
श्मशाने पर्वतप्रांते एकलिंगे शिवामुखे । मुण्डयोनौ ऋतौस्नात्वा गेहे वेश्यागृहे तथा ॥२८०॥
कुट्टिनीगृहमध्ये च कदलीमण्डपे तथा । पठेत्सहस्त्रनामाख्यं स्तोत्रं सर्वार्थसिद्धये ॥२८१॥
अरण्ये शून्यगर्ते च रणे शत्रुसमागमे । प्रजपेच्च ततो नामकाल्याश्चैव सहस्त्रकम् ॥२८२॥
बालानन्दपरो भूत्वा पठित्वा कालिकास्तवम् । कालीं संचिंत्य प्रजपेत्पठेन्नामसहस्त्रकम् ॥२८३॥
सर्वसिद्धीश्वरो भूयाद्वाञ्छासिद्धीश्वरो भवेत् । मुण्डचूडकयो र्योनित्वचि वा कोमले शिवे ॥२८४॥
विष्टरे शववस्त्रे वा पुष्पवस्त्रासनेऽपि वा । मुक्तकेशो दिगावासो मैथुनी शयने स्थितः ॥२८५॥
जप्त्वा कालीं पठेत्स्तोत्रं खेचरीसिद्धिभाग्भवेत् । चिकुरं योगमासाद्य शुक्रोत्सारणमेव च ॥२८६॥
जप्त्वा श्रीदक्षिणां कालीं शक्तिपातशतंभवेत् । लतां स्पृशञ्जपित्वा च रमित्वा त्वर्चयन्नपि ॥२८७॥
आह्लादयन्दिगावासः परशक्तिं विशेषतः । स्तुत्वा श्रीदक्षिणां कालीं योनिं स्वकरगाञ्चरेत् ॥२८८॥
पठेन्नाम सहस्त्रं यः स शिवादधिको भवेत् । लतांतरेषु जप्तव्यं स्तुत्वा कालीं निराकुलः ॥२८९॥
दशावधानो भवति मासमात्रेण साधकः । कालरात्र्यां महारात्र्यां वीररात्र्यामपि प्रिये ॥२९०॥
महारात्र्यां चतुर्दश्यामष्टम्यां संक्रमेऽपि वा । कुहूपूर्णेन्दुशुक्रेषु भौमा मायां निशामुखे ॥२९१॥
नवम्यां मंगलदिने तथा कुलतिथौ शिवे । कुलक्षेत्रे प्रयत्नेन पठेन्नामसहस्त्रकम् ॥२९२॥
सौदर्शनो भवेदाशु किन्नरीसिद्धिभाग्भवेत् । पश्चिमाभिमुखं लिंगं वृषशून्यं पुरातनम् ॥२९३॥
तत्र स्थित्वा जपेत्स्तोत्रं सर्वकामाप्तये शिवे । भौमवारे निशीथे वा अमावस्यादिने शुभे ॥२९४॥
माषभक्तबलिं छागं कृसरान्नं च पायसम् । दग्धमीनं शोणितं च दधिदुग्धगुडार्द्रकम् ॥२९५॥
बलिं दत्त्वा जपेत्तत्र त्वष्टोत्तरसहस्त्रकम् । देवगंधर्वसिद्धौघैः सेवितां सुरसुन्दरीम् ॥२९६॥
लभेद्देवेशि मासेन तस्य चासन संहतिः । हस्तत्रयं भवेदूर्ध्वं नात्र कार्या विचारणा ॥२९७॥
हेलया लीलया भक्त्या कालीं स्तौति नरस्तु यः । ब्रह्मादीन्स्तंभयेद्देवि माहेशीं मोहयेत्क्षणात् ॥२९८॥
आकर्षयेन्महाविद्या दश पूर्वास्त्रियामतः । कुर्वीत विष्णुनिर्माणं यमादीनां तु मारणम् ॥२९९॥
ध्रुवमुच्चाटयेन्नूनं सृष्टिनूतनतां नरः । मेषमाहिषमार्जार खरच्छागनरादिकैः ॥३००॥
खड्गिसूकरकापोतैष्टिट्टिभैः शशकैः पलैः । शोणितैः सास्थिमांसैश्च कारण्डैर्दुग्धपायसैः ॥३०१॥
कादम्बरीसिंधुमद्यैस्सुरारिष्टैश्च सासवैः । योनिक्षालिततोयैश्च योनिलिंगामृतैरपि ॥३०२॥
स्वजातकुसुमैः पूज्य जपांते तर्पयेच्छिवाम् । सर्वसाम्राज्यनाम्ना तु स्तुत्वा नत्वा स्वशक्तितः ॥३०३॥
शक्त्या लभन् पठेत्स्तोत्रं कालीरूपो दिनत्रयात् । दक्षिणा कालिका तस्य गेहे तिष्ठति नान्यथा ॥३०४॥

वेश्यालतागृहे गत्वा तस्याश्चुम्बनतत्परः । तस्या योनौ मुखं दत्त्वा तद्रसं विलिहञ्जपेत् ॥३०५॥
तदंते नामसाहस्त्रं पठेद्भक्तिपरायणः । कालिकादर्शनं तस्य भवेद्देवि त्रियामतः ॥३०६॥
नृत्यपात्रगृहे गत्वा मकारपञ्चकान्वितः । प्रसूनमंचे संस्थाप्य शक्तिन्यासपरायणः ॥३०७॥
पात्राणां साधनं कृत्वा दिग्वस्त्रां तां समाचरेत् । संभाव्य चक्रं तन्मूले तत्र सावरणां जपेत् ॥३०८॥
शतं भाले शतं केशे शतं सिन्दूरमण्डले । शतत्रयं कुचद्वंद्वे शतं नाभौ महेश्वरि ॥३०९॥
शतं योनौ महेशानि संयोगे च शतत्रयम् । जपेत्तत्र महेशानि तदंते प्रपठेत्स्तवम् ॥३१०॥
शतावधानो भवति मासमात्रेण साधकः । मातङ्गिनीं समानीय किं वा कापालिनीं शिवे ॥३११॥
दंतमाला जपे कार्य्या गले धार्य्या नृमुण्डजा । नेत्रपद्मे योनिचक्रं शक्तिचक्रं स्ववक्त्रके ॥३१२॥
कृत्वा जपेन्महेशानि मुण्डयंत्रं प्रपूजयेत् । मुण्डासनस्थितो वीरो मकारपञ्चकान्वितः ॥३१३॥
अन्यामालिङ्ग्य प्रजपेदन्यां संचुम्ब्य वै पठेत् । अन्यां संपूजयेत्तत्र त्वन्यां सम्मर्द्दयन् जपेत् ॥३१४॥
अन्ययोनौ शिवं दत्त्वा पुनः पूर्ववदाचरेत् । अवधानसहस्त्रेषु शक्तिपातशतेषु च ॥३१५॥
राजा भवति देवेशि मासपंचकयोगतः । यवनीशक्तिमानीय गानशक्तिपरायणाम् ॥३१६॥
कुलाचारमतेनैव तस्या योनिं विकासयेत् । तत्र प्रदायजिह्वां तु जपेन्नामसहस्त्रकम् ॥३१७॥
नृकपाले तत्र दीपं जपेत्प्रज्वाल्य यत्नतः । महाकविवरो भूयान्नात्र कार्य्या विचारणा ॥३१८॥
कामार्तां शक्तिमानीय योनौ तु मूलचक्रकम् । विलिख्य परमेशानि तत्र मंत्रं लिखेच्छिवे ॥३१९॥
तल्लिहन् प्रजपेद्देवि सर्वशास्त्रार्थतत्त्ववित् । अश्रुतानि च शास्त्राणि वेदादीन् पाठयेद् ध्रुवम् ॥३२०॥
विना न्यासैर्विना पाठैर्विना ध्यानादिभिः प्रिये । चतुर्वेदाधिपो भूत्वा त्रिकालज्ञस्त्रिवर्षतः ॥३२१॥
चतुर्विधं च पाण्डित्यं तस्य हस्तगतं क्षणात् । शिवाबलिः प्रदातव्यः सर्वदा शून्यमण्डले ॥३२२॥
कालीध्यानं मंत्रचिंता नीलसाधनमेव च । सहस्त्रनामपाठश्च कालीनामप्रकीर्तनम् ॥३२३॥
भक्तस्य कार्य्यमेतावदन्यदभ्युदयं विदुः । वीरसाधनकं कर्म्म शिवा पूजा बलिस्तथा ॥३२४॥
सिंदूरतिलको देवि वेश्यालापो निरंतरम् । वेश्यागृहे निशाचारो रात्रौ पर्य्यटनं तथा ॥३२५॥
शक्तिपूजा योनिदृष्टिः खड्गहस्तो दिगम्बरः । मुक्तकेशो वीरवेषः कुलमूर्तिधरो नरः ॥३२६॥
कालीभक्तो भवेद्देवि नान्यथा क्षेममाप्नुयात् । दुग्धास्वादी योनिलेही संविदासवघूर्णितः ॥३२७॥
वेश्यालता समायोगान्मासात्कल्पलता स्वयम् । वेश्याचक्र समायोगात्कालीचक्रसमः स्वयम् ॥३२८॥
वेश्यादेहसमायोगात् कालीदेहसमः स्वयम् । वेश्यामध्यगतं वीरं कदा पश्यामि साधकम् ॥३२९॥
एवं वदति सा काली तस्माद्वेश्या वरा मता । वेश्या कन्या तथा पीठजाति भेदकुलक्रमात् ॥३३०॥
अकुलक्रमभेदेन ज्ञात्वा चापि कुमारिकाम् । कुमारीं पूजयेद्भक्त्या जपांते भवने प्रिये ॥३३१॥
पठेन्नामसहस्त्रं यः कालीदर्शनभाग्भवेत् । भक्त्या कुमारीं सम्पूज्य वेश्याकुलसमुद्भवाम् ॥३३२॥
वस्त्रहेमादिभिस्तोष्या यत्नात्स्तोत्रं पठेच्छिवे । त्रैलोक्यविजयी भूयाद्दिवा चन्द्रप्रकाशकः ॥३३३॥

यद्यद्दत्तं कुमार्य्यै तु तदनंतफलं भवेत् । कुमारी पूजनफलं मया वक्तं न शक्यते ॥३३४॥
चांचल्याद्दुरितं किंचित्क्षम्यतामय मंजलिः । एकाचेत्पूजिता बाला द्वितीया पूजिता भवेत् ॥३३५॥
कुमार्यः शक्तयश्चैव सर्वमेतच्चराचरम् । शक्तिमानीय तद्गात्रे न्यासजालं प्रविन्यसेत् ॥३३६॥
वामभागे च संस्थाप्य जपेन्नाम सहस्त्रकम् । सर्वसिद्धीश्वरो भूयान्नात्र कार्य्या विचारणा ॥३३७॥
श्मशानस्थो भवेत्स्वस्थो गलितं चिकुरं चरेत् । दिगम्बरः सहस्त्रं च सूर्य्यपुष्पं समानयेत् ॥३३८॥
स्ववीर्य्येण प्लुतं कृत्वा प्रत्येकं प्रजपन् हुनेत् । पूज्य ध्यात्वा महाभक्त्या क्षमापालो नरः पठेत् ॥३३९॥
नखं केशं स्ववीर्य्यं च यद्यत्सम्मार्जनीगतम् । मुक्तकेशो दिशावासो मूलमंत्रपुरःसरः ॥३४०॥
कुजवारे मध्यरात्रे होमं कृत्वा श्मशानके । पठेन्नामसहस्त्रं यः पृथ्वीशाकर्षको भवेत् ॥३४१॥
पुष्पयुक्ते भगे देवि संयोगानन्दतत्परः । पुनश्चिकुरमासाद्य मूलमंत्रं जपन् शिवे ॥३४२॥
चितावह्नौ मध्यरात्रे वीर्य्य मुत्सार्य्ययत्नतः । कालिकां पूजयेत्तत्र पठेन्नामसहस्त्रकम् ॥३४३॥
पृथ्वीशाकर्षणं कुर्य्यान्नात्र कार्याविचारणा । कदलीवनमासाद्य लक्षमंत्रं जपेन्नरः ॥३४४॥
मधुमत्या स्वयं देव्या सेव्यमानः स्मरोपमः । श्रीमधुमतींत्युक्त्वा तथा स्थावरजङ्गमान् ॥३४५॥
आकर्षिणीं समुच्चार्य्य ठं ठं स्वाहा समुच्चरेत् । त्रैलोक्याकर्षिणी विद्या तस्य हस्ते सदा भवेत् ॥३४६॥
नदीं पुरीं च रत्नानि हेमस्त्रीशैलभूरुहान् । आकर्षयत्यम्बुनिधिं सुमेरुं च दिगंततः ॥३४७॥
अलभ्यानि च वस्तूनि दूराद्भूमितलादपि । वृत्तांतं च सुरस्थानाद्रहस्ये विदुषामपि ॥३४८॥
राज्ञां च कथयत्येषा सत्यं सत्वरमादिशेत् । द्वितीयवर्षपाठेन भवेत्पद्मावति शुभा ॥३४९॥
ॐ ह्रीं पद्मावतिपदं ततस्त्रैलोक्यनाम च । वार्तां च कथयंद्वंद्वं स्वाहांतो मंत्र ईरितः ॥३५०॥
ब्रह्मविष्णवादिकानां च त्रैलोक्ये यादृशी भवेत् । सर्वं वदति देवेशि त्रिकालज्ञः कविः शुभः ॥३५१॥
त्रिवर्षं संपठन्देवि लभेद्भोगवतीं कलाम् । महाकालेन दृष्टोऽपि चितामध्यगतोऽपि वा ॥३५२॥
तस्या दर्शनमात्रेण चिरंजीवी नरो भवेत् । मृतसंजीविनीत्युक्त्वा मृतमुत्थापयद्वयम् ॥३५३॥
स्वाहांतो मनुराख्यातो मृतसंजीवनात्मकः । चतुर्वर्षं पठेद्यस्तु स्वप्नसिद्धिस्ततो भवेत् ॥३५४॥
ॐ ह्रीं स्वप्नवाराहि कालि स्वप्ने कथयोच्चरेत् । अमुकस्यामुकं देहि क्रीं स्वाहांतो मनुर्मतः ॥३५५॥
स्वप्नसिद्धा चतुर्वर्षात्तस्य स्वप्ने सदा स्थिता । चतुर्वर्षस्य पाठेन चतुर्वेदाधिपो भवेत् ॥३५६॥
तद्धस्तजलसंयोगान्मूर्खः काव्यं करोति च । तस्य वाक्यपरिचयान्मूर्तिर्विन्दति काव्यताम् ॥३५७॥
मस्तके तु करं धृत्वा वदवाणीमिति ब्रुवन् । साधको वांछया कुर्य्यात्तत्तथैव भविष्यति ॥३५८॥
ब्रह्माण्डगोलके याश्च याः काश्चिज्जगतीतले । समस्ताः सिद्धयो देवि करामलकवत्सदा ॥३५९॥
साधकस्मृतिमात्रेण यावंत्यः संति सिद्धयः । स्वयमायांति पुरतो जपादीनां तु का कथा ॥३६०॥
विदेशवर्तिनो भूत्वा वर्तंते चेटका इव । अमायां चन्द्रसंदर्शश्चन्द्रग्रहणमेव च ॥३६१॥
अष्टम्यां पूर्णचन्द्रत्वं चन्द्रसूर्याष्टकं तथा । अष्टदिक्षु तथाष्टौ च करोत्येव महेश्वरि ॥३६२॥

अणिमा खेचरत्वं च चराचरपुरीगतम् । पादुकाखड्गवेताल यक्षिणीगुह्यकादयः ॥३६३॥
तिलको गुप्तताद्दश्यं चराचरकथानकम् । मृतसंजीविनी सिद्धिर्गुटिका च रसायनम् ॥३६४॥
उड्डीनसिद्धिर्देवेशि षष्ठिसिद्धीश्वरत्वकम् । तस्य हस्ते वसेद्देवि नात्र कार्या विचारणा ॥३६५॥
केतौ वा दुन्दुभौ वस्त्रे विताने वेष्टने गृहे । भित्तौ च फलके देवि लेख्यं पूज्यं च यत्नतः ॥३६६॥
मध्ये चक्रं दशांगोक्तं परितो नामलेखनम् । तद्धारणान्महेशानि त्रैलोक्यविजयी भवेत् ॥३६७॥
एको हि शतसाहस्त्रं निर्जित्य च रणांगणे । पुनरायाति च सुखं स्वगृहं प्रति पार्वति ॥३६८॥
एको हि शतसंदर्शी लोकानां भवति ध्रुवम् । कलशं संस्थाप्य यत्नेन नामसाहस्त्रकं पठेत् ॥३६९॥
सेकः कार्य्यो महेशानि सर्वापत्तिनिवारणे । भूतप्रेतग्रहादीनां रक्षसां ब्रह्मरक्षसाम् ॥३७०॥
वेतालानां भैरवाणां स्कंदवैनायकादिकान् । नाशयेत् क्षणमात्रेण नात्रकार्या विचारणा ॥३७१॥
भस्मभिर्मंत्रितं कृत्वा ग्रहग्रस्तं विलेपयेत् । भस्मसंक्षेपणादेव सर्वग्रहविनाशनम् ॥३७२॥
नवनीतं चाभिमंत्र्य स्त्रीभ्यो दद्यान्महेश्वरि । वन्ध्या पुत्रप्रदा देवि नात्र कार्या विचारणा ॥३७३॥
कण्ठे वा वामबाहौ वा योनौ वा धारणाच्छिवे । बहुपुत्रवती नारी सुभगा जायते ध्रुवम् ॥३७४॥
पुरुषो दक्षिणांगे तु धारयेत्सर्व सिद्धये । बलवान् कीर्तिमान् धन्यो धार्मिकः साधकः कृती ॥३७५॥
बहुपुत्रो रथानां च गजानामधिपः सुधीः । कामिनीकर्षणोद्युक्तः क्रीं च दक्षिणकालिके ॥३७६॥
क्रीं स्वाहा प्रजपेन्मंत्रमयुतं नामपाठकः । आकर्षणं चरेद्देवि जलखेचरभूगतान् ॥३७७॥
वशीकरणकामो हि हूँ हूँ ह्रीं ह्रीं च दक्षिणे । कालिके पूर्वबीजानि पूर्ववत्प्रजपन् पठेत् ॥३७८॥
उर्वशीमपि वशयेन्नात्र कार्याविचारणा । क्रीं च दक्षिणकालिके स्वाहा युक्तं जपेन्नरः ॥३७९॥
पठेन्नाम सहस्त्रं तु त्रैलोक्यं मारयेद्ध्रुवम् । सद्भक्ताय प्रदातव्या विद्याराज्ञि शुभे दिने ॥३८०॥
सद्विनीताय शांताय दांतायातिगुणाय च । भक्ताय ज्येष्ठपुत्राय गुरुभक्तिपराय च ॥३८१॥
वैष्णवाय प्रशुद्धाय शिवाबलिरताय च । वेश्यापूजनयुक्ताय कुमारीपूजकाय च ॥३८२॥
दुर्गाभक्ताय रौद्राय महाकालप्रजापिने । अद्वैतभावयुक्ताय कालीभक्तिपराय च ॥३८३॥
देयं सहस्त्रनामाख्यं स्वयं काल्या प्रकाशितम् । गुरुदैवतमंत्राणां महेशस्यापि पार्वति ॥३८४॥
अभेदेन स्मरेन्मंत्रं स शिवः स गणाधिपः । यो मंत्रं भावयेन्मंत्री स शिवो नात्र संशयः ॥३८५॥
स शाक्तो वैष्णवः सौरः स एव पूर्णदीक्षितः । अयोग्याय न दातव्यं सिद्धिरोधः प्रजायते ॥३८६॥
वेश्या स्त्रीनिन्दकायाथ सुरासंवित्प्रनिन्दके । सुरामुखो मनुं स्मृत्वा सुराचार्यो भविष्यति ॥३८७॥
वाग्देवता घोरे आसापरघोरे च हूँ वदेत् । घोररूपे महाघोरे मुखीभीमपदं वदेत् ॥३८८॥
भीषण्यमुष्य षष्ठ्यंतं हेतुर्वामयुगे शिवे । शिववह्नियुगास्त्रं हूँ हूँ कवचमनुर्भवेत् ॥३८९॥
एतस्य स्मरणादेव दुष्टानां च मुखे सुरा । अवतीर्णा भवेद्देवि दुष्टानां भद्रनाशिनी ॥३९०॥
खलाय परतंत्राय परनिंदापराय च । दुष्टाय दुष्टसत्त्वाय परवादरताय च ॥३९१॥

शिवाभक्ताय दुष्टाय परदाररताय च । न स्तोत्रं दर्शयेद्देवि शिवहत्याकरो भवेत् ॥३९२॥
कालिकानन्दहृदयः कालिकाभक्तिमानसः । कालीभक्तो भवेत्सोऽयं धन्यरूपः स एव तु ॥३९३॥
कलौकाली कलौकाली कलौकाली वरप्रदा । कलौकाली कलौकाली कलौकाली तु केवला ॥३९४॥
बिल्वपत्रसहस्राणि करवीराणि वै तथा । प्रतिनाम्ना पूजयेद्धि तेन काली वरप्रदा ॥३९५॥
कमलानां सहस्रं तु प्रतिनाम्ना समर्पयेत् । चक्रं संपूज्य देवेशि कालिकावरमाप्नुयात् ॥३९६॥
मंत्रक्षोभयुतो नैव कलशस्थ जलेन च । नाम्ना प्रसेचयेद्देवि सर्वक्षोभविनाशकृत् ॥३९७॥
तथा दमनकं देविसहस्रमाहरेद्व्रती । सहस्रनाम्ना संपूज्य कालीवरमवाप्नुयात् ॥३९८॥
चक्रं विलिख्य देहस्थं धारयेत्कालिकातनुः । काल्यै निवेदितं यद्यत्तदंशं भक्षयेच्छिवे ॥३९९॥
दिव्यदेहधरो भूत्वा कालीदेहे स्थितो भवेत् । नैवेद्यनिन्दकान् दुष्टान् दृष्ट्वा नृत्यंति भैरवाः ॥४००॥
योगिन्यश्च महावीरा रक्तपानोद्यताः प्रिये । मांसास्थिचर्मणोद्युक्ता भक्षयंति न संशयः ॥४०१॥
तस्मान्न निन्दयेद्देवि मनसा कर्मणा गिरा । अन्यथा कुरुते यस्तु तस्य नाशो भविष्यति ॥४०२॥
क्रमदीक्षायुतानां च सिद्धिर्भवति नान्यथा । मंत्रक्षोभश्च वा भूयात् क्षीणायुर्वा भवेद्ध्रुवम् ॥४०३॥
पुत्रहारी स्त्रियोहारी राज्यहारी भवेद्ध्रुवम् । क्रमदीक्षायुतो देवि क्रमाद्राज्यमवाप्नुयात् ॥४०४॥
एकवारं पठेद्देवि सर्वपापविनाशनम् । द्विवारं च पठेद्यो हि वाञ्छां विंदति नित्यशः ॥४०५॥
त्रिवारं च पठेद्यस्तु वागीशसमतां व्रजेत् । चतुर्वारं पठेद्देवि चतुर्वर्णाधिपो भवेत् ॥४०६॥
पंचवारं पठेद्देवि पंचकामाधिपो भवेत् । षड्वारं च पठेद्देवि षडैश्वर्य्याधिपो भवेत् ॥४०७॥
सप्तवारं पठेत्सप्तकामानां चिंतितं लभेत् । वसुवारं पठेद्देवि दिगीशो भवति ध्रुवम् ॥४०८॥
नववारं पठेद्देवि नवनाथसमो भवेत् । दशवारं कीर्त्तयेद्यो दशार्हः खेचरेश्वरः ॥४०९॥
विंशतिवारं कीर्तयेद्यः सर्वैश्वर्यमयो भवेत् । पंचविंशतिवारैस्तु सर्वचिंताविनाशकः ॥४१०॥
पञ्चाशद्वारमावर्त्य पंचभूतेश्वरो भवेत् । शतवारं कीर्त्तयेद्यः शताननसमान धीः ॥४११॥
शतपंचकमावर्त्य राजराजेश्वरो भवेत् । सहस्रावर्त्तनाद्देवि लक्ष्मीरावृणुते स्वयम् ॥४१२॥
त्रिसहस्रं समावर्त्त्य त्रिनेत्रसदृशो भवेत् । पंचसाहस्रमावर्त्त्य कामकोटिविमोहनः ॥४१३॥
दशसाहस्रमावर्त्य भवेद्दशमुखेश्वरः । पंचविंशतिसाहस्रैश्चतु विंशतिसिद्धिधृक् ॥४१४॥
लक्षावर्त्तनमात्रेण लक्ष्मीपतिसमो भवेत् । लक्षत्रयावर्त्तनात्तु महादेवं विजेष्यति ॥४१५॥
लक्षपंचकमावर्त्त्य कलापंचकसंयुतः । दशलक्षावर्त्तनात्तु दशविद्याप्तिरुत्तमा ॥४१६॥
पंचविंशतिलक्षैस्तु दशविद्येश्वरो भवेत् । पंचाशल्लक्षमावृत्य महाकालसमो भवेत् ॥४१७॥
कोटिमावर्त्तयेद्यस्तु कालीं पश्यति चक्षुषा । वरदानोद्युक्तकरां महाकालसमन्विताम् ॥४१८॥
प्रत्यक्षं पश्यति शिवे तस्या देहो भवेद्ध्रुवम् । श्रीविद्याकालिका तारात्रिशक्तिविजयी भवेत् ॥४१९॥
विधेर्लिपिं च सम्मार्ज्य किंकरत्वं विसृज्य च । माहाराज्यमवाप्नोति नात्र कार्या विचारणा ॥४२०॥

त्रिशक्ति विषये देवि क्रमदीक्षा प्रकीर्तिता । क्रमदीक्षा युतो देवि राजा भवति निश्चितम् ॥४२१॥
क्रमदीक्षा विहीनस्य फलं पूर्वमिहेरितम् । क्रमदीक्षा युतो देवि शिव एव न चापरः ॥४२२॥
क्रमदीक्षासमायुक्तः काल्युक्तसिद्धिभाग्भवेत् । क्रमदीक्षाविहीनस्य सिद्धिहानिः पदे पदे ॥४२३॥
अहो जन्मवतां मध्ये धन्यः क्रमयुतः कलौ । तत्रापि धन्यो देवेशि नामसाहस्रपाठकः ॥४२४॥
दशकालीविधौ देवि स्तोत्रमेतत्सदा पठेत् । सिद्धिं विंदति देवेशि नात्र कार्या विचारणा ॥४२५॥
कालौ कालीमहाविद्या कलौकाली च सिद्धिदा । कलौकाली च सिद्धा च कलौकाली वरप्रदा ॥४२६॥
कलौ काली साधकस्य दर्शनार्थं समुद्यता । कलौ काली केवला स्यान्नात्र कार्य्या विचारणा ॥४२७॥
नान्यविद्या नान्यविद्या नान्यविद्या कलौ भवेत् । कलौ कालीं विहायाथ यः कश्चित्सिद्धिकामुकः ॥४२८॥
स तु शक्तिं विना देवि रतिसम्भोगमिच्छति । कलौ कालीं विना देवि यः कश्चित्सिद्धिमिच्छति ॥४२९॥
स नीलसाधनं त्यक्त्वा परिभ्रमति सर्वतः । कलौ कालीं विहायाथ यः कश्चिन्मोक्षमिच्छति ॥४३०॥
गुरुध्यानं परित्यज्य सिद्धिमिच्छति साधकः । कलौ कालीं विहायाथ यः कश्चिद्राज्यमिच्छति ॥४३१॥
स भोजनं परित्यज्य भिक्षुवृत्तिमभीप्सति । स धन्यः स च विज्ञानी स एव सुरपूजितः ॥४३२॥
स दीक्षितः सुखी साधुः सत्यवादी जितेन्द्रियः । स वेदवक्ता स्वाध्यायी नात्र कार्या विचारणा ॥४३३॥
शिवरूपं गुरुं ध्यात्वा शिवरूपं गुरुं स्मरेत् । सदाशिवः स एव स्यान्नात्र कार्य्या विचारणा ॥४३४॥
स्वस्मिन् कालीं तु संभाव्य पूजयेज्जगदम्बिकाम् । त्रैलोक्यविजयी भूयान्नात्र कार्यां विचारणा ॥४३५॥
गोपनीयं गोपनीयं गोपनीयं प्रयत्नतः । रहस्यातिरहस्यं च रहस्यातिरहस्यकम् ॥४३६॥
श्लोकार्द्धंपादमात्रं वा पादार्द्धं च तदर्द्धकम् । नामार्द्धं यः पठेद्देवि न वंध्यदिवसं नयेत् ॥४३७॥
पुस्तकं पूजयेद्भक्त्या त्वरितं फलसिद्धये । न च मारीभयं तत्र न चाग्निवायुसंभवम् ॥४३८॥
न भूतादिभयं तत्र सर्वत्र सुखमेधते । कुंकुमालक्तकेनैव रोचनागरुयोगतः ॥४३९॥
भूर्जपत्रे लिखेत्पुस्तकं सर्वकामार्थसिद्धये । इति संक्षेपतः प्रोक्तं किमन्यच्छ्रोतुमिच्छसि ॥४४०॥
इति गदितमशेषं कालिकावर्णरूपं प्रपठति, यदि भक्त्या सर्वसिद्धीश्वरः स्यात् ।
अभिनवसुखकामः सर्वविद्याभिरामो भवति, सकलसिद्धिः सर्ववीरा समृद्धिः ॥४४१॥

॥ इति श्रीकालीतंत्रे रुद्रयामले च कालीसहस्त्रनामस्तोत्रं समाप्तम् ॥

॥ अथ श्री कालिका सहस्त्रनाम स्तोत्रम् ॥

इस स्तोत्र को भगवान शिव ने परशुरामजी को दिया था अतः इसकी विशेष महिमा है एवं स्वयं भगवती काली ने इसे प्रकाशित किया है।

॥ श्री शिव उवाच ॥

कथितोऽयं महामंत्रः सर्वमंत्रोत्तमोत्तमः । यामासाद्य मया प्राप्तमैश्वर्य पदमुत्तमम् ॥
संयुक्तः परया भक्त्या यथोक्त विधिना भवान् । कुरुतामर्चनं देव्यास्त्रैलोक्य विजिगीषया ॥

॥ श्री राम उवाच ॥

प्रसन्नो यदि मे देव परमेश पुरातन । रहस्यं परमं देव्याः कृपया कथय प्रभो ॥
विनार्चनं विना होमं विना न्यासं विना बलिं । विना गंधं विना पुष्पं विना नित्योदितां क्रियां ॥
प्राणयामं विनाध्यानं विना भूतविशोधनम् । विनादानं विना जापं येन काली प्रसीददति ॥

॥ श्री शिव उवाच ॥

पृष्टं त्वयोत्तमं प्राज्ञ भृगुवंश समुद्भव । भक्तानामपि भक्तोसि त्वमेव साधयिष्यसि ॥
देवीं दानव कोटिघ्नीं लीलया रुधिरप्रियाम् । सदा स्तोत्र प्रियामुग्रां कामकौतुक लालसां ॥
सर्वदानन्द हृदयामासवोत्सव मानसाम् । माध्वी कमत्स्यमांसानुरागिणीं वैष्णवीं पराम् ॥
श्मशान वासिनीं प्रेतगण नृत्य महोत्सवाम् । योगप्रभावां योगेशीं योगीन्द्र हृदयस्थिताम् ॥
तामुग्रकालिकां राम प्रसीदयितुमर्हसि । तस्याः स्तोत्र परं पुण्यं स्वयं 'काल्या प्रकाशितम्' ॥
तव तत् कथयिष्यामि श्रुत्वा वत्सावधारय । गोपनीयं प्रयत्नेत पठनीयं परात्परम् ॥
यस्यैक कालपठनात् सर्वेविघ्नाः समाकुलाः । नश्यन्ति दहने दीप्ते पतङ्गा इव सर्वतः ॥
गद्यपद्यमयी वाणी तस्य गङ्गाप्रवाहवत् । तस्यदर्शन मात्रेण वादिनो निष्प्रभां गताः ॥
तस्य हस्ते सदैवास्ति सर्वसिद्धिर्न संशयः । राजानोऽपि च दासत्वं भजंते किं परे जनाः ॥
निशाथे मुक्त केशस्तुः नग्नः शक्ति समाहितः । मनसा चिन्तयेत् कालीं महाकालेन चालितां ॥
पठेत् सहस्त्रनामाख्यं स्तोत्रं मोक्षस्य साधनम् । प्रसन्ना कालिका तस्य पुत्रत्वेनानुकम्पते ॥
यथा ब्रह्ममृतै ब्रंह्मकुसुमैः पूजिता परा । प्रसीदति तथानेन स्तुता काली प्रसीददति ॥

विनियोगः- अस्य श्री दक्षिण कालिका सहस्त्रनाम स्तोत्रस्य महाकालभैरव ऋषिस्त्रिष्टुप् छन्दः श्मशानकाली देवता धर्मार्थकाममोक्षार्थे विनियागः ।

॥ अथ स्तोत्रम् ॥

श्मशान कालिका काली भद्रकाली कपालिनी । गुह्यकाली महाकाली कुरुकुल्ला विरोधिनी ॥
कालिका कालरात्रिश्च महाकाल नितम्बिनी । कालभैरव भार्या च कुलवर्त्मप्रकाशिनी ॥
कामदा कामिनी कन्या कमनीयस्वरूपिणी । कस्तूरीरस लिप्ताङ्गी कुञ्जरेश्वर गामिनी ॥
ककारवर्ण सर्वाङ्गी कामिनी कामसुन्दरी । कामार्त्ता कामरूपा च कामधेनुः कलावती ॥

कांता कामस्वरूपा च कामाख्या कुलकामिनी । कुलीना कुलवत्यम्बा दुर्गा दुर्गति नाशिनी ॥
कौमारी कलजा कृष्णा कृष्णदेहा कृशोदरी । कृशाङ्गी कुलिशांगीजा क्रीङ्कारी कमला कला ॥
करालास्या कराली च कुलकांता - पराजिता । उग्रा उग्रप्रभा दीप्ता विप्रचित्ता महाबला ॥
नीला घना मेघनादा मात्रा मुद्रा मितामिता । ब्राह्मी नारायणी भद्रा सुभद्रा भक्तवत्सला ॥
माहेश्वरी च चामुण्डा वाराही नारसिंहिका । वज्राङ्गी वज्राकङ्काला नृमुण्डस्त्रग्विणी शिवा ॥
मालिनी नरमुण्डाली गलद्रक्त विभूषणा । रक्तचन्दन सिक्ताङ्गी सिंदुरारुण मस्तका ॥
घोररूपा घोरदंष्ट्रा घोरा घोरतरा शुभा । महादंष्ट्रा महामाया सुदन्ती युगदन्तुरा ॥
सुलोचना विरूपाक्षी विशालाक्षी त्रिलोचना । शारदेन्दु प्रसन्नास्या स्फुरत् स्मेताम्बुजेक्षणा ॥
अट्टहासा प्रफुल्लास्या स्मेरवक्त्रा सुभाषिणी । प्रफुल्लपद्मवदना स्मितास्या प्रियभाषिणी ॥
कोटराक्षी कुलश्रेष्ठा महती बहुभाषिणी । समुतिः कुमतिश्चण्डा चण्डमुण्डातिवेगिनी ॥
सुकेशी मुक्तकेशी च दीर्घकेशी महाकुचा । प्रेतदेहाकर्णपूरा प्रेतपाणिसुमेखला ॥
प्रेतासना प्रियप्रेता पुण्यदा कुलपण्डिता । पुण्यालया पुण्यदेहा पुण्यश्लोका च पावनी ॥
पूता पवित्रा परमा परा पुण्य - विभूषणा । पुण्यनाम्नी भीतिहरा वरदा खड्गपाशिनी ॥
नृमुण्डहस्ता शान्ता च छिन्नमस्ता सुनासिका । दक्षिणा श्यामला श्यामा शांता पीनोन्नतस्तनी ॥
दिगम्बरी घोररावा सृक्कान्तरक्त - वाहिनी । घोररावा शिवासंगा निःसंगा मदनातुरा ॥
मत्ता प्रमत्ता मदना सुधासिन्धु निवासिनी । अभिमत्तामहामत्ता सर्वाकर्षण कारिणी ॥
गीतप्रिया वाद्यरता प्रेतनृत्य परायणा । चतुर्भुजा दशभुजा अष्टादशभुजा तथा ॥
कात्यायनी जगन्माता जगती परमेश्वरी । जगद्बन्धुर्जगद्धात्री जगदानन्द कारिणी ॥
जगज्जीववती हेमवती माया महालया । नागयज्ञोपवीताङ्गी नागिनी नागशायिनी ॥
नागकन्या देवकन्या गान्धारी किन्नरी सुरी । मोहरात्रि महारात्रि दारुणामा - सुरासुरी ॥
विद्याधरी वसुमति यक्षिणी योगिनीजरा । राक्षसी डाकिनी वेदमयी वेदविभूषणा ॥
श्रुतिस्मृति महाविद्या गुह्यविद्या पुरातनी । चिंताचिंता स्वधा स्वाहा निद्रातंद्रा च पार्वती ॥
अपर्णा निश्चला लोला सर्वविद्या तपस्विनी । गङ्गा काशी शची सीता सती सत्यपरायणा ॥
नीतिः सुनीतिः सुरुचिस्तुष्टिः पुष्टिर्धृतिः क्षमा । वाणी बुद्धि महालक्ष्मी लक्ष्मीर्नीलसरस्वती ॥
स्त्रोतस्वती स्त्रोतवती मातंगी विजया जया । नदी सिन्धुः सर्वमयी तारा शून्य - निवासिनी ॥
शुद्धा तरंगिणी मेधा लाकिनी बहुरूपिणी । सदानन्दमयी सत्या सर्वानन्द स्वरूपिणी ॥
सुनन्दा नन्दिनी स्तुत्या स्तवनीया स्वभाविनी । रंकिणी टंकिणी चित्रा विचित्रा चित्ररूपिणी ॥
पद्मा पद्मालया पद्मसुखी पद्मविभूषणा । शाकिनी हाकिनी क्षान्ता राकिणी रुधिरप्रिया ॥
भ्रान्तिर्भव रुद्राणी मृडानी शत्रुमर्दिनी । उपेन्द्राणी महेशानी ज्योत्स्ना चेन्द्रस्वरूपिणी ॥

सूर्य्यात्मिका रुद्रपत्नी रौद्री स्त्री प्रकृतिः पुमान। शक्तिः सूक्तिर्मतिमती भुक्तिर्मुक्तिः पतिव्रता ॥
सर्वेश्वरी सर्वमता सर्वाणी हरवल्लभा। सर्वज्ञा सिद्धिदा सिद्धा भाव्या भव्या भयापहा ॥
कर्त्रीं हर्त्री पालयित्री शर्वरी तामसी दया। तमिस्त्रा यामिनीस्था च स्थिरा धीरा तपस्विनी ॥
चार्वङ्गी चंचला लोलजिह्वा चारु चरित्रिणी। त्रपा त्रपावती लज्जा निर्लज्जा ह्रीं रजोवती ॥
सत्ववती धर्मनिष्ठा श्रेष्ठा निष्ठुरवादिनी। गरिष्ठा दुष्टसंहर्त्री विशिष्टा श्रेयसीघृणा ॥
भीमा भयानका भीमनादिनी भीः प्रभावती। वागीश्वरी श्रीर्यमुना यज्ञकर्त्रीं यजुःप्रिया ॥
ऋक्सामाथर्वनिलया रागिणी शोभनस्वरा। कलकण्ठी कम्बुकण्ठी वेगुवीणापरायणा ॥
वंशिनी वैष्णवी स्वच्छा धात्री त्रिजगदीश्वरी। मधुमती कुण्डलिनी ऋद्धिः सिद्धिः शुचिस्मिता ॥
रम्भोर्वशी रती रामा रोहिणी रेवती रमा। शङ्खिनी चक्रिणी कृष्णा गदिनी पद्मिनी तथा ॥
शूलिनी परिघास्त्रा च पाशिनी शार्ङ्गपाणिनी। पिनाकधारिणी धूम्रा शरभी वनमालिनी ॥
वज्रिणी समरप्रीता वेगिनी रणपण्डिता। जटिनी विम्बिनी नीला लावण्याम्बुधिचन्द्रिका ॥
बलिप्रिया सदा पूज्या पूर्णा दैत्येन्द्र माथिनी। महिषासुरसंहन्त्री वासिनी रक्तदन्तिका ॥
रक्तपा रुधिराक्ताङ्गी रक्तखर्पर हस्तिनी। रक्तप्रिया मांसरुचिरा सवासरक्त मानसा ॥
गलच्छोणित मुण्डालिकण्ठमाला विभूषणा। शवासना चितान्तस्था माहेशी वृषवाहिनी ॥
व्याघ्रत्वगम्बरा चीनचेलिनी सिंहवाहिनी। वामदेवी महादेवी गौरी सर्वज्ञभाविनी ॥
बालिका तरुणी वृद्धा वृद्धमाता जरातुरा। सुभ्रुर्विलासिनी ब्रह्मवादिनी ब्राह्मणी मही ॥
स्वप्नावती चित्रलेखा लोपामुद्रा सुरेश्वरी। अरुन्धती तीक्ष्णा च भोगवायनुवादिनी ॥
मन्दाकिनी मन्दहासा ज्वालमुख्य सुरान्तका। मानदा मानिनी मान्या माननीया मदोद्धता ॥
मदिरा मदिरान्मादा मेध्या नव्या प्रसादिनी। सुमध्यानन्तगुणिनी सर्वलोकोत्तमोत्तमा ॥
जयदा जित्वरा जेत्री जय श्रीर्जयशालिनी। सुखदा शुभदा सत्या सभासंक्षोभ कारिणी ॥
शिवदूती भूतिमती विभूतिर्भीषणानना। कौमारी कुलजा कुन्ती कुलस्त्री कुलपालिका ॥
कीर्तिर्यशस्विनी भूषा भूष्या भूतपति प्रिया। सगुणा निर्गुणा धृष्टा निष्ठा काष्ठा प्रतिष्ठिता ॥
धनिष्ठा धनदा धन्यावसुधा स्वप्रकाशिनी। उर्वी गुर्वो गुरुश्रेष्ठा सगुणा त्रिगुणात्मिका ॥
महाकुलीना निष्कामा सकामा कामजीवना। कामदेवकला रामाभिरामा शिवनर्तकी ॥
चिन्तामणि कल्पलता जाग्रती दीनवत्सला। कार्त्तिकी कार्त्तिका कृत्या अयोध्या विषमा समा ॥
सुमंत्रा मंत्रिणी घूर्णा ह्लादिनी क्लेशनाशिनी। त्रैलोक्य जननी हृष्टा निर्मांसा मनोरूपिणी ॥
तडाग निम्नजठरा शुष्कमांसास्थि मालिनी। अवन्ती मथुरा माया त्रैलोक्य पावनीश्वरी ॥
व्यक्ताव्यक्तानेकमूर्त्तिः शर्वरी भीमनादिनी। क्षेमङ्करी शंकरी च सर्वसम्मोह कारिणी ॥
अर्द्ध तेजस्विनी क्लिन्ना महातेजस्विनी तथा। अद्वैता भोगिनी पूज्या युवती सर्वमङ्गला ॥

महाभैरव पत्नी च परमानन्दभैरवी । सुधानन्दभैरवी च उन्मादानन्दभैरवी ॥
मुक्तानन्दभैरवी च तथा तरुणभैरवी । ज्ञाननन्दभैरवी च अमृतानन्दभैरवी ॥
महाभयङ्करी तीव्रा तीव्रवेगा तपस्विनी । त्रिपुरा परमेशानी सुन्दरी पुरसुन्दरी ॥
त्रिपुरेशी पञ्चदशी पञ्चमी पुरवासिनी । महासप्तदशी चैव षौडशी त्रिपुरेश्वरी ॥
महांकुश स्वरूपा च महाचक्रेश्वरी तथा । नवचक्रेश्वरी चक्रेश्वरी त्रिपुरमालिनी ॥
राजराजेश्वरी धीरा महात्रिपुर सुन्दरी । सिन्दूर पूर रुचिरा श्रीमत्त्रिपुरसुन्दरी ॥
सर्वाङ्गसुन्दरी रक्ता रक्तवस्त्रोत्तरीयिणी । जावायावकसिन्दूर रक्तचन्दन धारिणी ॥
जावायावकसिन्दूर रक्तचन्दन - रूपधृक् । चामरी बालकुटिलनिर्मल श्यामकेशिनी ॥
वज्रमौक्तिक रत्नाढ्य किरीट मुकुटोज्ज्वला । रत्नकुण्डल संसक्त स्फुरद्गण्ड मनोरमा ॥
कुंजरेश्वर कुम्भोत्थ मुक्तारञ्जित नासिका । मुक्ताविद्रुम माणिक्यहाराढ्य स्तनमण्डला ॥
सूर्यकान्तेन्दु कान्ताढय स्पर्शाश्मकंठभूषणा । बीजपूरस्फुरद्वीज दंतपंक्तिरनुत्तमा ॥
कामकोदण्डका भुग्नभ्रूकाटाक्ष प्रवर्षिणी । मातङ्गकुम्भवक्षोजा लसत्कोकनदेक्षणा ॥
मनोज्ञ शष्कुलीकर्णा हंसीगति विडम्बिनी । पद्मरागांगद ज्योतिर्दोश्चतुष्कप्रकाशिनी ॥
नानामणि परिस्फूर्जच्छुद्ध कांचनकंकना । नागेन्द्रदन्त निर्माणवलयांकित पाणिनी ॥
अंगुरीयक चित्रांगी विचित्र क्षुद्रघण्टिका । पट्टाम्बर परीधाना कलमञ्जीर शिंजिनी ॥
कर्पूरागरुकस्तूरी कुंकुमद्रव लेपिता । विचित्र रत्न पृथिवी कल्प शाखि तलस्थिता ॥
रत्नद्वीप स्फुरद्रक्त सिंहासन विलासिनी । षट्चक्रभेदनकरी परमानन्द रूपिणी ॥
सहस्त्रदलपद्मान्त श्चन्द्रमण्डलवर्त्तिनी ॥
ब्रह्मरूपशिव क्रोडनानासुख विलासिनी । हर विष्णु विरिंचीन्द्र ग्रहनायक सेविता ॥
शिवा शैवा च रुद्राणी तथैव शिववादिनी । मातङ्गिनी श्रीमती च तथैवानन्द मेखला ॥
डाकिनी योगिनी चैव तथोपयोगिनी मता । माहेश्वरी वैष्णवी च भ्रामरी शिवरूपिणी ॥
अलम्बुषा वेगवती क्रोधरूपा सुमेरवला । गान्धारी हस्तजिह्वा च इडा चैव शुभङ्करी ॥
पिङ्गला ब्रह्मदूती च सुषुम्ना चैव गन्धिनी । आत्मयोनि र्ब्रह्मयोनिर्जगद् योनिरयोनिजा ॥
भगरूपा भगस्थात्री भगिनी भगरूपिणी । भगात्मिका भगाधाररूपिणी भगमालिनी ॥
लिंगाख्या चैव लिंगेशी त्रिपुरा भैरवी तथा । लिंगगीतिः सुगीतिश्च लिंगस्था लिंगरूपधृक् ॥
लिंगमाना लिंगभवा लिंगलिंगा च पार्वती । भगवती कौशिकी च प्रेमा चैव प्रियंवदा ॥
गृध्ररूपा शिवारूपा चक्रिणी चक्ररूपधृक । लिंगाभिधायिनी लिंगप्रिया लिंगनिवासिनी ॥
लिंगस्था लिंगनी लिंगरूपिणी लिंगसुन्दरी । लिंगगीतिर्महाप्रीता भगगीतिर्महासुखा ॥
लिंगनामसदानन्दा भगनामसदागतिः । लिंगमालाकण्ठभूषा भगमाला विभूषणा ॥

भगलिंगामृतप्रीता भगलिंग स्वरूपिणी । भगलिंगस्य रूपा च भगलिंग सुखावहा ॥
स्वयम्भू कुसुमप्रीता स्वयम्भू कुसुमार्चिता । स्वयम्भू कुसुमप्राणा स्वयम्भू पुष्पतर्पिता ॥
स्वयम्भू पुष्प घटिता स्वयम्भू पुष्पधारिणी । स्वयम्भू पुष्पतिलका स्वयम्भू पुष्पचर्चिता ॥
स्वयम्भू पुष्पनिरता स्वयम्भू कुसुमग्रहा । स्वयम्भू पुष्पयज्ञांशा स्वयम्भू कुसुमात्मिका ॥
स्वयम्भू पुष्पनिचिता स्वयम्भू कुसुमप्रिया । स्वयम्भू कुसुमादान लालसोन्मत्तमानसा ॥
स्वयम्भू कुसुमानन्दलहरी स्निग्धदेहिनी ॥
स्वयम्भू कुसुमाधारा स्वयम्भू कुसुमाकुला । स्वयम्भू पुष्पनिलया स्वयम्भू पुष्पवासिनी ॥
स्वयम्भू कुसुमस्निग्धा स्वयम्भू कुसुमात्मिका। स्वयम्भू पुष्पकरिणी स्वयम्भू पुष्पवाणिका ॥
स्वयम्भू कुसुमध्याना स्वयम्भू कुसुमप्रभा । स्वयम्भू कुसुमज्ञाना स्वयम्भू पुष्पभागिनी ॥
स्वयम्भू कुसुमोल्लसा स्वयम्भू पुष्पवर्षिणी । स्वयम्भू कुसुमोत्साहा स्वयम्भू पुष्परूपिणी ॥
स्वयम्भू कुसुमोन्मादा स्वयम्भू पुष्पसुन्दरी । स्वयम्भू कुसुमाराध्या स्वयम्भू कुसुमोद्भवा ॥
स्वयम्भू कुसुमव्याग्रा स्वयम्भू पुष्पपूर्णिता । स्वयम्भू पूजक प्रज्ञा स्वयम्भू होतृमातृका ॥
स्वयम्भू दातृरक्षित्री स्वयम्भू रक्ततारिका । स्वयम्भू पूजकग्रस्ता स्वयम्भूं पूजक प्रिया ॥
स्वयम्भू वन्दकाधारा स्वयम्भू निन्दकान्तका । स्वयम्भू प्रदसर्वस्वा स्वयम्भू प्रदपुत्रिणी ॥
स्वयम्भू प्रदसस्मेरा स्वयम्भू प्रदशरीरिणी ॥
सर्वकालोद्भव प्रीता सर्वकालोद्भवात्मिका । सर्वकालोद्भवोद्भावा सर्वकालोद्भवोदभवा ॥
कुण्डपुष्प सदा प्रीतिगेलि पुष्पसदारतिः । कुण्डगोलोद्भव प्राणा कुण्डगोलोद्भवात्मिका ॥
स्वयम्भूवा शिवाधात्री पावनी लोकपावनी । कीर्तिर्यशस्विनी मेधा विमेधा शुक्रसुन्दरी ॥
अश्विनी कृत्तिका पुष्या तेजस्का चन्द्रमण्डला । सूक्ष्मा सूक्ष्मा वलाका च वरदा भयनाशिनी ॥
वरदाभयदा चैव मुक्तिबन्ध विनाशिनी । कामुका कामदा कान्ता कामाख्या कुलसुन्दरी ॥
दुःखदा सुखदा मोक्षा मोक्षदार्थ प्रकाशिनी । दुष्टा दुष्टमतिश्चैव सर्वकार्य विनाशिनी ॥
शुक्राधारा शुक्ररूपा शुक्रसिन्धु निवासिनी । शुक्रालया शुक्रभोगा शुक्रपूजा सदारतिः ॥
शुक्रपूज्या शुक्रहोम सन्तुष्टा शुक्रवत्सला । शुक्रमूर्तिः शुक्रदेहा शुक्रपूजक पुत्रिणी ॥
शुक्रस्था शुक्रिणी शुक्र संस्पृहा शुक्रसुन्दरी । शुक्रस्नाता शुक्रकरी शुक्रसेव्याति शुक्रिणी ॥
महाशुक्रा शुक्रभवा शुक्रवृष्टि विधायिनी । शुक्राभिधेया शुक्रार्हा शुक्रवन्दक वन्दिता ॥
शुक्रानन्दकरी शुक्रसदानन्दाभिधायिका । शुक्रोत्सवा सदाशुक्रपूर्णा शुक्रमनोरमा ॥
शुक्रपूजकसर्वस्वा शुक्र निन्दक नाशिनी। शुक्रात्मिका शुक्रसम्वत् शुक्राकर्षण कारिणी ॥
शारदा साधक प्राणा साधका सक्तमानसा । साधकोत्तम सर्वस्वा साधकाभक्तरक्तता ॥
साधकानन्द सन्तोषा साधकानन्द कारिणी । आत्मविद्या ब्राह्मविद्या परब्रह्म स्वरूपिणी ॥

॥फलश्रुति॥

त्रिकूटस्था पञ्चकूटा सर्वकूटशरीरिणी । सर्ववर्णमयी वर्णजपमाला विधायिनी ॥
इति श्री कालिका नामे सहस्त्रं शिवभाषितम् । गुह्याद्गुह्यतरं साक्षात् महापातक नाशनम् ॥
पूजाकाले निशीथे च सन्ध्योयौरुभयोरपि । लभते गाणपत्यं स यः पठेत साधकोत्तमः ॥
यः पठेत पाठयेद्वापि शृणोति श्रावयेदथ । सर्वपाप विनिर्मुक्तः स याति कालिकापुरम् ॥
श्रद्धयाऽश्रद्धया वापि यः कश्चिम्मानवः स्मरेत् । दुर्ग दुर्गशतं तीर्त्वा स याति परमां गतिम् ॥
बंध्या वा काकबंध्या वा मृतवत्सा च यांगना । श्रुत्वा स्तोत्रमिदं पुत्रान् लभते चिरजीविनः ॥
यं यं कामयते कामं पठन् स्तोत्रमनुत्तमम् । देवीपाद प्रसादेन तत्तदाप्नोति निश्चितम् ॥

॥ इति श्रीकालिका कुल सर्वस्वे कालिका सहस्रनाम स्तोत्रं समाप्तम् ॥

॥ इतिकाली तंत्रं सम्पूर्णम् ॥

॥ प्रत्यंगिरा तन्त्रम् ॥

प्रत्यंगिरा महाशक्ति भद्रकाली का ही स्वरूप है। काली कल्पतरु में इसे कालिका के भेद स्वरूपों में माना है। महाशक्ति प्रत्यंगिरा शत्रु द्वारा किये अभिचार कर्म तथा कृत्या प्रयोगों को नष्ट करती है। विपरीत प्रत्यंगिरा नाम से विख्यात देवी शत्रु के द्वारा किये गये दुष्प्रयोग के दुष्फल को वापस शत्रु पक्ष की ओर भेजकर शत्रु को दण्ड देती है। यह देवी शत्रु के अधिकार में गयी हुई वस्तु को वापस दिलाती है। बगलामुखी से अधिक प्रभावी प्रयोग इस विद्या के हैं। दक्षिणमार्ग एवं वाममार्ग दोनों ही क्रम से फलप्रदा है। पूर्णाभिषिक्त एवं विशिष्ट साधक इस विद्या के मूलमंत्रों में कामना भेद से बीजाक्षरों के परिवर्तन अथवा कामना मंत्र कामनानाम जोड़कर मंत्र का प्रयोग कर सकते हैं।

यह देवि शवारूढा भी है और सिंहवाहनारूढा भी। अंगिरा, प्रत्यंगिरा, कौशिकी, रक्ता, देशिका, भद्रकाली इत्यादि नाम हैं। महाप्रत्यंगिरा सहस्त्रवदना है, उनकी जिह्वा से ज्वाला निकल रही है, ऐसा ध्यान साधक (माला मंत्र) में करें।

मेरू तंत्र के अनुसार अरिमंत्र के त्याग के विधान हेतु अरिमंत्र के जल में विसर्जन व शांति हवन के पश्चात् प्रत्यंगिरा मंत्र का जाप करना चाहिये ताकि अरिमंत्र का दुष्प्रभाव साधक पर नहीं पड़ सके।

जैन व प्राकृत ग्रंथों में भी प्रत्यंगिरा मंत्रों का वर्णन मिलता है।

एक विशिष्ट साधक ने राजा के द्वारा जब्त की गई संपत्ति व अधिकार को पुनः दिलाने के लिये प्रथम पुष्पणि कन्या के साथ देवी भाव से षोडशोपचार पूजन किया। तीसरे दिन कन्या ने पंचम कर्म का आदेश दिया। साधक ने प्रार्थना की कि आप शक्ति स्वरूपा है मैं शिव स्वरूप के योग्य नहीं हुं यदि आप प्रसन्न है तो मेरे यजमान के कार्य सिद्धि का आशिर्वाद दीजिये। चौथे दिन वह कार्य सिद्ध हो गया।

कामना भेद व कार्य भेद के कारण हमने भी मूल मंत्र के साथ कुछ अन्य मंत्रों द्वारा संपुटिकरण करके तथा कामना संयोग के द्वारा मंत्र जप अनुष्ठान कराये है। कुछ स्वयं के अनुभवी प्रयोगों का वर्णन भी आगे किया जायेगा। यह विद्या खोये हुये मान सम्मान धन को वापस दिलाती है।

प्रारंभ में परकृत्या, पीड़ा निवारक मंत्रों का वर्णन किया गया है पश्चात् शत्रुनाशक, पर पीड़ा कारक कृत्या ऋचाओं का वर्णन इस तंत्र खण्ड में दिया है।

॥ सावधानी विशेष ॥

कई बार ऐसा होता है। कि आप किसी यजमान के हित में प्रयोग कर रहे हैं तो कृत्या शक्ति वापस जाकर कृत्या प्रयोग करने वाले को संकेत देती है कि अब मुझे वहां से हटना पड़ेगा, इस कारण कृत्या भेजने वाला व्यक्ति पुनः शाबर मंत्रोक्त मूंठ चलाता है या अन्य कोई प्रयोग करता है।

आप पर देवी कृपा है, रक्षा कर्म मजबूत है तो शत्रु द्वारा छोड़ी गई मूंठ स्वतः जलकर नष्ट हो जायेगी उस समय

फटाके या धमाके की आवाज होगी। कपड़ा, प्लास्टिक, केश इत्यादि के जलने जैसी बदबू घर में फैल जायेगी। देवी कृपा से वह मूंठ पानी के पात्र मटकी में समा जायेगी तो मटकी फूट जायेगी और उसमें से धुये निकलेगी। कृत्या किसी वृक्ष उतरेगी तो वृक्ष सूख जायेगा।

एक व्यक्ति के ऊपर कृत्या प्रयोग किया हुआ था उससे **प्रत्यंगिरा स्तोत्र** के विशेष संख्या में जप करने को कहा गया आखिरी दिनों में पीड़ित व्यक्ति को एक बार सीने में जलन होकर खांसी आई और उसके साथ ही मुंह से धुआं निकला अर्थात् उसके खिलाफ कोई पुत्तल प्रयोग किया हुआ था जा जलकर नष्ट हो गया।

इस तरह अलग अलग घटनाओं में अलग अलग लक्षण हो सकते है।

॥ अथ प्रत्यंगिरा मंत्रा:॥

(१) षोडशाक्षर मंत्रः- (पुरुश्चर्यार्णवे) **ॐ अं कं चं टं तं पं ह्मं (ह्मं) भों ह्रीं हुं स हुं फट् स्वाहा।**

(२) सप्तदशाक्षर मंत्रः- (मेरु तंत्रे)- **ॐ अं कं चं टं पं यं शं ह्रां ह्रीं ह्रूं सः हुं फट् स्वाहा।**

विनियोग :- **अस्य मंत्रस्य विधाता ऋषि, उष्णिक छंदः, महावायु-महापृथ्वी-महाऽऽकाश- महासमुद्र- महापर्वत-महाग्नि इत्यादि षट् देवता, हुं बीजं, ह्रीं शक्ति सर्वशत्रु क्षयार्थे जपे विनियोगः।**

षडङ्गन्यासः- **ह्रां, ह्रीं, ह्रूं, ह्रैं, ह्रौ, ह्रः से क्रमशः** षडङ्गन्यास करें।

॥ ध्यानम् ॥

ताररत्नादिर्चिराक्रांतमम्भः प्रस्त्रवणैर्युतं ।व्याघ्रादि पशुभिर्व्याप्तं सानुयुक्तं गिरिं स्मरेत् ॥

मत्स्यकूर्मादि बीजाढ्यं नवरत्न समर्चितं ।घनतोयं स कल्लोलमकूपारं विचिन्तयेत् ॥

ज्वालावली समाक्रतं जगत्-त्रितयमद्भूतं ।पीतवर्णं महावह्निं संस्मरेच्छत्रु शांतये ॥

स्वरात् समुत्थरेणवौघ-मलिनमूर्ध्व भूविदं ।पवनं संस्मरेद् विश्वजीवनं प्राणस्वरूपतः ॥

नदी पर्वत वृक्षादि-कलिता ग्रामसंकुला ।आधारभूता जगतोध्येया पृथ्वीह मंत्रिणा ॥

सूर्यादिग्रह नक्षत्र कालचक्र समन्वितं ।निर्मल गगनं ध्यायेत् प्राणिनामाश्रय प्रदम् ॥

सोलह हजार जप करके व्रीहि, तण्डुल, आज्य, सर्षप, यव, तिलादि षड्द्रव्यों से दशांश होम करें।

(३) षट् विशंत्यक्षर मंत्रः- ॐ हुं स्फारय स्फाराय मारय मारय शत्रुवर्गान् नाशय नाशय स्वाहा।

प्रत्यंगिरा स्तोत्र के अंतर्गत यह मंत्र है। सर्षप हवन करने से शत्रु नाश होवे।

(४) अष्टाविंशत्यक्षर मंत्रः- (क) ॐ ऐं ह्रीं श्रीं प्रत्यंगिरे मां रक्ष रक्ष मम शत्रून् भंजय भंजय फे हुं फट् स्वाहा।(ख) मंत्रोद्धर- **प्रणवं वाग्भवं माया लक्ष्मीः प्रत्यंगिरेति च। मम रक्ष द्वयं देवि मम शत्रून् पदंमयि। भक्षं द्वयं प्रणवं च स्वाहांतो मंत्र उत्तमः।**

मंत्र यथा- **ॐ ऐं ह्रीं श्रीं प्रत्यंगिरे मम रक्ष रक्ष देवि मम शत्रून् भक्ष भक्ष ॐ स्वाहा।**

(हमारे अनुमान में **मां रक्ष रक्ष** अधिक उपयुक्त है।)

विनियोग – दोनों मंत्रों के **ऋषि भैरव है तथा छंदः अनुष्टुप् है। प्रथम मंत्र के देवता दैशिका, रक्ता, और प्रत्यंगिरा देवी है। दूसरे मंत्र का देवता प्रत्यंगिरा है तथा बीज परा शक्ति स्वाहा एवं ॐ कीलक है।** भोग अपवर्ग सिद्धि हेतु विनियोग कहा गया है।

षडङ्गन्यास – **ॐ ऐं हृदयाय नमः। ॐ ह्रीं शिरसे स्वाहा। ॐ श्रीं शिखायै वषट्। ॐ प्रत्यंगिरे कवचाय हुम्। मा रक्ष रक्ष नैत्रत्रयाय वौषट्। ॐ मम शत्रून् भञ्जय भञ्जय अस्त्राय फट्।** दूसरे मंत्र के न्यासादि भी इसी प्रकार करें।

यथा- **ॐ ऐं हृदयाय नमः। ॐ ह्रीं शिरसे स्वाहा। ॐ श्रीं शिखायै वषट्। ॐ प्रत्यंगिरे मां रक्ष रक्ष देवी कवचाय हुम्। ॐ मम शत्रून् भक्ष भक्ष नेत्रत्रयाय वौषट्। ॐ स्वाहा अस्त्राय फट्।**

(१) प्रथम मंत्र हेतु ध्यान इस प्रकार है-

टङ्क कपालं डमरुं त्रिशूलं, सम्बिभ्रती चन्द्रकलावतंसा।
पिङ्गोर्ध्वकेशोऽसित भीमदंष्ट्रा, भूयाद् विभूत्यै मम भद्रकाली॥

(२) दूसरे मंत्र हेतु ध्यान इस प्रकार है-

आशाम्बरा मुक्तकचा घनच्छाविर्ध्येया स-चर्मासि कराऽहि भूषणा।
दंष्ट्रोग्रवक्त्रा ग्रसिताहितात्वया प्रत्यंगिरा शङ्कर-तेजसेरिता॥

(पाठान्तर भेद से **"ग्रसिताहितान्वय"** है)

(५) अन्य मंत्र- कामना भेद तथा मूलइष्टदेव के भेद से बीजाक्षरों का परिवर्तन कर हमने अन्य प्रयोग भी करायें है।

यथा- **बालायुक्त उपरोक्त मंत्र ह्रीं श्रीं ऐं क्लीं सौः प्रत्यंगिरे मां रक्ष रक्ष मम शत्रून् भञ्जय भञ्जय ममैश्वर्याणि देहि देहि स्वाहा।**

(६) चतुस्त्रिशंदक्षर मंत्रः- (सिद्धान्त संग्रह से उद्धृत पुरश्चर्यार्णव में मंत्र इस प्रकार है तथा इसके ऋष्यादि ३७ अक्षर मंत्र के समान है)

ॐ यां कल्पयन्ति नोऽरयः क्रूरां कृत्यां वधूमिव। तां ब्रह्मणाऽप निर्णुद्म प्रत्यक् कर्तारमिच्छतु ह्रों॥

यह मंत्र विपरीत प्रत्यंगिरा मंत्र भी कहलाता है जो शत्रु की क्रिया को वापस उसी पर लौटाता है।

पाठान्तर- मंत्र के आदि एवं अंत में **ॐ** तथा **ह्रों** के स्थान पर **ह्रीं** बीज लगावें।

॥ ध्यानम् ॥

खड्ग चर्म धरां कृष्णां मुक्तकेशी विवाससं।
दंष्ट्रा - कराल - वदना - भीषाभां सर्वभूषणाम्।
ग्रसन्तीं वैरिणं ध्यायेत् प्रेरितां शिव - तेजसा॥

मंत्र जाप का दशांश होम अपामार्ग समिध व सर्षप, तिलादि से करें।

(७) सप्तत्रिशंदक्षर मंत्रः- ॐ ह्रीं यां कल्पयन्ति नोऽरयः क्रूरां कृत्यां वधूमिव। तां ब्रह्मणा अप निर्णुद्मः प्रत्यक्-कर्तारमृच्छतु ह्रीं ॐ (मेरु तंत्र में **अप निर्णुघ्न** लिखा है)

विनियोग- **अस्य मंत्रस्य ब्रह्मा ऋषि, अनुष्टुप् छंदः प्रत्यंगिरा देवी देवता, ॐ बीजं, ह्रीं शक्तिः कृत्यानाशने ((अखिलाप्तये) विनियोगः।**

षडङ्गन्यास- ॐ यां कल्पयंति नोऽरयः ह्रां हृदयाय नमः। ॐ क्रूरां कृत्यां ह्रीं शिरसे स्वाहा। ॐ वधूमिव ह्रूं शिखायै वषट्। ॐ तां ब्रह्मणा ह्रैं कवचाय हुम्। ॐ अपनिर्णुद्म ह्रौं। नेत्रत्रयाय वौषट्। ॐ प्रत्यक् कर्तारमृच्छतु ह्रः अस्त्राय फट्। मेरुमंत्र में न्यास मंत्रों में अंत में सभी जगज ह्रीं बीज कहा है। तथा अश्विनौ ऋषि कहा है। मंत्र महोदधि में ऋषि ब्रह्मा कहा है।

ध्यान- (पूर्वोक्त) आशाम्बरा मुक्तकचा- शंकर तेजसेरिता ॥

(८) लोमविलोम गायत्री मंत्र पुटित प्रयोग मंत्र - **ॐ भू र्भुवः स्वः तत्सवितुर वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्।**

ॐ ह्रीं यां कल्पयन्ती नोऽरयः क्रूरां कृत्यां वधूमिव तां ब्रह्मणा अपनिर्णुद्मः प्रत्यक् कर्तारमृच्छतु ह्रीं ॐ। द्यादचोप्र नः यो योधि हिमधी स्यवदे। गौंभ ण्यंरेव रतुविसत्त् स्वः भुवः भूः ॐ ॥

यह प्रयोग विशेष संहारक तथा शीघ्रफलप्रदा है इस प्रयोग को कई बार मैने प्रयोग में लिया है।

ध्यान-(मेरु तंत्रोपि)

ततो ध्यायेत् सिंहमुखीं मुक्तकेशां दिगम्बरां ।
असिचर्म करां श्यामां दंष्ट्राग्रां सर्व भीषणाम् ।
ग्रसन्तीमहितान्नुद्र तेजसा ध्यानमीरितम् ॥

(९) पञ्चविशंत्योत्तर शताक्षर माला मंत्र (मेरुतंत्रे) **ॐ ह्रीं नमः कृष्णवाससे स्तुते विश्वसहस्त्र हिंसिनि सहस्त्रावने महाबलेऽपराजिते प्रत्यंगिरे परसैन्य परकर्म विध्वंसिनि परमंत्रोत्सादिनि सर्वभूतदमनि सर्व देवान् बंध बंध सर्वविद्यां छिन्धि छिन्धि क्षोभय क्षोभय पर यंत्राणि स्फोटय स्फोटय सर्वश्रृंखलां त्रोटय त्रोटय ज्वलज्वाला जिह्वे करालवदने प्रत्यंगिरे ह्रीं नमः ॥**

(१०) अन्य मंत्र- उपरोक्त मंत्र विशेष प्रभावी है तथा प्रयोग समय में प्रारंभ काल में मनोद्वेग, उच्चाटन स्वयं का आधार या रक्षा विधान कमजोर होने से हो सकता है परन्तु बाद में यह मंत्र शान्ति देता है। यह मंत्र उध्वरिता भी है अच्छा ध्यान ऊपर के केन्द्रो में लगने लगता है।

मैंने समय की परिस्थिति अनुसार ग्रहों की मारक दशा, ऋणबंधन, राजबंधन, शत्रुबंधन व कृत्या पीड़ित व्यक्तियों हेतु उपरोक्त मंत्र में कुछ कामना मंत्र जोड़कर प्रयोग कराये हैं।

यथा- **ॐ ह्रीं नमः.......सर्वभूत दमनि दुष्टग्रहबंधनि सर्वदेवान् बंध बंध सर्वविद्या (परविद्यां, परकृत्यां) छिन्धि छिन्धि क्षोभय क्षोभय परयंत्राणि स्फोटय स्फोटय बंदी श्रृंखलां स्त्रोटय स्त्रोटय मम शत्रून भंञ्जय भंञ्जय ज्वलज्वाला जिह्वे करालवदने प्रत्यंगिरे ह्रीं नमः।**

विनियोगः- **अस्य मंत्रस्य ब्रह्माऋषिः, अनुष्टुप् छंदः, प्रत्यंगिरा देवता, ॐ बीजं, ह्रीं शक्तिः, कृत्यानाशने विनियोगः।**

षडङ्गन्यास- ह्रां, ह्रीं, ह्रूं, ह्रैं, ह्रौं, ह्रः से षडङ्गन्यास करे।

॥ ध्यानम् ॥

सिंहारूढाऽति कृष्णाङ्गी ज्वालावक्त्रा भयङ्करा। शूल खड्ग करा वस्त्रे दधती या तु तां भजे ॥

मंत्रमहार्णव में अन्य ध्यान इस प्रकार है-

सिंहारूढाऽति कृष्णं त्रिभुवनभयकृद् रूपमुग्रं वहन्ती, ज्वालावक्त्रा वसाना नववसन युगं नीलमण्याभ कांतिः । शूलं खड्गं वहन्ती निजकरयुगले भक्तरक्षैक रक्षा, सेयं प्रत्यंगिरा संक्षपयतु रिपुभिर्निर्मितं वोऽभिचाराम् ॥

पाठान्तर भेद- **कृष्णं- कृष्णा। निर्मितं- निर्मितान्। वोभिचारं- नोऽभिचारान्।**

कार्यसिद्धि हेतु दस हजार जप करके तिल एवं राजिका से होम करें।

(११) जैन प्राकृत ग्रंथोऽपि- शाक्त मंत्रों के प्रयोग जैन ग्रंथों व प्राकृत ग्रंथों में भी संग्रहीत है आवश्यकता वश धर्म रक्षार्थ प्रयोग किये जाते थे।

मंत्रार्थ के अनुसार मंत्र प्रयोग **घटचालन सिद्धि** द्वारा शुभाशुभ ज्ञान तथा वस्तु को (कृत्या को) पुनः पलट देने हेतु प्रयोग किया जाता है।

मंत्रो यथा- **ॐ ह्रीं कृष्णवाससे सुध्म सिंहवाहने सहस्त्रवदने महाबले प्रत्यंगिरे सर्वसैन्यकर्म विध्वंसिनि परमंत्र छेदनि सर्वदेवाणाणी सर्वदेवाणाणी बंधि बांधि निकृंतय निकृंतय ज्वालाजिह्वे करालचक्रे ॐ ह्रीं प्रत्यंगिरे स्वाहा स्वाहा स्वाहा शेषाणंद देवकेरी आज्ञा फुरई आज्ञाफुरई आज्ञा फुरई आज्ञा फुरई।**

इस मंत्र के साथ ही लिखा है, **घट फेरण** मंत्र अर्थात् इस मंत्र द्वारा कृत्या निवारण एवं घट चालन द्वारा मंत्र की सिद्धि असिद्धि प्रश्नोत्तर प्रयोग किये जाने का उल्लेख बनता है।

॥ अन्यऽपि प्रयोगिक सिद्ध मंत्राः ॥ (मेरुतंत्रे)

(१) रिपुनिग्रह - (प्रत्यंगिराऋषि, अनुष्टुप् छंद, कृत्या देवता)

शीर्षण्वतीं कर्णवतीं विष्णुरूपां भयङ्करीम् । यः प्राहिणोदिहाद्य त्वं नित्यं योजय स्वस्तिभिः ॥

(२) वैरनिवृत्ति हेतु - (वामदेव ऋषि, गायत्री छंद, कृत्या देवता)

येन दिष्ठ्येह वरसि प्रतिपूरमधापिनि । तमेवातो निवर्त्तस्व मा स्याम्यंतसो अनागसः ॥

(३) वैरनाश - (वृद्धवशिष्ठ ऋषि, अनुष्टुप् छंद, कालाग्नि रुद्र देवता)

अभिवर्त्तस्य कर्त्तारं निरस्तां ताभिरोजसा । आयुरस्य निकृन्तस्य प्रजाश्च पुरुषादिन्नि ॥

(४) अभिचार नाशक मंत्र - (उर्ध्वऋषि, अनुष्टुप् छंद, यातुधान्य देवता)

यस्त्वा कृत्ये चकारेह त्वं तं गच्छ पुनर्नवे । आसतीः कृत्यानाशय सर्वास्तु यातुधान्यः ॥

उक्त मंत्रों के प्रयोग शुक्ला अष्टमी से पूर्णिमा तक करे अथवा प्रतिप्रदा से प्रारंभ करे। पुरुष के प्रमाण या ८ प्रादेश प्रमाण का उदुम्बर का दण्ड लाये १०० बार अभिमंत्रित कर अग्नि में जला देने से शत्रु को व्याधि होगी। अर्कसमिध व तिल सर्षपादि के होम से शत्रु नाश होवे। श्मशान काष्ठ या ताल पर शत्रुनाम लिखकर गाड़ देवें। पश्चात् मंत्र प्रयोग करे रिपु नाश होवे।

(५) रिपु निग्रह - (महादेव ऋषिः, अनुष्टुप् छंद, कृत्या देवता)

क्षिप्रं कृत्ये निवर्त्तस्व कर्त्तुरेव गृहं प्रति । पशूंश्चैवास्य नाशय वीर्यं चास्य निबर्हय ॥

(६) रिपु निग्रह - (अगस्त्य ऋषिः, अनुष्टुप् छंद, कृत्या देवता)

यस्त्वां कृत्ये चकारेह विद्वानपि उपग्रहान् । तस्यैवातः परावृत्य तनुं कृन्धि यथा तरुम् ॥

(७) अरिनिग्रह – (वशिष्ठ मुनि, अनुष्टुप् छंद, रुद्र देवता)

प्रतिचित्वावसे धातु ब्रह्मणे विष्णुमित्रहम् । अग्निश्च कृत्यं रक्षोहा चोज एकपात् ॥

(८) शत्रुनिग्रह – (ब्रह्मा ऋषि, अनुष्टुप छंद, कृत्या देवता)

यथा त्वांगिरसः पूर्वे भृगवश्चायसेधिरे । अत्रयश्च वशिष्ठश्च तथैव नायसेधि माम् ॥

(९) अरिनाश – (अग्नि ऋषि, अनुष्टुप् छंद, कृत्या देवता)

यस्ते परुंषि स दधौ रथस्यैवं विभूर्धिया । तंत्रच्छतगते जननज्ञास्तेजनो यतः ॥

उपरोक्त पांचों मंत्रों के शांति प्रयोग एवं बाधा निवारण हेतु कपिला गाय के दूध को क्षीर मधुमंत्र एवं पलाश समिध से होम करे तो ग्रह पीड़ा प्रेतोपद्रव दूर होवे। आठ हजार आहुति देवें। नदी तीर, श्मशान या भद्रकाली मंदिर में पीपल समिध से होम करें। उस भस्म को गोशाला में डाले तो पशुधन की वृद्धि होवे।

(१०) संग्राम विजय– (भृगु ऋषि, अनुष्टुप् छंद, कृत्या देवता)

यो नः कृत्ये रणस्थो वा जनो वान्यो हि हिंसति । तस्य त्वं देवि विद्धवाग्निं तनुमृच्छ स्वहेतिना ॥

(११) विवादे जयप्रद मंत्र– (अगस्त्य ऋषि, अनुष्टुप् छंद, कृत्या देवता)

मनाः शर्यादेन हविमस्य क्षियन्त या कृत्वने । सरस्वतीत्यव कृत्य मच्छिषस्तस्य किञ्चन ॥

(१२) वाद विवादे जयप्रद मंत्र– (महादेव ऋषि अनुष्टुप् छंद, कृत्या देवता)

मनः कश्चिदुहाराति र्मनसा प्रतिभूरिति । दूरस्थो वान्तिकस्थो वा तस्य हृद्यमसृक् पिब ॥

(१३) दुस्साध्यकार्य सिद्धि–(अग्नि ऋषि, अनुष्टुप छंद, कृत्या देवता)

येनासि कृत्ये प्रहिता छद्मनास्मज्जिघांसया । तस्य व्यनेच्चा व्यनहीनस्त हरसाशनिः ॥

(१४) मार्गरक्षा– (गोतम ऋषि, अनुष्टुप् छंद, कृत्या देवता)

यो नोसि वासः प्रस्थानः परा यति पराचतम् । तैर्देविरात्र्याः कृत्ये नो गमयेमान्निकृन्तय ॥

नित्य १०८ आहुति तिल माष चरु होम करे तो सर्व व्याधि नाश होवे। पलाश पुष्प व तिलादि से होम करे सब दुःखों का नाश होवे। उपरोक्त मंत्रो के प्रयोग प्रतिपदा से प्रारंभ करे। कपिला क्षीर होम कर शेषांश का भक्षण करें तो दुःख दूर होवे।

(१५) शत्रु पीड़ा– ज्वरदाह (ज्वर ऋषि, अनुष्टुप छंद, मृत्यु देवता)

यन्द्विष्मो यश्च द्वेष्टयघायुर्यस्य न संशयः । शुनेः पिपृमि वक्ष्यामि तं प्रत्यस्मत्व मृत्यवे ॥

(१६) शत्रु निग्रह– (अंगिरा ऋषि, गायत्री छंद, अग्नि देवता)

यद्युवेश द्विपदेस्मानर्दिवेष चतुष्पदी । निरेस्था नो वज्रास्माभिः कर्तुं त्वष्टपदीगृहान् ॥

(१७) विद्वेषण मंत्र– (ब्रह्मा ऋषि, अनुष्टुप छंद, अग्नि देवता)

यश्च यायज्ञः शपथो यश्च मामीश याति नः । ब्रह्माचपकुद्धशया शर्वतत्कन्ध धस्पतिम् ॥

(१८) शत्रु पलायन– (कश्यप ऋषि, अनुष्टुप छंद, भौम देवता)

सबन्धुश्चाप्यवन्धुश्च यो अस्म अभिदा मति । तस्य त्वसिन्धयिष्टाय दावित्सर्प ताक्षिरः ।

बहते जल में खड़े होकर उपरोक्त मंत्रों के १०८ बार जप करें। २८ बार जलांजलि प्रदान करें। कार्य सिद्धि होवे।

(१९) अरिनाशक मंत्र- (उपमन्यु ऋषि, बृहतीछंद, कालाग्निरुद्र देवता)

अभिप्रेहि शुभप्राक्षं युक्ताशु शपथं रथे । शत्रुर्न तिष्ठति कृत्ये वृको वा विमतो गृहात् ॥

(२०) अरिपलायन- (सभ्यंतपा ऋषि, बृहती छंद, ज्वलनो देवता)

परिणो वृद्धिशपथा दहन्नग्निरिव ह्रदे । शत्रूनेवाभिनोज्ञेहि दिव्यावृक्षमिवा शनिः ॥

(२१) गजाऽजतुरगादीनां नियोगे- तथा रिपु मोहने (अंगिरा ऋषि, अनुष्टुप् छंद, कृत्या देवता)

असपत्नं पुरस्तान्नः शिवं दक्षिणतस्कृधि । अभयं सततं पश्चाद्भर उत्तरतो गृ॰ ॥

(२२) रिपुत्रास कारक मंत्र- (कश्यप ऋषि, बृहती छंद, कृत्या देवता)

परे हि कृत्ये मातिष्ठ वृद्धसेवपदं नय । मृगास्यहि मृगोरिः प्रांतत्वानि कर्तुमर्हति ॥

उपरोक्त मंत्रों का शिव लिंग या काली के सम्मुख २१ दिन जप करें या कृष्णाष्टमी से शुक्लाष्टमी तक जप करें तो हस्ति पीड़ा, गजपीड़ा दूर होवे। दक्षिणा में कंबल का दान करें तो कलत्र का नाश होवे।

(२३) पुरदहनार्थ- (शर्व ऋषि, अनुष्टुप् छंद, सर्वसुर देवता)

अग्न्यास्य घोर रूपेपि पुरुषेपि विनाशनी । जृंभिता प्रतिगृह्णस्व प्रमादाय हि चाद्भुतम् ॥

(२४) राजकोप शांति- (अर्क ऋषि, अनुष्टप् छंद, कृत्या देवता)

त्वमिन्द्रो यमो वरुणस्त्वमापोपि च रथोनिलः । त्वं ब्रह्मा चैव रुद्रश्च त्वष्टा चैव प्रजापतिः ॥

(२५) रोगनाश- (इन्द्र ऋषि, गायत्री छंद, अश्विनौ देवता)

आवर्तध्वं निवर्त्तध्व मृतवः परिवत्सराः । अहोरात्रास्तथाब्दाश्च दिशः प्रतिदिशश्च मे ॥

(२६) असाध्यकार्य हेतु- (गालव ऋषि, त्रिष्टुप् छंद, मित्रो देवता)

त्व यमं वरुणं सोमं त्वमापोग्निमथानिलम् । अत्राहत्य पशूश्चैव चोत्पादयसि चाद्भुतम् ॥

उपरोक्त पंच अनुवाक का नित्य जप करने से शत्रुभय दूर होता है तथा पूर्व जन्म दोष से जनित रोग का नाश होता है।

(२७) सर्वरक्षाकर मंत्र- (विष्णु ऋषि, अनुष्टुप् छंद, विष्णु देवता)

यो मेरुगर्भशयानं विश्वस्य हितं पुरुषं विजहुः। कुंभीवपाकं नरकं जनाग्रीय पंचवर्षाश्च एवं पुरुषो सोमपस्य ॥

(२८) स्त्रीवश्य मोहनाश- (शुक्र ऋषि, अनुष्टप् छंद, ब्रह्म देवता)

अत्यक्ता रक्तास्वलंकृतः सर्वतो दुरितं वह । जातीयाश्चैव कृत्यानां शत्रुहन्याय चेतसः ॥

(२९) दुर्वध्यारिविनाशने- (वसवो ऋषि, अनुष्टुप् छंद, परमात्मा देवता)

यथा हतिपुरासीनं तथैवस्वत्सकृन्नरः । तथा त्वया युजा वयं तस्य निकुमः स्थातुजङ्गमम् ॥

(३०) शत्रुनाश- (इन्दु ऋषि, अनुष्टुप् छंद, अग्नि देवता)

उत्तिष्ठेवमरहीनो जातेह्निभिहेच्छसि । या वास्ते कृत्ययादौ तु प्रतिकृत्स्यामिविद्रवः ॥

(३१) तपोविघ्ननाशकारक मंत्र- (शान्तायन ऋषि, अनुष्टुप् छंद परमा देवता)

लोभालस्यादयो वाथ दृश्यन्ते ये तपोपहा। तपोविघ्नकराः पाठे स्वायुधाश्शमिदं पठेत् ॥
स्वायुधाः सन्ति नोऽरयो विघ्नं चैवं परुंषि ते। तैस्तैर्निकपला पापिनोजीवयस्यरीन् ॥

(३२) पापनाश- (भागीरथ ऋषि, अनुष्टुप् छंद, ब्रह्मा देवता)

मास्याच्छिषो द्विपदं तनोचकि चतुष्पदम्। माज्ञातीतन्तु जानस्यान्मनवे क्षिप्रवेशिनौ ॥

उपरोक्त पांचों अनुवाक का नित्य १०८ बार पाठ करे तो शत्रु नाश होवे। सब प्रकार की कृत्या नाश होकर लोक का वशीकरण होवे। शिव मंदिर में जपने से व्यधिनाश होवे। सूर्य के संमुख २८ बार कार्पास बीज, लवण घृतादि से होम करे तो शत्रु का स्तंभन होवे, समुद्र का शोषण करने की शक्ति प्राप्त होवे॥

(३३) दुर्लभ कर्मसाधन- (अंगिरा ऋषि, अनुष्टुप् छंद, कालमृत्यु देवता)

शत्रूयता प्रहितासि मां ये ताभिमधर्वतः। ततस्तथा त्वदनु यो मततु र्यायश्रितः ॥

(३४) पापनाश- (अंगिरा ऋषि, नियोग छंद, महादेव देवता)

एवं त्वनिकृतास्माभि र्ब्रह्मण देवि सर्वशः। वधेत माघ्विनो गत्वा पापधीनेव नो न हि ॥

(३५) शत्रूणां शोषणार्थे- (अंगिरा ऋषि, अनुष्टुप् छंद, कृत्या देवता)

यथा विद्युद्धतो वृक्ष आमूलादनुशुष्यति। एवं प्रतिशुष्यति स यो मे पापं चिकीर्षति ॥

(३६) स्त्रिया कृताभिचार नाशन- (कठो ऋषि, अनुष्टुप् छंद, महादेव देवता)

यथा प्रतिशुको भूत्वा तमेव प्रतिधावति। पापन्तमेव धावतु यो मे पापं चिकीर्षति ॥

(३७) दुर्गस्थाने रक्षा- (भृगु ऋषि, अनुष्टुप् छंद, विश्वेदेवा देवता)

या नश्चेक्षरणे यश्च निष्ण्यौ निघनार्ठसति। देवास्ते सर्व धुन्वन्तु ब्रह्मवर्म ममाचरम् ॥

उपरोक्त अनुवाकों का १०८ बार नित्य होम करें तो सब पापों की शांति होकर आयुवृद्धि होवे। पलाश पुष्पों के होम से ब्रह्म तेज की वृद्धि होवे, बकुल पुष्प एवं ब्रह्म वृक्ष की समिध होम से पाप नाश होव।

(३८) प्रत्यंगिरा ऋचा-

कृणुष्वपाजः प्रजासितिं न पृथ्वीं याहि राजेवामवां इभेन।
त्रिष्वीमन प्रसितिं गृणानो स्तासिविध्य रक्षसस्तपिष्ठैः ॥

(३९) ग्रामनाशक, शत्रुनाश-

उदग्नेतिष्ठ प्रत्वा तनुष्वन्यामित्राँ ओषधात्तिग्म हेते। यो नो अरातिं समिधा न चक्रेनीचा तं धक्ष्यत सं न शुष्कम्॥

विषचूर्ण, रक्तकंटक, राजिका होम से शत्रु नाश होवे।

(४०) ग्रामनाशक-

काण्डात् काण्डात् प्ररोहन्ती परुषः परुषपरि। एवा नो दूर्वे प्रतनु सहस्रेण शतेन च ॥
या शतेन प्रतनोषि सहस्रेण विरोहसि। तस्यास्ते देवीष्टके विधेम हविषा वयम् ॥

मंत्र जप पश्चात् दूर्वा से दश हजार होम करें। ग्राम नगर के लिये बीस हजार, देश के लिये साठ हजार तथा राष्ट्र की

रक्षा हेतु १ लाख बार होम करें॥

(४१) कामना सिद्धि मंत्र-

मधुमान्नो वनसपतिर्मधुमाँ अस्तु सूर्यः । माध्वीर्गावो भवन्तु नः ॥

त्रिमधु एवं उदुम्बर समिध होम से कामना सिद्धि होवें॥

॥ प्रत्यंगिरा यंत्रार्चनम् ॥

काली की पीठशक्तियों का अर्चन कर ध्यान पूर्वक देवी का आवाहन करें। पुष्प में हाथ में लेकर यंत्रार्चन की आज्ञा मांगे।

ॐ सचिन्मये परा देवि परामृत रसप्रिये । अनुज्ञां मे देहि परिवारार्चनाय ते ॥

विन्दु त्रिकोण षट्कोण, अष्टदल बनाकर उनके ऊपर ३ वृत्त बनाये पश्चात् चार द्वार युक्त भूपुर बनाये।

प्रथमावरणम् - (भूपुरे) पूर्वादिक्रमेण- **ॐ इन्द्रसशक्तिं श्री पादुकां पूजयामि तर्पयामि नमः** - इति सर्वत्र। **ॐ अग्नि सशक्ति पा.। ॐ यमसशक्तिं पा.। निर्ऋति सशक्तिं पा.। ॐ वरुण सशक्तिं पा.। ॐ वायु सशक्तिं पा.। ॐ कुबेर सशक्तिं पा.। ॐ ईशान सशक्ति पा.। ॐ ब्रह्म सशक्तिं पा.। ॐ विष्णु सशक्तिं पा.।**

द्वितीयावरणम् - (भूपुरे लोकपालसमीपे) **वज्र श्री पा.। शक्ति श्री. पा.। दण्ड श्री. पा.। खड्ग श्री पा.। पाश श्री पा.। अंकुश श्री पा.। गदा श्री पा.। त्रिशूल श्री पा.। पद्म श्री पां। चक्र श्री पा.।**

तृतीयावरणम् - (त्रिवृत्ते) प्रथम वीथिकायाम् - **ॐ कोलानंद श्री पा.। ॐ परमगुरवे श्री पा.। ॐ परमेष्ठी गुरवे श्री पा.॥ १॥** द्वितीय वीथिकायाम् - **ॐ दिव्यौघ गुरुभ्यो श्री. पा.। ॐ सिद्धौघ श्री पा.। पुनः स्वगुरु अ---नंद नाथ सशक्तिं श्री पा.॥२॥**

॥ प्रत्यंगिरा यन्त्रम् ॥

चतुर्थावरणम् - (अष्टदलाग्रे) पूर्वादिक्रमेण- **अं असितांग भैरवाय पा.। इं रुरुभैरवाय पा.। उं चण्डभैरवाय पा.। ॠं क्रोध भैरव पा.। लृं उन्मत्त भैरव श्री पा.। एं कपालि भैरव पा.। ओं भीषण भैरव श्री पा.। अं संहारभैरव श्री पा.।**

पंचमावरणम् - (अष्टदलमध्ये) पूर्वादिक्रमेण- **आं ब्राह्मी श्री पा.। ईं माहेश्वरी श्री पा.। ॐ कौमारी श्री पा.। ॠं वैष्णवी श्री पा.। लृं वाराही श्री पा.। ऐं माहेन्द्री श्री पा.। औं चामुण्डा श्री पा.। अः नारसिंह श्री पा.।**

षष्ठमावरणम् - (अष्टदले ग्रंथिस्थानेषु) पश्चिम से नैर्ऋति पर्यन्त **ॐ कामरूपपीठ श्री पा.। ॐ मलयगिरिपीठ पा.। ॐ कोलगिरिपीठ श्री पा.। ॐ कालांतपीठ श्री पा.। ॐ चौहारपीठ श्री पा.। ॐ जालंधरपीठ श्री पा.। ॐ उड्डीयानपीठ पा.। ॐ देवकूट पीठ श्री पा.।**

सप्तमावरणम् - (वृत्त मंडले) पश्चिम से निर्ऋति तक- **हेरुक भैरव पा.। बेताल भैरव पा.। त्रिपुरांतक भैरव पा.। अग्निजिह्व भैरव पा.। कालांत भैरव श्री पा.। कपालिभैरव श्री पा.। एकपाद भैरव श्री पा.। भीमरूप भैरव श्री पा.। उर्ध्वं मलयभैरव श्री पा.। अधः हाटकेश्वर भैरव श्री पा.।**

अष्टमावरणम् – (अष्टदल केशरेषु वा अष्टयोनिषु) पूर्वादि क्रमेण- **ॐ ऐं ह्रीं श्रीं स्तंभिनी श्री पा.। ॐ ऐं ह्रीं श्रीं क्षोभिणी श्री पा.। ॐ ऐं ह्रीं श्रीं द्राविणी श्री पा.। ॐ ऐं ह्रीं श्रीं भ्रामणी श्री पा.। ॐ ऐं ह्रीं श्रीं रौद्री श्री पा.। ॐ ऐं ह्रीं श्रीं मोहिनी श्री पा.। ॐ ऐं ह्रीं श्रीं जिभृणी श्री पा.। ॐ ऐं ह्रीं श्रीं संहारिणी श्री पा.।**

नवमावरणम् – (षट्कोणे) आग्नेये **ॐ ऐं ह्रीं श्रीं हृदय श्री पा.।** ईशाने- **ॐ ऐं ह्रीं श्रीं शिरः श्री पा.।** निर्ऋत- **ॐ ऐं ह्रीं श्रीं शिखा श्री पा.।** वायव्ये- **ॐ ऐं ह्रीं श्रीं कवच श्री पा.।** आमध्ये- **ॐ ऐं ह्रीं श्रीं नेत्र श्री पा.।** दिक्षु- **ॐ ऐं ह्रीं श्रीं अस्त्र श्रीं पा.।**

दशमावरणम् – (त्रिकोणे) आग्नेये- **ॐ ऐं ह्रीं श्रीं काली श्री पा.।** ईशाने- **ॐ ऐं ह्रीं श्रीं भद्रकाली श्री पा.।** अधः कोणे- **ॐ ऐं ह्रीं श्रीं नित्याकाली श्री पा.।** ततौ मध्ये बिन्दु समीपे- मूल मंत्र उच्चारण करे **श्री भैरवसहितां श्रीमच्छ्री प्रत्यंगिरा श्री पा.।**

एकादशावरणम् – (भूपुरे) पश्चिमे- **बं बटुक श्री पा.।** उत्तरे **यां योगिनीभ्यो श्री पा.।** पूर्वे **क्षां क्षेत्रपालाय नमः श्री पा.।** दक्षिणे- **गं गणपतये नमः श्री पा.।** वायव्ये- **सुधाभ्यो नमः श्री पा.।** ईशानें **द्वादशादित्ये श्री पा.।** अग्नियें **एकादश रुद्रेभ्यो नमः।** नैर्ऋते **सर्वेभ्यो भूतेभ्यो नमः।**

पश्चात् देवी के अस्त्रों की देवी के समीप पूजन करे। देवी दक्षहस्ते **ॐ असि श्री पा.।** वामहस्ते **ॐ चर्म श्री पा.।** इसके बाद देवी की पूजा अर्चाकर बलिप्रयोग करे होम करे। अग्नि या जलं में आहुति देवे। **प्राणाय स्वाहा। व्यानाय स्वाहा। उदानाय स्वाहा। अपानाय स्वाहा। समानाय स्वाहा।**

ईशानादि चारों कोणों त्रिकोण वृत्त चतुरस्र बनाकर बलिमण्डल बनाकर बलि प्रदान करे। ईशाने- **बं बटुकाय नमः। एह्येहिं देवीपुत्र बटुकनाथ कपिल जटाभार भास्वर त्रिनेत्र ज्वालामुख सर्व विघ्नान्नाशय २ सर्वोपचार सहितं बलिं गृहण २ स्वाहा ॥१॥ आग्नेयां योगिनीभ्यो नमः। उर्ध्वं ब्रह्माण्डतो वा दिविगगनतले भूतले निष्कले वा पाताले वातले वा पवनसलिलयो र्यत्रकुत्र स्थिता वा क्षेत्रे पीठोपपीठादिषु च कृतपदाधूप दीपादिकेन प्रीता देव्यः सदानः सुभबलि विधिना पांतु वीरेन्द्र वंद्याः। यां योगिनीभ्यो नमः स्वाहा सर्वयोगिनी ह्रीं फट् स्वाहा ॥२॥** नैर्ऋते- **क्षां क्षीं क्षूं क्षैं क्षौं क्षः क्षेत्रपाल अतिबलि सहितं बलिं गृहण २ स्वाहा ॥३॥** वायव्ये- **गां गीं गूं गणपतये वर वरद सर्वजनं में वशमानय बलिं गृहण २ स्वाहा ॥४॥** यथा शक्ति जप कर देवी समर्पण करें।

॥ अथ कृत्यानिवारक सूक्तम् ॥

भगवति प्रत्यंगिरा का प्रयोग शत्रु द्वारा किये गये अभिचार को नष्ट करने हेतु किया जाता है। शत्रु के प्रहार को उसी पर वापस लौटाने से इसे विपरीत प्रत्यंगिरा भी कहते हैं। जैन एवं प्राकृत ग्रंथों में पाठान्तर भेद से इसके प्रयोग मिलते हैं। मेरे अनुभव में यह आया है कि आप पर कोई कृत्या, मूठ भेजी गई है, भगवति की कृपा से स्वतः नष्ट हो जायेगी तो धमाके की या फटाके की आवाज आयेगी। आपके किसी पानी के पात्र में मूठ उतरेगी तो पात्र टूट जायेगा। और छमं की आवाज के साथ मूठ निष्क्रिय हो जायेगी। यदि पेड़ या शिला पर गिरेगी तो पेड़ जल जायेगा, शिलाखण्ड टूट जायेगा। अगर मूठ अन्यत्र नहीं जावे तो स्वयं पर आघात होगा। अगर मूठ या कृत्या अभिचार प्रयोग भारी है तो विशेष प्रयोग करें। यदि प्रयोग में विघ्न आवें, लाभ नहीं हो रहा हो तो साथ में **कालरात्री का प्रयोग अवश्य करें।** कालरात्रि शत्रु की क्रिया को संम्मोहित करके शिथिल करेगी। अन्य विशेष अनुभवी साधकों से ज्ञात करें।

किसी व्यक्ति पर किसी ने जादू टोना प्रेतादि उपद्रव किया हो उसके निवारण हेतु इस सूक्त के विशेष संख्या में जप करके तिल, समिध, सरसों, काली मिर्च, राई, नमक आदि से हवन करें।

सावधानी जब कोई कृत्या प्रयोग किसी पर आता है बड़े पक्षी के गुजरने जैसी ''शर्र'' की आवाज सुनाई देती है। लौ जलती हुई दिखाई देती है। धम् की आवाज होती है। अगर आपका इष्ट प्रबल है तो उसकी कृत्या स्वतः नष्ट हो जायेगी उस समय जोरदार फटाखे की आवाज होगी, आपके घर में पानी की जगह में समा जायेगी तो पात्र फूट जायेगा और वहां से धुयें निकलेगी। सामने कोई वृक्ष हो तो जल जायेगा अगर कोई प्रेतोपद्रव दमन हेतु १०-११ दिन का कोई प्रयोग है तो शुरु के ५-७ दिन तकलीफ बाधा रह सकती है बाद में ठीक रहे। अगर प्रेत बलवान है तो जाते उस व्यक्ति के कार्य व्यापार को ३-४ महिने के लिये बड़े संकट में डाल सकता है अन्य नुकसान दे सकता है बाद में ठीक हो जायेगा अतः धेर्य रखें इसके अलावा बगलामुखी व प्रत्यंगिरा देवी के मंत्रों का प्रयोग करें।

(ऋषि-प्रत्यङ्गिरसः। देवता-मन्त्रोक्ता॥ छन्द-बृहती, गायत्री, अनुष्टुपः, पंक्तिः, जगतीः, त्रिष्टुप्ः, उष्णिक, गायत्री)

यां कल्पयन्ति वहतौ वधूमिव विश्वरूपां हस्तकृतां चिकित्सवः। सारादेत्वप नुदाम एनाम् ॥ १ ॥
शीर्षण्वती नस्वती कर्णिनी कृत्याकृता संभृता विश्वरूपा । सारादेत्वप नुदाम एनाम् ॥ २॥
शूद्रकृता राजकृता स्त्रीकृता ब्रह्माभिः कृता। जाया पत्या नुत व कर्तारं बन्ध्वृच्छतु ॥ ३॥
अनयाहमोषध्या सर्वाः कृत्या अदूदुषम् । यां क्षेत्रे चक्रुर्यां गोषु यां वा ते पुरुषेषु ॥ ४॥
अधमस्त्वधकुते शपथःशपथीयते। प्रत्यक्कर्तारमिच्छतु ह्रीं ॐ प्रतिप्रहिण्मो यथा कृत्याकृतं हनत् ॥ ५॥
प्रतीचीन आङ्गिरसोऽध्यक्षो नः पुरोहितः । प्रतीचीः कृत्या आकृत्यामून् कृत्याकृतो जहि ॥ ६॥
यस्त्वोवाच परेहिति प्रतिकूलमुदाय्यम्। तं कृत्येऽभिनिवतस्व मास्मोनिच्छो अनागसः ॥ ७॥
यस्ते परूषिं संदधौ रथस्येव ऋभुर्धिया। तं गच्छ तत्र तेऽयनमज्ञातस्तेऽय जनः ॥ ८॥
येत्वा कृत्त्वालेभिरे विद्र्लाअभिचारिणः। शभ्वीदं कृत्यादूषणंप्रतिवर्त्म पुनासरं तेनत्वास्नपयामसि ॥ ९ ॥
यद् दुर्भगां प्रस्नपितां मृत्वत्सामुपेयिम । अपतु सर्वं मत् पापं द्रविणं मोप तिष्ठतु॥ १० ॥

जिस कृत्या को निर्माता लोग दहेज में प्राप्त वधू के समान सजाते हैं, उस कृत्या को हम भगाते हैं, वह हमारे पास से चली जाय ॥ १ ॥ सिर, नाक, कान से युक्त निर्मित कृत्या अनेक आपत्ति वाली है, उसे हम भगाते है, वह हमारे पास से चली जाय ॥ २ ॥ शूद्र द्वारा की गई, राजा व स्त्रियो द्वारा की गई और मंत्रो द्वारा की गई और मंत्रों द्वारा प्रेरित कृत्या पति द्वारा उसके भाईयों के पास भेजी गई स्त्री के समान कृत्याकारी के पास लौट जाय ॥ ३ ॥ क्षेत्र में, गौओं में और पुरुषों में की गई कृत्या को मैं इस औषधि द्वारा निवीर्य कर चुका हूँ॥ ४ ॥ शपथ, शपथ देने वाले को ही प्राप्त हो, हिंसा रूप पा उसी हिंसक के पास पहुंचे। हम कृत्या को इस प्रकार लौटाते हैं, जिससे वह कृत्याकारी की ही हिंसा कर डाले ॥ ५ ॥ हमारा पुरोहित पश्चिम का है, अंगिरा वंश का है। हे पुरोहित। तुम सामने आती हुई कृत्याओं को खण्डित करते हुए कृत्याकारियों को ही नष्ट कर डालो ॥ ६ ॥ हे कृत्ये! जिसने तुझे मेरे पास आने को कहा है, तू उसी के पास लौट जा। हम निरपराध है, हमारी कामना न कर ॥ ७ ॥ हे कृत्ये! ऋभु जैसे रथ को जोड़ता है, वैसे जिसने तेरी हड्डियो को जोडा है, तू उसी के पास लौट जा। यह मनुष्य तो तुझसे परिचित भी नहीं हैं ॥ ८ ॥ हे कृत्ये! जिन अभिचार करने वालों ने तुझे पाया है, यह मंगलमय पुनःसर कृत्या को दूषित कर उसके मार्ग को उल्टा करने में समर्थ है, हम उसी से तुझे स्नान कराते हैं ॥ ९ ॥ हम जिस कृत्या को प्राप्त होकर मृतवत्सा रूप दुर्भाग्य को प्राप्त हो गये हैं, हमारा वह पाप दूर हो और हमारे पास धनादि स्थित रहे ॥ १० ॥

॥ अथ प्रेतबाधा निवारण प्रयोग ॥

अथ संपुट मंत्राः - निम्न मंत्रो के संपुट दुर्गापाठ के या किसी भी देवता के कवच मंत्रो के संपुट लगाने से **प्रेत बाधा दूर होवे।**

तपनो अस्मि पिशाचानां व्याघ्रो गोमतामिव। श्वानः सिंहमिव दृष्ट्वा ते न विन्दतं न्यञ्चनम् ॥

अ०वै०का०४ अ ८ सू ३६

जैसे सिंह गौ के स्वामियो के चिंता का कारण होता है। वैसे मैं अपने मंत्र बल से राक्षसों को भय देने वाला होऊँ। जैसे सिंह के सामने श्वान छिप जाते है वैसे ही मेरे मंत्र बल से पिशाचादि पतित व लुप्त हो जावे।

न पिशाचै सं शक्नोमिन स्तेनैर्न वनर्गुभिः। पिशाचास्तस्मान्नश्यन्ति यमहं ग्रामबाविशे ॥

अ०वे०म० ४ अ ८ सू ३६

डाकू मेरे पास नही आते, पिशाच मुझमें प्रविष्ट नही हो सकता। मै जिस गांव में जाता हूँ उस गांव के पिशाच नाश को प्राप्त होते है।

॥ श्रीप्रत्यंङ्गिरा कवचम् ॥

॥ देव्युवाच ॥

भगवन् सर्वधर्मज्ञ सर्वशास्त्रार्थ पारग।
देव्याः प्रत्यंगिरायाश्चकवचं यत्प्रकाशितम् ॥१॥
सर्वार्थसाधनं नाम कथयस्वमयि प्रभो।

॥ भैरवउवाच ॥

शृणुदेवि प्रवक्ष्यामिकवचं परमाद्भुतम् ॥२॥
सर्वार्थसाधनं नाम त्रैलोक्ये चातिदुर्लभं। सर्वसिद्धिमयं देविसर्वैश्वर्य प्रदायकं ॥३॥
पठनाच्छ्रवणान्मर्त्यस्त्रैलोक्यैश्वर्य भाग्भवेत् ॥ सर्वार्थ -साधकस्यास्य कवचस्य ऋषिः शिवः ॥४॥
छंदोविराट् पराशक्ति - र्जगद्धात्री च देवता। धर्मार्थकाम मोक्षेषुविनियोगः प्रकीर्त्तितः ॥५॥
प्रणवं मे शिरः पातु वाग्भवं च ललाटकम्। ह्रींपातु दक्षनेत्रं मे लक्ष्मीर्वामं सुरेश्वरी ॥६॥
प्रत्यंगिरादक्षकर्णं वामेकामेश्वरी तथा। लक्ष्मीः प्राणं सदापातु बंधनं पातु केशवः ॥७॥
गौरी तु रसनां पातु कंठं पातु महेश्वरः। स्कंधदेशं रतिः पातुभुजौ तु मकरध्वजः ॥८॥
शंखनिधिकरः पातुवक्षः पद्मनिधिस्तथा। ब्राह्मी मध्यं सदापातु नाभिं पातु महेश्वरी ॥९॥
कौमारी पृष्ठदेशं तु गुह्यं रक्षतु वैष्णवी। वाराही च कटिं पातु चैन्द्री पातु पदद्वयम् ॥१०॥
भार्यां रक्षतु चामुण्डा लक्ष्मीरक्षतु पुत्रकान्। इन्द्रः पूर्वेसदापातु आग्नेय्यामग्निदेवता ॥११॥
याम्ये यमः सदापातु नैर्ऋत्यां निर्ऋतिस्तथा। पश्चिमे वरुणः पातु वायव्यां वायुदेवता ॥१२॥
सौम्यां सोमः सदापातु चैशान्यामीश्वरो विभुः। ऊर्ध्वं प्रजापतिः पातु ह्यधश्चानं त देवता ॥१३॥

राजद्वारे श्मशाने च अरण्येप्रान्तरे तथा । जलेस्थलेचांतरिक्षे शत्रूणां निवहेतथा ॥१४॥
एताभिः सहिता देवी चतुर्बीजामहेश्वरी । प्रत्यंगिरा महाशक्तिः सर्वत्र मांसदावतु ॥१५॥
इति ते कथितं देवि सारात्सारं परात्परम् । सवार्थ - साधनं नामकवचं परमाद्भुतम् ॥१६॥
अस्यापि पठनात्सद्यः कुबेरोपिधनेश्वरः । इन्द्राद्याः सकलादेवाः धारणात्पठनाद्यतः ॥१७॥
सर्वसिद्धिश्वराः संतः सर्वैश्वर्यमवाप्नयुः । पुष्पांजल्यष्टकं दत्त्वा मूलेनैवकृत्पठेत् ॥१८॥
संवत्सरकृतायास्तु पूजायाः फलमाप्नुयात् । प्रीतिमन्येन्यतः कृत्वा कमलानिश्चलागृहे ॥१९॥
वाणी च निवसेद्वक्रेसत्यं न संशयः । यो धारयतिपुण्यात्मा सर्वार्थ साधनाभिधम् ॥२०॥
कवचं परमं पुण्यं सोपिपुण्यवतां वरः । सर्वेश्वर्य युतौभृत्वा त्रैलोक्य विजयी भवेत् ॥२१॥
पुरुषो दक्षिणेबाहौ नारी वामभुजे तथा । बहुपुत्रवतीभृत्वा धन्यापि लभतेसुतम् ॥२२॥
ब्रह्मास्त्रादीनि-शस्त्राणि नैव कृन्तंतितत्तनुम् । एतत्कवचमज्ञात्वा योजपेत्परमेश्वरीम् ॥२३॥
दारिद्र्यं परमं प्राप्यसेचिरान्मृत्युभाप्नुयात् ।

॥ इतिश्रीरुद्रयामले तन्त्रपञ्चांगखण्डेप्रत्यंगिरायाः सर्वार्थसाधनंनाम कवचं समाप्तम् ॥

॥ प्रत्यंगिरा पञ्जर स्तोत्रम् ॥

सिद्धिविद्या महाकाली यत्रेवेह च मोदते । सप्तलक्षमहाविद्या गोपिता परमेश्वरी ॥१॥
महाकाली महादेवि शङ्करश्रेष्ठ देवताः । यस्याः प्रसादमात्रेण परब्रह्म महेश्वरः॥२॥
कृत्तिमादि विषघ्नीशा प्रलयादि निवर्त्तिका ॥३॥
त्वदङ्घ्रिदर्शनादेव कम्पानो महेश्वरः । यस्य निग्रह- मात्रेण पृथिवी प्रलयं गता॥४॥
दशविद्या यदा ज्ञाता दशद्वार-समाश्रिता । प्राचीद्वारे भुवनेशी दक्षिणे कालिका तथा ॥५॥
नाक्षत्री पश्चिमे च उत्तरे भैरवी तथा । ऐशान्यां सततं देवि प्रचण्डचण्डिका ॥६॥
आग्नेयां बगलादेवि रक्षः कोणे मतङ्गिनि । धूमावती च वायव्ये अध उर्ध्वे च सुन्दरि ॥७॥
सम्मुखे षोडशी देवी जाग्रत स्वप्न-स्वरूपिणी । वामभागे च देवेशी महात्रिपुर सुन्दरी ॥८॥
अंशरूपेण देवेशी सर्वा देव्यः प्रतिष्ठिताः । महाप्रत्यंगिरा चैव प्रत्यङ्गिरा तथोदिता ॥९॥
पठनाद्-धारणाद् देवि सृष्टिसंहारको भवेत् । अभिचारादिकाः सर्वा या या साध्यतमाः क्रियाः ।
स्मरणेन महाकाल्या नाशं जग्मुः सुरेश्वरि ॥११॥
विपरीता प्रत्यङ्गिरा तत्र काली प्रतिष्ठिता । साधकस्मरण मात्रेण शत्रूणां निगमागमाः ॥१२॥
नाशं जग्मुः नशीं जग्मुः सत्यं सत्यं वदामिते । परब्रह्म महादेवी पूजनैरीश्वरो भवेत् ॥१३॥

॥ इति श्री प्रत्यङ्गिरा पञ्जर स्तोत्रम् ॥

॥ श्रीविपरीत प्रत्यंगिरा स्तोत्रम् ॥

मंत्र :- ॐ ऐं ह्रीं श्रीं प्रत्यंगिरे मां रक्ष रक्ष मम शत्रून भञ्जय भञ्जय फे हुं फट् स्वाहा।

॥ ध्यानम् ॥

टङ्कं कपालं डमरुं त्रिशूलं सम्बिभ्रती चन्द्रकलावतंसा ।
पिङ्गोर्ध्वकेशोऽसितभीमदंष्ट्रा भूयाद् विभूत्यै मम भद्रकाली ॥

विनियोग: :- ॐ अस्य श्रीमहाविपरीत प्रत्यङ्गिरा स्तोत्र मन्त्रस्य महाकालभैरवऋषि:, त्रिष्टुप् छन्द:, श्रीमहाविपरीत प्रत्यंङ्गिरा देवता, हं बीजं, ह्रीं शक्ति:, क्लीं कीलकं, मम सर्वार्थसिद्ध्यर्थे जपे विनियोग:।

करन्यास :- ॐ ऐं अङ्गुष्ठाभ्यां नम। ॐ ह्रीं तर्जनीभ्यां नम:। ॐ श्रीं मध्यमाभ्यां नम:। ॐ प्रत्यंङ्गिरे अनामिकाभ्यां नम:। ॐ मां रक्ष रक्ष कनिष्ठिकाभ्यां नम:। ॐ मम शत्रून भञ्जय भञ्जय करतलकरपृष्ठाभ्यां नम:।

हृदयादि न्यास: :- ॐ ऐं हृदयाय नम:। ॐ ह्रीं शिरसे स्वाहा। ॐ श्रीं शिखायै वषट्। ॐ प्रत्यंङ्गिरे कवचाय हुम्। ॐ मां रक्ष रक्ष नेत्रत्रयाय वौषट्। ॐ मम शत्रून भञ्जय भञ्जय अस्त्राय फट्।

॥ लघु स्तोत्रम् ॥

ॐ ॐ ॐ ॐ ॐ कुं कुं कुं मां सां खां चां लां क्षां ॐ ह्रीं ह्रीं ॐ ॐ ह्रीं वां धां मां सां रक्षां कुरु। ॐ ह्रीं ह्रीं ॐ स: हुं ॐ क्षौं वां लां धां मां सां रक्षां कुरु। ॐ ॐ हुं प्लुं रक्षां कुरु।

ॐ नमो विपरीतप्रत्यंगिरायै विद्याराज्ञि त्रैलोक्यवशङ्करि तुष्टि पुष्टिकरि सर्वपीडापहारिणि सर्वापन्नाशिनि सर्वमङ्गल माङ्गल्ये शिवे सर्वार्थसाधिनि मोदिनि सर्वशास्त्राणां भेदिनि क्षोभिणि। तथा परमन्त्र तन्त्र यन्त्र विष चूर्ण सर्वप्रयोगादीनन्येषां निर्वर्तयित्वा यत्कृतं तन्मेऽस्तु कलिपातिनि सर्वहिंसा मा कारयति अनुमोदयति मनसा वाचा कर्मणा ये देवाऽसुर राक्षसास्तिर्यग्योनि सर्वहिंसका विरूपकं कुर्वन्ति मम मन्त्र तन्त्र यन्त्र विष चूर्ण सर्वप्रयोगा--दीनात्महस्तेन य: करोति करिष्यति कारयिष्यति तान् सर्वानन्येषां निर्वर्तयित्वा पातय कारय मस्तके स्वाहा।

अन्य मंत्रा: :- ॐ हुँ स्फारय स्फारय मारय मारय शत्रुवर्गान् नाशय नाशय स्वाहा। (इति विंशाक्षरी)

॥स्तोत्रम्॥

विनियोग: :- ॐ अस्य श्रीमहाविपरीत प्रत्यङ्गिरा स्तोत्र मन्त्रस्य महाकालभैरवऋषि:, स्त्रिष्टुप् छन्द:, श्रीमहावीपरीत प्रत्यंङ्गिरा देवता, हं बीजं, ह्रीं शक्ति:, क्लीं कीलकं, परमंत्र, परयंत्र परकृत्या छेदनार्थे, सर्वशत्रु क्षयार्थे विनियोग:।

यह स्तोत्र प्रभावी है कहीं भी कोई कृत्या प्रयोग किया हुआ हो उसे नष्ट करता है। दूसरे के हाथ में गई संपदा को वापस दिलाता है।

ॐ ॐ ॐ ॐ ॐ ॐ ॐ नमो विपरीतप्रत्यङ्गिरायै सहस्त्रानेककार्यलोचनायै कोटि विद्युज्जिह्वायै महाव्यापिन्यै संहाररूपायै जन्मशान्ति कारिण्यै मम सपरिवारकस्य भावि भूत भवच्छत्रुदारा प्रत्यान् संहारय संहारय महाप्रभावं दर्शय दर्शय हिलि हिलि किलि किलि मिलि मिलि चिलि चिलि भूरि भूरि विद्युज्जिह्वे ज्वल ज्वल प्रज्वल प्रज्वल ध्वंसय ध्वंसय प्रध्वंसय प्रध्वंसय ग्रासय ग्रासय पिब पिब नाशय नाशय त्रासय त्रासय वित्रासय वित्रासय मारय मारय विमारय विमारय भ्रामय भ्रामय विभ्रामय विभ्रामय द्रावय द्रावय विद्रावय विद्रावय हुँ हुँ फट् स्वाहा हूँ हूँ हूँ हूँ हूँ ह्रीं ह्रीं ह्रीं ह्रीं ह्रीं क्लीं क्लीं क्लीं क्लीं क्लीं ॐ ॐ ॐ ॐ ॐ विपरीत प्रत्यङ्गिरे हूँ लँ ह्रीं फट् क्लीं लँ ॐ

लँ फट् फट् लँ स्वाहा।

हूँ लँ ह्रीं क्लीं ॐ विपरीत प्रत्यङ्गिरे मम सपरिवारकस्य यावच्छत्रून् देवता पितृ पिशाच नाग गरुड किन्नर विद्याधर गन्धर्व यक्ष राक्षस लोकपालान् ग्रह भूत नरलोकान् समन्त्रान् सौषधान् सायुधान् ससहायान् पाणौ छिन्धि छिन्धि भिन्धि भिन्धि निकृन्तय निकृन्तय छेदय छेदय उच्चाटय उच्चाटय मारय मारय तेषां साहंकारादि धर्मान् कीलय कीलय घातय घातय नाशय नाशय विपरीतप्रत्यङ्गिरे स्फ्रें स्फ्रेत्कारिणी ॐ ॐ जँ ॐ ॐ जँ ॐ ॐ जँ ॐ ॐ जँ ॐ ॐ जँ ॐ ठः ॐ ठः ॐ ठः ॐ ठः ॐ ठः मम सपरिवारकस्य शत्रूणां सर्वा विद्याः स्तंभय स्तंभय नाशय नाशय हस्तौ स्तंभय स्तंभय मुखं स्तंभय स्तंभय नाशय नाशय नेत्राणि स्तंभय स्तंभय नाशय नाशय दन्तान् स्तंभय स्तंभय नाशय नाशय जिह्वां स्तंभय स्तंभय नाशय नाशय पादौ स्तंभय स्तंभय नाशय नाशय गुह्यं स्तंभय स्तंभय नाशय नाशय सकुटुम्बानां स्तंभय स्तंभय नाशय नाशय स्थानं स्तंभय स्तंभय नाशय नाशय सँ प्राणान् कीलय कीलय नाशय नाशय हूँ हूँ हूँ हूँ हूँ हूँ हूँ ह्रीं ह्रीं ह्रीं ह्रीं ह्रीं ह्रीं ह्रीं क्लीं क्लीं क्लीं क्लीं क्लीं क्लीं क्लीं ऐं ऐं ऐं ऐं ऐं ऐं ऐं ॐ ॐ ॐ ॐ ॐ ॐ ॐ फट् फट् स्वाहा।

मम सपरिवारकस्य सर्वतो रक्षां कुरु कुरु फट् फट् स्वाहा ह्रीं ह्रीं ह्रीं ह्रीं ह्रीं ऐं हूँ ह्रीं क्लीं हूँ सों विपरीत प्रत्यङ्गिरे! मम सपरिवारकस्य भूतभविष्यच्छत्रूणामुच्चाटनं कुरु कुरु हूँ हूँ फट् स्वाहा। ह्रीं ह्रीं ह्रीं ह्रीं ह्रीं, वँ वँ वँ वँ वँ, लँ लँ लँ लँ लँ, रँ रँ रँ रँ रँ, यँ यँ यँ यँ यँ, ॐ ॐ ॐ ॐ ॐ नमो भगवति विपरीत प्रत्यङ्गिरे दुष्टचाण्डालिनी त्रिशूल वज्राङ्कुश शक्ति शूल धनुः शर पाशधारिणी शत्रुरुधिर चर्म मेदो मांसाऽस्थि मज्जा शुक्र मेहन वसा वाक् प्राण मस्तक हेत्वादिभक्षिणी परब्रह्मशिवे ज्वालादायिनी मालिनी शत्रूच्चाटन मारण क्षोभन स्तम्भन मोहन द्रावण जृम्भण भ्रामण रौद्रण सन्तापन यन्त्र मन्त्र तन्त्रान्तर्याग पुरश्चरण भूतशुद्धि पूजाफल परमनिर्वाण-हारण - कारिणि कपालखट्वाङ्ग परशुधारिणि मम सपरिवारकस्य भूतभविष्यच्छत्रून् ससहायान् सवाहनान् हन हन रण रण दह दह दम दम धम धम पच पच मथ मथ लंघय लंघय खादय खादय चर्वय चर्वय व्यथय व्यथय ज्वरय ज्वरय मूकान् कुरु कुरु ज्ञानं हर हर हूँ हूँ फट् फट् स्वाहा।

ह्रीं ह्रीं ह्रीं ह्रीं ह्रीं ह्रीं ह्रीं, हूँ हूँ हूँ हूँ हूँ हूँ हूँ, क्लीं क्लीं क्लीं क्लीं क्लीं क्लीं क्लीं ॐ ॐ ॐ ॐ ॐ ॐ ॐ विपरीत प्रत्यङ्गिरे ह्रीं ह्रीं ह्रीं ह्रीं ह्रीं ह्रीं ह्रीं हूँ हूँ हूँ हूँ हूँ हूँ हूँ क्लीं क्लीं क्लीं क्लीं क्लीं क्लीं क्लीं ॐ ॐ ॐ ॐ ॐ ॐ ॐ फट् स्वाहा।

मम सपरिवारकस्य कृत मन्त्र-यन्त्र-तन्त्र हवनकृतौषधविषचूर्ण शस्त्राद्यभिचार सर्वोपद्रवादिकं येन कृतं कारितं कुरुते करिष्यति वा तान् सर्वान् हन हन स्फारय स्फारय सर्वतो रक्षां कुरु कुरु हूँ हूँ फट् फट् स्वाहा।

हूँ हूँ हूँ हूँ हूँ हूँ हूँ, ह्रीं ह्रीं ह्रीं ह्रीं ह्रीं ह्रीं ह्रीं, क्लीं क्लीं क्लीं क्लीं क्लीं क्लीं क्लीं, ओं ओं ओं ओं ओं ओं ओं, ॐ ॐ ॐ ॐ ॐ ॐ ॐ फट् फट् स्वाहा।

ॐ हूँ ह्रीं क्लीं ॐ अं विपरीतप्रत्यङ्गिरे मम सपरिवारकस्य शत्रवः कुर्वन्ति करिष्यन्ति शत्रुश्चकारयामास कारयन्ति कारयिष्यन्ति याऽन्यां कृत्यान्तैः सार्धं तांस्तां विपरीतां कुरु कुरु नाशय नाशय मारय मारय श्मशानस्थानं कुरु कुरु कृत्यादिकां क्रियां भावि भूत भवच्छत्रूणां यावत्कृत्यादिकां क्रियां विपरीतां कुरु कुरु तान् डाकिनी-मुखे हारय हारय भीषय भीषय त्रासय त्रासय परमशमनरूपेण हन हन धर्मावच्छिन्न निर्वाणं हर हर तेषाम् इष्टदेवानां शासय शासय क्षोभय क्षोभय प्राणादि मनोबुद्ध्यहङ्कार क्षुत्तृष्णाकर्षणलयन आवागमन मरणादिकं नाशय नाशय हूँ हूँ ह्रीं ह्रीं क्लीं क्लीं ॐ ॐ फट् फट् स्वाहा।

(१) ह्रौं सौं ॐ ह्रीं त्रीं हुं हंसः। (२) ऐं स्त्रीं ॐ ऐं ह्रीं फट् स्वाहा। स्वच्छन्द संग्रह के अनुसार यह मंत्र त्रैलोक्य वशंकर एवं आज्ञासिद्धिकारक हैं। **षडङ्गन्यास हेतु-** एक एक बीजाक्षर से एक एक न्यास तथा शेष अक्षरों से अस्त्रन्यास करे।

॥ कृष्णादेवी (तारणी) महाकल्प॥

नवाक्षर मंत्रः- (१) क्रीं क्लीं कृष्णदेवि ह्रीं क्रीं ऐं।

विनियोग- (तारिणी तंत्रे) **अस्य मंत्रस्य शक्ति ऋषिः, वृहती छंदः, तारिणी देवता सर्वाभीष्ट सिद्धये जपे विनियोगः।** षडङ्गन्यास **ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः** से करे।

(२) मंत्रः- **क्रीं क्लीं कृष्णादेवि ह्रीं क्रीं ऐं।** मंत्रमहार्णव में कृष्णा देवी महाकल्प में कृष्णादेवी लिखा हैं।

विनियोग:- **ॐ अस्य श्री तारिणीमंत्रस्य शक्ति ऋषिः, वृहती छंदः, तारिणी देवता, ह्रीं बीजं, ऐं शक्तिं, मम श्रीतारणीप्रसादतो विद्या प्राप्त्यर्थे जपे विनियोगः।**

षडङ्गन्यास पूर्व की तरह **ह्रां, ह्रीं ह्रूं** की तरह करे। हिन्दी तंत्रसार में "**कृष्णदेवि**" लिखा हैं। षडङ्गन्यास **क्रीं, क्लीं, कृष्णदेवि, ह्रीं, क्रीं, ऐं** इत्यादि से क्रमशः करे।

कृष्णां लंबोदरीं भीमां नागकुण्डल शोभितां, रक्तमुखीं ललज्जिह्वां रक्तांबरधरां कटौ।
पीनोन्नतस्तनीमुग्रां महानागेन वेष्टितां, शवस्योपरि देवेशि तस्योपरि कपालिके ॥१॥
नासाग्रध्याननिरतां महाघोरां वरप्रदां, चतुर्भुजां दीर्घकेशीं दक्षिणस्योर्ध्व बाहुना।
विभ्रतीं नलिनीमेकां वामोर्द्धे पानपात्रकं, वराभयधरां देवीमधस्ताद् दक्षवामयोः ॥२॥
पिवन्तीं रौधिरीं धारां पानपात्रे सदाशिवे, सर्वसिद्धिप्रदां देवीं नित्यां गिरिनिवासिनीम्।
लोचनत्रय संयुक्तां नागयज्ञोपवीतिनीं, दीर्घनासां दीर्घजङ्घां दीर्घाङ्गीं दीर्घजिह्विकाम् ॥३॥
चन्द्रसूर्याग्निभेदेन त्रिलोचन समन्वितां, शत्रुनाशकरीं देवीं महाभीमां वरप्रदाम्।
व्याघ्रचर्म शिरोबद्धां जगतत्रय विभावितां, साधकानां सुखकर्त्रीं सर्वलोक भयङ्करीम् ॥
एवं भूता महादेवीं तारिणीं प्रणमाम्यहम्॥

मंत्र महार्णव में ८-९ जगह पाठान्तर भेद हैं। एक लक्ष जप का विधान हैं। यह मंत्र जाड्यनाशक, अष्टसिद्धिदायक हैं।

॥ यंत्रार्चनम् ॥

भद्रमण्डल पर "**ॐ मं मण्डूकादि परतत्वान्त पीठदेवताभ्यो नमः**" से पूजा कर पूर्वादि क्रम से ९ पीठ शक्तियों का पूजन करे। **ॐ मेधायै नमः। ॐ प्रज्ञायै नमः। ॐ प्रभायै नमः। ॐ विद्यायै नमः। ॐ धियै नमः। ॐ धृत्यै नमः। ॐ स्मृत्यै नमः। ॐ बुद्ध्यै नमः। मध्ये विश्वेश्वर्यै नमः।** "**ह्री तारणी योगपीठात्मने नमः**" से पुष्पासन देकर देवी यंत्र को स्थापित कर ध्यान पूर्वक मूर्ति की कल्पना करे। पुष्पांजलि लेकर देवी से परिवार पूजन की आज्ञा मांगे।

संविन्मये परे देवि परामृतरस प्रिये। अनुज्ञां तारणी देहि परिवारार्चनाय मे।

॥ कृष्णदेवी (तारणी) पूजन यन्त्रम् ॥

प्रथमावरणम् - (चतुर्दले) पूर्वादि क्रमेण- **ऐं नमः। ऐं श्री पादुकां तर्पयामि नमः। इति सर्वत्र॥ क्रीं नमः। ह्रीं नमः। क्रीं क्लीं कृष्णादेव्यै नमः।**

अभीष्टसिद्धिं मे देहि शरणागत वत्सले।
भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥

इसे पढ़कर पुष्पांजलि देवे तथा "**पूजितास्तर्पिताः सन्तु**" कहकर अर्घ्यपात्र से जल छोड़े। ऐसा प्रत्येक आवरण पूजा बाद करे।

द्वितीयावरणम् - (षट्कोणे) आग्नेयी आदि चारों दिशाओं में - **ह्रीं हृदयाय नमः। ह्रीं शिरसे स्वाहा। ह्रीं शिखायै वषट्। ह्रीं कवचाय हुं।** अग्रे- **ह्रीं नेत्रत्रयाय वौषट्।** देवी पश्चिमे **ह्रीं अस्त्राय फट्।**

तृतीयावरणम् – (चतुर्दलाग्रे) **ॐ क्षेत्रपालाय नमः। ॐ भैरवाय नमः। ॐ गणपतयै नमः। ॐ सहाम्बिकायै नमः।**

चतुर्थावरणम् – (अष्टदले) **ॐ अणिमायै नमः। ॐ अनङ्गायै नमः। ॐ मदनायै नमः। ॐ लघिमायै नमः। ॐ मदनातुरायै नमः। ॐ अनङ्गकुसुमायै नमः। ॐ अष्टकर्णिकायै नमः। ॐ कपालिकायै नमः।**

पंचमावरणम्– (षोडशदले) **ॐ सुतदायै नमः। सुतदा श्री पादुकां पूजयामि तर्पयामि नमः।** इति सर्वत्र। **ॐ मोक्षदायै नमः। ॐ भक्तिदायै नमः। ॐ भोगदायै नमः। ॐ मुक्तिदायै नमः। ॐ सिद्धिदायै नमः। ॐ कामदायै नमः। ॐ धनदायै नमः। ॐ क्षेमदायै नमः। ॐ शिवदायै नमः। ॐ परदायै नमः। ॐ आत्मदायै नमः। ॐ योगदायै नमः। ॐ भाग्यदायै नमः। ॐ मोक्षदायै नमः। ॐ सर्वसिद्धिदायै नमः।**

षष्ठमावरणम् – (भूपुर के अंदर पूर्वादि चारों दिशाओं में) **ॐ अणिमाद्यष्टसिद्धिभ्यो नमः। ॐ अग्निदशकलायै नमः। ॐ षोडशचन्द्रकलायै नमः। ॐ द्वादशसूर्यकलायै नमः।**

सप्तमावरणम् – (भूपुरे) पूर्वे **ॐ इन्द्राय नमः। ॐ अग्नये नमः। ॐ यमाय नमः। ॐ निर्ऋतिये नमः। ॐ वरुणाय नमः। ॐ वायवे नमः। ॐ कुबेराय नमः।** पूर्वईशानयोर्मध्ये – **ॐ ब्रह्मणे नमः।** निर्ऋतिपश्चिमोर्मध्ये – **ॐ अनंताय नमः।**

अष्टमावरणम् – (भूपुर में इन्द्रादि देवों के पास आयुध पूजा करे) **ॐ वज्राय नमः। ॐ शक्तये नमः। ॐ दण्डाय नमः। ॐ खड्गाय नमः। ॐ पाशाय नमः। ॐ अंकुशाय नमः। ॐ गदायै नमः। ॐ त्रिशूलाय नमः। ॐ पद्माय नमः। ॐ चक्राय नमः।**

पश्चात् धूपादि नैवेद्य, नमस्कार पर्यन्त पूजन करे। इसका पुरश्चरण एक लाख जप का हैं। लाल चंदन से चर्चित नाना प्रकार के फूलों व बेलपत्रों से, विशेष गंधों से पूजन करे। जपा (अढ़उल) पुष्प, रक्तकनेर, श्वेत कनेर, बेलपुष्प, कुन्द, लवंग, अपराजिता, चम्पा, केसर के पुष्पों से देवि का अर्चन करे। मालती, बकपुष्पों व दूर्वादलों से पूजन करे। कदम्बपुष्प, श्वेत पुष्प व नाना द्रव्यों से देवी का पूजन करे। इसके समान अन्य कोई विद्या नहीं हैं। साधक शास्त्रों में पारंगत तथा आशुकवि बन जाता हैं।

॥ तारा के शिव– अक्षोभ्य ॥

अष्टाक्षर मंत्रः– **ॐ स्त्रीं आं अक्षोभ्य स्वाहा।**

विनियोगः– **अस्य मंत्रस्य ब्रह्म विष्णु महेश्वर ऋषिः, विराट् छंदः, अक्षोभ्य भैरव देवता, स्त्रीं बीजं, स्वाहा शक्तिः, ॐ कीलकं चतुर्वर्ग सिद्ध्यर्थे जपे विनियोगः।**

सहस्त्रादित्यसङ्काशं नागरूपधरं शुभं, विद्युत्कोटिसमंवक्त्रं वह्निभंरक्तलोचनम् ।
सार्द्ध त्रिवलयोपेतं जटाकोटिरसंस्थितं, महालावण्य संयुक्तं सुरासुर नमस्कृतम् ॥१॥
समुद्रमध्ये देवि! कालकूटं समुत्थितं, सर्वेदेवाः सदाराश्च महाक्षोभमवाप्नुयु ।
क्षोभादिरहितं यस्मात् पीतं हालाहलं विषं, अतएव महेशानि ! अक्षोभ्यः परिकीर्तितः ॥२॥

॥ तारा गायत्री ॥

(१) उग्रतारा- (१) तारायै विद्महे महोग्रायै धीमहि तन्नो देवी धियो यो नः प्रचोदयात्। (२) ॐ तारायै विद्महे महोग्रायै धीमहि देवि प्रचोदयात्। (तोडल तंत्रे) (३) ॐ तारायै विद्महे महोग्रायै धीमहि तन्नो देवी प्रचोदयात्। (तारा नित्यार्चन)

(२) एकजटा- ॐ भगवत्येकजटे विद्महे घोरदंष्ट्रे धीमहिं तन्नस्तारे प्रचोदयात्।

(३) नील सरस्वती- ॐ नीलसरस्वत्यै धीमहि शारदायै विद्महे तन्नः शिवे प्रचोदयात्।

॥ श्री तारा कवचम् ॥

इस कवच स्तोत्र में भगवती तारा के कई मंत्रों का वर्णन है, साधक उन मंत्रों का अलग से प्रयोग कर सकते हैं।

॥ ईश्वर उवाच ॥

कोटितन्त्रेषु गोप्या हि विद्यातिभयमोचिनी । दिव्यं हि कवचं तस्याः श्रृणुष्व सर्वकामदम् ॥१॥

विनियोगः- अस्य श्री ताराकवचस्य अक्षोभ्य ऋषिः, त्रिष्टुप् छन्दः, भगवती तारा देवता। सर्वमंत्रसिद्धि समृद्धये जपे विनियोगः।

प्रणवो मे शिरः पातु ब्रह्मरूपा महेश्वरी । ललाटे पातु ह्रींकारो बीजरूपा महेश्वरी ॥२॥
स्त्रींकारो वदने नित्यं लज्जारूपा महेश्वरी । हूँकारः पातु हृदये भवानीरूपशक्तिधृक् ॥३॥
फट्कारः पातु सर्वाङ्गे सर्वसिद्धिफलप्रदा । खर्वा मां पातु देवेशी गण्डयुग्मे भयापहा ॥४॥
निम्नोदरी सदा स्कंधयुग्मे पातु महेश्वरी । व्याघ्रचर्मावृता कट्यां पातु देवी शिवप्रिया ॥५॥
पीनोन्नतस्तनी पातु पार्श्वयुग्मे महेश्वरी । रक्तवर्तुलनेत्रा च कटिदेशे सदाऽवतु ॥६॥
ललज्जिह्वा सदा पातु नाभौ मां भुवनेश्वरी । करालास्या सदा पातु लिङ्गेदेवी हरप्रिया ॥७॥
पिङ्गोग्रैकजटा पातु जङ्घायां विघ्ननाशिनी । प्रेतखर्परभृद्देवी जानुवक्रे महेश्वरी ॥८॥
नीलवर्णा सदा पातु जानुनी सर्वदा मम । नागकुण्डलधर्त्री च पातु पादयुगेः ततः ॥९॥
नागहार धरा देवी सर्वाङ्गं पातु सर्वदा । नागकङ्कधरा देवी पातु प्रान्तरदेशतः ॥१०॥
चतुर्भुजा सदा पातु गमने शत्रुनाशिनी । खड्गहस्ता महादेवीं श्रवणे पातु सर्वदा ॥११॥
नीलाम्बरधरा देवी पातु मां विघ्ननाशिनी । कर्त्रिहस्ता सदा पातु विवादे शत्रुमध्यतः ॥१२॥
ब्रह्मरूपधरा देवी संग्रामे पातु सर्वदा । नागकङ्कणधर्त्री च भोजने पातु सर्वदा ॥१३॥
शवकर्णा महादेवी शयने पातु सर्वदा । वीरासनधरा देवी निद्रायां पातु सर्वदा ॥१४॥
धनुर्बाणधरा देवी पातु मां विघ्नसंकुले । नागाञ्चितकटी पातु देवी मां सर्वकर्मसु ॥१५॥
छिन्नमुण्डधरा देवी कानने पातु सर्वदा । चितामध्यस्थिता देवी मारणे पातु सर्वदा ॥१६॥

द्वीपिचर्मधरा देवी पुत्रदारधनादिषु । अलङ्कारान्विता देवी पातु मां हरवल्लभा ॥१७॥
रक्ष रक्ष नदीकुञ्जे हूं हूं फट् सुसमन्विते । बीजरूपा महादेवी पर्वते पातु सर्वदा ॥१८॥
मणिभृद्वज्रिणी देवी महाप्रतिसरे तथा । रक्ष रक्ष सदा हूं हूं ॐ ह्रीं स्वाहा महेश्वरी ॥१९॥
पुष्पकेतुरजार्हेति कानने पातु सर्वदा । ॐ ह्रीं वज्रपुष्पं हुं फट् प्रान्तरे सर्वकामदा ॥२०॥
ॐ पुष्पे पुष्पे महापुष्पे पातु पुत्रान्महेश्वरी । हूं स्वाहा शक्तिसंयुक्ता दारान् रक्षतु सर्वदा ॥२१॥
ॐ आं हूं स्वाहा महेशानी पातु द्यूते हरप्रिया । ॐ ह्रीं सर्वविघ्नोत्सारिणी देवी विघ्नान्मां सदाऽवतु ॥२२॥
ॐ पवित्रवज्रभूमे हुं फट् स्वाहा समन्विता । पूरिका पातु मां देवी सर्वविघ्नविनाशिनी ॥२३॥
ॐ आः सुरेखे वज्ररेखे हुं फट् स्वाहा समन्विता । पाताले पातु सा देवी लाकिनी नामसंज्ञिका ॥२४॥
ह्रींकारी पातु मां पूर्वे शक्तिरूपा महेश्वरी । स्त्रींकारी पातु देवेशी वधूरूपा महेश्वरी ॥२५॥
हूंस्वरूपा महादेवी पातु मां क्रोधरूपिणी । फट्स्वरूपा महामाया उत्तरे पातु सर्वदा ॥२६॥
पश्चिमे पातु मां देवी फट्स्वरूपा हरप्रिया । मध्ये मां पातु देवेशी हूंस्वरूपा नगात्मजा ॥२७॥
नीलवर्णा सदा पातु सर्वतो वाग्भवा सदा । भवानी पातु भवने सर्वैश्वर्यप्रदायिनी ॥२८॥
विद्यादानरता देवी वक्त्रे नीलसरस्वती । शास्त्रे वादे च संग्रामे जले च विषमे गिरौ ॥२९॥
भीमरूपा सदा पातु श्मशाने भयनाशिनी । भूतप्रेतालये घोरे दुर्गमा श्रीघनाऽवतु ॥३०॥
पातु नित्यं महेशानी सर्वत्र शिवदूतिका । कवचस्य च माहात्म्यं नाहं वर्षशतैरपि ॥३१॥
शक्नोमि गदितुं देवि भवेत्तस्य फलं च यत् । पुत्रदारेषु बन्धूनां सर्वदेशे च सर्वदा ॥३२॥
न विद्यते भयं तस्य नृपपूज्यो भवेच्च सः । शुचिर्भूत्वाऽशुचिर्वापि कवचं सर्वकामदम् ॥३३॥
प्रपठन् वा स्मरन्मर्त्यो दुःखशोक-विवर्जितः । सर्वशास्त्रे महेशानि कविराड् भवति ध्रुवम् ॥३४॥
सर्ववागीश्वरो मर्त्योलोकवश्यो धनेश्वरः । रणे द्यूते विवादे च जयस्तत्र भवेद्ध्रुवम् ॥३५॥
पुत्रपौत्रान्वितो मर्त्यो विलासी सर्वयोषिताम् । शत्रवो दासतां यान्ति सर्वेषां वल्लभः सदा ॥३६॥
गर्वी खर्वी भवत्येव वादी स्खलति दर्शनात् । मृत्युश्च वश्यतां याति दासास्तस्यावनीभुजः ॥३७॥
प्रसङ्गात्कथितं सर्वं कवचं सर्वकामदम् । प्रपठन्वा स्मरन्मर्त्यः शापानुग्रहणे क्षमः ॥३८॥
आनन्दवृन्द सिन्धूनामधिपः कविराड् भवेत् । सर्ववागीश्वरो मर्त्यो लोकवश्यः सदा सुखी ॥३९॥
गुरोः प्रसादमासाद्य विद्यां प्राप्य सुगोपिताम् । तत्रापि कवचं देवि दुर्ल्लभं भुवनत्रये ॥४०॥
गुरुर्देवो हरः साक्षात्तत्पत्नी तु हरप्रिया । अभेदेन भजेद्यस्तु तस्य सिद्धिरदूरतः ॥४१॥
मंत्राचारा महेशानि कथिताः पूर्ववत्प्रिये । नाभौ ज्योतिस्तथा रक्तं हृदयोपरि चिन्तयेत् ॥४२॥
ऐश्वर्यं सुकवित्वं च महावागीश्वरो नृपः । नित्यं तस्य महेशानि महिलासङ्गमं चरेत् ॥४३॥
पंचाचाररतो मर्त्यः सिद्धो भवति नान्यथा । शक्तियुक्तो भवेन्मर्त्यः सिद्धो भवति नान्यथा ॥४४॥
ब्रह्मा विष्णुश्च रुद्रश्च ये देवासुरमानुषाः । तं दृष्ट्वा साधकं देवि लज्जायुक्ता भवन्ति ते ॥४५॥

स्वर्गे मर्त्ये च पाताले ये देवाः सिद्धिदायकाः । प्रशंसन्ति सदा देवि तं दृष्ट्वा साधकोत्तमम् ॥४६॥

विघ्नात्मकाश्च ये देवाः स्वर्गे मर्त्ये रसातले । प्रशंसन्ति सदा सर्वे तं दृष्ट्वा साधकोत्तमम् ॥४७॥

इति ते कथितं देवि मया सम्यक्प्रकीर्तितम् । भुक्तिमुक्तिकरं साक्षात्कल्पवृक्षस्वरूपकम् ॥४८॥

आसाद्याद्यगुरुं प्रसाद्य य इदं कल्पद्रुमालम्बनं, मोहेनापि मदेन चापि रहितो जाड्येन वा युज्यते ॥

सिद्धोऽसौ भुवि सर्वदुःखविपदां पारं प्रयात्यन्तके, मित्रंतस्यनृपाश्च देवि विपदोनश्यन्ति तस्याशु च ॥४९॥

तद्गात्रं प्राप्य शस्त्राणि ब्रह्मास्त्रादीनि वै भुवि । तस्य गेहे स्थिरा लक्ष्मीर्वाणी वक्त्रे वसेद् ध्रुवम् ॥५०॥

इदं कवचमज्ञात्वा तारां यो भजते नरः । अल्पायुर्निर्द्धनो मूर्खो भवत्येव न संशयः ॥५१॥

लिखित्वा धारयेद्यस्तु कण्ठे वा मस्तके भुजे । तस्य सर्वार्थसिद्धिः स्याद्यद्यन्मनसि वर्तते ॥५२॥

गोरोचना कुंकुमेन रक्तचन्दनकेन वा । यावकैर्वा महेशानि लिखेन्मन्त्रं समाहितः ॥५३॥

अष्टम्यां मङ्गलदिने चतुर्दश्यामथापि वा । संध्यायां देवदेवेशि लिखेद्यन्त्रं समाहितः ॥५४॥

मघायां श्रवणे वापि रेवत्यां वा विशेषतः । सिंहराशौगते चन्द्रे कर्कटस्थे दिवाकरे ॥५५॥

मीनराशौ गुरौ याते वृश्चिकस्थे शनैश्चरे । लिखित्वा धारयेद्यस्तु उत्तराभिमुखो भवेत् ॥५६॥

श्मशाने प्रान्तरे वापि शून्यागारे विशेषतः । निशायां वा लिखेन्मंत्रं तस्य सिद्धिरचञ्चला ॥५७॥

भूर्जपत्रे लिखेन्मंत्रं गुरुणा च महेश्वरि । ध्यानधारणयोगेन धारयेद्यस्तु भक्तितः ॥५८॥

अचिरात्तस्य सिद्धिः स्यान्नात्र कार्या विचारणा ॥

॥ इति श्रीरुद्रयामले तन्त्रे उग्रताराकवचं समाप्तम् ॥

॥ श्री तारा हृदय स्तोत्रम् ॥

॥ श्रीशिव उवाच ॥

शृणु पार्वति! भद्रं ते लोकानां हितकारकम् । कथ्यते सर्वदा गोप्यं ताराहृदयमुत्तमम् ॥१॥

॥ श्रीपार्वत्युवाच ॥

स्तोत्रं कथं समुत्पन्नं कृतं केन पुरा प्रभो । कथ्यतां सर्वसद्वृत्तं कृपां कृत्वा ममोपरि ॥२॥

॥ श्रीशिव उवाच ॥

रणे देवासुरे पूर्वं कृतमिन्द्रेण सुप्रिये । दुष्टशत्रुविनाशार्थं बलवृद्धियशस्करम् ॥३॥

विनियोगः- ॐ अस्य श्रीमदुग्रताराहृदयस्तोत्र मंत्रस्य श्रीभैरवऋषिः, अनुष्टुप् छन्दः, श्रीमदुग्रतारा देवता, स्त्रीं बीजं, हूं शक्तिः, नमः कीलकं सकल शत्रुविनाशार्थे पाठे विनियोगः।

हृदयादि षडंगन्यासः- ॐ स्त्रीं हृदयाय नमः। ॐ ह्रीं शिरसे स्वाहा। ॐ हूं शिखायै वषट्। ॐ त्रीं कवचाय हुं। ॐ ऐं नेत्रत्रयाय वौषट्। ॐ हंसः अस्त्राय फट्।

॥ ध्यानम् ॥

ॐ ध्यायेत्कोटिदिवाकर - द्युतिनिभां बालेन्दुयुक्छेखरां
रक्तांगीं रसनां सुरक्तवसनां पूर्णेन्दुबिंबाननाम् ।
पाशं कर्त्रिमहांकुशादि दधतीं दोर्भिश्चतुर्भिर्युतां
नानाभूषणभूषितां भगवतीं तारां जगत्तारिणीम् ॥४॥

एवं ध्यात्वा शुभां तारां ततस्तु हृदयं पठेत् । तारिणी तत्त्वनिष्ठानां सर्वतत्त्वप्रकाशिका ॥५॥
रामाभिन्ना पराशक्तिः शत्रुनाशं करोतु मे । सर्वदा शत्रुसंरम्भे तारा मे कुरुतां जयम् ॥६॥
स्त्रीं त्रीं स्वरूपिणी देवि त्रिषु लोकेषु विश्रुता । तव स्नेहान्मयाख्यातं न पैशुन्यं प्रकाश्यताम् ॥७॥
शृणु देवि! तव स्नेहात्तारानामानि तत्त्वतः । वर्णयिष्यामि गुप्तानि दुर्लभानि जगत्त्रये ॥८॥
तारिणी तरला तारा त्रिरूपा तरणिप्रभा । सत्त्वरूपा महासाध्वी सर्वसज्जनपालिका ॥९॥
रमणीया रजोरूपा जगत्सृष्टिकरी परा । तमोरूपा महामाया घोररावा भयानका ॥१०॥
कालरूपा कालिकाख्या जगद्विध्वंसकारिका । तत्त्वज्ञानपरानन्दा तत्त्वज्ञानप्रदाऽनघा ॥११॥
रक्तांगी रक्तवस्त्रा च रक्तमालाप्रशोभिता । सिद्धिलक्ष्मीश्च ब्रह्माणी महाकाली महालया ॥१२॥
नामान्येतानि ये मर्त्याःसर्वदैकाग्रमानसाः । प्रपठन्ति प्रिये तेषां किंकरत्वं करोम्यहम् ॥१३॥
तारां तारपरां देवीं तारकेश्वर पूजिताम् । तारिणीं भवपाथोधेरुग्रतारां भजाम्यहम् ॥१४॥
स्त्रीं ह्रीं हूं त्रीं फण्मंत्रेण जलं जप्त्वाऽभिषेचयेत् । सर्वेरोगाः प्रणश्यन्ति सत्यं सत्यं वदाम्यहम् ॥१५॥
त्रीं स्वाहान्तैर्महामंत्रैश्चन्दनं साधयेत्ततः । तिलकं कुरुते प्राज्ञो लोको वश्यो भवेत्प्रिये ॥१६॥
स्त्रीं ह्रीं त्रीं स्वाहा मंत्रेण श्मशानं भस्ममंत्रयेत् । शत्रोर्गृहे तत्प्रक्षेपाच्छत्रोर्मृत्युर्भविष्यति ॥१७॥
ह्रीं हूं स्त्रीं फडंत मन्त्रैः पुष्पं संशोध्य सप्तधा । उच्चाटनं नयत्याशु रिपूणां नैव संशयः ॥१८॥
स्त्रीं त्रीं ह्रीं मन्त्रवर्येन अक्षताश्चाभिमंत्रिताः । तत्प्रतिक्षेपमात्रेण शीघ्रमायाति मानिनी ॥१९॥

(हंसः ॐ ह्रीं स्त्रीं हूं हंसः) इति मंत्रेण जप्तेन शोधितं कज्जलं प्रिये । तस्यैव तिलकं कृत्वा जगन्मोहं समाचरेत् ॥२०॥

ताराया हृदयं देवि सर्वपापप्रणाशनम् । वाजपेयादियज्ञानां कोटिकोटिगुणोत्तरम् ॥२१॥
गंगादिसर्वतीर्थानां फलं कोटिगुणात्स्मृतम् । महादुःखे महारोगे सङ्कटे प्राणसंशये ॥२२॥

महाभये महाघोरे - पठेत्स्तोत्रं महोत्तमम् ।
सत्यं सत्यं मयोक्तं ते पार्वति प्राणवल्लभे ॥२३॥
गोपनीयं प्रयत्नेन न प्रकाश्यमिदं क्वचित् ॥२४॥

॥ इति श्रीभैरवीतंत्रे शिवपार्वती संवादे श्रीमदुग्रताराहृदयं सम्पूर्णम् ॥

॥ अथ तारा स्तोत्रम् ॥

मातर्नीलसरस्वति प्रणमतां सौभाग्यसम्पत्प्रदे, प्रत्यालीढपदस्थिते शवहृदि स्मेराननांभोरुहे ।
फुल्लेन्दीवर लोचने त्रिनयने कर्त्रीकपालोत्पले, खड्गंचादधती त्वमेव शरणं त्वामीश्वरीमाश्रये ॥१॥
वाचामीश्वरि भक्तिकल्पलतिके सर्वार्थसिद्धीश्वरि, गद्यप्राकृतपद्यजातरचना सर्वार्थसिद्धिप्रदे ।
नीलेन्दीवरलोचनत्रययुते कारुण्यवारान्निधे सौभाग्यामृतवर्द्धनेन कृपया सिञ्च त्वमस्मादृशम् ॥२॥
खर्वे गर्वसमूहपूरिततनो सर्पादिवेषोज्ज्वले व्याघ्रत्वक् परिवीतसुन्दरकटिव्याधूत घण्टाङ्किते ।
सद्यः कृत्तगलद्रजः परिमिलन्मुण्डद्वयीमूर्द्धजग्रन्थिश्रेणि नृमुण्डदामललिते भीमे भयंनाशय ॥३॥
मायानङ्गविकाररूपललनाबिन्द्वर्द्धचन्द्राम्बिके हुं फट्कारमयि त्वमेव शरणं मंत्रात्मिके मादृशः ।
मूर्तिस्ते जननि त्रिधामघटिता स्थूलातिसूक्ष्मा परा वेदानां नहि गोचरा कथमपि प्राज्ञैर्नुतामाश्रये ॥४॥
त्वत्पादाम्बुजसेवया सुकृतिनो गच्छन्ति सायुज्यतां तस्याः श्रीपरमेश्वर त्रिनयन ब्रह्मादिसाम्यात्मनः ।
संसाराम्बुधिमज्जने पटुतनुर्देवेन्द्रमुख्यान्सुरान् मातस्ते पदसेवने हि विमुखान् किं मन्दधीःसेवते ॥५॥
मातस्त्वत्पद पंकजद्वय रजोमुद्रांक कोटीरिणस्ते देवा जयसङ्गरे विजयिनो निःशङ्कमङ्के गताः ।
देवोऽहं भुवने न मे सम इति, स्पर्द्धां वहन्तः परे तत्तुल्यां नियतं यथा शशिरवी नाशं व्रजन्ति स्वयम् ॥६॥
त्वन्नामस्मरणात्पलायन परान्द्रष्टुं च शक्ता न ते भूतप्रेतपिशाचराक्षसगणा यक्षाश्च नागाधिपाः ।
दैत्यादानव पुङ्गवाश्च खचरा व्याघ्रादिका जन्तवो डाकिन्यः कुपितान्तकश्च मनुजान् मातः क्षणं भूतले ॥७॥
लक्ष्मीः सिद्धिगणश्च पादुकमुखाः सिद्धास्तथा वैरिणां स्तंभश्चापि वराङ्गने गजघटा स्तंभस्तथा मोहनम् ।
मातस्त्वत्पदसेवया खलुनृणां सिध्यन्ति ते ते गुणाः क्लान्तः कान्त मनोभवोऽत्र भवति क्षुद्रोऽपि वाचस्पतिः ॥८॥
ताराष्टकमिदं पुण्यं भक्तिमान् यः पठेन्नरः । प्रातर्मध्याह्नकाले च सायाह्ने नियतः शुचिः ॥९॥
लभते कवितां विद्यां सर्वशास्त्रार्थविद्भवेत्, लक्ष्मीमनश्वरां प्राप्य भुक्त्वा भोगान्यथेप्सितान् ।
कीर्तिं कान्तिं च नैरुज्यं प्राप्यान्ते मोक्षमाप्नुयात् ॥१०॥

॥ इति नीलतंत्रे तारास्तोत्रं सम्पूर्णम् ॥

॥ अथ तारा शतनाम स्तोत्रम् ॥

॥ श्री शिव उवाच ॥

तारिणी तरला तन्वी तारा तरुणवल्लरी । तीररूपा तरी श्यामा तनुक्षीणपयोधरा ॥१॥
तुरीया तरला तीव्रगमना नीलवाहिनी । उग्रतारा जया चण्डी श्रीमदेकजटाशिराः ॥२॥
तरुणी शाम्भवी च्छिन्नभाला च भद्रतारिणी । उग्रा चोग्रप्रभा नीला कृष्णा नीलसरस्वती ॥३॥
द्वितीया शोभना नित्या नवीना नित्यनूतना । चण्डिका विजयाराध्या देवी गगनवाहिनी ॥४॥
अट्टहास्या करालास्या चरास्या दितिपूजिता । सगुणा सगुणाराध्या हरीन्द्रदेवपूजिता ॥५॥
रक्तप्रिया च रक्ताक्षी रुधिरास्यविभूषिता । बलिप्रिया बलिरता दुर्गा बलवती बला ॥६॥

बलप्रिया बलरता बलरामप्रपूजिता । अर्द्धकेशेश्वरी केशा केशवासविभूषिता ॥७॥
पद्ममाला च पद्माक्षी कामाख्या गिरिनंदिनी । दक्षिणा चैव दक्षा च दक्षजा दक्षिणे रता ॥८॥
वज्रपुष्पप्रिया रक्तप्रिया कुसुमभूषिता । माहेश्वरी महादेवप्रिया पञ्चविभूषिता ॥९॥
इडा च पिङ्गला चैव सुषुम्ना प्राणरूपिणी । गान्धारी पञ्चमी पञ्चाननादि परिपूजिता ॥१०॥
तथ्यविद्या तथ्यरूपा तथ्यमार्गानुसारिणी । तत्त्वप्रिया तत्त्वरूपा तत्त्वज्ञानात्मिकानघा ॥११॥
ताण्डवाचारसन्तुष्टा ताण्डवप्रियकारिणी । तालदानरता क्रूरतापिनी तरणिप्रभा ॥१२॥
त्रयीयुक्ता त्रयीमुक्ता तर्पिता तृप्तिकारिणी । तारुण्यभावसंतुष्टा शक्तिर्भक्तानुरागिणी ॥१३॥
शिवासक्ता शिवरतिः शिवभक्तिपरायणा । ताम्रद्युतिस्ताम्ररागा ताम्रपात्रप्रभोजिनी ॥१४॥
बलभद्रप्रेमरता बलिभुग्बलिकल्पिनी । रामरूपा रामशक्ती रामरूपानुरागिणी ॥१५॥
इत्येतत्कथितं देवि रहस्यं परमाद्भुतम् । श्रुत्वा मोक्षमवाप्नोति तारादेव्याः प्रसादतः ॥१६॥
य इदं पठति स्तोत्रं तारास्तुति रहस्यकम् । सर्वसिद्धियुतो भूत्वा विहरेत् क्षितिमण्डले ॥१७॥
तस्यैव मंत्रसिद्धिः स्यान्मम सिद्धिरनुत्तमा । भवत्येव महामाये सत्यं सत्यं न संशयः ॥१८॥
मन्दे मंगलवारे च यः पठेन्निशि संयतः । तस्यैव मंत्रसिद्धिः स्याद्गाणपत्यं लभेत सः ॥१९॥
श्रद्धयाऽश्रद्धया वापि पठेत्ताराहस्यकम् । सोऽचिरणैव कालेन जीवन्मुक्तः शिवो भवेत् ॥२०॥
सहस्त्रावर्त्तनाद्देवि पुरश्चर्याफलं लभेत् ।
एवं सततयुक्ता ये ध्यायं तस्त्वामुपासते ।
ते कृतार्था महेशानि मृत्युसंसारवर्त्मनः ॥२१॥

॥ इति श्रीस्वर्णमालातंत्रे तारिणी शतनामस्तोत्रम् सम्पूर्णम् ॥

॥ श्री तकारादि तारा सहस्त्रनाम स्तोत्रम् ॥

॥ श्रीवशिष्ठ उवाच ॥

नाम्नां सहस्त्रं ताराया मुखाम्भोजाद्विनिर्गतम् । मंत्रसिद्धिकरं प्रोक्तं तन्मे वद पितामह ॥१॥

॥ ब्रह्मोवाच ॥

शृणु वत्स! प्रवक्ष्यामि रहस्यं सर्वसिद्धिदम् । यस्योपदेशमात्रेण तव सिद्धिर्भविष्यति ॥२॥
महाप्रलयकालादौ नष्टे स्थावरजङ्गमे । महाकारं समाकर्ण्य कृपया संहृतं तनौ ॥३॥
नाम्ना तेन महातारा ख्याता सा ब्रह्मरूपिणी । महाशूलत्रयं कृत्वा तत्र चैकाकिनी स्थिता ॥४॥
पुनः सृष्टेश्चिकीर्षा -ऽभूद्दिव्यसाम्राज्यसंज्ञकम् । नाम्नां सहस्त्रमस्यास्तु तकाराद्यं मया स्मृतम् ॥५॥
तत्प्रभावेण ब्रह्माण्डं निर्मितं सुदृढं महत् । औविर्भूता वयं तन्त्रयन्त्रैस्तस्याः पुरा द्विजः ॥६॥
स्व-स्व-कार्यार्थिनस्तत्र भ्रान्ता भ्रम्यां यथा वयम् । तयोपदिष्टाः कृपया भवामःसृष्टिकारकाः ॥७॥
तस्याः प्रसादाद्विप्रेन्द्र त्रयो ब्रह्माण्डनायकाः । अन्ये सुरगणाः सर्वे तस्याः पादप्रसेवकाः ॥८॥

पठनाद्धारणात्सृष्टेः कर्ताऽहं पालको हरिः । तत्त्वाक्षरोपदेशेन संहर्ता शंकरः स्वयम् ॥९॥
ऋषिच्छन्दादिकं ध्यानं मूलवत्परिकीर्तितम् । नियोगमात्रसिद्धौ च पुरुषार्थचतुष्टयम् ॥१०॥

विनियोग:- ॐ अस्य श्रीतारातकारादिसहस्रनाम स्तोत्रस्य वसिष्ठ ऋषिः, अनुष्टुप् छन्दः, तारा देवता, सर्वेष्ट सिद्धये पाठे विनियोगः।

ऋष्यादि न्यास:- ॐ वसिष्ठ ऋषये नमः शिरसि। अनुष्टुप् छन्दसे नमः मुखे। तारादेवतायै नमो हृदि। विनियोगाय नमः सर्वाङ्गे। इति ऋष्यादि न्यासः।

हृदयादि षडंगन्यास:- ॐ ह्रां हृदयाय नमः। ॐ ह्रीं शिरसे स्वाहा। ॐ ह्रूं शिखायै वषट्। ॐ ह्रैं कवचाय हुं। ॐ ह्रौं नेत्रत्रयाय वौषट्। ॐ ह्रः अस्त्राय फट्।

करन्यास:- ॐ ह्रां अंगुष्ठाभ्यां नमः। ॐ ह्रीं तर्जनीभ्यां नमः। ॐ ह्रूं मध्यमाभ्यां नमः। ॐ ह्रैं अनामिकाभ्यां नमः। ॐ ह्रौं कनिष्ठिकाभ्यां नमः। ॐ ह्रः करतलकरपृष्ठाभ्यां नमः।

॥ ध्यानम् ॥

प्रत्यालीढपदार्पितांघ्रि शवहृद्-घोराट्टहासा परा खड्गेन्दीवर कर्त्रिखर्परभुजा हुंकारबीजोद्भवा ।
खर्वा नीलविशालपिङ्गल जटाजूटैकनागैर्युता जाड्यं न्यस्य कपालकर्तृ जगतां हन्त्युग्रतारा स्वयम् ॥

इति ध्यात्वा स्तोत्रं पठेत् -

तारा तारादिपंचार्णा तारान्यावेदवीर्यजा । तारा तारहितावर्णा ताराद्याताररूपिणी ॥११॥
तारारात्रि समुत्पन्ना तारारात्रिवरोद्यता । तारारात्रिजपासक्ता तारारात्रिस्वरूपिणी ॥१२॥
ताराराज्ञीस्वसंतुष्टा ताराराज्ञीवरप्रदा । ताराराज्ञीस्वरूपा च ताराराज्ञीप्रसिद्धिदा ॥१३॥
ताराहृत्पंकजागारा ताराहृत्पंकजापरा । ताराहृत्पंकजाधारा ताराहृत्पंकजा तथा ॥१४॥
तारेश्वरी च ताराभा तारागणस्वरूपिणी । तारागणसमाकीर्णा तारागणनिषेविता ॥१५॥
तारा तारान्विता तारारत्नान्वितविभूषणा । तारागणरणासन्ना ताराकृत्यप्रपूजिता ॥१६॥
तारागणकृताहारा तारागणकृताश्रया । तारागणकृतागारा तारागणनतत्परा ॥१७॥
तारागुणगुणाकीर्णा तारागुणगणप्रदा । तारागुणगणासक्ता तारागुणगणालया ॥१८॥
तारेश्वरी तारापूज्या ताराजप्या तु तारणा । तारमुख्या तु ताराख्या तारदक्षा तु तारिणी ॥१९॥
तारागम्या तु तारस्था तारामृत तरङ्गिणी । तारभव्या तु तारार्णा तारहव्या तु तारिणी ॥२०॥
तारका तारकांतस्था तारकाराशिभूषणा । तारकाहारशोभाढ्या तारकावेष्टिताङ्गणा ॥२१॥
तारकाहंसकाकीर्णा तारकाकृतभूषणा । तारकाङ्गदशोभाङ्गी तारकाश्रितकङ्कणा ॥२२॥
तारकाञ्चितकाञ्ची च तारकान्वितभक्षणा । तारकाचित्रवसना तारकासनमण्डला ॥२३॥
तारकाकीर्णमुकुटा तारकाश्रितकुण्डला । तारकान्वित ताटङ्कयुग्मगण्डस्थलोज्ज्वला ॥२४॥
तारकाश्रितपादाब्जा तारकावरदायिका । तारकादत्तहृदया तारकाञ्चितसायका ॥२५॥
तारकान्यासकुशला तारकान्यासविग्रहा । तारकान्याससन्तुष्टा तारकान्याससिद्धिदा ॥२६॥

तारकान्यासनिलया तारकान्यासपूजिता । तारकान्याससंहृष्टा तारकान्याससिद्धिदा ॥२७॥
तारकान्याससंमग्ना तारकान्यासवासिनी । तारकान्याससम्पूर्णा मंत्रसिद्धिविधायिनी ॥२८॥
तारकोपासकप्राणा तारकोपासकप्रिया । तारकोपासकासाध्या तारकोपासकेष्टदा ॥२९॥
तारकोपासकासक्ता तारकोपासकार्थिनी । तारकोपासकाराध्या तारकोपासकाश्रया ॥३०॥
तारकासुरसन्तुष्टा तारकासुरपूजिता । तारकासुरनिर्माणकर्त्री तारकवन्दिता ॥३१॥
तारकासुरसम्मान्या तारकासुरमानदा । तारकासुरसंसिद्धा तारकासुरदेवता ॥३२॥
तारकासुरदेहस्था तारकासुरस्वर्गदा । तारकासुरसंसृष्टा तारकासुरगर्वदा ॥३३॥
तारकासुरसंहंत्री तारकासुरमर्दिनी । तारकासुरसंग्रामनर्तकी तारकापरा ॥३४॥
तारकासुरसंग्रामतारिणी तारकारिभृत् । तारकासुरसंग्राम - कबंधवृन्दवन्दिता ॥३५॥
तारकारिप्रसूस्तारकारिमाता तुकारिका । तारकारिमनोहारि वस्त्रभूषानुशासिका ॥३६॥
तारकारिविधात्री च तारकारिनिषेविता । तारकारिवचस्तुष्टा तारकारिसुशिक्षिता ॥३७॥
तारकारिसुसन्तुष्टा तारकारिविभूषिता । तारकारिकृतोत्सङ्गा तारकारिप्रहर्षदा ॥३८॥
तमः सम्पूर्णसर्वाङ्गी तमोलिप्तकलेवरा । तमोव्याप्तस्थलासङ्गा तमः - पटलसन्निभा ॥३९॥
तमोहन्त्री तमःकर्त्री तमः संचारकारिणी । तमोगात्री तमोदात्री तमः पात्री तमोऽपहा ॥४०॥
तमोराशिस्तमोनाशा तमोराशि विनाशिनी । तमोराशिकृतध्वंसी तमोराशिभयंकरी ॥४१॥
तमोगुणप्रसन्नास्या तमोगुणसुसिद्धिदा । तमोगुणोक्तमार्गस्था तमोगुणविराजिता ॥४२॥
तमोगुणस्तुतिपरा तमोगुणविवर्द्धिनी । तमोगुणाश्रितपरा तमोगुणविनाशिनी ॥४३॥
तमोगुणक्षयकरी तमोगुणकलेवरा । तमोगुणध्वंसतुष्टा तमः पारे प्रतिष्ठिता ॥४४॥
तमोभवभवप्रीता तमोभवभवप्रिया । तमोभवभवश्रद्धा तमोभवभवाश्रया ॥४५॥
तमोभवभवप्राणा तमोभवभवार्चिता । तमोभवभवप्रीत्यालीढ - कुम्भस्थलस्थिता ॥४६॥
तपस्विवृन्दसन्तुष्टा तपस्विवृन्दपुष्टिदा । तपस्विवृन्दसंस्तुत्या तपस्विवृन्दवंदिता ॥४७॥
तपस्विवृन्दसम्पन्ना तपस्विवृन्दहर्षदा । तपस्विवृन्दसम्पूज्या तपस्विवृन्दभूषिता ॥४८॥
तपस्विचित्ततल्पस्था तपस्विचित्तमध्यगा । तपस्विचित्तचित्तार्हा तपस्विचित्तहारिणी ॥४९॥
तपस्विकल्पवल्ल्याभा तपस्विकल्पपादपा । तपस्विकामधेनुश्च तपस्विकामपूर्तिदा ॥५०॥
तपस्वित्राणनिरता तपस्विगृहसंस्थिता । तपस्विगृहराज्य श्रीस्तपस्विराज्यदायिका ॥५१॥
तपस्विमानसाराध्या तपस्विमानदायिका । तपस्वितापसंहर्त्री तपस्वितापशान्तिकृत् ॥५२॥
तपस्विसिद्धिविद्या च तपस्विमंत्रसिद्धिकृत् । तपस्विमंत्रतन्त्रेशी तपस्विमंत्ररूपिणी ॥५३॥
तपस्विमंत्रनिपुणा तपस्विकर्मकारिणी । तपस्विकर्मसम्भूता तपस्विकर्मसाक्षिणी ॥५४॥
तपस्सेव्या तपोभव्या तपोभाव्या तपस्विनी । तपोवश्या तपोगम्या तपोगेहनिवासिनी ॥५५॥

तपोधन्या तपोमान्या तपःकन्या तपोवृता । तपस्तथ्या तपोगोप्या तपोजप्या तपोनृता ॥५६॥
तपःसाध्या तपोराध्या तपोवन्द्या तपोमयी । तपस्संध्या तपोवन्ध्या तपस्सान्निध्यकारिणी ॥५७॥
तपोध्येया तपोज्ञेया तपस्तप्ता तपोबला । तपोलेया तपोदेया तपस्तत्त्वफलप्रदा ॥५८॥
तपोविघ्नवरघ्नी च तपोविघ्नविनाशिनी । तपोविघ्नचयध्वंशी तपोविघ्नभयंकरी ॥५९॥
तपोभूमिवरप्राणा तपोभूमिपतिस्तुता । तपोभूमिपतिध्येया तपोभूमिपतीष्टदा ॥६०॥
तपोवनकुरङ्गस्था तपोवनविनाशिनी । तपोवनगतिप्रीता तपोवनविहारिणी ॥६१॥
तपोवनफलासक्ता तपोवनफलप्रदा । तपोवनसुसाध्या च तपोवनसुसिद्धिदा ॥६२॥
तपोवनसुसेव्या च तपोवननिवासिनी । तपोधनसुसंसेव्या तपोधनसुसाधिता ॥६३॥
तपोधनसुसंलीना तपोधन मनोमयी । तपोधननमस्कारा तपोधनविमुक्तिदा ॥६४॥
तपोधनधनासाध्या तपोधनधनात्मिका । तपोधनधनाराध्या तपोधनफलप्रदा ॥६५॥
तपोधनधनाढ्या च तपोधनधनेश्वरी । तपोधनधनप्रीता तपोधनधनालया ॥६६॥
तपोधनजनाकीर्णा तपोधनजनाश्रया । तपोधनजनाराध्या तपोधनजनप्रसूः ॥६७॥
तपोधनजनप्राणा तपोधनजनेष्टदा । तपोधनजनासाध्या तपोधनजनेश्वरी ॥६८॥
तरुणासृक्प्रपानार्ता तरुणासृक्प्रतर्पिता । तरुणासृक्समुद्रस्था तरुणासृक्प्रहर्षदा ॥६९॥
तरुणासृक्सुसन्तुष्टा तरुणासृग्विलेपिता । तरुणासृङ्नदीप्राणा तरुणासृग्विभूषणा ॥७०॥
तरुणैणबलिप्रीता तरुणैणबलिप्रिया । तरुणैणबलिप्राणा तरुणैणबलीष्टदा ॥७१॥
तरुणाजबलिप्रीता तरुणाजबलिप्रिया । तरुणाजबलिघ्राणा तरुणाजबलिप्रभुक् ॥७२॥
तरुणादित्य सङ्काशा तरुणादित्यविग्रहा । तरुणादित्यरुचिरा तरुणादित्यनिर्मला ॥७३॥
तरुणादित्यनिलया तरुणादित्यमण्डला । तरुणादित्यललिता तरुणादित्यकुण्डला ॥७४॥
तरुणार्कसमज्योत्स्ना तरुणार्कसमप्रभा । तरुणार्कप्रतीकाशा तरुणार्कप्रवर्द्धिता ॥७५॥
तरुणारुणनेत्रा च तरुणारुण लोचना । तरुणारुणगात्रा च तरुणारुणभूषणा ॥७६॥
तरुणीदत्तसंकेता तरुणीदत्तभूषणा । तरुणीगणसन्तुष्टा तरुणी तरुणीमणिः ॥७७॥
तरुणीमणिसंसेव्या तरुणीमणिवंदिता । तरुणीमणिसंतुष्टा तरुणीमणिपूजिता ॥७८॥
तरुणीवृन्दसंवन्द्या तरुणीवृन्दवन्दिता । तरुणीवृन्दसंस्तुत्या तरुणीवृन्दमानदा ॥७९॥
तरुणीवृन्दमध्यस्था तरुणीवृन्दवेष्टिता । तरुणीवृन्दसम्प्रीता तरुणीवृन्दभूषिता ॥८०॥
तरुणीजयसंसिद्धा तरुणीजयमोक्षदा । तरुणीपूजकासक्ता तरुणीपूजकार्थिनी ॥८१॥
तरुणीपूजकश्रीदा तरुणीपूजकार्तिहा । तरुणीपूजकप्राणा तरुणीनिन्दकार्त्तिदा ॥८२॥
तरुणीकोटिनिलया तरुणीकोटिविग्रहा । तरुणीकोटिमध्यस्था तरुणीकोटिवेष्टिता ॥८३॥
तरुणीकोटिदुःसाध्या तरुणीकोटिविग्रहा । तरुणीकोटिरुचिरा तरुणी तरुणीश्वरी ॥८४॥

तरुणीमणिहाराढ्या तरुणीमणिकुण्डला । तरुणीमणिसन्हृष्टा तरुणीमणिमण्डिता ॥८५॥
तरुणीसरणिप्रीता तरुणीसरणीरता । तरुणीसरणिस्थाना तरुणीसरणीमता ॥८६॥
तरणीमण्डलश्रीदा तरणीमण्डलेश्वरी । तरणीमण्डलश्रद्धा तरणीमण्डलस्थिता ॥८७॥
तरणीमण्डलार्घ्याढ्या तरणीमण्डलार्चिता । तरणीमण्डलध्येया तरणीभवसागरा ॥८८॥
तरणीकरणासक्ता तरणीतक्षकार्चिता । तरणीतक्षकश्रीदा तरणीतक्षकार्थिनी ॥८९॥
तरीतरणशीला च तरीतरणतारिणी । तरीतरणसम्वेद्या तरीतरणकारिणी ॥९०॥
तरुरूपा तरूपस्था तरुस्तरुलतामयी । तरुयूपा तरुस्था च तरुमध्यनिवासिनी ॥९१॥
तप्तकाञ्चन गेहस्था तप्तकाञ्चन भूमिका । तप्तकाञ्चनप्राकारा तप्तकाञ्चनपादुका ॥९२॥
तप्तकाञ्चनदीप्तांगी तप्तकाञ्चनसन्निभा । तप्तकाञ्चन गौराङ्गी तप्तकाञ्चनमञ्चगा ॥९३॥
तप्तकाञ्चनवस्त्राढ्या तप्तकाञ्चनरूपिणी । तप्तकाञ्चन मध्यस्था तप्तकाञ्चन कारिणी ॥९४॥
तप्तकाञ्चन मासार्च्या तप्तकाञ्चन पात्रभुक् । तप्तकाञ्चन शैलस्था तप्तकाञ्चनकुण्डला ॥९५॥
तप्तकाञ्चन क्षेत्राढ्या तप्तकाञ्चन दण्डधृक् । तप्तकाञ्चन भूषाढ्या तप्तकाञ्चन दानदा ॥९६॥
तप्तकाञ्चन देशेशी तप्तकाञ्चन चापधृक् । तप्तकाञ्चनतूणाढ्या तप्तकाञ्चन बाणभृत् ॥९७॥
तलातलविधात्री च तलातल विधायिनी । तलातलस्वरूपेशी तलातल विहारिणी ॥९८॥
तलातल जनासाध्या तलातल जनेश्वरी । तलातल जनाराध्या तलातल जनार्थदा ॥९९॥
तलातलजयाभाक्षी तलातलजचञ्चला । तलातलजरत्नाढ्या तलातलजदेवता ॥१००॥
तटिनीस्थानरसिका तटिनी तटवासिनी । तटिनी तटिनीतीरगामिनी तटिनीप्रिया ॥१०१॥
तटिनीप्लवनप्रीता तटिनीप्लवनोद्यता । तटिनीप्लवनश्लाघ्या तटिनीप्लवनार्थदा ॥१०२॥
तटलास्या तटस्थाना तटेशी तटवासिनी । तटपूज्या तटाराध्या तटरोममुखार्थिनी ॥१०३॥
तटजा तटरूपा च तटस्था तटचञ्चला । तटसन्निधिगेहस्था सहितातटशायिनी ॥१०४॥
तरङ्गिणी तरङ्गाभा तरङ्गायतलोचना । तरङ्गसमदुर्द्धर्षा तरङ्गसमचञ्चला ॥१०५॥
तरङ्गसमदीर्घाङ्गी तरङ्गसमवर्द्धिता । तरङ्गसम-सम्वृद्धिस्तरङ्गसमनिर्मला ॥१०६॥
तडागमध्यनिलया तडागमध्यसम्भवा । तडागरचनश्लाघ्या तडागरचनोद्यता ॥१०७॥
तडागकुमुदामोदी तडागेशी तडागिनी । तडागनीरसंस्नाता तडागनीरनिर्मला ॥१०८॥
तडागकमलागारा तडागकमलालया । तडागकमलान्तस्था तडागकमलोद्यता ॥१०९॥
तडागकमलाङ्गी च तडागकमलानना । तडागकमलप्राणा तडागकमलेक्षणा ॥११०॥
तडागरक्तपद्मस्था तडागश्वेतपद्मगा । तडागनीलपद्माभा तडागनीलपद्मभृत् ॥१११॥
तनुस्तनुगता तन्वी तन्वङ्गी तनुधारिणी । तनुरूपा तनुगता तनुधृक्तनुरूपिणी ॥११२॥
तनुस्था तनुमध्याङ्गी तनुकृत्तनुमंगला । तनुसेव्या तु तनुजा तनुजा तनुसम्भवा ॥११३॥

तनुभृत्तनु सम्भूता तनुदा तनुकारिणी । तनुभृत्तनु - संहन्त्री तनुसंचारकारिणी ॥११४॥

तथ्यवाक् तथ्यवचना तनुकृत्तथ्यवादिनी । तथ्यभृत्तथ्यचरिता तथ्यधर्मानुवर्तिनी ॥११५॥

तथ्यभुक्तथ्यगमना तथ्यभक्तिवरप्रदा । तथ्यनीचेश्वरी तथ्यचित्ताचाराशुसिद्धिदा ॥११६॥

तर्क्यातर्क्यस्वभावा च तर्कदा या तु तर्ककृत् । तर्काध्यापन मध्यस्था तर्काध्यापनकारिणी ॥११७॥

तर्काध्यापन सन्तुष्टा तर्काध्यापन रूपिणी । तर्काध्यापनसंशीला तर्कार्थप्रतिपादिता ॥११८॥

तर्काध्यापनसंतृप्ता तर्कार्थप्रतिपादिका । तर्कवादाश्रितपदा तर्कवादविवर्द्धिनी ॥११९॥

तर्कवादैकनिपुणा तर्कवादप्रचारिणी । तमालदलश्यामाङ्गी तमालदलमालिनी ॥१२०॥

तमालवनसंकेता तमालपुष्पपूजिता । तगरीतंगराराद्धया तगरार्चितपादुका ॥१२१॥

तगरस्त्रक्सुसन्तुष्टा तगरस्त्रग्विराजिता । तगराहुतिसन्तुष्टा तगराहतिकीर्तिदा ॥१२२॥

तगराहुतिसंसिद्धा तगराहुतिमानदा । तडित्तडिल्लताकारा तडिच्चंचललोचना ॥१२३॥

तडिल्लता तडित्तन्वी तडिद्दीप्ता तडित्प्रभा । तद्रूपा तत्स्वरूपेशी तन्मयी तत्त्वरूपिणी ॥१२४॥

तत्स्थानदाननिरता तत्कर्मफलदायिनी । तत्त्वकृत्तत्त्वदा तत्त्वातत्त्ववित्तत्त्व तर्पिता ॥१२५॥

तत्त्वार्च्या तत्त्वपूज्या च तत्त्वार्घ्या तत्त्वरूपिणी । तत्त्वज्ञानप्रदानेशी तत्त्वज्ञानसुमोक्षदा ॥१२६॥

त्वरितात्वीरतप्रीता त्वरितार्त्तिविनाशिनी । त्वरितासवसन्तुष्टा त्वरितासवतर्पिता ॥१२७॥

त्वग्वस्त्रा त्वक्परीधाना तरलातरलेक्षणा । तरक्षुचर्मवसना तरक्षुत्वग्निभूषणा ॥१२८॥

तरक्षुस्तरक्षुप्राणा तरक्षुपृष्ठगामिनी । तरक्षुपृष्ठसंस्थाना तरक्षुपृष्ठवासिनी ॥१२९॥

तर्पितोदैस्तर्पणाशा तर्पणासक्तमानसा । तर्पणानन्दहृदया तर्पणाधिपतिस्तति: ॥१३०॥

त्रयीमयी त्रयीसेव्या त्रयीपूज्या त्रयीकथा । त्रयीभव्या त्रयीभाव्या त्रयीहव्या त्रयीयुता ॥१३१॥

त्र्यक्षरी त्र्यक्षरेशानी त्र्यक्षरीशीघ्रसिद्धिदा । त्र्यक्षरेशी त्र्यक्षरीस्था त्र्यक्षरीपुरुषास्पदा ॥१३२॥

तपता तपनेष्टा च तपस्तपनकन्यका । तपनांशु समासह्या तपनकोटिकांतिकृत् ॥१३३॥

तपनीया तल्पगता तल्पातल्पविधायिनी । तल्पकृत्तल्पगा तल्पदात्री तल्पतलाश्रया ॥१३४॥

तपनीय तलारात्री तपनीयांशुप्रार्थिनी । तपनीयप्रदा तप्ता तपनीयाद्रिसंस्थिता ॥१३५॥

तल्पेशी तल्पदा तल्पसंस्थिता तल्पवल्लभा । तल्पप्रिया तल्परता तल्पनिर्माणकारिणी ॥१३६॥

तरसापूजनासक्ता तरसावरदायिनी । तरसासिद्धिसंधात्री तरसामोक्षदायिनी ॥१३७॥

तापसी तापसाराध्या तापसार्तिविनाशिनी । तापसार्ता तापसश्रीस्तापसप्रियवादिनी ॥१३८॥

तापसानन्दहृदया तापसानन्ददायिनी । तापसाश्रितपदाब्जा तापसासक्तमानसा ॥१३९॥

तामसी तामसी पूज्या तामसीप्रणयोत्सुका । तामसी तामसीप्रीता तामसीशीघ्रसिद्धिदा ॥१४०॥

तालेशी तालभुक्तालदात्री तालोपमस्तनी । तालवृक्षस्थिता तालवृक्षजा तालरूपिणी ॥१४१॥

तार्क्ष्या तार्क्ष्यसमारूढा तार्क्ष्येशी तार्क्ष्यपूजिता । तार्क्ष्येश्वरी तार्क्ष्यमाता तार्क्ष्येशीवरदायिनी ॥१४२॥

तापी तु तापिनी तापसंहंत्री तापनाशिनी । तापदात्री तापकर्त्री तापविध्वंसकारिणी ॥१४३॥
त्रासकर्त्री त्रासदात्री त्रासहर्त्री च त्रासहा । त्रासिता त्रासरहिता त्रासनिर्मूलकारिणी ॥१४४॥
त्राणकृत् त्राणसंशीला तानेशी तानदायिनी । तानगानरता तानकारिणी तानगायिनी ॥१४५॥
तारुण्यामृतसम्पूर्णा तारुण्यामृतवारिधिः । तारुण्यामृतसन्तुष्टा तारुण्यामृततर्पिता ॥१४६॥
तारुण्यामृतपूर्णाङ्गी तारुण्यामृतविग्रहा । तारुण्यगुणसम्पन्ना तारुण्योक्ति विशारदा ॥१४७॥
ताम्बूली ताम्बुलेशानी ताम्बूलचर्वणोद्यता । ताम्बूल पूरितास्या च ताम्बूलारुणिताधरा ॥१४८॥
ताटङ्करत्नविख्याति स्ताटङ्करत्नभूषिणी । ताटङ्करत्नमध्यस्था ताटङ्कद्वयभूषिता ॥१४९॥
तिथीशा तिथि - सम्पूज्या तिथिस्था तिथिरूपिणी । तिथित्रितयवास्तव्या तिथिशवरदायिनी ॥१५०॥
तिलोत्तमादिकाराध्या तिलोत्तमादिकप्रभा । तिलोत्तमा तिलप्रेक्ष्या तिलाराध्या तिलार्चिता ॥१५१॥
तिलभुक् तिलसन्दात्री तिलतुष्टा तिलालया । तिलदा तिलसंकाशा तिलतैलविधायिनी ॥१५२॥
तिलतैलोपलिप्तांगी तिलतैलसुगन्धिनी । तिलाज्यहोमसन्तुष्टा तिलाज्यहोमसिद्धिदा ॥१५३॥
तिलपुष्पाञ्जलिप्रीता तिलपुष्पांजलिप्रिया । तिलपुष्पांजलिश्रेष्ठा तिलपुष्पाघनाशिनी ॥१५४॥
तिलकाश्रित - सिन्दूरा तिलकाङ्कित - चन्दना । तिलकाहृतकस्तूरी तिलकामोद - मोहिनी ॥१५५॥
त्रिगुणा त्रिगुणाकारा त्रिगुणान्वित - विग्रहा । त्रिगुणाकार विख्याता त्रिमूर्तिस्त्रिगुणात्मिका ॥१५६॥
त्रिशिरा स्त्रिपुरेशानी त्रिपुरा त्रिपुरेश्वरी । त्रिपुरेशी त्रिलोकस्था त्रिपुरी त्रिपुराम्बिका ॥१५७॥
त्रिपुरारि - समाराध्या त्रिपुरारिवरप्रदा । त्रिपुरारि - शिरोभूषा त्रिपुरारिसुखप्रदा ॥१५८॥
त्रिपुरारीष्ट सन्दात्री त्रिपुरारीष्टदेवता । त्रिपुरारिकृतार्द्धाङ्गी त्रिपुरारि - विलासिनी ॥१५९॥
त्रिपुरासुरसंहर्त्री त्रिपुरासुर - मर्द्दिनी । त्रिपुरासुर - संसेव्या त्रिपुरासुर - वर्य्यपा ॥१६०॥
त्रिकूटा त्रिकूटाराध्या त्रिकूटार्चित विग्रहा । त्रिकूटाचल - मध्यस्था त्रिकूटाचल वासिनी ॥१६१॥
त्रिकूटाचल सञ्जाता त्रिकूटाचल निर्गता । त्रिकूटा त्रिजटेशानी त्रिजटावरदायिनी ॥१६२॥
त्रिनेत्रेशी त्रिनेत्रा च त्रिनेत्र वरवर्णिनी । त्रिवली त्रिवलीयुक्ता त्रिशूलवरधारिणी ॥१६३॥
त्रिशूलेशी त्रिशूलीशी त्रिशूलभृत्त्रिशूलिनी । त्रिमनुस्त्रिमनूपास्या त्रिमनूपासकेश्वरी ॥१६४॥
त्रिमनुजपसन्तुष्टा त्रिमनोस्तूर्णसिद्धिदा । त्रिमनुपूजन - प्रीता त्रिमनुध्यानमोक्षदा ॥१६५॥
त्रिविधा त्रिविधाभक्तिस्त्रिमता त्रिमतेश्वरी । त्रिभावस्था त्रिभावेशी त्रिभावपरिपूरिता ॥१६६॥
त्रितत्त्वात्मा त्रितत्त्वेशी त्रितत्त्वज्ञा त्रितत्त्वधृक् । त्रितत्त्वा च मनप्रीता त्रितत्त्वाचमनेष्टदा ॥१६७॥
त्रिकोणस्था त्रिकोणेशी त्रिकोणचक्रवासिनी । त्रिकोणचक्रमध्यस्था त्रिकोणबिन्दुरूपिणी ॥१६८॥
त्रिकोणयंत्रसंस्थाना त्रिकोणयंत्ररूपिणी । त्रिकोणयंत्र सम्पूज्या त्रिकोणयन्त्रसिद्धिदा ॥१६९॥
त्रिवर्णाढ्या त्रिवर्णेशी त्रिवर्णोपास्यरूपिणी । त्रिवर्णस्था त्रिवर्णाढ्या त्रिवर्णावरदायिनी ॥१७०॥
त्रिवर्णाद्या त्रिवर्णार्च्या त्रिवर्गफलदायिनी । त्रिवर्गाढ्या त्रिवर्गेशी त्रिवर्गाद्यफलप्रदा ॥१७१॥

त्रिसंध्यार्च्या त्रिसन्ध्येशी त्रिसन्ध्याराधनेष्टदा । त्रिसन्ध्यार्चन सन्तुष्टा त्रिसंध्याजपमोक्षदा ॥१७२॥

त्रिपदाराधितपदा त्रिपदा त्रिपदेश्वरी । त्रिपदाप्रदिपाद्येशी त्रिपदाप्रतिपादिका ॥१७३॥

त्रिशक्तिश्च त्रिशक्तीशी त्रिशक्तेष्टफलप्रदा । त्रिशक्तेष्टा त्रिशक्तीष्टा त्रिशक्ति परिवेष्टिता ॥१७४॥

त्रिवेणी व त्रिवेणीस्त्री त्रिवेणीमाधवार्चिता । त्रिवेणीजल सन्तुष्टा त्रिवेणी स्नान पुण्यदा ॥१७५॥

त्रिवेणीजल संस्नाता त्रिवेणी जलरूपिणी । त्रिवेणीजलपूताङ्गी त्रिवेणीजल पूजिता ॥१७६॥

त्रिनाडीस्था त्रिनाडीशी त्रिनाडीमध्यगामिनी । त्रिनाडीसन्ध्य संछेद्यो त्रिनाडी च त्रिकोटिनी ॥१७७॥

त्रिपञ्चाशत्त्रिरेखा च त्रिशक्तिपथ गामिनी । त्रिपथस्था त्रिलोकेशी त्रिकोटिकुलमोक्षदा ॥१७८॥

त्रिरामेशी त्रिरामार्च्या त्रिरामवरदायिनी । त्रिदशाश्रित पादाब्जा त्रिदशालप - चञ्चला ॥१७९॥

त्रिदशा त्रिदशप्रार्थ्या त्रिदशाशुवरप्रदा । त्रिदशैश्वर्य - सम्पन्ना त्रिदशेश्वर - सेविता ॥१८०॥

त्रियामार्च्या त्रियामेशी त्रियामानन्त सिद्धिदा । त्रियामेशाधिक ज्योत्स्ना त्रियामेशाधिकानना ॥१८१॥

त्रियामानाथ वत्सौम्या त्रियामानाथ भूषणा । त्रियामानाथ लावण्या रत्नकोटियुतानना ॥१८२॥

त्रिकालस्था त्रिकालज्ञा त्रिकालज्ञत्वकारिणी । त्रिकालेशी त्रिकालार्च्या त्रिकालज्ञत्व दायिनी ॥१८३॥

तीरभुक्तीरगा तीरसरिता तारवासिनी । तीरभुग्देश - संजाता तीरभुग्देशेसंस्थिता ॥१८४॥

तिग्मा तिग्मांशुसंकाशा तिग्मांशुक्रोड संस्थिता । तिग्मांशुकोटि दीप्ताङ्गी तिग्मांशुकोटि विग्रहा ॥१८५॥

तीक्ष्णा तीक्ष्णतरा तीक्ष्णमहिषासुरमर्दिनी । तीक्ष्णकर्त्री लसत्पाणिस्तीक्ष्णासि वरधारिणी ॥१८६॥

तीव्रा तीव्रगतिस्तीव्रासुर सङ्घविनाशिनी । तीव्राष्टनागाभरणा तीव्रमुण्डविभूषणा ॥१८७॥

तीर्थात्मिका तीर्थमयी तीर्थेशी तीर्थपूजिता । तीर्थराजेश्वरी तीर्थफलदा तीर्थदानदा ॥१८८॥

तुमुली तुमुलप्राज्ञी तुमुलासुरघातिनी । तुमुलक्षतजप्रीता तुमुलांगणनर्तकी ॥१८९॥

तुरगी तुरगारूढा तुरंगपृष्ठगामिनी । तुरङ्गगमनाह्लादा तुरंगवेगगामिनी ॥१९०॥

तुरीया तुलना तुल्या तुल्यवृत्तिस्तु तुल्यकृत् । तुलनेशी तुलाराज्ञी तुलाराज्ञीत्व सूक्ष्मवित् ॥१९१॥

तुम्बिका तुम्बिकापात्रभोजना तुम्बिकार्थिनी । तुलसी तुलसीवर्य्या तुलजा तुलजेश्वरी ॥१९२॥

तुषाग्निव्रतसन्तुष्टा तुषाग्निस्तुषराशिकृत् । तुषारकर - शीतांगी तुषारकरपूर्तिकृत् ॥१९३॥

तुषाराद्रिस्तुषाराद्रिसुता तुहिनदीधितिः । तुहिनाचलकन्या च तुहिनाचलवासिनी ॥१९४॥

तुर्यवर्गेश्वरी तुर्यवर्गदा तुर्य्यवेददा । तुर्यवर्यात्मिका तुर्यतुर्यश्चेरस्वरूपिणी ॥१९५॥

तुष्टिदा तुष्टिकृत्तुष्टिस्तूणीरद्वयपृष्ठधृक् । तुम्बुराज्ञान - सन्तुष्टा तुष्टसंसिद्धिदायिनी ॥१९६॥

तूर्णराज्यप्रदा तूर्णगद्गदा तूर्णपद्यदा । तूर्णपाण्डित्य - सन्दात्री तूर्णपूर्णबलप्रदा ॥१९७॥

तृतीया च तृतीयेशी तृतीयातिथि पूजिता । तृतीया चन्द्रचूडेशी तृतीया - चन्द्रभूषणा ॥१९८॥

तृप्तिस्तृप्तिकरी तृप्ता तृष्णा तृष्णाविवर्द्धिनी । तृष्णापूर्णकरी तृष्णा नाशिनी तृषिता तृषा ॥१९९॥

त्रेतासंसाधिता त्रेता त्रेतायुग - फलप्रदा । त्रैलोक्यपूज्या त्रैलोक्यदात्री त्रैलोक्यसिद्धिदा ॥२००॥

त्रैलोक्येश्वरतादात्री त्रैलोक्य परमेश्वरी । त्रैलोक्य मोहनेशानी त्रैलोक्यराज्य - दायिनी ॥२०१॥
तैत्रिशाखेश्वरी तैत्रिशाखा तैत्रविवेकदा । तोरणान्वित - गेहस्था तोरणासक्त - मानसा ॥२०२॥
तोलकास्वर्ण संदात्री तोलकास्वर्ण - कंकणा । तोमरायुधरूपा च तोमरायुधधारिणी ॥२०३॥
तौर्य्यत्रिकेश्वरी तौर्यत्रिकी तौर्य्यत्रिकोत्सुकी । तन्त्रकृत्तंत्रवत्सूक्ष्मा तन्त्रमन्त्र स्वरूपिणी ॥२०४॥
तन्त्रकृत्तन्त्र सम्पूज्या तन्त्रेशी तन्त्रसम्मता । तन्त्रज्ञा तन्त्रवित्तन्त्र साध्या तन्त्रस्वरूपिणी ॥२०५॥
तन्त्रस्था तन्त्रजा तन्त्री तन्त्रभृत्तंत्रमन्त्रदा । तन्त्राद्या तन्त्रगा तन्त्रा तन्त्रार्च्या तन्त्रसिद्धिदा ॥२०६॥
इति ते कथितं दिव्यं क्रतुकोटिफलप्रदम् । नाम्नां सहस्त्रं तारायास्तकाराद्यं सुगोपितम् ॥२०७॥
दानं यज्ञस्तपस्तीर्थं व्रतं चानशनादिकम् । एकैक नाम सम्पुण्यं सन्ध्यासुगदितं मया ॥२०८॥
गुरौ देवे तथा मन्त्रे यस्य स्यान्निश्चला मतिः । तस्यैव स्तोत्रपाठेऽस्मिन् सम्भवेदधिकारिता ॥२०९॥
महाचीन क्रमाभिन्नषोढान्यस्त कलेवरः । क्रमदीक्षान्वितो मंत्री पठेदेतन्न चान्यथा ॥२१०॥
गंधपुष्पादिभिर्द्रव्यैर्मकारैः पंचभिर्द्विजः । सम्पूज्य तारां विधिवत्पठेदेतदनन्यधीः ॥२११॥
अष्टम्यां च चतुर्दश्यां संक्रान्तौ रविवासरे । शनिभौमदिने रात्रौ ग्रहणे चन्द्रसूर्ययोः ॥२१२॥
तारारात्रौ कालरात्रौ मोहरात्रौ विशेषतः । पठनान्मंत्रसिद्धिः स्यात्सर्वज्ञत्वं प्रजायते ॥२१३॥
श्मशाने प्रान्तरै रम्ये शून्यागारे विशेषतः । देवागारे गिरौ वापि स्तवपारायणं चरेत् ॥२१४॥
ब्रह्महत्या सुरापानं स्तेयं स्त्रीगमनादिकम् । गुरुतल्पे तथा चान्यत्पातकंनश्यति ध्रुवम् ॥२१५॥
लतामध्यगतो मंत्री श्रद्धया चार्चयेद्यदि । आकर्षयेत्तदा रम्भां मेनामपि तथोर्वशीम् ॥२१६॥
संग्रामसमये वीरस्तारा साम्राज्य कीर्त्तनात् । चतुरंगचयं जित्वा सर्वसाम्राज्य भाग्भवेत् ॥२१७॥
निशार्द्धे पूजनान्ते च प्रतिनाम्ना प्रपूजयेत् । एकैकं करवीराद्यै मंदारैर्नील वारिजैः ॥२१८॥
गद्यपद्यमयी वाणी भूभोज्या च प्रवर्तते । पाण्डित्यं सर्वशास्त्रेषु वादी त्रस्यति दर्शनात् ॥२१९॥
वह्नि जायान्तकैरेतैस्ताराद्यैः प्रतिनामभिः । राजन्यं सर्वराजेषु परकाय प्रवेशनम् ॥२२०॥
अन्तर्धानं खेचरत्वं बहुकायप्रकाशनम् । गुटिका पादुका पद्मावती मधुमती तथा ॥२२१॥
रसं रसायनाः सर्वाः सिद्धयः समुपस्थिताः । कर्पूरागरु कस्तूरीचन्दनैः संयुतैर्जलैः ॥२२२॥
मूलसम्पुटिते नैव प्रतिनाम्ना प्रपूजयेत् । यक्षराक्षस गन्धर्व विद्याधर महोरगाः ॥२२३॥
भूतप्रेत पिशाचाद्या डाकिनी शाकिनीगणाः । दुष्टभैरववेतालाः कूष्माण्डाः किन्नरीगणाः ॥२२४॥
भयभीताः पलायन्ते तेजसा साधकस्य च । मंत्रज्ञाने समुत्पन्ने प्रतिनाम्ना विचारयेत् ॥२२५॥
मंत्रसम्पुटिते नैव तस्य शांतिर्भवेद् ध्रुवम् । ललना वशमायान्ति दासतां यान्ति पार्थिवाः ॥२२६॥
अग्नयः शीततां यान्ति जापकस्य च भाषणात् । एकावर्तन मात्रेण राजभीति निवारणम् ॥२२७॥
वेलावर्तन मात्रेण पशुवृद्धिः प्रजायते । दशावृत्त्या धनप्राप्तिर्विंशत्या राज्यमाप्नुयात् ॥२२८॥
शतावृत्त्या गृहे तस्य चंचला निश्चला भवेत् । गङ्गाप्रवाहवद्वाणी प्रलापादपि जायते ॥२२९॥

पुत्र पौत्रान्वितो मंत्री चिरञ्जीवी तु देववत् । शतद्वया वर्त्तनेन देववत्पूज्यते जनैः ॥२३०॥
शतपंचकमावर्त्य स भवेद् भैरवोपमः । सहस्रावर्तने नैव मंत्रस्तस्य स्वसिद्धिदः ॥२३१॥
तस्मिन्प्रवर्त्तते सर्वसिद्धिः सर्वार्थ साधिनी । पादुकाञ्जन वेताल पाताल गमनादिकम् ॥२३२॥
विविधा यक्षिणीसिद्धिर्वाक्सिद्धि स्तस्य जायते । शोषणं सागराणां च धरायां भ्रमणं तथा ॥२३३॥
नवीनसृष्टि निर्माणं सर्वं कर्तुं क्षमो भवेत् । अयुतावर्तने नैव तारां पश्यति चक्षुषा ॥२३४॥
लक्षावर्तन मात्रेण तारापति समो भवेत् । न किञ्चिद् दुर्लभं तस्य जीवन्मुक्तो हि भूतले ॥२३५॥
कल्पान्ते न तु तत्पश्चात्तारा सायुज्यमाप्नुयात् । यद्धि तारा समा विद्या नास्ति तारुण्यरूपिणी ॥२३६॥
न चैतत्सदृशं स्तोत्रं भवेद् ब्रह्माण्ड मण्डले । वक्त्रकोटि सहस्रैस्तु जिह्वाकोटि शतैरपि ॥२३७॥
न शक्यते फलं वक्तुं मया कल्पशतैरपि । चुम्बके निन्दके दुष्टे पिशुने जीवहिंसके ॥२३८॥
सगोप्यं स्तोत्र मे तत्तद्दर्शनेनैव कुत्रचित् । राज्यं देयं धनं देयं शिरो देयमथापिवा ॥२३९॥
न देयं स्तोत्र वर्य्यं तु मन्त्रादपि महोद्यतम् । अनुलोम विलोमाभ्यां मूल सम्पुटितं त्विदम् ॥२४०॥
लिखित्वा भूर्जपत्रादौ गंधाष्टक पुरस्सरैः । धारयेद्दक्षिणे बाहौ कण्ठे वामभुजे तथा ॥२४१॥
तस्य सर्वार्थसिद्धिः स्याद्वह्निना नैव दह्यते । तद्गात्रं शस्त्र सघैश्च भिद्यते न कदाचन ॥२४२॥
स भूमि वलये पुत्र विचरेद्भैरवोपमः । वन्ध्यापि लभते पुत्रं निर्द्धनो धनमाप्नुयात् ॥२४३॥
निर्विघ्नो लभते विद्यां तर्कव्याकरणादिकाम् ॥२४४॥
इति निगदितमस्यास्तादि नाम्नां सहस्त्रं वरदमनु निधानं दिव्यसाम्राज्य संज्ञम् ।
विधिहरि गिरिशादौ शक्तिदानैकदक्षं समविधि पठनीयं कालितारा समज्ञैः ॥२४५॥

॥ इति श्रीब्रह्मयामले तारायास्तकारादि सहस्रनाम स्तोत्रं सम्पूर्णम् ॥

॥ नील सरस्वती ॥

नीलसरस्वती की उपासना बौद्धों में अधिक प्रचलित हैं। यह वांम मार्ग प्रधान हैं। पंच तत्वों से पूजन करते हैं। नीलयान एवं वज्रयान इत्यादि संप्रदाय भेद भी हैं। इस विद्या की उपासना से शास्त्रीय ज्ञान कर्मठता तथा वाक्सिद्धि प्राप्त होती हैं। मंत्रकोष में कहा हैं **कुल्लुका नाम देवी सा महानील सरस्वती।**

त्र्यक्षर मंत्रः- (१) ह्रीं त्रीं हूं।(२) ह्रीं स्त्रीं हूं। (नील तंत्र एवं तारा नित्यार्चने)

लंबोदरीं महादेवीं व्याघ्रचर्म - नितम्बिनीं, पीनोन्नत - पयोधरां रक्तवर्तुल लोचनाम् ।
श्वेतास्थि पट्टिका युक्तां कपालपञ्च - शोभितां ललाटे रक्तनागेन कृतकर्णावतंसिनीम् ॥
चतुर्भुजां रक्तमांस मुण्डमण्डित मण्डिनीं, जटा - जूटाक्ष - सूत्रेण शोभितां तीक्ष्ण धारया ।
खड्गेन दक्षिणस्योर्ध्वे शोभिनीं भीमनादिनीं, तदधस्ताद् वीजवृन्त कर्तृकालंकृतां पराम् ॥
वामोर्ध्वे रक्तनालेषद् विकाशित मनोहरम्। दधतीं नीलपद्मं च तदधस्तात् कपालकम् ॥

(अन्यच्च तंत्रदीपिनी ग्रंथे)

नीलवर्णां त्रिनयनां शवासन समायुताम् । बिभ्रतीं विविधां भूषां मौलावक्षोभ्य भूषिताम् ॥

चतुरक्षर मंत्रः- ॐ ह्रीं स्त्रीं हूं।

पंचाक्षर मंत्रः- ॐ ह्रीं स्त्रीं हूं फट्।

सप्ताक्षर मंत्रः- ॐ ह्रीं स्त्रीं हूं फट् स्वाहा।

अष्टाक्षर मंत्रः- (१) ॐ ह्रीं हूं स्त्रीं हूं फट् स्वाहा। (२) ऐं ह्रीं ॐ ऐं ह्रीं फट् स्वाहा। नीलतंत्र के अनुसार प्रारंभ के **५ बीजाक्षरों से पंचन्यास** एवं **फट् स्वाहा** से **अस्त्रन्यास** करें। **नीलतंत्रे**

चतुर्दशाक्षर मंत्र :- (१) ॐ श्रीं ह्रीं ह्सौः हूं फट् नीलसरस्वत्यै स्वाहा। (ताराभक्ति सुधार्णवे)। (२) मंत्रमहोदधि में पांचवे बीज हेतु मंत्रोद्धार में कूर्च **(हूं)** नहीं हैं **''वर्मास्त्रं''** लिखा हैं अतः **''हुं फट्''** हैं। **ॐ श्रीं ह्रीं ह्सौः हुं फट् नीलसरस्वत्यै स्वाहा।** प्रथम मंत्र का ध्यान इस प्रकार हैं।

(१) खड्गं त्रिशूलं करपल्लवैः स्वैर्घण्टाधृतं छिन्नशिरो दधाना ।
पशुं पदाधः परिमर्दयन्ती तनोतु भव्यानि सरस्वती नः ॥

दोनों मंत्रों के विनियोगादि इस प्रकार हैं।

विनियोगः- **अस्य श्रीनीलसरस्वती मंत्रस्य ब्रह्मार्त्रऋषिः, गायत्रीश्छंदः, नीलसरस्वती देवता, ममाभीष्टसिद्ध्यर्थे जपे विनियोगः।**

ऋष्यादिन्यासः- **ॐ ब्रह्मऋषये नमः शिरसि। गायत्री छंद से नमः मुखे। नीलसरस्वती देवतायै नमः हृदि। विनियोगाय नमः सर्वाङ्गे।**

षडङ्गन्यासः- **ॐ श्रीं हृदयाय नमः। ह्रीं शिरसे स्वाहा। ह्सौः शिखायै वषट्। हुं फट् कवचाय हुं। नीलसरस्वत्यै नेत्रत्रयाय वौषट्। स्वाहा अस्त्राय फट्।** इसी तरह से करन्यास करे।

(२) घण्टां शिरः शूलमसिं कराग्रैः संबिभ्रतीं चन्द्रकला वतंसाम् ।
प्रमथ्नतीं पादतले पशं तां भजे मुदा नीलसरस्वतीं ताम् ॥

इस मंत्र का पूजा प्रयोग पूर्ववत् प्रयोगों की तरह हैं।

॥ विद्याराज्ञी प्रयोगः॥

यह विद्याराज्ञी प्रयोग इन्द्रादि देवताओं को दुर्लभ हैं। यह महाविद्या सेवित होने से भोग एवं मोक्ष को देने वाली हैं। इस महाविद्या के दो प्रयोग मंत्र दिये जा रहे हैं। विस्तृत पूजाक्रम दूसरे मंत्र के साथ दिया गया हैं। दोनों मंत्र ३२ अक्षरात्मक हैं।

१. ऐं ह्रीं श्रीं क्लीं सौः क्लीं ह्रीं ऐं ब्लूं स्त्रीं नीलतारे सरस्वति द्रां द्रीं क्लीं ब्लूं सः ऐं क्लीं ब्लूं स्त्रीं सः सौः ह्रीं स्वाहा।

मंत्रकोष में ऋष्यादि पूर्ववत् कहने से **ऋषि ब्रह्मा तथा गायत्री छन्दः** है जबकि दूसरा मंत्र समान हैं उसके भी ऋषि ब्रह्मा परन्तु छंद अनुष्टुप् उल्लेखित हैं।

नौकारूढां त्रिनेत्रामहि लसिततनु संविदानन्दरूपां,
हस्तैः स्वीयै कपालं त्रिशिख, क्रकचके कर्तृकां सन्दधाना ।
अट्टाट्टहास्य युक्ता मनवरत लसन्मुण्डमालाभि रम्याम्,
चीरोदञ्चित्, कटीर स्थल ललित लसत् किङ्किणीं भासमानाम् ॥

चार लाख जप कर मधुत्रय से युक्त किंशुकपुष्पों से दशांश होम करे। कामनानुसार सात्विक, राजस, तामस ध्यान दिये जा रहे है।

चतुर्वक्त्रमष्टभुजां मुक्ताभरण भूषितां, श्वेताम्बरामक्ष मुद्रां शक्तिं पाशं कमण्डलुम् ।
पंकजं पुष्पमालां च वराभीती भुजेषु च, शब्दाम्भोनिधिमध्यस्थां हंसयाने विचिन्तयेत् ।१ ॥
रक्ताम्बरां हेमरत्न नानालङ्कार भूषितां, रत्नदीपे महानीलां परिवारैः समावृताम् ।
रत्नसिंहासनारूढां वराभीत्यक्षमालिकां, दधतीं रत्नचषकं स्थितिरूपे विचिन्तयेत् ॥२ ॥
रक्ताम्भोनिधिमध्ये तु नौकारूढां विचिन्तयेत्, नववक्त्रां भालनेत्रां कृष्णाम्बर भयानकाम् ।
वराभये च दधतीं परशुं दर्विकां तथा, संहारास्त्रं वामहस्ते दक्षे पाशुपतं तथा ॥
त्रिशीर्षं वामहस्तेन त्रिशूलं खड्ग कर्तृके, पद्मं पाशं हलं शक्तिं त्रिमूर्तिं डिण्डिमं तथा ।
खट्वाङ्गं मुशलं दोर्भिः शत्रुभक्षण मानसां, भक्तानां वरदात्रीं च रक्षयन्तीं च साधकम् ॥३ ॥

२. ऐं ह्रीं श्रीं क्लीं सौं क्लीं ह्रीं ऐं ब्लूं स्त्रीं नीलतारे सरस्वति द्रां द्रीं क्लीं ब्लूं सः ऐं ह्रीं श्रीं क्लीं सौः सौः ह्रीं स्वाहा।

विनियोगः- अस्य श्रीमहाविद्या मंत्रस्य ब्रह्माः ऋषिः, अनुष्टुप् छन्दः, सरस्वती देवता, ममाभीष्ट सिद्धयर्थे जपे विनियोगः।

ऋष्यादि न्यासः- ॐ ब्रह्मऋषये नमः शिरसि। अनुष्टुप् छन्दसे नमः मुखे। सरस्वती देवतायै नमः हृदि। विनियोगाय नमः सर्वाङ्गे।

षडङ्गन्यासः- ऐं ह्रीं श्रीं क्लीं सौं हृदयाय नमः। क्लीं ह्रीं ए ब्लूं स्त्रीं शिरसे स्वाहा। नीलतारे सरस्वति शिखायै वषट्। द्रां द्रीं क्लीं ब्लूं सः कवचाय हुं। ऐं ह्रीं श्रीं क्लीं सौः नेत्रत्रयाय वौषट्। सौः ह्रीं स्वाहा अस्त्राय फट्। इसी तरह कराङ्गन्यास करे।

॥ ध्यान ॥

शवासनां सर्पविभूषणाढ्यां कर्त्री कपालं चषकं त्रिशूलम् ।
करैदधानां नरमुण्डमालां त्र्यक्षां भजे नीलसरस्वतीं ताम् ॥

उक्त सरस्वती महाविद्या मंत्र का चार लाख जप करे पश्चात् मधुमिश्रित पलाश पुष्पों का श्रद्धा पूर्वक दशांश होम करे।

॥ यंत्रावरणपूजन प्रयोगः ॥

सर्वप्रथम त्रिकोण फिर षट्कोण उसके बाद अष्टदल फिर षोडशदल तदनन्तर बत्तीसदल फिर चौंसठदल वाला कमल बनाये उनके बाहर तीन रेखाओं वाला भूपुर बनाये। पूर्व में कही गई विधि के अनुसार भूतशुद्धि षोढान्यास दिग्बन्धन कर अर्घ्यस्थापन कर पात्रा सादन करे। सरस्वती यंत्रार्चन में वर्णित मेघादि नवपीठ शक्तियों का पूजन करें। देवी का षोडशोपचार पूजन कर योनिमुद्रा दिखायें। पुष्पांजलि लेकर आवरण पूजा की आज्ञा मांगे।

॥ विद्याराज्ञी यन्त्रम् ॥

ॐ संविन्मये परे देवि परामृत रसप्रिये । अनुज्ञां देहि मे मातः परिवारार्चनाय मे ॥

प्रथमावरणम् :- (भूपुरे) प्रथमरेखायां पूर्वादिक्रमेण सभी विद्याओं का चतुर्थी से आवाहन करे तथा प्रथमा से स्थापन कर **पादुकां पूजयामि तर्पयामि** कह कर गंध पुष्पाक्षत छोड़कर तर्पण करे। **ॐ अणिमायै नमः। अणिमा श्री पादुकां पूजयामि तर्पयामि।** इति सर्वत्र॥

ॐ लघिमायै नमः। ॐ महिमायै नमः। ॐ ईशित्यै नमः। ॐ वशितायै नमः। ॐ कामपूरण्यै नमः। ॐ गरिमायै नमः। ॐ प्राप्त्यै नमः। ततो भूपूरे द्वितीयरेखायाम्:- **ॐ असितांग भैरवाय नमः। ॐ रुरुभैरवाय नमः। ॐ चण्डभैरवाय नमः। ॐ क्रोध भैरवाय नमः। ॐ उन्मत्त भैरवाय नमः। ॐ कपाली भैरवाय नमः। ॐ भीषण भैरवाय नमः। ॐ संहारभैरवाय नमः।** ततो भूपूरे तृतीयरेखायाम्- **ॐ ब्राह्मयै नमः। ॐ माहेश्वर्यै नमः। ॐ कौमार्यै नमः। ॐ वैष्णव्यै नमः। ॐ वाराह्यै नमः। ॐ इन्द्राण्यै नमः। ॐ चामुण्डायै नमः। ॐ महालक्ष्म्यै नमः।** पश्चात् पुष्पांजलि लेकर मूलमंत्र का उच्चारण प्रार्थना करे।

अभीष्ट सिद्धिं मे देहि शरणागत वत्सले। भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥

योनि मुद्रा दिखावें। **पूजितास्तर्पिताः सन्तु** कह कर अर्घपात्र से जल छोड़े। ऐसा प्रत्येक आवरण पूजा बाद करे।

द्वितीयावरणम् – (चतुः षष्टिदले) पूर्वादि क्रमेणः– **ॐ कुलेश्यै नमः। ॐ कुलनन्दायै नमः। ॐ वागीश्वर्यै नमः। ॐ भैरव्यै नमः। ॐ उमायै नमः। ॐ श्रियै नमः। ॐ शान्तायै नमः। ॐ चण्डायै नमः। ॐ धूम्रायै नमः। ॐ काल्यै नमः। ॐ करालिन्यै नमः। ॐ महालक्ष्म्यै नमः। ॐ कङ्काल्यै नमः। ॐ रुद्रकाल्यै नमः। ॐ सरस्वत्यै नमः। ॐ वाग्वादिन्यै नमः। ॐ नकुल्यै नमः। ॐ भद्रकाल्यै नमः। ॐ शशिप्रभायै नमः। ॐ प्रत्यङ्गिरायै नमः। ॐ सिद्धलक्ष्म्यै नमः। ॐ अमृतेश्यै नमः। ॐ चण्डिकायै नमः। ॐ खेचर्यै नमः। ॐ भूचर्यै नमः। ॐ सिद्धायै नमः। ॐ कामाख्यै नमः। ॐ हिंगुलायै नमः। ॐ बलायै नमः। ॐ जयायै नमः। ॐ विजयायै नमः। ॐ अजितायै नमः। ॐ नित्यायै नमः। ॐ अपराजितायै नम :। ॐ विलासिन्यै नमः। ॐ घोरायै नमः। ॐ चित्रायै नमः। ॐ मुग्धायै नमः। ॐ धनेश्वर्यै नमः। ॐ सोमश्वर्यै नमः। ॐ महाचण्डायै नमः। ॐ विद्यायै नमः। ॐ हंस्यै नमः। ॐ विनायकायै नमः। ॐ वेदगर्भायै नमः। ॐ भोमायै नमः। ॐ उग्रायै नमः। ॐ वैद्यायै नमः। ॐ सद्गत्यै नमः। ॐ उग्रश्वर्यै नमः। ॐ चन्द्रगर्भायै नमः। ॐ ज्योत्स्नायै नमः। ॐ सत्यायै नमः। ॐ यशोवत्यै नमः। ॐ कुलिकायै नमः। ॐ कामिन्यै नमः। ॐ काभ्यायै नमः। ॐ ज्ञानवत्यै नमः। ॐ डाकिन्यै नमः। ॐ राकिन्यै नमः। ॐ लाकिन्यै नमः। ॐ काकिन्यै नमः। ॐ शाकिन्यै नमः। ॐ हाकिन्यै नमः।**

पूजा कर खेचरीमुद्रा प्रदर्शित पुष्पांजलि देवे। **खेचरीमुद्रा**–बांये हाथ को दायें हाथ में, दाँएं हाथ को बाएं हाथ में बाहुओं को उलट कर उसीक्रम से कनिष्ठा तथा अनामिका उसक्रम से युक्त करके सबसे ऊपर दोनों तर्जनियों से दोनों मध्यमाओं को समाक्रान्त करके दोनों अँगूठों को सीधा कर देवे।

तृतीयावरणम् – (द्वात्रिंशद्दले) **ॐ कiरातायै नमः। ॐ योगिन्यै नमः। ॐ वीरायै नमः। ॐ वेतालायै नमः। ॐ यक्षिण्यै नमः। ॐ हरायै नमः। ॐ उध्वकेश्यै नमः। ॐ मातंग्यै नमः। ॐ मोहिन्यै नमः। ॐ वंशवर्द्धिन्यै नमः। ॐ मालिन्यै नमः। ॐ ललितायै नमः। ॐ दूत्यै नमः। ॐ मनोजयायै नमः। ॐ पद्मिन्यै नमः। ॐ धरायै नमः। ॐ बर्वर्यै नमः। ॐ छत्रहस्तायै नमः। ॐ रक्तनेत्राय्रै नमः। ॐ विचार्चिकायै नमः। ॐ मातृकायै नमः। ॐ दूरदर्श्यैनमः। ॐ क्षेत्रेश्यै नमः। ॐ रङ्गिन्यै नमः। ॐ नटयै नमः। ॐ शान्त्यै नमः। ॐ दीप्तायै नमः। ॐ वज्रहस्तायै नमः। ॐ धूम्रायै नमः। ॐ श्वेतायै नमः। ॐ सुमङ्गलायै नमः। ॐ सर्वेश्वर्यै नमः।** पूजन कर बीजमुद्रा दिखावें।

चतुर्थावरणम् – (षोडशदले)- **ॐ मुग्धायै नमः। ॐ श्रियै नमः। ॐ कुरुकुल्लायै नमः। ॐ त्रिपुरायै नमः। ॐ तोतलायै नमः। ॐ क्रियायै नमः। ॐ रत्यै नमः। ॐ प्रीत्यै नमः। ॐ बालायै नमः। ॐ सुमुख्यै नमः। ॐ श्यामलाविलायै नमः। ॐ पिशाच्यै नमः। ॐ विदार्यै नमः। ॐ शीतलायै नमः। ॐ वज्रयोगिन्यै नमः। ॐ सर्वेश्वर्यै नमः।** पूजन कर अंकुश व सृष्टिमुद्रा दिखावें।

पंचमावरणम्- अष्टदल में अष्ट सरस्वतियों का पूजन करे। **ॐ नमः पद्मासने शब्दरूपे ऐं ह्रीं क्लीं वद वद वाग्वादिनी स्वाहा। क्लीं वद वद चित्रेश्वरी ऐं स्वाहा। ऐं कुलिजे ऐं सरस्वति स्वाहा। ऐं ह्रीं श्रीं वद वद कीर्तीश्वरी स्वाहा। ऐं ह्रीं अन्तरिक्ष सरस्वति स्वाहा। ह्स्फ्रं ह्स्त्रौं ह्स्फ्रौं ऐं ह्रीं श्रीं द्रां द्रीं क्लीं ब्लूं सः घ्रीं घटसरस्वति घटे वद वद तर तर रुद्राज्ञया ममाभिलाषं कुरु कुरु स्वाहा।** नील सरस्वती – **ब्लूं वें वद वद त्रीं हुं फट्। ऐं हैं ह्रीं किणि किणि विच्चे।** अष्ट सरस्वतियों पूजन कर क्षोभमुद्रा दिखावें। पुष्पांजलि देवे।

क्षोभमुद्रा– कनिष्ठा और अंगुष्ठ से रोकी गयी मध्यमा पर मध्यमा को करके दोनों तर्जनियों को सीधी करके मध्यमा

के ऊपर दोनों अनामिकाओं को रखें।

विद्राविणी मुद्रा- क्षोभमुद्रा की मध्यमा अंगुलियां जब सीधी होती है तब वह विद्राविणी मुद्रा बन जाती हैं। इसे द्राविणी मुद्रा भी कहते हैं।

बीज मुद्रा- हाथों को उलटकर आपस में जुड़े हुये अर्द्धचन्द्र की आकृति के समान दोनों तर्जनी और अंगूठों को एक साथ करे। नीचे कनिष्ठा से लगी दोनों मध्यमा अंगुलियों को विनियोजित करे। उसी प्रकार सबसे नीचे अनामिकाओं को टेढी करके मुद्रा बनावें।

अंकुश मुद्राः- दोनों मध्यमाओं को सीधा रखते हुये दोनों तर्जनियों को मध्यपोर के पास परस्पर बांधे। अब तर्जनियों को थोड़ा झुकाकर एक दूसरे को खींचे।

षष्ठमावरणम्ः- (षट्कोणे) केसरेषु च- **ॐ डाकिन्यै नमः** अग्निकोणे। **ॐ राकिन्यै नमः** ईशान कोणे। **ॐ लाकिन्यै नमः** नैऋत्य कोणे। **ॐ काकिन्यै नमः** वायवे। **ॐ शाकिन्यै नमः** मध्ये। **ॐ हाकिन्यै नमः** दिक्षु। पुष्पांजलि देकर द्राविणी मुद्रा दिखावे।

सप्तमावरणम् - (त्रिकोणे) **ह्रीं परायै नमः। ऐं क्लीं सौः बालायै नमः। ह्सैं ह्क्लीं ह्सौः भैरव्यै नमः।** पुष्पांजलि देवे- **अभीष्टसिद्धिं मे देहि शरणागत वत्सले। भक्त्या समर्पये तुभ्यं सप्तमावरणार्चनम्॥**

अर्घपात्र से जल छोड़कर कहे **पूजिता स्तर्पिताः सन्तु**। आकर्षिणी मुद्रा दिखावे।

आकर्षण मुद्रा- अंकुशाकाररूप मध्यमा और तर्जनी अंगुलियों के साथ कनिष्ठा और अनामिका अंगुलिया समान रहे।

प्रतिदिन चौराहे पर गणेश, क्षेत्रपाल, योगिनी, भैरवी एवं तारा देवी को बलिप्रदान करे। मांस व उड़द से बनी हुई वस्तु, शाक, घी, खीर, मालपुआ आदि बलिद्रव्यों से बलि प्रदान करे।

॥ काम्य प्रयोग ॥

ह्रीं श्रीं मूलं, श्री यंत्र स्थित सर्वेभ्यो, देवेभ्यो पूजिताः तर्पिताः सन्तु । जल छोड़े फिर सब देवताओं को भगवती को, धूप, दीप, नैवेद्य आदि अर्पण करें।

अगर, गंधार्चन, तर्पण यंत्र के सामने दूसरे पात्र में किया हो तो ठीक श्री यंत्र पर अर्चन किया होतो निर्माल्य उतार कर शुद्ध जल से धोकर पुनः गंधाक्षत कर धूप दीप नैवेद्यादि अर्पण करें। नीराजन करें।

यंत्र पूजा के अंतर्गत पंचसिंहासन देवताओं तथा पंचपंचिका विद्याओं का भी पूजन करना चाहियें। भगवती की नित्याओं का पूजन उनके नाम मंत्रों से अथवा मूल मंत्र जो नित्याओं के पूर्व में बताये गयें है उनके अनुसार पूजन करें।

पूजा अनन्तर पात्रासादन कर तर्पणादि कर सुधा ग्रहण कर चक्रार्चन करें। शक्ति पूजा कर चक्रार्चन कर मंत्र जप करें।

पात्रासादन प्रयोग तथा सुधाग्रहण पात्र वंदना विधि अलग प्रकरण में दिये गयें है। मंत्र का पुरश्चरण कर दशांश होम कर तर्पण, मार्जन, कुमारी पूजन करें।

॥ पञ्च आम्नाय देवता ॥

पंच आम्नाय देवताओं के स्मरण से **मूल मंत्र विद्या** सभी दिशाओं में तथा सर्वकार्यों में गति देकर साधक की उन्नति करती है तथा साधक सभी तरह से सुरक्षित रहता है। एक तरह से इष्ट देवता के उक्त आम्नाय का निष्किलन हो जाता है।

पञ्चवक्त्रैः शिवप्रोक्ताः पंच चाम्नाय देवताः। पंचसिंहासन प्रोढाः सर्वकाम फलप्रदा ॥

(१) पूर्वाम्नाय विद्या-(उन्मनी) मंत्र- **ह्स्रौं स्ह्रीं श्रीं कल ह्रीं।**

विनियोगः- **ॐ अस्य मंत्रस्य. दक्षिणामूर्ति ऋषिः, पङ्क्तिश्छंदः, श्री उन्मनी देवता, ह्स्रीं बीजं, कलह्रीं शक्तिः, स्ह्रीं कलीकं, श्रीविद्याङ्गत्वेन विनियोगः।**

षडङ्गन्यास- **ह्स्रीं, कलह्रीं, स्ह्रीं, ह्स्रीं, कलह्रीं, स्ह्रीं** से हृदयादि न्यास करें। **संपत्प्रदा भैरवी** का ध्यान करें।

(२) दक्षिणाम्नायविद्या (भोगिनी) मंत्र - **ऐं क्लिन्ने क्लीं मदद्रवे कुले ह्सौः।**

विनियोग- **अस्य मंत्रस्य दक्षिणामूर्ति ऋषिः, पंक्तिश्छंदः, भोगिनी देवता, ऐं बीजं, स्त्रं शक्तिः, क्लीं कीलकं श्री विद्याङ्गत्वेन विनियोगः।**

षडङ्गन्यास- मंत्र के एक एक पद से न्यास करें। तथा **अघोर भैरवी** का ध्यान करें।

(३) पश्चिमाम्नाय विद्या (कुब्जिका) मंत्र - **ऐं ह्रीं श्रीं हसखफ्रें हसौः, ॐ नमो भगवति हसखफ्रें कुब्जिका, ह्स्त्रां ह्स्त्रूं अघोरे घोरे अघोरमुखि, छ्रां छ्रीं किणिकिणि विच्चे, ह्सौः हसखफ्रें, श्री ह्रीं ऐं।**

विनियोग- **अस्य मंत्रस्य रुद्र ऋषिः, गायत्री छंदः कुब्जिका देवता, हसौः बीजं, हसखफ्रें शक्तिः, हसूं कीलकंकं श्री विद्याङ्गत्वेन विनियोगः। ध्यान षट्कूटा भैरवी का करे।**

षडङ्गन्यास - मंत्र मे दिखाये गये पद भेदों से न्यास करे।

(४) उत्तराम्नाय विद्या (कालिका) मंत्र -**खफ्रें महाचण्डयोगेश्वरि।**

विनियोग- **अस्य मंत्रस्य भैरव ऋषिः, उष्णिक् छंदः, श्री कालिका देवता, खफ्रें बीजं, ईश्वरि शक्तिः महाचण्डयोग कीलकं श्री विद्याङ्गत्वेन विनियोगः।**

षडङ्गन्यास- **खफ्रां, खफ्रीं, खफ्रूं, खफ्रें, खफ्रौं, खफ्रः क्रमात्।** ध्यान **भुवनेश्वरी भैरवी** का करे।

(५) उर्ध्वाम्नाय विद्या-(पराप्रसाद मंत्र) मंत्र - **ह्सौः स्हौः।**

विनियोग- **अस्य मंत्रस्य परशंभुऋषिः, गायत्री छंदः अर्धनारीश्वर देवता, ह्सां स्हीं बीजं श्री विद्याङ्गत्वेन विनियोगः।**

षडङ्गन्यास - **ह्सां, ह्सीं, ह्सूं, ह्सैं, ह्सौं ह्सः इति क्रमात् ॥**

॥ अथ षट्दर्शन प्रयोगः॥

मंत्र महोदधि में **पंच पञ्चिका** पूजन पश्चात् तथा **"श्रीविद्यार्णव तंत्र"** के **"अष्टम श्वास"** में श्रीविद्या पूजनान्तर्गत षटदर्शन पूजन प्रयोग देकर इस विद्या को **"सर्वदेव देवीमयी"** प्रतिपादित किया है।

(१) ब्रह्मदर्शन (पूर्वायतनमयी ब्रह्मगायत्री)

मंत्रो यथा- **ॐ भूर्भुवः स्वः स्वर्महर्जनः तपः सत्यं तत्सवितु र्वरेण्यम् भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् परो रजसे सावदोम्॥ ॐ ब्राह्मदर्शन श्री पादुका पूजयामि नमः।**

(२) वैष्णव दर्शन (दक्षिणा यतन विद्या)

मंत्रो यथा- **ॐ नमो नारायणाय।**

विनियोग- **अस्य मंत्रस्य साध्यनारायण ऋषिः गायत्रीच्छंदः श्रीमहाविष्णु दैवता, ॐ बीजं, नम शक्तिः नारायणेति कीलकं, श्रीविद्याङ्गत्वेन विनियोगः।**

षडङ्गन्यास- **ॐ क्रुद्धोल्काय नमः, ॐ महोल्काय नमः, ॐ वीरोल्काय नमः, ॐ द्युल्काय नमः, ॐ चण्डोल्काय नमः, ॐ ॐ सहस्त्रोल्काय नमः,** से क्रमशः षडङ्गन्यास करें।

॥ध्यानम्॥

उद्यत्कोटि- दिवाकराभमनिशं शङ्खं गदां पंकजम्, चक्रं विभ्रतमिन्दिरा वसुमती संशोभि पार्श्वद्वयम् । कोटीराङ्गद हारकुण्डलधरं पीताम्बरं कौस्तुभोद्दीप्तम्, विश्वधरं स्व- वक्षसि लसच्छ्रीवत्स चिह्नं भजे ॥

ॐ वैष्णव दर्शन श्री पादुकां पूजयामि नमः ॥

(३) सौरदर्शन (पश्चिमायतन विद्या)

मंत्रो यथा– ॐ घृणिः सूर्य आदित्योम् ॥

विनियोग:– अस्य मंत्रस्य देवभाग ऋषिः, गायत्रीच्छंदः श्री आदित्यो देवता, ॐ बीजं, आदित्य शक्तिः घृणिकीलकं, श्री विद्याङ्गत्वेन विनियोगः।

षडङ्गन्यास– ॐ सत्यतेजो ज्वाला मालिने हुं फट् स्वाहा। ॐ ब्रह्मतेजोज्वालामालिने हुं फट् स्वाहा। ॐ विष्णुतेजो ज्वाला मालिने हुं फट् स्वाहा। ॐ रुद्रतेजो ज्वाला मालिने हुं फट् स्वाहा। ॐ अग्नितेजो ज्वाला मालिने हुं फट् स्वाहा। ॐ सर्वतेजो ज्वाला मालिने हुं फट् स्वाहा। इत्यादि से हृदयादि न्यास करे।

रक्ताब्ज युग्माभयदान हस्तं केयूरहाराङ्गद कुण्डलाढ्यम्।
माणिक्यमौलिं दिनानाथमीडे बन्धूककांतिं विलसत् त्रिनेत्रम् ॥

ॐ श्री सौरदर्शन श्री पादुकां पूजयामि नमः ॥

(४) बौद्धदर्शन (उत्तरायतन विद्या)

मंत्रो यथा– ॐ ह्रीं तारय तारय स्वाहा।

विनियोग: – ॐ अस्य श्री बौद्ध मंत्रस्य बुद्ध ऋषिः, त्रिष्टुप्छंदः, श्री बौद्धो देवता, ॐ बीजं, स्वाहा शक्तिः, ह्रीं कीलकं श्री विद्याङ्गत्वेन विनियोगः।

षडङ्गन्यास– ॐ, ह्रीं, तारय, तारय, स्वाहा से क्रमशः हृदयादि, नेत्र न्यास कर मूल मंत्र से अस्त्र न्यास करें।

पुरा पुराणानसुरान् विजेतुं संभावयन् पीठरचिह्नवेषम्।
चकार यः शास्त्रममोघकल्पं तं मूलभूतं प्रणमामि बुद्धम् ॥

ॐ श्री बौद्ध दर्शन श्री पादुकां पूजयामि नमः।

(५) शैव दर्शन (उर्ध्वायतन विद्या)

मंत्रो यथा– ॐ नमः शिवाय।

विनियोग: – ॐ अस्य श्री शिव मंत्रस्य वामदेव ऋषिः, पंक्तिश्छन्दः, परमशिवो देवता, ॐ बीजं, नमः शक्तिः शिवाय कीलकं श्री विद्याङ्गत्वेन विनियोगः।

षडङ्गन्यास– ॐ सर्वज्ञाय नमः। ॐ नित्यतृप्ताय नमः। ॐ अनादि बोधाय नमः। ॐ स्वतंत्राय नमः। ॐ नित्यमलुप्त शक्तये नमः। ॐ नित्यमनन्त शक्तये नमः। से हृदयादि न्यास करें।

नमोस्तु स्थाणुभूताय ज्योतिर्लिङ्गामृतात्मने । चतुर्मूर्ति - वपुष्काय भासिताङ्गाय शंभवे।

ॐ शैव दर्शन श्री पादुकां पूजयामि नमः।

(६) शाक्त दर्शन (सर्वोर्ध्वायतन विद्या)

मंत्रो यथा– श्री विद्या कहीं कहीं भुवनेश्वरी विद्या कहा है। तद् मंत्र के न्यास ध्यान करें। ॐ श्री शाक्त दर्शन श्री पादुकां पूजयामि नमः।

॥ मंत्रस्य जाग्रत, स्वप्न, सुषुप्त्यादि अवस्था भेदः॥

त्रिपुर सुन्दरी के मंत्रों के पहले **ह्रीं श्रीं, ॐ, क्लीं, ऐं, ह्रीं, श्रीं, ॐ ह्रीं श्रीं** इत्यादि लगाने से मंत्र की अलग-अलग अवस्थायें होती है अतः मंत्र सिद्धि के लियें उन उन मंत्रो का जप करना चाहिए।

१. जाग्रत रूपा - पंचदशाक्षर मंत्र के पहले "**ह्रीं**" लगावें। यथा- **जाग्रतरूपा मायादिः पंचदश्युदितात्र तु।**

२. बोध रूपा - पंचदशाक्षर मंत्र के पहले "**श्रीं**" लगावें। यथा - **श्री बीज योगेन बोधन्यावृत्तिरूपका।**

अन्यत्र भेद से **ॐ, ह्रीं, क्लीं, श्रीं, ऐं** के योग से त्रिकूट मंत्र चतुष्कूट हो जायेगें। वैष्णवी मंत्र सप्तकूट एवं शिवपूजिता मंत्र पंचकूट हो जायेगें।

३. स्वप्नरूपा - मंत्र के पहले "**ह्रीं श्रीं**" अभिलाषा पूरक मंत्र होता है एवं "**श्रीं ह्रीं**" चिन्तामणि मंत्र होता है। इस तरह त्रिकूट मंत्र, पंचकूट हो जाते है। विष्णुमंत्र आठकूट एवं शिवपूजिता मंत्र छः कूट का बन जाता है।

४. सुषुप्ति रूपा - **तारमायादिः स्यात् सा सुषुप्तिरूपिणी।** मंत्र के पूर्व "**ॐ ह्रीं श्रीं**" का योजन करने से त्रिकूट मंत्र षट्कूट हो जाते है। विष्णु मंत्र नवकूट तथा शिव मंत्र सप्तकूट मंत्र होगा। फल- **सुषुप्तिरूपा जायन्ते सुषुप्तिः शिवरूपिणी।**

५. सुषुप्ति कलाभेद - "**ॐ ह्रीं श्रीं, ह्रीं ॐ श्रीं, ॐ श्रीं ह्रीं, श्रीं ॐ ह्रीं**" इन चार प्रकार से योजन करने पर सुषुप्ति के चार भेद हो जाते है। यथा - **मरणं विस्मृतिर्मूर्च्छा निद्रा च तमसावृता।** १२ विद्याओं को इस तरह पुटित करने पर १४४ मंत्र बन जाते है।

६. तुरीयारूपा - विद्यार्णव तंत्र में लिखा है कि - "**श्री महोषोडशार्णा तु तुरीया संप्रकीर्तिता**"। अर्थात् "महाषोडशी मंत्र" तुरीयरूपा है।

७. तुर्यातीता - पराषोडशी मंत्र तुर्यातीत मंत्र है।

८. बीज योजन फलम्- ॐ, ह्रीं, श्रीं, क्लीं, ऐं को मंत्र के आदि में लगाने से अलग-अलग फल प्राप्त होता है।

वैराग्यरूपा तारादिः षोडशी प्रकीर्तिता। मायादिः षोडशार्णा तु मुमुक्षुत्व स्वरूपिणी ॥
कामादिः षोडशार्णा स्यात् सा समाधिरूपिणी। रमादिः षोडशी चित्तवैमल्यस्य रूपिणी ॥
सदसद्वस्तुनिर्धारस्वरूपा वाग्भवादिका। पंचधा षोडशार्णा तु दुर्लभा भुवन त्रये ॥

॥ होम द्रव्याणि ॥

मल्लिकामालतीपुष्पै होंमाद्वागीशतामियात्। करवीरर्जपापुष्पै होंमान्मोहयते जगत् ॥१॥
चन्द्र (कर्पूर) कुंकुम कस्तूरी होमात् कामाधिको भवेत्। चंपकै पाटलैर्विश्वं वशमानयतेऽचिरात् ॥२॥
लाजाहोमे राज्यदायी मधुनोपद्रवक्षयः। निशिच्छागपलै होंमो रिपुसैन्य विनाशकृत् ॥३॥
दध्याज्य दुग्धमधुभिः क्रमाद्धोमादवाप्नुयात्। आरोग्यं संपद ग्रामं धनं शर्करया सुखम् ॥४॥
कमलैर्धनसम्पत्तिर्दाडिमै राजवश्यता। क्षत्रिया मातुलिङ्गैस्तु वैश्या नारंगजै फलैः ॥५॥

शूद्रा कूष्माण्ड संभूतैर्वश्याः स्युरचिराद्धुतैः । पनसानां लक्षहोमाद्वश्याः स्युश्चक्रवर्तिनः ॥६॥
द्राक्षाफलैरिष्टसिद्धी रंभाभिर्मन्त्रिणो वशाः । नारिकेलैस्तु संपत्तिस्तिलै सर्वेष्टसिद्धय ॥७॥
गुग्गुलैर्दुःखनाशः स्यात् सर्वेष्टं शर्करागुडैः । पायसैर्धनधान्याप्तिर्बन्धूकैः प्राणिनो वशाः ॥८॥
पक्वैश्चूतफलै र्होमाल्लक्षमात्राद्धरा वशा । लवणै राजिकायुक्तै र्होमाद्दुष्ट-विनाशनम् ॥९॥
कर्पूरहोमाल्लभते वाक्पतित्वं नरोऽचिरात् । करंजफलहोमेन भूतप्रेतादयो वशाः ॥१०॥
बिल्वैः स्यादतुला लक्ष्मीरिक्षुदंडैः सुखाप्तयः । घृतहोमादीप्सिताप्तिः शांतिः स्यात्तिलतंडुलैः ॥११॥

॥ विद्या के शुद्धाशुद्धादि भेदः॥

(१) **शुद्ध विद्या** - अनुलोम मंत्र।

(२) **अशुद्ध विद्या** - विलोम मंत्र।

(३) **शुद्धाशुद्ध उभयात्मक** - अनुलोम विलोम मंत्र।

(४) **शवला विद्या** - अनुलोम विलोम अनुलोम मंत्रः।

अनुलोमाश्च या विद्याः शुद्धाः स्यु प्रतिलोमजा, अशुद्धा इति ज्ञेया उभयात्मन एव च । शुद्धाशुद्धाश्च शवला व्यत्यस्त व्याकुलक्रमात् । एवं चतुर्विद्या विद्या विज्ञेया देशिकोत्तमै ॥

॥ अथ गोपाल सुन्दरी मंत्र प्रयोगः॥

वैष्णव संप्रदाय में गोपाल सुन्दरी की उपासना शाक्त मत के त्रिपुरसुंदरी की साधना के समान हैं। मंत्रमहोदधि में २० अक्षर मंत्र कहा हैं। यंत्र पूजा में गोपाल यंत्र पर त्रिपुरसुन्दरी के यंत्र की पूजा करने मात्र से समिष्टि मानकर गोपाल सुन्दरी क्रम मान लिया गया है।

जब कि श्रीकल्पद्रुम के अनुसार षोडशी विद्या के तीनों कूटों को मिलाने से ही गोपाल सुन्दरी मंत्र पूर्ण होगा।

(१) **ह्रीं श्रीं क्लीं कृष्णाय गोविन्दाय गोपीजनवल्लभाय स्वाहा।** मंत्र महोदधि की टीका में यही मंत्र दिया है परन्तु मंत्रोद्धार के अनुसार त्रिपुरसुंदरी के मंत्र के त्रिकूटों का प्रयोग नहीं किया है।

(२) **मंत्रोद्धार- गोपालसुन्दरी वक्ष्ये भोगमोक्षप्रदायिनीं। माया (ह्रीं) रमा (श्रीं) चितजन्मा (क्लीं) कृष्णायेति पदं ततः॥ आद्यं वाक्कूटमुच्चार्य गोविन्दाय पदं वदेत । द्वितीय तु ततः कूटं गोपीजन पदं ततः॥ वल्लभायपदान्तं तु तृतीयं कूटमुच्चरेत् । स्वाहान्ता वह्नियुग्मार्णा स्मृता गोपालसुंदरी ॥**

अतः दूसरा मंत्र यथार्थ इस प्रकार है- **ह्रीं श्रीं क्लीं कृष्णाय कएईल ह्रीं गोविन्दाय हसकहल ह्रीं गोपीजनवल्लभाय सकल ह्रीं स्वाहा।** (विद्यार्णव तंत्रे)

विनियोगः- **अस्य श्रीगोपालसुन्दरी मंत्रस्य विधात्रानन्दभैरवो ऋषिः, देवी गायत्री छन्दः, श्रीगोपालसुंदरी देवता, क्लीं बीजं, स्वाहा शक्तिः, ममाभीष्टसिद्ध्यर्थे जपे विनियोगः।**

षडङ्गन्यासः - **ह्रीं श्रीं क्लीं हृदयाय नमः। कृष्णाय कएईल ह्रीं शिरसे स्वाहा। गोविन्दाय हसकल ह्रीं शिखायै वषट्। गोपीजन कवचाय हुं। वल्लभाय सकल ह्रीं नेत्रत्रयाय वौषट्। स्वाहा अस्त्राय फट्।**

वर्णन्यासः- प्रत्येक वर्ण का न्यास करें। स्थिति क्रम में मूल मंत्र के प्रत्येक वर्ण का न्यास स्थान सृष्टिक्रम में जो क्रम बताया गया है उसमें हृदय, उदर, नाभौ, से आरंभ कर **स्वां नमः कण्ठे तथा हां नमः बाहुमूले** तक होगा। अथवा **गौं नमः** हृदि से प्रारंभ कर **यं नमः** बाहुमूल तक करें।

सृष्टिन्यास- सभी मंत्र वर्णो के साथ **नमः** युक्त कर न्यास करे। **ह्रीं नमः मूर्ध्नि। श्रीं ललाटे। क्लीं भ्रुवोः। कृं नेत्रयोः। ष्णां कर्णयो। यं** नासिकयौ। **गों मुखे। विं चिबुके। न्दां कंठे। यं बाहुमूले। गों हृदि। पीं उदरे।** जं नाभौ। नं **लिङ्गे। वं गुदे। ल्लं कट्यां। भां जान्वो। यं जंघयोः। स्वां गुल्फयोः। हां पादयोः।**

स्थिति न्यास- **ह्रीं हृदि। श्रीं उदरे। क्लीं नाभौ। कृं लिङ्गे। ष्णां मूलाधारे। यं कट्यां। गों जान्वो। विं जंघयोः। न्दां गुल्फयोः। यं पादयोः। गों मूर्ध्नि। पीं ललाटे। जं भ्रुवो। नं नेत्रयोः। वं कर्णयोः। ल्लं नसोः। भां मुखे। यं चिबुके। स्वां कण्ठे। हां बाहुमूले।**

संहारन्यास- **ह्रीं नमः पादयोः। श्री गुल्फयोः। क्लीं जंघयोः। कृं जान्वो। ष्णां कट्यां। यं गुदे। गो लिङ्गे। विं नाभौ। न्दां उदरे। यं हृदि। गों बाहुमूले। पी कण्ठे। जं चिबुके। नं मुखे। वं नसौः। ल्लं कर्णयोः। भां नेत्रयोः। यं भ्रुवोः। स्वां ललाटे। हां मूर्ध्नि।**

वाग्देवता न्यास- **१. अं.....अः रब्लूं वशनिवाग्देवतायै नमः शिरसि। २. कं......ङं कलह्रीं कामेश्वरीवाग्देवतायै नमः ललाटे। ३. चं.....ञं ब्लूं मोहिनी वाग्देवतायै नमः भ्रूमध्ये। ४. टं.....णं म्लूं विमला वाग्देवतायै नमः कंठे। ५. तं.....नं ज्म्रीं अरुणा वाग्देवतायै नमः हृदि। ६. पं.....मं ह्स्ल्व्यूं जपिनी वाग्देवतायै नमः नाभौ। ७. यं रं लं वं झ्म्र्यूं सर्वेश्वरी वागदेवतायै नमः मूलाधारे। ८. शं.....लं क्षं क्ष्म्री कोलिनी वाग्देवतायै नमः उर्ध्वादिपादन्तम्। मंत्रमहोदधि में कएईल ह्रीं** इत्यादि कूटों से न्यास की जगह त्रिकूट न्यास इस प्रकार कहे हैं।

षडङ्गन्यासः- **१. कृष्णाय हृदयाय नमः। गोविन्दाय शिरसे स्वाहा। गोपीजनवल्लभाय शिखायै वषट्। कृष्णाय कवचाय हुं। गोविन्दाय नेत्रत्रयाय वषौट्। गोपीजनवल्लभाय अस्त्राय फट्।**

२. ह्रीं श्रीं क्लीं हृदयाय नमः। कृष्णाय शिरसे स्वाहा। गोविन्दाय शिखायै वषट्। गोपीजन वल्लभाय कवचाय हुं। स्वाहा नेत्रत्रयाय वौषट्। कएईल ह्रीं, हसकहल ह्रीं, सकल ह्रीं अस्त्राय फट्।

॥ ध्यानम्॥

क्षीराम्भोधिस्थ कल्पद्रुमवन विलसद्रत्नयुङ् मण्डपान्तः ।
प्रोद्यच्छ्रीपीठसंस्थं करधृत जलजारीक्षु चापांकुशेषुम् ॥
पाशं वीणां सुवेणुं दधतमवनिमाशोभितं रक्तकान्तिम् ।
ध्यायेद् गोपालमीश विधिमुख विबुधैरीड्यमानं समन्तात् ॥

॥ यंत्रपूजनम्॥

षट्कोण, अष्टदल बनाकर चारद्वार युक्त भूपूर बनाये। विमलादि पीठशक्तियों का पूजन कर प्रधान देवता का आवाहन कर पूजा करे पश्चात् यंत्रार्चन करे। देव के पास में ही उनके शस्त्रों का पूजन करे -

ॐ कीरीटाय नमः, कुण्डलाभ्यां नमः, शङ्खाय नमः, चक्राय नमः, गदायै नमः, पद्माय नमः, वनमालायै नमः, श्रीवत्साय नमः, कौस्तुभाय नमः।

प्रथमावरण - (षट्कोणे) **ह्रीं श्रीं क्लीं हृदयाय नमः** अग्निकोणे। **कृष्णाय शिरसे स्वाहा** (ईशाने)। **गोविन्दाय**

॥ गोपाल सुन्दरी यन्त्रम् ॥

शिखायै वषट्। नैऋते। **गोपीजन कवचाय हुं**। (वायव्ये)। **वल्लभाय नेत्रत्रयाय वौषट्** देव्याग्रे। **स्वाहा अस्त्राय फट्** दिक्षु।

द्वितीयावरणम् – (अष्टदले) पूर्वे **ॐ वासुदेवाय नमः**। दक्षिणे **ॐ सङ्कर्षणाय नमः**। पश्चिमे **ॐ पद्मुम्नाय नमः**। उत्तरे **अनिरुद्धाय नमः**। आग्नेयादि कोणे **ॐ शान्त्यै नमः**। **ॐ श्रियै नमः**। **ॐ सरस्वत्यै नमः**। **ॐ रत्यै नमः**।

तृतीयावरणम् – (अष्टदलमध्ये) पूर्वादिक्रमेण पूर्व **ॐ रुक्मिण्यै नमः। ॐ सत्यमामायै नमः। ॐ कालिंद्यै नमः। ॐ नाग्नजित्यै (जाम्बवत्यै) नमः। मित्रविन्दाय नमः। ॐ चारुहासिन्यै (सुनन्दायै) नमः। ॐ रोहिण्ये (सुलक्षणायै) नमः। ॐ जाम्बवत्य (नाग्नजित्यै) नमः।**

चतुर्थावरणम् – अष्टदलाग्रे– **ॐ षोडशसहस्त्र महिषीभ्यो नमः।**

पंचमावरणम् – (भूपूर अष्टदलान्तरे)-(पूर्वादिक्रमेण) **ॐ इन्द्रनिधियै नमः। ॐ नीलनिधियै नमः। ॐ मुकुन्दनिधियै नमः। ॐ मकरनिधियै नमः। ॐ आनंदनिधियै नमः। ॐ कच्छपनिधियै नमः। ॐ पद्मनिधियै नमः। ॐ शङ्खनिधियै नमः**। मध्ये – **ॐ खर्वनिधियै नमः।**

पाठान्तरे – (भूपूर अष्टदलान्तरे)– **ॐ महापद्माय नमः पूर्वे। ॐ पद्माय नमः आग्नेये। ॐ शंखाय नमः दक्षिणे। ॐ मकराय नमः नैर्ऋत्ये। ॐ कच्छपाय नमः पश्चिमे। ॐ मुकुन्दाय नमः वायव्ये। ॐ कुन्दाय नमः उत्तरे। ॐ नीलाय नमः ऐशान्ये। ॐ खर्वाय नमः मध्ये।**

षष्ठमावरणम् – भूपुर में इन्द्रादि दशदिक्पालों का एवं उनके वज्रादि आयुधों का पूजन करे। पश्चात् देव की सर्वविध पूजा करे।

इसके पश्चात् त्रिपुरसुन्दरी के श्रीयंत्र का जो अर्चन है उन सभी आवरण देवताओं का अर्चन करें।

आरतीकर पुष्पांजलि देवे।

॥ संमोहन हेतु अन्यकामना मंत्र ॥

(१) ॐ गल्यौं ॐ (२) ह्रीं गल्यौं ह्री (३) ऐं गल्यौं ऐं (४) क्लीं गल्यौं क्लीं (५) ब्लूं गल्यौं ब्लूं (६) स्त्रीं गल्यौं स्त्रीं (७) द्रां द्रीं क्लीं ब्लूं सः गल्यौं सः ब्लूं क्लीं द्रां द्रीं ॥

अरुणं षड्भुजं वंशवादिनं पाशमंकुशम्। पुण्ड्रेक्षुचापपुष्पेबून् दधानं शक्तिभिः स्मरेत्॥ मंत्र के बीजों से षडङ्गन्यास करे।

अष्टदल के सात पत्रों में एक मंत्र से पूजा करे। रविवार से क्रमश एक मंत्र से पूजा करे। प्रतिदिन अलग नैवेद्य देवे।

सकलेष्टप्रदा नित्यं दुग्धक्षोद्र घृतान्नकैः।पायसैर्नारिकेलैश्च ससितैः कदलीफलैः ॥

मूल मंत्र सुवर्णपुष्पो का लेपन कंठ पर करे तो देव दर्शन होवे।

॥ अथ बाणेशी मंत्र प्रयोगः॥

बाणेशी मंत्र का प्रयोग आकर्षण, सम्मोहन, वशीकरण, इत्यादि कार्यों हेतु किया जाता है। यह अपने ५ बाणों से शत्रु को द्रवित कर साधक का मनोरथ सफल करती है।

मंत्र- द्रां द्रीं क्लीं ब्लूं सः।

विनियोगः- **ॐ अस्य श्री वाणेशीमंत्रस्य सम्मोहन ऋषिः, गायत्री छन्दः, वाणेशी देवता, ममाभीष्ट सिद्ध्यर्थे जपे विनियोगः।**

षडंगन्यासः- **सः हृदयाय नमः। ब्लूं शिरसे स्वाहा। क्लीं शिखायै वषट्। द्रीं कवचाय हुं। द्रां नेत्रत्रयाय वौषट्। द्रां द्रीं क्लीं ब्लूं सः अस्त्राय फट्।**

सर्वाङ्ग न्यासः- **द्रां द्राविण्यै नमः मूर्ध्नि। द्रीं क्षोभिण्यै नमः पादयोः। क्लीं वशीकरिण्यै नमः मुखे। ब्लूं आकर्षिण्यै नमः गुह्ये। सः संमोहिन्यै नमः हृदि।**

उद्यद्भास्वत्सन्निभा रक्तवस्त्रा, नानारत्नालंकृताङ्गी वहन्ती।
हस्तैः चापंचांकुशं चापवाणौ, वाणेशी नः कामपूर्तिं विधत्ताम्॥

॥ यंत्रार्चनम्॥

यंत्र मध्य में दो वृत्त बनाये। उनके बाहर अष्टदल के पश्चात् भूपूर बनायें। पीठ शक्तियों का पूजन यंत्र के मध्य में पूर्वादि क्रम से करें। **ॐ मोहिन्यै नमः। ॐ क्षोभिण्यै नमः। ॐ त्रास्यै नमः। ॐ स्तंभिन्यै नमः। ॐ आकर्षिण्यै नमः। ॐ द्राविण्यै नमः। ॐ आह्लादिन्यै नमः। ॐ क्लिन्नायै नमः। मध्ये- ॐ क्लेदिन्यै नमः।**

॥ बाणेशी यंत्रम्॥

प्रथमावरणम्- दो वृत्तों के बीच में जो कर्णिका बनी है आग्नेयादि चारों कोणों में अंगन्यास शक्ति से पूजन तर्पण करें- **ॐ सः हृदयाय नमः। ॐ ब्लूं शिरसे स्वाहा। ॐ क्लीं शिखायै वषट्। ॐ द्रां कवचाय हुं। ॐ द्रां नेत्रत्रयाय वौषट् अग्रे। द्रां द्रीं क्लीं ब्लूं सः अस्त्राय फट् दिक्षु।**

द्वितीयावरणम् - (वृत्त कर्णिका से पूजन करें) **द्रां द्राविण्यै नमः** पूर्वे। **द्रीं क्षोभिण्यै नमः** दक्षिणे। **क्लीं वशीकरणे नमः** पश्चिमे। **ब्लूं आकर्षिण्यै नमः** उत्तरे। **सः संमोहिन्यै नमः** अग्रे।

तृतीयावरणम् -(अष्टदल मध्ये पूर्वादि क्रमेण)- **ॐ अनङ्गरूपायै नमः। ॐ अनङ्गमदनायै नमः। ॐ अनङ्ग मन्मथाय नमः। ॐ अनङ्ग कुसुमायै नमः। ॐ अनङ्गमदनायै नमः। ॐ अनङ्ग शिशिरायै नमः। ॐ अनङ्ग मेखलायै नमः। ॐ अनङ्गदीपिकायै नमः।**

चतुर्थावरणम् में भूपूर में इन्द्रादि दशदिक्पालों का एवं **पंचमावरणम्** में उन्हीं के पास भूपूर में उनके वज्रादि आयुधों का पूजन करें।

॥काम्यप्रयोगः॥

३ दिन तक दधिमिश्रित अशोक पुष्पों से प्रतिदिन १००० आहुतियाँ देवे तो जगत का वशीकरण होवें। इतनी ही संख्या में साधक दही सहित लाजा होम करें तो पत्नी की प्राप्ति होवें, कन्या करे तो उसें उत्तम वर की प्राप्ति होवें।

॥ अथ कामेशी मंत्र प्रयोगः॥

मंत्रः- ह्रीं क्लीं ऐं ब्लूँ स्त्रीं।

विनियोगः- ॐ अस्य श्रीकामेशी मंत्रस्य संमोहन ऋषिः, गायत्री छन्दः, कामेशी देवता, ममाभीष्टसिद्ध्यर्थे जपे विनियोगः।

त्र्यक्षरी मंत्र :- ऐं क्लीं सौः। (विधान बालासुन्दरीवत्)

षडंगन्यासः- ॐ स्त्रीं हृदयाय नमः। ॐ ब्लूं शिरसे स्वाहा। ॐ ऐं शिखायै वषट्। ॐ क्लीं कवचाय हुं। ॐ ह्रीं नेत्रत्रयाय वौषट्। ॐ ह्रीं क्लीं ऐं ब्लूं स्त्रीं अस्त्राय फट्।

॥ ध्यानम् ॥

पाशांकुशाविक्षुशरासवाणौ कैरर्वहन्तीमरुणांशुकाढ्यम्।
उद्यत्पतङ्गाभिरुचिं मनोज्ञां कामेश्वरीं रत्नचितां प्रणौमि॥

यंत्रोद्धार- सर्वप्रथम वृत्ताकार कर्णिका के ऊपर चतुर्दल बनाये, फिर अष्टदल पश्चात् भूपूर बनाये।

॥ कामेशी यंत्रम् ॥

प्रथमावरणम् - (वृत्ताकार कर्णिका मध्ये)- ॐ स्त्रीं हृदयाय नमः। ॐ ब्लूं शिरसे स्वाहा। ॐ ऐं शिखायै वषट्। ॐ क्लीं कवचाय हुं। ॐ ह्रीं नेत्रत्रयाय वौषट्। ॐ ह्रीं क्लीं ऐं ब्लूं स्त्रीं अस्त्राय फट्।

द्वितीयावरणम् - (चतुर्दले)- ॐ मनोभवाय नमः पूर्वे। ॐ मकरध्वजाय नमः दक्षिणे। ॐ कंपर्दाय नमः पश्चिमे। ॐ मन्मथाय नमः उत्तरे। ॐ कामदेवाय नमः मध्ये।

तृतीयावरणम्- तृतीय से पंचमावरण तक के देवता अष्टदल व भूपूर में वाणेशी पूजन के ही देवता है।

प्रयोगः- साधक ५ लाख जप करें एवं पलाश के फूलों से ५० हजार संख्या में आहुति देवें तो जगत वशीकरण होवें।

॥ श्रीविद्यायाः शुद्ध शक्ति खड्गमाला स्तोत्रम् ॥

इस स्तोत्र के पाठ से श्रीयंत्र की पूजा का फल प्राप्त होता है। विशेष पूजा विधि स्तोत्र के बाद दी गई है।

॥ श्रीपार्वत्युवाच ॥

भगवन्! देव देवेश! सर्वज्ञ! करुणानिधे! शुद्धशक्ति महामन्त्रं ब्रूहि मे सकलेष्टदम् ॥१॥

॥ ईश्वर उवाच ॥

शृणु देवि! प्रवक्ष्यामि यन्मा त्वं परिपृच्छसि। यस्य स्मरण मात्रेण चक्रपूजा फलं लभेत् ॥२॥
शुद्ध नमोऽन्ताः स्वाहान्तास्तर्पणान्ता जयान्तकाः। प्रवृत्तयः पञ्चधा स्युर्मालासु निखिलास्वपि ॥३॥
शुद्धायाः शक्तिमालाया जपस्तेन विधीयते। पञ्चधा जायते नित्यं पुरश्चर्या फलं लभेत् ॥४॥
एषा विद्या महाविद्या समयाचार वर्त्तिनी। अतिवीर्यतरा विद्या सूर्यकोटि समप्रभा ॥५॥

कुलाङ्गना कुलं सर्वं मदीयं परमेश्वरि । देवी रक्षतु सर्वाङ्गं दिव्याङ्गं भोगदायिनी ॥६॥
निरालम्बे महातल्पे लीयमाना सुरेश्वरी । हुङ्कारं च ततः कृत्वा पूजयेद् भुवि मण्डले ॥७॥
पूजान्ते वामहस्तेन ह्रींकारं त्रिविधं जपेत् । पश्चात् त्रिपुर मन्त्रेण मूलमन्त्रेण शङ्करि ॥८॥
नवावरण देवीनां ललितायाः महौजसः । एकत्रः गणनारूपो मन्त्रो मन्त्रार्थ गोचरः ॥
मालामन्त्र विधानेन क्रमणोच्चारणं भवेत् ॥९॥

सङ्कल्प- अद्येत्यादि मम श्रीराजराजेश्वरी महात्रिपुर सुन्दरी देवता वरप्रसाद सिद्धि द्वारा सर्वाभीष्ट प्राप्त्यर्थं शुद्ध शक्ति खड्गमाला मन्त्र पाठाख्यं कर्म करिष्ये।

विनियोग:-ॐ नमोऽस्य श्रीशुद्धशक्तिखड्गमाला मन्त्रस्य उपस्थेन्द्रियाधिष्ठायी श्रीवरुणादित्य ऋषिः, देवी गायत्री छन्दः, सात्विक ककार-भट्टारक पीठस्थित शिव श्रीकामेश्वराङ्कनिलया श्रीकामेश्वरी ललिता महाभट्टारिका देवता, ऐं क-५बीजं, सौः स-४ शक्तिः, क्लीं ह-६ कीलकं, श्रीमहात्रिपुरसुन्दरी वरप्रसाद सिद्ध्यर्थे जपे विनियोगः।

ऋष्यादिन्यास:- उपस्थेन्द्रियाधिष्ठायिने श्रीतरुणादित्य ऋषये नमः शिरसि। देवी गायत्री छन्दसे नमः मुखे। सात्विक ककार भट्टारक पीठस्थित शिवश्रीकामश्वराङ्क निलयायै श्रीकामेश्वरी ललिता महाभट्टारिकायै देवतायै नमः हृदये। ऐं क-५ बीजाय नमः गुह्ये। सौः स-४ शक्तये नमः नाभौ। क्लीं ह-६ कीलकाय नमः पादयोः। श्रीललितामहात्रिपुरसुन्दरी वरप्रसाद सिद्ध्यर्थे जपे विनियोगाय नमः सर्वाङ्गे। मूलेन व्यापकं कुर्यात्

॥ ध्यानम् ॥

अरुणां करुणा तरङ्गिताक्षीं धृतपाशांकुश वाणचापहस्ताम् ।
अणिमादिभिरावृतां मयूखैरहमित्येव विभावये भवानीम् ॥
अतिमधुरचापहस्तामपरिमित मोदमान सौभाग्याम् ।
अरुणामतिशय करुणामभि नवकुलसुन्दरीं वन्दे ॥

मानसोपचारैः सम्पूज्य प्रार्थयेत् यथा-

ॐ ऐं ह्रीं श्रीं हस्क्रें हस्फ्रीं हस्फ्रौं श्रीं ह्रीं ऐं समयिनि मदिरानन्द सुन्दरि समस्त सुरासुर वन्दिते भुजङ्ग भूपाल मौलि मालार्चित चरणकमले विकटदन्त खटाटोप निवारिणि! मदीयं शरीरं वज्रमयं कुरु कुरु दुर्जनं हन हन दुष्ट महीपालान् क्षोभय क्षोभय परचक्रं भंजय भंजय। जयंकरि, गगन गायिनि त्रैलोक्य स्वामिनि! समल वरयूं रमल वरयूं यमल वरयूं समल वरयूं श्रीभैरवि! प्रसीद प्रसीद स्वाहा।

तादृशं खड्गमाप्नोति येन हस्तस्थितेन वै । अष्टादश महाद्वीप सम्राट् भोक्ता भविष्यति ॥

ह्रां ह्रीं इत्यादिना षडंगन्यासं कृत्वा खड्गमाला मन्त्रं जपेत् यथा-

ॐ ऐं ह्रीं श्रीं नमस्त्रिपुरसुन्दरि हृदयदेवि शिरोदेवि शिखादेवि कवचदेवि नेत्रदेव्यस्त्र देवि कामेश्वरि भगमालिनि नित्य क्लिन्ने भेरुण्डे वह्निवासिनि महावज्रेश्वरि शिवदूति त्वरिते कुलसुन्दरि नित्ये नीलपताके विजये सर्वमङ्गले ज्वालामालिनि चित्रे महानित्ये परमेश्वर परमेश्वरि मित्रीशमयि षष्ठीशमय्युड्डीश -मयि चर्यानाथमयि लोपामुद्रामय्यगस्त्यमयि कालतापनमयि धर्माचार्यमयि मुक्तकेशीश्वरमयि दीपकलानाथमयि विष्णुदेवमयि प्रभाकर देवमयि तेजोदेवमयि मनोजदेवमयि कल्याणदेवमयि रत्नदेवमयि वासुदेवमयि श्रीरामानन्दमयी अणिकाम सिद्धे

लघिमासिद्धे महिमासिद्धे ईशित्वसिद्धे वशित्वसिद्धे प्राकाम्यसिद्धे भुक्तिसिद्धे इच्छासिद्धे प्राप्तिसिद्धे सर्वकामसिद्धे, ब्राह्मि माहेश्वरि कौमारि वैष्णवि वाराहि माहेन्द्रि चामुण्डे महालक्ष्मि, सर्वसंक्षोभिणि सर्वविद्राविणि सर्वाकर्षिणि सर्ववशङ्करि सर्वोन्मादिनि सर्वमहांकुशे सर्वखेचरि सर्ववीजे सर्वयोने सर्वत्रिखण्डे ''त्रैलोक्य मोहनचक्र स्वामिनि'' प्रकटयोगिनि कामाकर्षिणि बुद्ध्याकर्षिणि अहङ्काराकर्षिणि गंधाकर्षिणि चित्ताकर्षिणि धैर्याकर्षिणि स्मृत्याकर्षिणि नामाकर्षिणि बीजाकर्षिण्यात्माकर्षिण्यमृताकर्षिणि शरीराकर्षिणि सर्वाशा परिपूरकचक्र स्वामिनि गुप्तयोगिअनङ्गन्यङ्गकुसुमेऽनङ्ग मेखलेऽनङ्ग मदनेऽनङ्ग मदनातुरेऽनङ्ग-रेखेऽनङ्ग वेगिन्यनऽनङ्गां कुशेऽनङ्गमालिनि सर्वसंक्षोभण चक्र स्वामिनि गुप्ततरयोगिनि सर्वसंक्षोभिणि सर्वविद्राविणि सर्वाकर्षिणि सर्वाह्लादिनि सर्वसम्मोहिनि सर्वस्तम्भिनि सर्वजृम्भिणि सर्ववशङ्करि सर्वरंजिनि सर्वोन्मादिनि सर्वार्थसाधिनि सर्वसम्पत्तिपूरिणि सर्वमन्त्रमयि सर्वद्वन्द्वक्षयङ्करि ''सर्वसौभाग्य दायक चक्रस्वामिनि सम्प्रदाय योगिनि'' सर्वसिद्धिप्रदे सर्वसम्पतप्रदे सर्वप्रियङ्करि सर्वमङ्गलकारिणि सर्वकामप्रदे सर्वदुःखविमोचिनि सर्वमृत्युप्रशमनि सर्वविघ्ननिवारिणि सर्वाङ्गसुन्दरि सर्वसौभाग्य दायिनि ''सर्वार्थ साधक चक्रस्वामिनि'' कुलोत्तीर्ण योगिनिसर्वज्ञे सर्वशक्ते सर्वैश्वर्यप्रदे सर्वज्ञानमयि सर्वव्याधिविनाशिनि सर्वाधार स्वरूपे सर्वपापहरे सर्वानन्दमयि सर्वरक्षास्वरूपिणि सर्वेप्सितप्रदे ''सर्वरक्षाकर चक्रस्वामिनि निगर्भयोगिनि'' वशिनि कामेश्वरि मोदिनि विमलेऽरुणे जयिनि सर्वेश्वरि कौलिनि सर्वरोगहरचक्र स्वामिनि रहस्ययोगिनि वाणिनि चापिनि पाशिन्यंकुशिनि महाकामेश्वरि महावज्रेश्वरि महाभगमालिनि महाश्रीसुन्दरि ''सर्वसिद्धिप्रदचक्र स्वामिन्यति रहस्ययोगिनि'' श्री श्री महाभट्टारिके सर्वानन्दमय चक्रस्वामिनि परापर रहस्ययोगिनि त्रिपुरे त्रिपुरेशि त्रिपुरसुन्दरि त्रिपुर वासिनि त्रिपुरा श्रीस्त्रिपुरमालिनि त्रिपुरासिद्धे त्रिपुराम्ब महात्रिपुरसुन्दरि महामाहेश्वरि महामहागुप्ते महामहाज्ञप्ते महामहा नन्दे महामहाराज्ञि महामहाशक्ते महामहास्पन्दे महामहाशये महामहाश्रीचक्र साम्राज्ञि नमस्ते नमस्ते नमस्ते स्वाहा श्रीं ह्रीं ऐं ॐ।

ॐ ऐं ह्रीं श्रीं समस्त प्रकटगुप्त गुप्ततर सम्प्रदाय कुल कौल निगर्भ रहस्याति रहस्य परापर रहस्य योगिनि श्रीविद्या राजराजेश्वरि श्रीपादुकां पूजयामि नमः।

पुष्पाञ्जलिं निवेद्य मूलेन न्यासं विधाय मानसोपचारैः पूजयेत्।

॥ फलश्रुति ॥

माला मन्त्रो महादेव्याः सर्वसिद्धि प्रदायकः। एकत्रिंशत् सहस्त्राणैं स्त्रिलोकी मोहन क्षमः ॥१॥
एषा विद्या महासिद्धि दायिनी स्मृति मात्रतः। अग्निवातमहाक्षोभे राज राष्ट्रस्य विप्लवे ॥२॥
लुण्ठने तस्कर भये संग्रामे सलिलप्लवे। समुद्रयान विक्षोभे भूतप्रेतादिजे भये ॥३॥
अपस्मार ज्वर व्याधि मृत्यून्मादादिजे भये। डाकिनी पूतना यक्ष रक्षः कूष्माण्डजे भये ॥४॥
मित्रभेदे ग्रहभये व्यसने चाभिचारके। अन्येष्वपि च दोषेषु मालामन्त्रं स्मरेद् बुधः ॥५॥
सर्वोपद्रव निर्मुक्तः सर्वव्याधि विवर्जितः। सर्वदा पूर्णहृदयः साक्षाच्छिव मयो भवेत् ॥६॥
आपत्काले नित्यपूजां विस्तरात् कर्तुमक्षमः। एकावर्तन मात्रेण चक्रपूजा फलं लभेत् ॥७॥
नवावरण देवीनां ललिताया महौजसः। एकत्र गणना रूपो यन्त्र मन्त्रार्थ गोचरः ॥८॥
सर्वागम रहस्यार्थः स्मरणात् पापनाशिनी। नरेन्द्राणां नारीणां सर्वदेव वशङ्करी ॥९॥
ललिताया महेशान्या मालाविद्या महीयसी। अणिमादि गणैश्वर्यैः रञ्जनी पापभञ्जनी ॥१०॥
तत् तथावरण स्थायिदेवतावृन्द मन्त्रजम्। मालामन्त्रो महादेव्याः सर्वकार्यार्थ सिद्धिदः ॥११॥

इदं स्तोत्रं महादेव्याः सर्वलोक विमोहनम् । सर्वसौख्यप्रदं नृणां सर्वसौभाग्य दायकम् ॥१२॥
अनेनशुद्धशक्ति माला मन्त्र जपाख्येन कर्मणा भगवती राजराजेश्वरी श्रीमहात्रिपुर सुन्दरी प्रीयताम् ।

॥ ॐ तत्सत् श्रीललिता परिशिष्टे उमामहेश्वर संवादे शुद्धशक्तिमाला स्तोत्रं सम्पूर्णम् ॥

॥ अथ खड्गमाला स्तोत्र प्रयोग विधिः॥

खड्गमाला स्तोत्र में सभी आवरण देवताओं की नामावलि है अतः इस स्तोत्र के पाठ से ''श्री यंत्र के यंत्रार्चन का फल प्राप्त होता है''। स्तोत्र में पहले भगवती की १५ नित्याओं का स्मरण कर पश्चात भूपुर से त्रिकोण तक विलोम क्रम से आवरण पूजा दी गई हैं। अर्थात् नित्या पूजन के बाद संहार क्रम का पूजन दिया गया है अतः शत्रुनाश व विघ्ननाश के लिये यह प्रयोग ठीक है परन्तु मेरे अनुभव से अर्थप्राप्ति में यह प्रयोग अधिक उपयुक्त नहीं है। खड्गमाला के अलग अलग प्रयोग साधकों में साधना भेद व प्रांतभेद से अलग अलग प्रचलित है।

(१) स्वशरीर में दिव्य शक्ति हेतु ध्यान एवं न्यास

स्तोत्र के प्रारंभ से रामानंदमयि तक ''**सहस्त्रार**'' में तथा अणिमा सिद्धि से सर्वत्रिखण्डे ''**त्रैलोक्य मोहन चक्र स्वमिनि प्रकटयोगिनी**'' तक शरीर के ''**ब्राह्यान्तर प्रदेश**'' मे आठों दशाओं में ध्यान करें। ''**कामाकर्षिणि**'' से सर्वाशापरिपूरक चक्र स्वमिनि गुप्तयोगिनी का ''**मूलाधारचक्र**'' में तथा ''**अनङ्गकुसुमे**''...... ''**सर्वसंक्षोभण चक्रस्वामिनी गुप्ततरयोगिनि**'' तक ''**स्वाधिष्ठान चक्र**'' में यजन करें। ''**सर्वसंक्षोमिणि चक्रस्वमिनि संप्रदाय योगिनि**'' तक ''**मणिपूर चक्र**'' में एवं सर्वसिद्धिप्रदे सर्वार्थसाधकचक्र स्वामिनि कुलोत्तीर्ण योगिनी तक अनाहत् चक्र में ध्यान करें। ''**सर्वज्ञे सर्वरक्षाकर चक्रस्वमिनि निगर्भयोगिनि**'' का ''**विशुद्धचक्र**'' में वशिनि सर्वरोगहर चक्रस्वातिनि रहस्य योगिनी तक ''**आज्ञा चक्र**'' में पूजन करें पश्चात् अन्यशक्तियों का ''**सहस्त्रार**'' में ध्यान कर मानस पूजा करें।

(२) अथ मासान्त पुरश्चरण प्रयोग विधिः।

यह प्रयोग महिने के शुक्ल पक्ष की प्रतिपदा से मासांत तक ''खड्गमाला प्रयोग'' अधिक प्रचलित है। यदि साधक के पास अधिक समय नहीं है तो इसक्रम से दैनिक पूजन करने से साधना का पूर्ण फल प्राप्त होगा।

''खड्गमाला'' अर्चन प्रयोग के मुख्य ५ अङ्ग है। **(१)आवाहन संबोधन (संबुद्धयन्त) (२) नमोऽन्त (३) स्वाहान्त (४) तर्पणान्त (५) जयान्त**। १५ दिन के ऋषि न्यास सहित प्रयोग विस्तृत है। साधरण प्रयोग इस प्रकार है-

प्रतिदिन एक एक विधिसे प्रयोग करे तो ५ दिन में एकक्रम होता है। प्रथम ५ दिन(प्रतिप्रदा से पंचमी) ''**शक्तिप्रधान**'' होने से ''संकल्प'' में अलग अलग दिन अलग अलग क्रम का उल्लेख करे।

यथा प्रथम दिन-**श्री शक्ति संबुद्धयन्त खड्गमाला प्रयोग महं करिष्ये**। दूसरे दिन- **श्री शक्ति नमोऽन्त खड्गमाला प्रयोग करिष्ये**। तीसरे दिन- **श्री शक्ति स्वाहान्त खड्गमाला प्रयोग महं करिष्ये**। चौथे दिन- **श्री शक्ति जयान्त खड्गमाला प्रयोग महं करिष्ये**। पंचम दिन- **श्री शक्ति जयान्त खड्गमाला प्रयोग महं करिष्ये**।

॥ प्रयोग विधानम्॥

प्रतिप्रदा प्रतिनाम के साथ ''**ह्रीं श्रीं** '' या **ऐं ह्रीं श्रीं** प्रथम उच्चारण कर नाम के बाद आवाहयामि ध्यायामि कह कर हाथ जोड़े।

यथा- **ऐं ह्रीं श्रीं ॐ नमस्त्रिपुर सुंदरि आवाहयामि ध्यायामि।** द्वितीया- **ऐं ह्रीं श्रीं ॐ नमस्त्रिपुर सुंदर्यै नमः पादुकां पूजयामि।** गंधार्चन पुष्पार्चन युक्त पुष्पांजलि देवें। तृतीया- **ऐं ह्रीं श्रीं ॐ नमस्त्रिपुर सुन्दर्यै स्वाहा।** प्रतिनाम हवनकुण्ड में घृत की आहुति देवें। चतुर्थी- ऐं **ह्रीं श्रीं ॐ नमस्त्रिपुरसुन्दरी तर्पयामि।** प्रतिनाम देवता से तर्पण करे। वीराचार से पूजन करं तो जिह्वाग्र स्थित कुलकुण्डालिनी का ध्यान कर उसको अमृत से तर्पण करें। पंचमी- **ऐं ह्रीं श्रीं ॐ नमस्त्रिपु सुन्दरि जय जय।** प्रतिनाम पुष्पांजलि देवे।

''**छष्ठी से दशमी**'' शिव तत्व प्रधान पूजा है अतः संकल्प में शक्ति की जगह ''**शिव**'' का उच्चारण करें। पांच दिनों मे पूर्वोक्त विधि से क्रम करें।

''**एकादशी से पूर्णिमा**'' शक्ति शिव उभयात्मक अमुक खड्गमाला प्रयोग महं करिष्ये का उल्लेख करें।

पुनः कृष्ण प्रयोग में ५ दिन का यही क्रम प्रतिप्रदा से पंचमी शिव शक्ति उभयात्मक। षष्ठी से दशमी तक **शिव प्रधान** का संकल्प का उल्लेख कर प्रयोग करें। ५ दिनों की प्रयोग विधि पूर्ववत् ही रहेगी केवल मात्र पाठ के संकल्प का भेद है।

एकादशी से अमावस्या तक **शक्ति प्रधान** का संकल्प करें। शुक्लपक्ष की प्रतिप्रदा से पंचमी तक विधान तरह पांचों दिन का प्रयोग करें।

ललिता देवी पंद्रह दिनों में अपने भिन्न-भिन्न स्वरूपों से अपने अपने कामेश्वर शिव के साथ विग्रह स्वरूप में इस प्रकार है- उनका यजन भी करे यथा-

(१) कामेश्वरीललिता- शिव कामेश्वर। (२) एकला ललिता- एकवीरकामेश्वर। (३) ईश्वरीललिता-ईश्वर कामेश्वर (४) ललितालिलिता- ललितकामेश्वर (५) हृल्लेखाललिता- हृदय कामेश्वर। (६) हलिनीललिता- हलिककामेश्वर। (७) सरस्वतीललिता- सर्वज्ञकामेश्वर (८) कमलाललिता -कालमर्दनकामेश्वर (९) हरिवल्लभा ललिता- हरनाथकामेश्वर (१०) लक्ष्मीललिता- ललज्जिह्वकामेश्वर। (११) हिरण्याललिता- हृदयेश्वर कामेश्वर(१२) सकलजननीललिता- सकलेश्वरकामेश्वर। (१३) कामकोटिललिता- करुणाकरकामेश्वर। (१४) लीलावतीललिता- लावण्यनायककामेश्वर। (१५) हरेश्वरीललिता- हिरण्यबाहुकामेश्वर।

॥ इति खड्गमाला प्रयोगः ॥

॥ श्री षोडशी मातृका ॥

इन मातृकाओं के न्यास वहिर्मातृका न्यास की तरह करें।

कामेशी भगमाला च नित्यक्लिन्ना ततः परम्। भेरुण्डा - वह्निवासिन्यौ वज्रेशी तदनन्तरम् ॥१॥
शिवदूती च त्वरिता ततश्च कुलसुन्दरी। नित्या नीलपताका च विजया सर्वमङ्गला ॥२॥
ज्वालामालिनि चित्रा च महात्रिपुरसुन्दरी। षोडशी मातृकांयाश्च सम्प्रोक्ताः स्वरशक्तयः ॥३॥
ग्रसिनी प्रियवादिन्यौ कराली च कपालिनी। शिवा घोषा च दंष्ट्रा च वीरोमा वाक् प्रदा तथा ॥४॥
नारायणी मोहिनी च प्रज्ञा च शिखिवाहिनी। भीषणा वायुवेगा च भीमा चैव विनायिका ॥५॥
पूर्णा शक्तिश्च कङ्काली कुर्दिनी कालिका तथा। दीपनी च जयन्तिन्या पावनी लम्बिनी तथा ॥६॥
संहारिणी छागली च पूतना मोदिका तथा। परशक्तिस्तथाम्बा च इच्छाशक्तिस्ततः परम ॥७॥
महाकाली च सम्प्रोक्ता व्यञ्जनानां च शक्तयः।

॥ श्री बालात्रिपुरसुन्दरी कवचम् ॥

॥ श्री भैरवी उवाच ॥

देवदेव! महादेव! भक्तानां प्रीतिवर्द्धन! सूचितं यत् त्वया देव्याः कवचं कथयस्व मे ॥१॥

॥ श्री भैरव उवाच ॥

शृणु देवि! प्रवक्ष्यामि कवचं देवदुर्लभम् । अप्रकाश्यं परं गुह्यं साधकाभीष्ट सिद्धिदम् ॥२॥

विनियोगः - **अस्य श्री बालात्रिपुरसुन्दरी कवचस्य श्री दक्षिणामूर्ति ऋषिः, पंक्तिश्छंदः श्री बालात्रिपुरसुन्दरी देवता, ऐं बीजं, सौः शक्ति, क्लीं कीलकं, चतुर्वर्ग साधने पाठे विनियोगः।**

ऋष्यादिन्यासः - **श्रीदक्षिणामूर्ति ऋषये नमः शिरसि। पंक्तिश्छंदसे नमः मुखे। श्री बालात्रिपुरसुन्दरी देवतायै नमः हृदि।, ऐं बीजाय नमो गुह्ये, सौः शक्तये नमो नाभौ, क्लीं बीजाय नमः पादयोः, चतुर्वर्ग साधने पाठे विनियोगाय नमः सर्वाङ्गेषु।**

षडङ्गन्यासः	करन्यास	अङ्गन्यासः
ऐं	**अंगुष्ठाभ्यां नमः**	**हृदयाय नमः**
क्लीं	**तर्जनीभ्यां नमः**	**शिरसे स्वाहा**
सौः	**मध्यमाभ्यां नमः**	**शिखायै वषट्**
ऐं	**अनामिकाभ्यां नमः**	**कवचाय हुं**
क्लीं	**कनिष्ठिकाभ्यां नमः**	**नेत्रत्रयाय वौषट्**
सौः	**करतलकर पृष्ठाभ्यां नमः**	**अस्त्राय फट्**

॥ ध्यानम् ॥

मुक्ताशेखर - कुण्डलाङ्गद मणि - ग्रैवेय - हारोर्मिका
विद्योतद् वलयादि कङ्कणकटिसूत्रां स्फुरन् नूपुराम् ।
माणिक्योदर बन्धकम्बु कबरीमिन्दोः कलां विभ्रतीं
पाशं चांकुश पुस्तकाक्ष वलयं दक्षोर्ध्व बाह्वादितः ॥

मानसोपचारैः सम्पूज्य कवचं पठेत् -

ऐं वाग्भवं पातु शीर्षं क्लीं कामस्तु तथा हृदि । सौः शक्तिबीजं च पातु नाभौ गुह्ये च पादयोः ॥१॥
ऐं क्लीं सौः वदने पातु बाला मां सर्वसिद्धये । हसकलह्रीं सौः पातु भैरवी कण्ठदेशतः ॥२॥
सुन्दरी नाभि देशेऽव्याच्छीर्षिका सकला सदा । भ्रू नासयोरन्तराले महात्रिपुरसुन्दरी ॥३॥
ललाटे सुभगा पातु भगा मां कण्ठदेशतः । भगा देवी तु हृदये उदरे भगसर्पिणी ॥४॥
भगमाला नाभिदेशे लिङ्गे पातु मनोभवा । गुह्ये पातु महादेवी राजराजेश्वरी शिवा ॥५॥
चैतन्यरूपिणी पातु पादयोर्जगदम्बिका । नारायणी सर्वगात्रे सर्वकार्ये शुभङ्करी ॥६॥
ब्रह्माणी पातु मां पूर्वे दक्षिणे वैष्णवी तथा । पश्चिमे पातु वाराही उत्तरे तु महेश्वरी ॥७॥
आग्नेय्यां पातु कौमारी महालक्ष्मीश्च नैर्ऋते । वायव्यां पातु चामुण्डा इन्द्राणी पातु चेशके ॥८॥

जले पातु महामाया पृथिव्यां सर्वमङ्गला । आकाशे पातु वरदा सर्वतो भुवनेश्वरी ॥९॥

॥ फलश्रुति ॥

इदं तु कवचं नाम देवानामपि दुर्लभम् । पठेत् प्रातः समुत्थाय शुचिः प्रयत मानसः ॥१०॥

नाधयो व्याधयस्तस्य न भयं च क्वचिद् भवेत् । न च मारीभयं तस्य पातकानां भयं तथा ॥११॥

न दारिद्र्यवशं गच्छेत् तिष्ठन्मृत्यु वशे न च । गच्छेच्छिवपुरे देवि! सत्यं सत्यं वदाम्यहम् ॥१२॥

इदं कवचमज्ञात्वा श्रीविद्यां यो जपेच्छिवे । स माप्नोति फलं तस्य प्राप्नुयाच्छस्त्र घातनम् ॥१३॥

॥ इति श्रीरुद्रयामल तन्त्रे भैरव-भैरवी संवादे श्रीबाला त्रिपुरसुन्दरी कवचम् ॥

॥ श्री बालात्रिपुरसुन्दरी स्तोत्रम् ॥

॥ श्री भैरव उवाच ॥

अधुना देव! बालाया स्तोत्रं वक्ष्यामि पार्वति । पञ्चमाङ्गं रहस्यं मे श्रुत्वा गोप्यं प्रयत्नतः ॥

विनियोगः – **अस्य श्री बालात्रिपुरसुन्दरी स्तोत्र मन्त्रस्य श्री दक्षिणामूर्ति ऋषिः, पंक्तिश्छंदः श्री बालात्रिपुरसुन्दरी देवता, ऐं बीजं, सौः शक्ति, क्लीं कीलकं, श्री बालाप्रीतये पाठे विनियोगः।**

ऋष्यादिन्यासः – **श्रीदक्षिणामूर्ति ऋषये नमः शिरसि। पंक्तिश्छंदसे नमः मुखे। श्री बालात्रिपुरसुन्दरी देवतायै नमः हृदि।, ऐं बीजाय नमः गुह्ये, सौः शक्तये नमः नाभौ, क्लीं कीलकाय नमः पादयोः, श्री बालाप्रीतये पाठे विनियोगाय नमः सर्वाङ्गे।**

षडङ्गन्यासः	करन्यास	अङ्गन्यासः
ऐं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
क्लीं	तर्जनीभ्यां नमः	शिरसे स्वाहा
सौः	मध्यमाभ्यां नमः	शिखायै वषट्
ऐं	अनामिकाभ्यां नमः	कवचाय हुँ
क्लीं	कनिष्ठिकाभ्यां नमः	नेत्रत्रयाय वौषट्
सौः	करतलकर पृष्ठाभ्यां नमः	अस्त्राय फट्

॥ ध्यानम् ॥

अरुण – किरणजालै रञ्जिताशावकाशा । विधृतजप वटीका पुस्तकाभीतिहस्ता ।
इतरकरवराढ्या फुल्लकह्लारसंस्था । निवसतु हृदि बाला नित्यकल्याणरूपा ॥

मानसोपचारैः संपूज्य स्तोत्रं पठेत् –

वाणीं जपेद् यस्त्रिपुरे भवान्या बीजं निशीथे जड़भावलीनः ।
भवेत् स गीर्वाण गुरोर्गरीयान् गिरीशपत्नि! प्रभुतादि तस्य ॥१॥

कामेश्वरि! त्र्यक्षरी कामराजं जपेद् दिनान्ते तव मन्त्रराजम् ।
रम्भाऽपि जृम्भारिसभां विहाय भूमौ भजेत् तं कुलदीक्षितं च ॥२॥

तार्तीयकं बीजमिदं जपेद् यस्त्रैलोक्य मातस्त्रिपुरे! पुरस्तात् ।
विधाय लीलां भुवने तथान्ते निरामयं ब्रह्मपदं प्रयाति ॥३॥
धरासद्म - त्रिवृत्ताष्ट - पत्र षट्कोण नागरे !
विन्दुपीठेऽर्चयेद् बालां योऽसौ प्रान्ते शिवो भवेत् ॥४॥
इति मन्त्रमयं स्तवं पठेद् यस्त्रिपुराया निशि वा निशावसाने ।
स भवेद् भुवि सार्वभौम मौलिस्त्रिदिवे शक्र - समान - शौर्यलक्ष्मी ॥५॥
इतीदं देवि! बालाया स्तोत्रं मन्त्रमयं परम् ।
अदातव्यमभक्तेभ्यो गोपनीयं स्वयोनिवत् ॥६॥

॥ इति श्रीरुद्रयामले तन्त्रे भैरव-भैरवी संवादे श्रीबाला त्रिपुरसुन्दरी स्तोत्रम् ॥

॥ श्री सौभाग्य कवच स्तोत्रम् ॥

कैलास शिखरे रम्ये सुखासीनं सुरार्चितम्, गिरीशं गिरिजा स्तुत्वा स्तोत्रैर्वेदान्त पारगैः ।
प्रणम्य परया भक्त्या तमपृच्छत् कृतांजलिः, रहस्यं रक्षणं किं वा सर्व सम्पत्करं वद ॥१॥

॥ श्रीशिवोवाच ॥

शृणु देवि! प्रवक्ष्यामि यस्मात् त्वं परिपृच्छसि, यस्य श्रवण मात्रेण भवभीतिर्न जायते ।
एतत् सौभाग्य कवचं रहस्याति रहस्यकम्, सौभाग्यकवचं देवि! शृणु सौभाग्यदायकम् ॥२॥

विनियोगः :- ॐ अस्य श्रीसौभाग्य कवच स्तोत्रस्य श्रीआनन्द भैरवो ऋषिः। अनुष्टुप् छन्दः। श्रीसौभाग्य सुन्दरी देवता। ॐ क्लीं सौः बीजं। ह्रीं क्लीं शक्तिः। आं ह्रीं क्रों कीलकं। सर्वसौभाग्य सिद्धयर्थे पाठे विनियोगः।

ऋष्यादिन्यास :- शिरसि श्रीआनन्दभैरवाय ऋषये नमः। मुखे अनुष्टुप्छन्दसे नमः। हृदि श्री सौभाग्यसुन्दरी देवतायै नमः। गुह्ये ॐ क्लीं सौः बीजाय नमः। पादयो ह्रीं क्लीं शक्तये नमः। नाभौ आं ह्रीं क्रों कीलकाय नमः। सर्वाङ्गे सर्व सौभाग्य सिद्धयर्थे पाठे विनियोगाय नमः।

षडङ्गन्यासः	करन्यासः	अङ्गन्यासः
ऐं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
क्लीं	तर्जनीभ्यां नमः	शिरसे स्वाहा
सौः	मध्यमाभ्यां नमः	शिखायै वषट्
ऐं	अनामिकाभ्यां नमः	कवचाय हुम्
क्लीं	कनिष्ठिकाभ्यां नमः	नेत्रत्रयाय वौषट्
सौः	करतल करपृष्ठाभ्यां नमः	अस्त्राय फट्

॥ ध्यानम् ॥

ऐहिक परफलदात्रीमैशानीं मानसी भावये मुद्राम् ।
ऐन्दव - कलावतंसामैश्वर्य स्फुरण परिणतिं जगताम् ॥१॥

क्लीवत्व - दैत्यहन्त्रीं क्लिन्न मनस्कां महेश्वराश्लिष्टाम् ।
क्लृप्त जनेष्टकर्त्रीं कल्पित लोकप्रभां नमामि कलाम् ॥२॥
सौभाग्यदिव्यक - निधिं सौरभ कचवृन्द विचलदलिमालाम् ।
सौशील्यशेष तल्पां सौन्दर्यविभा - मंजरीं कलये ॥३॥
पाशपाणि सृणि पाणि भावये चापपाणि शरपाणि दैवतम् ।
यत्प्रभा पटल - पाटलं जगत् - पद्मरागमणिमण्डपायते ॥४॥
हेमाद्रौ हेमपीठ - स्थितामखिल - सुरैरीड्यमानां विराजत् ।
पुष्पेष्विष्वास पाशांकुश करकमलां रक्तवेषाति - रक्ताम् ॥५॥
दिक्षूद्यद्भिश्चतुर्भिर्मणिमय - कलशैः पञ्च शक्त्याञ्चितैः ।
स्वभ्रष्टैः क्लृप्ताभिषेकां भजत भगवतीं भूतिदामन्त्य यामे ॥६॥

॥ कवच स्तोत्रम् ॥

शिखाग्रं सततं पातु ममत्रिपुर सुन्दरी । शिरः कामेश्वरी नित्या तत् पूर्वं भगमालिनी ॥१॥
नित्य क्लिन्नाऽवताद्दक्षं भेरुण्डा तस्य पश्चिमम् । वह्नि वासिन्यवेद् वामं मुखं विद्येश्वरी तथा ॥२॥
शिवदूती ललाटं मे त्वरिता तस्य दक्षिणम् । तद्वाम पार्श्वमवतात् तथैव कुलसुन्दरी ॥३॥
नित्या पातु भ्रुवोर्मध्यं भ्रुवं नीलपताकिनी । वामभ्रुवं तु विजया नयनं सर्वमङ्गला ॥४॥
ज्वालामालिन्यक्षि वामं चित्रा रक्षत् पक्ष्मणी । दक्ष श्रोत्रं महानित्या वामं पातु महोद्यमा ॥५॥
दक्षं वामं च वटुका कपोलौ क्षेत्रपालिका । दक्षनासा पुटं दुर्गा तदन्यं तु भारती ॥६॥
नासिकाग्रं सदा पातु महालक्ष्मीर्निरन्तरम् । अणिमा दक्षकटिं महिमा च तदन्यकम् ॥७॥
दक्ष गण्डं च गरिमा लघिमा चोत्तरं तथा । ऊर्ध्वोष्ठकं प्राप्तिसिद्धिः प्राकाम्यमधरोष्ठकम् ॥८॥
ईशित्वमूर्ध्व - दन्तांश्च ह्यधो दन्तान् वशित्वकम् । रस सिद्धिश्च रसनां मोक्ष सिद्धिश्च तालुकम् ॥९॥
तालुमूलद्वयं ब्राह्मी माहेश्वर्यौ च रक्षताम् । कौमारी चिबुकं पातु तदधः पातु वैष्णवी ॥१०॥
कण्ठं रक्षतु वाराही चैन्द्राणी रक्षतादधः । कृकाटिकां तु चामुण्डा महालक्ष्मीस्तु सर्वतः ॥११॥
सर्वसंक्षोभिणीमुद्रा स्कन्धं रक्षतु दक्षिणम् । तदन्यं द्राविणीमुद्रा पायादंस द्वयं क्रमात् ॥१२॥
आकर्षणी वश्यमुद्रा चोन्मादिन्यथ दक्षिणम् । भुजं महांकुशा वामं खेचरी दक्ष - कक्षकम् ॥१३॥
वाम कक्षं बीजमुद्रा योनिमुद्रा तु दक्षिणम् । लसत् त्रिखण्डिनीमुद्रा वामभागं प्रपालयेत् ॥१४॥
श्रीकामाकर्षिणी नित्या रक्षताद् दक्षकूर्परम् । कूर्परं वाममवतात् सा बुद्ध्याकर्षिणी तथा ॥१५॥
अहङ्काराकर्षिणी तु प्रकाण्डं पातु दक्षिणम् । शब्दाकर्षिणिका वामं स्पर्शाकर्षिणिकाऽवतु ॥१६॥
प्रकोष्ठं दक्षिणं पातु रूपाकर्षिणिकेतरम् । रसाकर्षिणिका पातु मणिबन्धं च दक्षिणम् ॥१७॥
गन्धाकर्षिणिका वामं चित्ताकर्षिणिकाऽवतु । करभं दक्षिणं धैर्याकर्षिणी पातु वामकम् ॥१८॥

स्मृत्याकर्षिण्यसौ वामं नामाकर्षिणिकेतरम् । बीजाकर्षिणिका पायात् सततं दक्षिणांगुलीः ॥१९॥
आत्माकर्षिणिका त्वन्या अमृताकर्षिणी नखान् । शरीराकर्षिणी वाम नखान् रक्षतु सर्वदा ॥२०॥
अनङ्गकुसुमा शक्तिः पातु दक्षिण स्तनोपरि । अनङ्गमेखला चान्य स्तनोर्ध्वमभि रक्षतु ॥२१॥
अनङ्ग मदना दक्षस्तनं तच्चूचुकं पुनः । रक्षतादनिशं देवी ह्यनङ्ग मदनातुरा ॥२२॥
अनङ्गरेखा वामं तु वक्षोजं तस्य चूचुकम् । अनङ्गवेगिनी क्रोडमनङ्गास्यांकुशाऽवतु ॥२३॥
अनङ्गमालिनी पायाद् वक्षःस्थलमहर्निशम् । सर्वसंक्षोभिणी शक्तिहृत् सर्वद्राविणी परा ॥२४॥
कुक्षिं सर्वाकर्षिणी तु पातु पार्श्वं च दक्षिणम् । आह्लादिनी वाम पाशर्वं मध्यं सम्मोहिनी चिरम् ॥२५॥
सा सर्व स्तम्भिनी पृष्ठं नाभिं वै सर्वजृम्भिणी । वशङ्करी वस्तिदेशं सर्वरंजिनी मे कटिम् ॥२६॥
सा तु सर्वोन्मादिनी मे पायाज्जघन मण्डलम् । सर्वार्थसाधिनी शक्तिः नितम्बं रक्षतान्मम ॥२७॥
दक्ष स्फिचं सदा पांतु सर्वसम्पत्ति पूरिणी । सर्वमन्त्रमयी शक्तिः पातु वाम स्फिचं मम ॥२८॥
पायात् कुकुन्दर द्वन्दं सर्वद्वन्द्वक्षयङ्करी । सर्वसिद्धिप्रदा देवी पातु दक्षिण वंक्षणम् ॥२९॥
सर्व सम्पत्प्रदा देवी पातु मे वाम वंक्षणम् । सर्वप्रियङ्करी देवी गुह्यं रक्षतु मे सदा ॥३०॥
मेढ्रं रक्षतु मे देवी सर्वमङ्गलकारिणी । सर्वकामप्रदा देवी पातु मुष्कं तु दक्षिणम् ॥३१॥
पायात् तदन्यमुष्कं तु सर्वदुःख - विमोचिनी । सर्वमृत्युप्रशमनी देवी पातु गुदं मम ॥३२॥
पातु देवी गुह्य मध्यं सर्वविघ्ननिवारिणी । सर्वाङ्गसुन्दरी देवी रक्षताद् दक्ष सक्थिकम् ॥३३॥
वाम सक्थि तलं पायात् सर्वसौभाग्य दायिनी । अष्ठीवं मम सर्वज्ञा देवी रक्षतु दक्षिणम् ॥३४॥
वामाष्ठीवं सर्वशक्तिः देवी पातु युगं मम । सर्वैश्वर्यप्रदा देवी दक्ष जानुं सदाऽवतु ॥३५॥
सर्वज्ञानमयी देवी जानुमन्यं ममावतात् । अव्याद् देवी दक्ष जङ्घां सर्वव्याधिविनाशिनी ॥३६॥
तदन्यां पातु देवी सा सर्वाधार स्वरूपिणी । सर्व पापहरा देवी गुल्फं रक्षतु दक्षिणम् ॥३७॥
सर्वानन्दमयी देवी वाम गुल्फं सदाऽवतु । पार्ष्णि मे दक्षिणं पायात् सर्व रक्षास्वरूपिणी ॥३८॥
अव्यात्सदा सदापार्ष्णि सर्वेप्सित फल प्रदा । दक्षांघ्रि पार्श्वं वशिनी पूर्व वाग् देवता मम ॥३९॥
सर्वं कामेश्वरी चोर्ध्वमधो वाग् देवता मम । मोदिनी प्रपदं पातु विमला दक्षिणेतरे ॥४०॥
अंगुलीररुणा पातु दक्षपाद नखोज्ज्वजा । तदन्या जयिनी पातु सदा सर्वेश्वरी मम ॥४१॥
दक्ष वामपादतलं कौलिनी देवता मम । कुर्वन्तु जृम्भणा बाणाः त्रैलोक्याकर्षणं मम ॥४२॥
मोहं संहरतादिक्षु कोदण्डं भृङ्गमौविक्रम् । करोतु सततं पाशो वशीकरणमद्भुतम् ॥४३॥
विदध्यादंकुशं नित्यं स्तम्भनं शत्रु सङ्कटे । पीठं मे कामरूपाख्यं पातु कामान्तिकं मनः ॥४४॥
पूर्णं पूर्णगिरेः पीठं कान्तिं मे जनयेत् सदा । जालन्धरमन्य जालन्धर पीठं मे रक्षतु ॥४५॥
सायुज्ये नियतां प्रज्ञां श्रीपीठं श्रीकरं मम । कामेश्वरी त्वात्मतत्त्वं रक्षेद् वज्रेश्वरी तथा ॥४६॥
विद्यातत्त्वं शैवतत्त्वं पायाच्छ्रीभगमालिनी । कामं विद्यान्महाशत्रूनमृतार्णव मानसम् ॥४७॥

क्रोधं क्रोधापहा हन्यान्मन्युं पैताम्बुजासनम् । लोभ चिदासनं हन्याद् देव्यात्मामृतरूप भाक् ॥४८।
मोहं संहरताच्चक्रं मदं मन्त्रासनं मम । मात्सर्यं नाशयेन्नित्यं मम सान्ध्यासनं तथा ॥४९॥
आधारं त्रिपुरा रक्षेत् स्वाधिष्ठानं पुरेश्वरी । मणिपूरं मणिद्योता पायात् त्रिपुरसुन्दरी ॥५०॥
अव्यादनाहतं भव्या नित्यं त्रिपुरवासिनी । विशुद्धिं त्रिपुरा श्रीश्च आज्ञां त्रिपुरमालिनी ॥५१॥
इडां मे त्रिपुरसिद्धा त्रिपुराचापि पिङ्गलाम् । सुषुम्नां पातु मे नित्या पायात् त्रिपुरभैरवी ॥५२॥
त्रैलोक्यमोहनं चक्रं रोम कूपांश्च रक्षतु । सर्वाशापूरकं चक्रं सप्तधातुँश्च रक्षतु ॥५३॥
सर्वसंक्षोभणं चक्र प्राणाद्यं वायु पञ्चकम् । सौभाग्यदायकं चक्रं नागाद्यनिल पञ्चकम् ॥५४॥
सर्वार्थसाधकं चक्रं कारणानां चतुष्टयम् । सर्वरक्षाकरं चक्रं रक्षतान्मे गुणत्रयम् ॥५५॥
सर्वरोगहरं चक्रं पायात् पुर्यष्टकं मम । सर्वसिद्धिप्रदं चक्रमव्यान्मे कोश पञ्चकम् ॥५६॥
सर्वानन्दमयं चक्रं यशः कीर्ति च रक्षतु । सौन्दर्यं मन्मथः पायाद् धृतिश्चापि रतिं मम ॥५७॥
प्रीतिं मे पातु या प्रीतिः रूपं पातु वसन्तकः । संकल्पं कल्पकोद्यानं महालक्ष्मी श्रियं मम ॥५८॥
कान्तिं कपालिनी रक्षेत् मन्दिरं मणिमण्डपः । पुत्रान् शङ्खनिधिः पायाद् भार्यां पद्मनिधिस्तथा ॥५९॥
मार्गे क्षेमङ्करी रक्षेत् मातङ्गी मुकुटं तथा । योगिनी प्रकटाद्यास्ता नव द्वाराणि पान्तु मे ॥६०॥
भोजने मामन्नपूर्णा मातङ्गी क्रीडनेऽवतात् । वने रक्षतु मां दुर्गा जाग्रती दुष्टनिग्रहे ॥६१॥
त्रिधाऽहङ्कार नैष्ठुर्य दोषत्रयं मलत्रयम् । डाकिन्यो योगिनी मुख्याः संहरन्तु ममानिशम् ॥६२॥
इच्छा शक्तिर्गुरोर्भक्तिं पातु मे ज्ञानमात्मनि । ज्ञानशक्तिः क्रियाशक्तिर्वैराग्य विषयेष्वपि ॥६३॥
हृत्- पद्मकर्णिका मध्ये ह्रींकारी परिरक्षतु । वैखरी श्रवणं पातु मध्यमा मननं पुनः ॥६४॥
योगं रक्षतु पश्यन्ती साक्षात् ज्ञानपरा मम । ब्रह्माणी जागृतं पातु शयानं वैष्णवी तथा ॥६५॥
सुषुप्तौ चण्डिका पातु तुर्या मे मोहकारिणी । सदा मां भैरवी पातु जगद्- भरण- पण्डिता ॥६६॥
चरणाम्भोरुहानन्द परामृत - रसेरिता । प्लाविनी कुण्डली पूर्णा अन्तरान्तं सदाऽवतात् ॥६७॥
अष्टदिक्षु महेन्द्राद्या सायुधाः पान्तु सर्वदा । पायादूर्ध्वां दिशं ब्रह्मा विष्णुश्चक्रायुधोप्यधः ॥६८॥
अनावृत्तानि स्थानानि कवचेन तु यानि मे । तानि सर्वाणि रक्षन्तु शिवाद्या गुरुवः सदा ॥६९॥
एतत् सौभाग्य कवचं शाङ्करं यस्तु पाठयेत् । त्रिसन्ध्यं यः पठेद् भक्त्या शृणुयाद् वा समाहित : ॥१॥
तस्य शीघ्रेण सिध्यन्ति सिद्धयस्त्वणिमादयः । गुटिका पादुकाद्यष्ट सिद्धयः सम्भवन्ति च ॥२॥
वश्यादीन्यष्ट कर्माणि योगश्चाष्टाङ्ग संयुतः । ब्रह्मा विष्णु गिरीशेन्द्र कन्दर्प रतिभिः सह ॥३॥
विचरन्ते तदखिलान् सिद्ध गन्धर्व सेविताः । तस्य स्मरण मात्रेण ग्रह भूत पिशाचकाः ॥४॥
कीटवत् पलायन्ते कूष्माण्डा भैरवादयः । तस्यांघ्रि तोय पतनात् प्रशाम्यति महारुजाः ॥५॥

तत् पाद कमलासक्तरजो लेशाभिः मर्शनात् ।
वश्यं भवति शीघ्रेण त्रैलोक्यं स चराचरम् ।
आबाल महिला भूपाः किमू माया विमोहिताः ॥६॥

॥ श्रीललिता हृदय स्तोत्रम् ॥

॥ अगस्त्य उवाच ॥

हयग्रीव! दया सिन्धो! ललितायाः शुभं मम । हृदयं च महोत्कृष्टं कथयस्व महामुने ॥१॥

॥ हयग्रीव उवाच ॥

शृणु त्वं शिष्य! वाक्यं मे हृदयं कथयामि ते । महादेव्यास्तथा शक्तेः प्रीतिसम्पाद कारकम् ॥२॥

बीजात्मकं महामन्त्र रूपकं परमं निजम् । कामेश्वर्याः स्वाङ्गभूतं डामर्यादिभिरावृतम् ॥३॥

कामाकर्ष्यादि संयुक्तं पञ्चकाम- दुघान्वितम् । नववल्लि समायुक्तं कादि हादि मतान्वितम् ॥४॥

त्रिकूट दर्शितं गुप्तं हृदयोत्तममेव च । मूलप्रकृति व्यक्तादि कला शोधन कारकम् ॥५॥

विमर्श - रूपकं चैव विद्या शक्ति षडङ्गकम् । षडध्व मार्ग पीठस्थं सौर शाक्तादि संज्ञकम् ॥६॥

अभेद - भेदनाशं च सर्व वाग्वृत्ति दायकम् । तत्त्वचक्र मयं तत्त्व बिन्दु नाद कलान्वितम् ॥७॥

प्रभायन्त्र समायुक्तं मूलचक्र मयान्वितम् । कण्ठशक्ति मयोपेतं भ्रामरी शक्तिरूपकम् ॥८॥

विनियोग :- ॐ अस्य श्रीललिता हृदयस्तोत्रमाला मन्त्रस्य श्रीआनन्द भैरव ऋषिः । अमृत विराट् छन्दः । श्रीललिता वाग्देवता प्रसाद सिद्धये जपे विनियोगः ।

ऋष्यादि न्यासं कृत्वा कर सम्पुटे कूटत्रयं द्विरावृत्य षडङ्गद्वयम् कुर्यात् ।

॥ ध्यानम् ॥

द्रां द्रीं क्लीं बीजरूपे, हासित कह कहे, ब्रह्म देहान्तरङ्गे !
ब्लूं सः क्रों वर्णमाले, सुरगणनमिते, तत्त्व रूपे! हसखफ्रें ॥
ह्सां ह्सीं ह्सौं बीजरूपे, परमसुख करे, वीर मातः! स्वयम्भूः ।
ऐं हसखफ्रें बीजतत्त्वे, कलित कुल कले! ते नमः शुद्ध वीरे ॥

इति ध्यात्वा मनसा पञ्चधोपचर्य नवमुद्राः प्रदर्श्य, मूलं त्रिवारं जप्त्वा योनि मुद्रया प्रणमेत् ।

॥ स्तोत्रम् ॥

हृदयाम्बुज - मध्यस्था ब्रह्मात्मैक्य प्रदायिनी । त्रिपुराम्बा त्रिकोणस्था पातु मे हृदयं सदा ॥१॥

अवर्ण- मालिका शक्तिर्वर्णमाला स्वरूपिणी । नित्याऽनित्या तत्त्वगा सा निराकार मयान्विता ॥२॥

शब्द ब्रह्ममयी शब्द बोधाकार स्वरूपिणी । सांविदी वादि संसेव्या सर्व श्रुतिभिरीडिता ॥३॥

महावाक्योपदेशानी स्वर नाडी - गुणान्विता । ह्रींकारचक्र मध्यस्था ह्रीमुद्यान विहारिणी ॥४॥

ह्रीं मोक्षकारिणी ह्रीं ह्रीं, महाह्रींकार - धारिणी । कालकण्ठी महादेवी कुरुकुल्ला कुलेश्वरी ॥५॥

ऐं ऐं प्रकाशरूपेण, ऐं बीजान्तर वासिनी । ईशस्था ईदृशी चेशी ईं ईं बीजकरी तथा ॥६॥

लक्ष्मीनारायणान्तःस्था लक्ष्यालक्ष्यकरी तथा । शिवस्था हेतिवर्णस्था सशक्तेवर्ण - रूपिणी ॥७॥

कमलस्था कलामाला ह्रां ह्रीं ह्रीं ह्रीं मुखी तथा । लावण्यसुन्दरी पातु लक्ष्यकोणाग्रमन्विता ॥८॥

लांलांलींलीं सुरैः स्तुत्या सांसींसूंसैं सुरार्चिता । कां कीं कूं काकिनी सेव्या लां लीं लूं काकिनीस्तुता ॥९॥

बिन्दुचक्रेश्वरी पातु द्वितीयावर्ण - देवता । वसु कोणेश्वरी देवी द्विदशारेश्वरी च माम् ॥१०॥
मन्वस्त्रचक्रमध्यस्था नागपत्रेश्वरी सदा । षोडशारेश्वरी नित्या मण्डलत्रयदेवता ॥११॥
भूपुरत्रयमध्यस्था द्वादशग्रन्थि भेदिनी । हंसी हसी सुबीजस्था हरिद्रादिभिरर्चिता ॥१२॥
अनन्तकोटि जन्मस्था जन्माजन्मत्ववर्जिता । अमृताम्भोधिमध्यस्था अमृतेशादिसेविता ॥१३॥
मृतामृतकरी मूलविराट् शक्तिः परात्मिका । आत्मनं प ातु मे नित्यं तथा सर्वाङ्गमेव च ॥१४॥
अष्टदिक्षु कराली सा ऊर्ध्वाधः प्रान्तके तथा । गुरुशक्तिमहाविद्या गुरुमण्डलगामिनी ॥१५॥
सर्वचक्रेश्वरी सर्वब्रह्मादिभिः सुवन्दिता । सत्त्वशक्तिः रजःशक्तिस्तमःशक्ति परात्मिका ॥१६॥
प्रपञ्चेशी सुकालस्था महावेदान्त गर्भिता । कूटस्था कूटमध्यस्था कूटाकूटविवर्जिता ॥१७॥
योगाङ्गी योगमध्यस्था अष्टयोग प्रदायिनी । नवशक्तिः कृती माता अष्टसिद्धि स्वरूपिणी ॥१८॥
नववीरावली रम्या मुक्तिकन्या मुकुन्दगा । उपदेशकरी विद्या महामुख्यविराजिता ॥१९॥
मुख्याऽमुख्या महामुख्या मूल बीज प्रवर्तिका । दिक्पालकाः सदापान्तु श्रीचक्राधि देवताः ॥२०॥
दिग्योगिन्यष्टकं पातु तथा भैरव चाष्टकम् । षडङ्गदेवताः पान्तु नित्या षोडशिकास्तथा ॥२१॥
नाथशक्तिः सदापातु नित्या त्रिकोणान्तर दीपिका । त्रिसारा त्रयकर्माणी नाशिनी त्रयं दर्शति ॥२२॥
त्रिकाला शोषणी शोषकारिणी शोषणेश्वरी । भुक्तिमुक्तिप्रदा बाला भुवनाम्बा बगलेश्वरी ॥२३॥
अतृप्तिस्तृप्ति सन्तुष्टा तृप्ता तृप्तकरी सदा । आम्नायशक्तयः पान्तु आदिशेष - सुतल्पिनी ॥२४॥
राज्यं त्वं देहि मे नित्यं आदिशम्भुस्वरूपिणी । सर्वरोगहरा सर्वकैवल्यपद दायिनी ॥२५॥

॥ फलश्रुति ॥

इदं तु हृदयं दिव्यं ललिता प्रीतिदायकम् । अनेन च समं नास्ति स्तोत्रं प्रख्यात वैभवम् ॥२६॥
शक्तिरूपं शक्तिगुप्तं प्रकटाङ्गं प्रभुं शुभम् । मूलविद्यात्मकं मूलब्रह्मसम्भव कारणम् ॥२७॥
नादादिशक्ति संयुक्तमभूतमद्भुतं महत् । रोगहं पापहं विघ्ननाशनं विघ्नहारिणम् ॥२८॥
चिरायुष्यप्रदं सर्वमृत्यु दारिद्र्यनाशनम् । क्रोधहं मुक्तिदं मुक्तिदायकं परं मे सुखम् ॥२९॥
रुद्रदं मृडपं विष्णुं दण्डकं ब्रह्मरूपकम् । विचित्रं च सुचित्रं च सुन्दरं च सुगोचरम् ॥३०॥
नाभक्ताय न दुष्टाय नाविश्वस्ताय देशिकः । न दापयेत् परंविद्याहृदयं मन्त्र गर्भितम् ॥३१॥
स्तोत्राणामुत्तमं स्तोत्रं मन्त्राणामुत्तमं मनुम् । वीजानामुत्तमं बीजं शाक्तानामुत्तमं शिवम् ॥३२॥
पठेद् भक्त्या त्रिकालेषु अर्धरात्रे तथैव च । वाक् सिद्धि दायकं नित्यं परविद्याविमोहकम् ॥३३॥
स्वविद्यास्थापकं चान्यद् यन्त्रतन्त्रादिभेदनम् । कृत्तिका नक्षत्र कूर्माख्ये चक्र स्थित्वा जपेन्मनुम् ॥३४॥

॥ इति श्रीमहत्तरयोनि विद्याया महातन्त्रे श्रीललिता हृदयं सम्पूर्णम् ॥

॥ श्रीललिता सौभाग्य प्रदाष्टोत्तर शतनाम स्तोत्रम् ॥

विनियोगः – ॐ अस्य श्रीसौभाग्याष्टोत्तर शतनाम स्तोत्रस्य श्रीभार्गव ऋषिः, अनुष्टुप् छन्दः, क-५ कएईल ह्रीं बीजं, स-४ सकल ह्रीं शक्तिः, ह-६ हसकहल ह्रीं उत्कीलनं, श्रीललिताम्बा देवता प्रसाद सिद्धये पाठे विनियोगः।

ऋष्यादि न्यासः :- श्रीभार्गव ऋषये नमः शिरसि। अनुष्टुप् छन्दसे नमः मुखे। श्रीललिताम्बादेवतायै नमः हृदयाय। कएईल ह्रीं बीजाय नमः लिङ्गे। सकलह्रीं शक्तये नमः नाभौ। हसकहल ह्रीं उत्कीलनाय नमः सर्वाङ्गे। श्रीललिताम्बा प्रसाद सिद्धये पाठे विनियोगाय नमः अंजलौ।

मूल मंत्र से षडङ्ग न्यासादि कर ध्यान करे। यथा –

बालार्क – मण्डलाभासां चतुर्बाहुं त्रिलोचनाम् ।
पाशांकुश धनुर्वाणन् धारयन्तीं शिवां भजे ॥

ध्यान कर मानस पूजा करे। योनि मुद्रा से प्रणाम कर स्तोत्र पढ़ें। यथा –

ऐं ह्रीं श्रीं ॐ कामेश्वरीकामशक्तिः कामसौभाग्यदायिनी। कामरूपाकामकला कामिनी कमलासना ॥१॥
कमला कलना हीना कमनीया कलावती । पद्मपा भारती सेव्या कल्पिताऽशेष संस्थितिः ॥२॥
अनुत्तराऽनघाऽनन्ताऽद्भुत रूपाऽनलोद्भवा । अतिलोक चरित्राऽतिसुन्दर्यति – शुभप्रदा ॥३॥
विश्वाद्या चातिविस्ताराऽर्चन – तुष्टाऽमितप्रभा । एक – रूपैक वीरैक नाथैकान्तार्चन प्रिया ॥४॥
एकैक –भावतुष्टैक रसैकान्त जनप्रिया । एधमानप्रभा वैध भक्तपातकनाशिनी ॥५॥
एलामोद मुखैर्नोऽद्रि शक्तायुध समस्थितिः । ईहा शून्येप्सितेशादि सेव्येशानवराङ्गना ॥६॥
ईश्वराज्ञापिकेकार – भाव्येप्सित फलप्रदा । ईशानति हरेशैषा चारुणाक्षीश्वरेश्वरी ॥७॥
ललिता ललनारूपा लयहीना लसत्तनुः । लयसर्वा लयक्षोणिर्लय – कर्त्री लयात्मिका ॥८॥
लघिमा लघुमध्यामढ्या ललमाना लघुद्रुता । हयारूढा हताऽमित्रा हरकान्ता हरिस्तुता ॥९॥
हयग्रीवेष्टदा हालाप्रिया हर्षसमुद्भवा । हर्षणा हल्लकाभाङ्गी हस्त्यन्तैश्वर्य- दायिनी ॥१०॥
हलहस्तार्चितपदा हविर्दान प्रसादिनी । रामा रामार्चिता राज्ञी रम्या रवमयी रतिः ॥११॥
रक्षिणी रमणी राकाऽऽदित्यादिमण्डलप्रिया । रक्षिताऽखिल लोकेशी रक्षोगण निषूदिनी ॥१२॥
अन्तान्त कारिण्यम्भोज क्रियान्तक भयङ्करी । अम्बुरूपाम्बुज कराऽम्बुज – जातवरप्रदा ॥१३॥
अन्तः पूजा क्रियान्तःस्था अन्तर्ध्यान वचोमयी । अन्तकाऽराति वामाङ्ग स्थिताऽन्तःसुख रूपिणी ॥१४॥
सर्वज्ञा सर्वगा सारा समा समसुखा सती । सन्ततिः सन्तता सोमा सर्वा सांख्या सनातनी ॥१५॥

॥फलश्रुति॥

एतत् ते कथितं देवि! नाम्नामष्टोत्तरं शतम् । अति गोप्यमिदं स्तोत्रं सर्वतो सारमुद्धृतम् ॥१॥
एतच्छदृशं स्तोत्रं त्रिषुलोकेषु दुर्लभम् । अप्रकाश्यमभक्तानां पुरतो देवता द्विषम् ॥२॥

एतत् सदा शिवो नित्यं पठन्त्यन्ये हरादयः । एतत् प्रभावात् कन्दर्पः त्रैलोक्यं जयति क्षणात् ॥३॥
सौभाग्याष्टोत्तर शतनामस्तोत्र मनोहरम् । यस्त्रिसन्ध्यं पठेन्नित्यं न तस्य भुवि दुर्लभम् ॥४॥
श्रीविद्योपासन - वतौ एतदावश्यकं मतम् । सकृदेतत् प्रपठतां नान्यकर्म विलुप्यते ॥५॥
अपठित्वा स्तोत्रमिदं नित्यं नैमितिकं कृतम् । व्यर्थी भवति तन्नर कृतं कर्म यथा-तथा ॥६॥
सहस्रनाम पाठादौ पठेत् स्तोत्रं शुभप्रदम् । सहस्रनाम पाठस्य फलं शतगुणं भवेत् ॥७॥
सहस्रपठनाद् ध्याता वीक्षणान्नाशयेद् रिपून् । करवीरैः रक्तपुष्पैर्हुत्वा लोकान् वशं नयेत् ॥८॥
बाह्याभ्यन्तर करणानां रूप ग्रहण योग्यतास्तीत्यावाहनं। तस्य बाह्याभ्यन्तर करणानामेक रूप विषय ग्रहणमसनं। रक्त शुक्ल पदैकी करणं पाद्यं। उज्ज्वलदामोदाऽऽनन्दा सानन्दनमर्घ्यं। स्वच्छास्वतः शक्तिरित्याचमनं। चिच्चन्द्रमयी स्मरणं स्नानं। चिदग्निस्वरूप परमानन्दशक्ति स्मरणं वस्त्रं। प्रत्येकं सप्तविंशतिधा भिन्नत्वेन इच्छा क्रियात्मक ब्रह्मग्रन्थिमयी सतन्तु ब्रह्मनाडी ब्रह्मसूत्रं सव्यातिरिक्त वस्त्रं। सङ्गरहितं स्मरणं विभूषणम्। स्वच्छन्द परिपूर्ण स्मरणं गन्धः। समस्त विषयाणां मनःस्थैर्येणानु सन्धानं कुसुमं। तेषामेव सर्वदा स्वीकरणं धूपः। पवनाच्छिन्नोर्ध्व ज्वाला सच्चिदाह्लादाकाशदेहो दीपः। समस्त यातायात वर्जनं नैवेद्यं। अवस्था त्रयैकीकरणं ताम्बूलं। मूलाधारादाब्रह्मरन्ध्र पर्यन्तं ब्रह्मरन्ध्रादामूलाधार पर्यन्तं गतागतरूपेण प्रादक्षिण्यं। तुरीयावस्थानं संस्कार देहशून्यं प्रमादितावति मज्जनं बलि हरणं। सत्वमस्ति कर्त्तव्यमकर्त्तव्यमौदासीन्यमात्म विलापनं होमः। भावना विषयाणामभेद भावना तर्पणं। स्वयं तत् पादुका निमज्जनं परिपूर्ण ध्यानं।

एवं मूर्तित्रयं भावनया युक्तो मुक्तो भवति। तस्य देवतात्मैक्य सिद्धिः चितिकार्याण्यप्रयत्नेन सिध्यन्ति स एव शिव योगीति कथ्यते।

॥ इति श्री ललितोपनिषत् ॥

॥ श्रीत्रिपुरोपनिषत् ॥

ॐ वाङ् मे मनसि प्रतिष्ठिता, मनो मे वाचि प्रतिष्ठितमाविरावीर्म एधि वेदस्य मे आणीस्थः, श्रुतं मे म प्रहासीरनेनाहोऽधीतेनाहोरात्रान्त्संदधामि। ऋतं वदिष्यामि। सत्यं वदिष्यामि। तन्मामवतु। तदवक्तारमवतु। अवतु माम्। अवतु वक्तारम्॥

ॐ शान्तिः शान्तिः शान्तिः

ॐ तिस्रः पुरस्त्रिपथा विश्वचर्षणी। अत्राकथा अक्षराः सन्निविष्टाः ।
अधिष्ठायैनामजरा पुराणी। महत्तरा महिमा देवतानाम् ॥१॥
नवयोनीर्नवचक्राणि दीधिरे। नवैव योगा नवयोगिन्यश्च ।
नवानां चक्रे अधिनाथाः स्योना। नवमुद्रा नवभद्रा महीनाम् ॥२॥
एका सा आसीत् प्रथमा सा । नवासीदासोन विंशदासोनत्रिंशत् ।
चत्वारिंशदथ तिस्रः समिधा । उशतीरिव मातरो माऽऽविशन्तु ॥३॥
ऊर्ध्वज्वलज्ज्वलन-ज्योतिरग्रे। तमो वै तिरश्चीनमजरं तद्रजोऽभूत् ।
आनन्दनं मोदनं ज्योतिरिन्दोरेता उ वै मण्डला मण्डयन्ति ॥४॥
तिस्रश्च रेखाः सदनानि भूमेस्त्रि-विष्टपास्त्रिगुणास्त्रिप्रकाशाः ।
एतत् पुरं पूरकं पूरकाणामत्र प्रथेते मदनो मदन्या ॥५॥
मदन्तिका मानिनी मङ्गला च । सुभगा च सा सुन्दरी शुद्धमत्ता ।
लज्जा मतिस्तुष्टिरिष्टा च पुष्टा लक्ष्मीरुमा ललिता लालपन्ती ॥६॥

इमां विज्ञाय सुधया मदन्ति । परिस्रुता तर्पयन्तः स्वपीठम् ।
नाकस्य पृष्ठे महतो वसन्ति । परंधाम त्रैपुरं चाविशन्ति ॥७॥
कामो योनिः कमला वज्रपाणिर्गुहा हसा मातरिश्वाऽभ्रमिन्द्रः ।
पुनर्गुहा सकला मायया च । पुरूच्येषा विश्वमाताऽऽदि विद्या ॥८॥
षष्ठं सप्तममथ वह्नि सारथिमस्या । मूल त्रिकमावेशयन्तः ।
कथ्यं कविं कल्पकं काममीशं । तुष्टुवांसो अमृतत्वं भजन्ते ॥९॥
त्रिविष्टपं त्रिमुख विश्व मातुर्नव - रेखाः स्वर मध्यं तदीले ।
वृहत् तिथीर्दश - पञ्चादिनित्या । सा षोडशी पुरमध्यं विभर्त्ति ॥१०॥
द्वा मण्डला द्वा स्तना बिम्बमेकं । मुखं चाधस्त्रीणि गुहा सदनानि ।
कामीं कलां काम्यरूपा विदित्वा । नरो जायते कामरूपश्च काम्यः ॥११॥
परिस्रुतं झषमाद्यं पलं व । भक्तानि योनीः सुपरिष्कृतानि ।
निवेदयन् देवतायै महत्यै । स्वात्मीकृत्य सुकृती सिद्धिमेति ॥१२॥
सृण्येव सितया विश्वचर्षणिः । पाशेन प्रतिबध्नात्यभीकान् ।
इषुभिः पञ्चभिर्धनुषा च विध्यत्यादि-शक्तिररुणा विश्वजन्या ॥१३॥
भगः शक्तिर्भगवान् काम ईश उभा दातारावेह सौभगानाम् ।
समप्रधानौ समसत्त्वौ समोजौ तयोः शक्तिरजरा विश्वयोनिः ॥१४॥
परिस्रुतौ हविषा भावितेन प्रसंकोचे गलिते वै मनस्कः ।
शर्वः सर्वस्य जगतो विधाता धर्ता हर्ता विश्वरूपत्वमेति ॥१५॥
एषर्ग्यजुः परमेतच्च सामेवायमथर्वेयमन्या च विद्या ॐ ।
इयं महोपनिषत् त्रिपुरायाः यामक्षयं परमे गीर्भिरीट्टे ॥१६॥

॥ ॐ ह्रीं ॐ ह्रीमिति त्रिपुरोपनिषत् ॥

॥ श्री महात्रिपुरसुन्दरी कवचम् ॥

॥ श्री ईश्वर उवाच ॥

शृणु देवि! प्रवक्ष्यामि कवचं सुन्दरी प्रियम् । रहस्यामि रहस्यं च मन्त्ररूपमिदं प्रिये ॥

॥ श्रीपार्वत्युवाच ॥

भगवन्! सर्वलोकेश! सर्वलोकैक वन्दित! गुह्याद् गुह्यतमं तत्त्वं श्रोतुमिच्छामि तत्त्वतः ॥

विनियोगः - अस्य श्री महात्रिपुरसुन्दरी कवच स्तोत्र मंत्रस्य श्री दक्षिणामूर्ति ऋषिः, अनुष्टुप्छंदः, श्री महात्रिपुरसुन्दरी देवता, ऐं-५ कएईल ह्रीं बीजं, क्लीं-६ हसकहल ह्रीं कीलकं, सौः स-४ सकल ह्रीं शक्तिः, सर्वाभीष्टसिद्ध्यर्थं श्री महात्रिपुरसुन्दरी कवच स्तोत्र पाठे विनियोगः ।

ऋष्यादिन्यासं कृत्वा मूलमन्त्रेण षडङ्गन्यासं कुर्यात्।

॥ ध्यानम् ॥

स कुंकुम - विलेपनामलिक - चुम्बिकस्तूरिकाम्
स - मन्द - हसितेक्षणां स शरचाप पाशाङ्कुशाम् ।
अशेष जन मोहिनीमरुण - माल्य - भूषाम्बरां
जपाकुसुम भासुरां जप विधौ स्मरेदम्बिकाम् ॥१॥
चतुर्भुजे! चन्द्रकलावतंसे कुचोन्नते कुंकुम रागशोणे ।
पुण्ड्रेक्षु पाशांकुश पुष्पवाण हस्ते नमस्ते जगदेकमातः ॥२॥

मानसोपचारेण भगवती सम्पूज्य विधिना कवचं पठेत् -

ककारः पातु शीर्षं मे एकारः पातु फालके । ईकारः पातु वक्त्रं मे लकारः कूर्पयुग्मके ॥१ ।
ह्रींकारः पातु हृदयं वाग्भवश्च सदाऽवतु । हकारः पातु जठरं सकारो नाभि देशके ॥२॥
ककारः पार्श्वभागे च हकारः पातु पृष्ठके । लकारश्च नितम्बके मे ह्रींकारः पातु मूलके ॥३॥
कामराजः सदापातु जठरादि प्रदेशके । सकारः पातु कट्यां मे ककारः पातु लिङ्गके ॥४॥
लकारो जानुनी पातु ह्रींङ्कारो जङ्घ युग्मके । शक्तिबीजं सदा पातु मूलविद्या सदाऽवतु ॥५॥
त्रिपुरा मां सदा पातु त्रिपुरेशी च सर्वदा । त्रिपुरासुन्दरी पातु वसुपत्रस्य देवता ॥६॥
त्रिपुरावासिनी पातु त्रिपुराश्रीः सदाऽवतु । त्रिपुरामालिनी पातु त्रिपुरा सिद्धिसदाऽवतु ॥७॥
त्रिपुरा तथा पातु पातु त्रिपुराभैरवी । अणिमाद्यास्तथा पांतु ब्राह्मयाद्याः पातु मां सदा ॥८॥
नवमुद्रास्तथा पान्तु कामाकर्षणि पूर्विकाः । पान्तु मां षोडशारे तु अनङ्गकुसुमादिकाः ॥९॥
पान्तु मामष्टपत्रेषु सर्वसंक्षोभणादिकाः । पान्तु चक्रकोणेषु सर्वसिद्धि प्रदायिकाः ॥१०॥
पान्तु मां बाह्यकोणेषु मध्यादि कोणके तथा । सर्वज्ञाद्यास्तथा पान्तु सर्वाभीष्ट प्रपूरिकाः ॥११॥
वशिन्याद्यास्तथा पान्तुवसु पत्रस्य देवताः । त्रिकोणस्यान्तरालेषु पान्तु मामायुधानि च ॥१२॥
कामेश्वर्यादिकाः पांतु त्रिकोणे कोण संस्थिताः । विन्दुचक्रे तथा पातु श्रीमत् त्रिपुरसुन्दरी ॥१३॥
इदं श्रीकवचं नित्यं त्रिसन्ध्यं यः पठेन्नरः । सर्वसिद्धिमवाप्नोति सर्वाभीष्ट फलप्रदम् ॥१४॥

॥ इति श्री महात्रिपुर-सुन्दरी कवचं सम्पूर्णम् ॥

॥ श्रीपरा महायोनि कवचम् ॥

ॐ नमः शिवाय गुरवे नाद विन्दुकलात्मने। श्रीगणेशाय नमः। श्रीमन्महात्रिपुर सुन्दर्यै नमः।

॥ श्रीभैरव उवाच ॥

क्रमदीक्षा विधानानि मयोक्तानि महेश्वरि!
त्वयात्मनः कुलागारे कवचं यत् सुगोपितं ॥१॥
अधुना कृपया त्वं च तत् सर्वं वक्तुमर्हसि।

॥ श्रीभैरव्युवाच ॥

शृणु! प्रवक्ष्यामि तन्त्रसारमिदं महत् ॥२॥

एतच्छ्री कवचस्यास्य परब्रह्म ऋषिः शिवः। महती जगतीच्छन्दश्चिच्छक्तिर्देवतोच्यते ॥३॥

ऐं बीजं ह्रीं तथा शक्तिः सकलह्रीं कीलकं तथा। परब्रह्म प्राप्ति हेतौ विनियोगः प्रकीर्तितः ॥४॥

ऋष्यादिन्यासं कृत्वा कवचं पठेत्। यथा -

ॐ ह्रीं स्त्रीं हूं फट् उग्रतारा मूलाधारं ममावतु। ह्रीं भुवनेश्वरी पातु स्वाधिष्ठानं च मे सदा ॥५॥

क्रीं हूं ह्रीं दक्षिणा पातु मणिपुरं तथा मम । नमो भगवत्यै हस्ख्फ्रें कुब्जिकायै स्ह्रां स्ह्रीं स्ह्रूं ङञणनम मे अघोरा मुखि छांछीं किणि किणि विच्चे ॥६॥

अनाहतं सदा पातु कुब्जिका परमेश्वरी। फ्रं ख्फ्रें गुह्यकाली सा विशुद्धं मे च रक्षतु ॥७॥

कएईलह्रीं हसकहलह्रीं सकलह्रीं श्रीं। आज्ञाचक्रं महादेवी षोडशी पातु मे सदा ॥८॥

हस्क्ष्म्लवरयूं स्हक्ष्म्लवरयीं नादचक्रं । च मे पातु श्रीमदानन्दभैरवः ॥९॥

ह्सौः स्हौः अर्धनारीश्वरी बिन्दुश्च मेऽवतु। हंसः सोऽहं सदापातु सहस्त्रारं सदा मम ॥१०॥

कएईलह्रीं हसकहलह्रीं सकलह्रीं श्रीं । शिरो मे पातु सा देवी महात्रिपुरसुन्दरी ॥११॥

कएईलह्रीं कामेशी भ्रूमध्यं मे सदाऽवतु । हसकहलह्रीं वज्रेशी दक्षनेत्रं सदाऽवतु ॥१२॥

सकलह्रीं वामनेत्रं रक्षतु भगमालिनी । ह्स्त्रें हसकलह्रीं ह्सौः त्रिनेत्रं पातु भैरवी ॥१३॥

ह्रीं श्रीं सौः त्रिपुरासिद्धा कर्णौ मे परिरक्षतु । ह्रीं क्लीं क्षुं मां सदा पातु मुखं त्रिपुरमालिनी ॥१४॥

हसैं हस्क्लीं हसौं कण्ठं पातु श्रीत्रिपुराश्रीर्मे हैं । हक्लीं हसौं पातु वक्षस्त्रिपुरवासिनी ॥१५॥

दौवारिजौ सदापातु ह्यणिमाद्यष्ट सिद्धयः। ह्रीं क्लीं सौः पातु मे नाभिं परा त्रिपुरसुन्दरी ॥१६॥

दशमुद्रायुता देवी ममोरू पातु सर्वदा । ऐं क्लीं सौः पातु मे जानू श्रीमहात्रिपुरेश्वरी ॥१७॥

षड्दर्शनं सदापातु जङ्घायुग्मं च सर्वदा। अं आं सौः त्रिपुरा पातु पादौ च सततं नमः ॥१८॥

ॐ ह्रीं श्रीं पातु मां पूर्वे श्रीमहाभुवनेश्वरी। कएईलह्रीं दक्षिणे मां पराऽऽद्या परिरक्षतु ॥१९॥

सौः ऐं क्लीं ह्रीं श्रीं श्रीकुजापश्चिमे मांसदाऽवतु। श्रीं ह्रीं क्लीं ऐं सौः चोत्तरे मां पातु योगेश्वरी परा ॥२०॥

हसकहलह्रीं पातु मामधो वज्रयोगिनी । सकलह्रीं सा ललिता ह्यूर्ध्वे मां परिरक्षतु ॥२१॥

श्रीं ५ ॐ ३ क ५ ह ६ स ४ सौः ५ सदाऽवतु। सर्वाङ्गं मे च चिद्रूपा महात्रिपुर सुन्दरी ॥२२॥

(टीका - ॐ३= ॐ ह्रीं श्रीं। स४= सकल ह्रीं। क५= कएईल ह्रीं। श्रीं५= श्रीं ह्रीं क्लीं ऐं सौः। सौः ५= सौः ऐं क्लीं ह्रीं श्रीं। ह ६= हसकहल ह्रीं।)

॥ फलश्रुति ॥

इति ते कथितं देव! ब्रह्मानन्द मयं परं । श्रीमहायोनिराख्यातं कवचं देवदुर्लभम् ॥२३॥

मम तेजसा रचितं श्रीविद्या क्रम संयुतम् । तव स्नेहान्महादेव तवाग्रे तु मयोदितम् ॥२४॥

राज्यं देयं शिरो देयं न देयं कवचं परम् । देयं पूर्णाभिषिक्ताय स्वशिष्याय महेश्वर ॥२५॥

अन्यथा नारकी भूयात् कल्प कोटि शतैरपि । दिक्सहस्त्रेण पाठेन ह्यसाध्यं साध्यते क्षणात् ॥२६॥
लक्षं जप्त्वा महादेव तद्दशांशं हुनेद् यदि । ब्रह्मज्ञानमवाप्नोति परब्रह्मणि लीयते ॥२७॥

भूर्जे विलिख्य गुटिकां स्वर्णस्थां धारयेद् यदि ।
कण्ठे वा दक्षिणे बाहौ साक्षात् कामेश्वरो भवेत् ।
नारी वामभुजे धृत्वा भवेत् त्रिपुर सुन्दरी ॥२८॥

॥ ॐ तत्सत् श्रीमहानिर्वाणतन्त्रे श्रीमहायोनि नाम श्रीमन्महात्रिपुरसुन्दरी कवचम् ॥॥

॥ १. श्रीषोडशी कवच स्तोत्रम् ॥

॥ श्री देव्युवाच ॥

देव देव महादेव भक्तानां प्रीतिवर्द्धनं सूचितं यन् महादेव्याः कवचं कथयस्व मे ॥

॥ श्रीमहादेव उवाच ॥

शृणु देवि प्रवक्ष्यामि कवचं देव दुर्लभं । न प्रकाश्यं परंगुह्यं साधकाभीष्ट सिद्धिदं ॥
कवचस्य ऋषिर्देवि दक्षिणामूर्तिररव्ययः । छन्दः पंक्ति समुद्दिष्टं देवी त्रिपुरसुन्दरी ॥
धर्मार्थ काम मोक्षाणां विनियोगस्तु साधने । वाग्भवः कामराजश्च शक्ति बीजं सुरेश्वरि ॥

॥ कवच स्तोत्रम् ॥

वाग्भवः पातु शीर्षे मां कामराजस्तथा हृदि । शक्ति बीजं सदा पातु नाभौ गुह्ये च पादयोः ॥
ऐं क्लीं सौः वदने पातु बाला मां सर्वसिद्धये । ह्सौः सकलह्रीं पातु भैरवी कण्ठ देशतः ।
सुंदरी नाभिदेशे च शीर्षे कामकला सदा । भ्रू नासयोरन्तराले महात्रिपुरसुन्दरी ॥
ललाटे सुभगा पातु भगा मां कण्ठदेशतः । भगोदया च हृदये उदरे भग सर्पिणी ॥
भगमाला नाभिदेशे लिङ्गे पातु मनोभवा । गुह्ये पातु महादेवी राजराजेश्वरी शिवा ॥
चैतन्य रूपिणी पातु पादयोर्जगदम्बिका । नारायणी सर्वगात्रे सर्वकार्ये शुभङ्करी ॥
ब्रह्माणी पातु मां पूर्वे दक्षिणे वैष्णवी तथा । पश्चिमे पातु वाराही उत्तरे तु महेश्वरी ॥
आग्नेय्यां पातु कौमारी महालक्ष्मीस्तु नैर्ऋते । वायव्यां पातु चामुण्डा इन्द्राणी पातु ईशके ॥
जले पातु महामाया पृथिव्यां सर्वमङ्गला । आकाशे पातु वरदा सर्वत्र भुवनेश्वरी ॥

॥ फलश्रुति ॥

इदं तु कवचं देव्या देवानामपि दुर्लभम् । पठेत् प्रातः समुत्थाय शुचिर्प्रयत मानसः ॥
नाधयो व्याधयस्तस्य न भयं च कश्चिद् भवेत् । न च मारीभयं तस्य पातकानां भयं तथा ॥
न दारिद्र्यवशं गच्छेत् तिष्ठेन्मृत्युवशे न च । गच्छेच्छिवपुरं देवि सत्यं सत्यं वदाम्यहं ॥
इदं कवचमज्ञात्वा श्रीविद्यां यो जपेत् सदा । स नाप्नोति फलं तस्य प्राप्नुयाच्छस्त्र घातनं ॥

॥ इति सिद्ध यामले श्री षोडशी कवचं सम्पूर्णम् ॥

॥ २. श्रीषोडशी कवच स्तोत्रम् ॥

॥ श्री देव्युवाच ॥

भगवन् देव-देवेश लोकानुग्रह कारक त्वत्प्रसादान्महादेव श्रुता मन्त्रास्तवनेकधा ।
साधनं विविधं देव कीलकोद्धरणं तथा शापादि दूषणोद्धारः श्रुतस्त्वत्तो मया प्रभो ।
राजराजेश्वरी देव्याः कवचं सञ्चितं मया श्रोतुमिच्छामि त्वत्तस्तत्कथयस्व दयानिधे ॥

॥ श्री ईश्वरोवाच ॥

लक्षवारसहस्त्राणि वारिताऽसि पुनः पुनः स्त्रीस्वभावात् पुनर्देवि पृच्छसि त्वं मम प्रिये ।
अत्यन्तगुह्यं कवचं सर्वकामफलप्रदं प्रीतये तव देवेशि कथयामि शृणुष्व तत् ॥

विनियोगः :- अस्य षोडशी कवचस्य श्रीमहादेव ऋषिः, प्रस्तार पंक्तिश्छन्दः, श्री राजराजेश्वरी महात्रिपुर - सुन्दरी देवता, धर्मार्थ काम मोक्ष साधने पाठे विनियोगः।

ऋष्यादिन्यासः :- श्रीमहादेव ऋषये नमः शिरसि। प्रस्तार पंक्तिश्छन्दसे नमः मुखे। श्री राजराजेश्वरी महात्रिपुर- सुन्दरी देवतायै नमः हृदि। सर्वार्थ काम मोक्ष साधने पाठे विनियोगाय नमः सर्वाङ्गे।

॥ कवच स्तोत्रम् ॥

पूर्वे मां भैरवी पातु बाला मां पातु दक्षिणे, मालिनी पश्चिमे पातु त्रासिनी तूत्तरेऽवतु ॥
ऊर्ध्वं पातु महादेवी महात्रिपुरसुन्दरी, अधस्तात् पातु देवेशी पातालातल वासिनी ॥
आधारे वाग्भवः पातु कामराजस्तथा हृदि, डामरः पातु मां नित्यं मस्तके सर्व कामदः ॥
ब्रह्मरन्ध्रे सर्वगात्रे छिद्रस्थाने च सर्वदा, महाविद्या भगवती पातु मां परमेश्वरी ॥
ऐं ह्रीं ललाटे मां पातु क्लीं क्लुं सश्च नेत्रयोः, नासायां मे कर्णयोश्च द्रीं द्रैं द्रां द्रीं चिबुके तथा ॥
सौः पातु गले हृदये स ह ह्रीं नाभिदेशके, क ल ह्रीं क्लीं स्त्रीं गुह्यदेशे सह्रीं पादयोस्तथा ॥
स ह्रीं मां सर्वतः पातु सकली पातु सन्धिषु, जले स्थले तथाकाशे दिक्षु राजगृहे तथा ॥
हूं क्षेमा त्वरिता पातु स ह्रीं स क्लीं मनोभवा हंसः पायान्महादेवि परं निष्कल देवता ॥
विजया मंगला दूती कल्याणी भगमालिनी, ज्वाला च मालिनी नित्या सर्वदा पातु मां शिवा ॥
इत्येवं कवचं देवि देवानामपि दुर्लभं, तव प्रीत्या मयाख्यातं गोपनीयं प्रयत्नतः ॥
इदं रहस्यं परमं गुह्याद् गुह्यतरं प्रिये, धन्यं यशस्यमायुष्यं भोग मोक्षं प्रद शिवे ॥
दुःस्वप्न नाशनं पुण्यं नर-नारी वशङ्करम्, आकर्षणकरं देवि स्तम्भोच्चाटकं शिवे ॥
इदं कवचमज्ञात्वा राजराजेश्वरीं पराम्, योऽर्चयेद् योगिनी वृन्दैः स भक्ष्यो नात्र संशयः ॥
न तस्य मन्त्रसिद्धिः स्यात् कदाचिदपि शांकरि, इह लोके च दारिद्र्यं रोगदुःखाशुभानि च ॥
परत्र नरकं गत्वा पशु योनिमवाप्नुयात्, तस्मादेतत् सदाभ्यासादधिकारी भवेत् किल ॥
मद्वक्त्र निर्गतमिदं कवचं सुपुण्यं, पूजाविधेश्च पुरतो विधिना पठेद्यः ॥
सौभाग्य भाग ललितानि शुभानि भुक्त्वा, देव्याः पदं भजति तत् पुनरन्तकाले ॥

॥ कुलानन्द संहितायां षोडशीकवचं सम्पूर्णम् ॥

॥ षोडशी हृदय स्तोत्रम् ॥

कैलासे करुणाक्रान्ता परोपकृतिमानसा, पप्रच्छ करुणासिन्धुं सुप्रसन्नं महेश्वरं ।

॥ श्रीपार्वत्युवाच ॥

आगामिनि कलौ ब्रह्मन् धर्म-कर्मविवर्जिताः, भविष्यन्ति जनास्तेषां कथं श्रेयो भविष्यति ?

॥ शिव उवाच ॥

शृणुदेवि प्रवक्ष्यामिं तव स्नेहान्महेश्वरि दुर्लभं यत् त्रिलोकेषुसुन्दरी हृदयस्तवं ।
ये नरा दुःख सन्तप्ता दारिद्र्य हत मानसाः अस्यैव पाठ मात्रेण तेषां श्रेयो भविष्यति ॥

विनियोगः – ॐ अस्य श्रीमहात्रिपुरसुन्दरी हृदयस्तोत्र मन्त्रस्य श्रीआनन्दभैरवः ऋषिः। देवी गायत्रीश्छन्दः। श्रीमहात्रिपुरसुन्दरी देवता। ऐं बीजं। सौः शक्तिः। क्लीं कीलकं। धर्मार्थ-काम-मोक्षार्थे विनियोगः।

ऋष्यादिन्यासः – श्रीआनन्दभैरवाय ऋषये नमः शिरसि। देवी गायत्रीछन्दसे नमः मुखे। श्रीमहात्रिपुरसुन्दरी देवतायै नमः हृदये। ऐं बीजाय नमः लिङ्गे। सौः शक्तये नमः नाभौ। क्लीं कीलकाय नमः मूलाधारे। धर्मार्थ-काम-मोक्षार्थे विनियोगाय नमः सर्वाङ्गे।

षडङ्गन्यासः	करन्यास	अङ्गन्यासः
ऐं ह्रीं क्लीं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
क्लीं श्रीं सौः ऐं	तर्जनीभ्यां नमः	शिरसे स्वाहा
सौः ॐ ह्रीं श्रीं	मध्यमाभ्यां नमः	शिखायै वषट्
ऐं कएईलह्रीं हसकहलह्रीं	अनामिकाभ्यां नमः	कवचाय हुँ
क्लीं सकलह्रीं	कनिष्ठिकाभ्यां नमः	नेत्रत्रयाय वौषट्
सौः सौः ऐं क्लीं ह्रीं श्रीं	करतलकर पृष्ठाभ्यां नमः	अस्त्राय फट्

॥ ध्यानम् ॥

बालव्यक्त विभाकरामितनिभां भव्यप्रदां भारतीम्, ईषत् फुल्लमुखाम्बुजस्मित् करैराशाभवान्धापहाम् ।
पाशं साभयमंकुशं च वरदं सम्बिभ्रतीं भूतिदाम्, भ्राजन्तीं चतुरम्बुजाकृति करैर्भक्त्या भजे सुन्दरीम् ॥

॥ स्तोत्रम् ॥

सुन्दरी सकल कल्मषापहा कोटिकञ्जप्रिय काम्यकान्तिका ।
कोटिकल्पकृत पुण्य कर्मणा पूजनीय – पदपुण्यपुष्करा ॥१॥

शर्वरीश सम सुन्दरानना श्रीश-शक्ति सुकृताश्रय श्रिता ।
सज्जनानु शरणीय सत्पदा सङ्कटे सुरगणैः सुवन्दिता ॥२॥

या सुरासुर-रणे जयान्विता आजघान जगदम्बिकाऽजिता ।
तां भजामि जगतां जनिं जयां युद्धयुक्त दितिजान् सुदुर्जयान् ॥३॥

योगिनां हृदय सङ्गतां शिवां योगयुक्त मनसां यतात्मनाम् ।
जाग्रतीं जगति यत्नतो द्विजा यां जपन्ति हृदि तां भजाम्यहम् ॥४॥

कल्पकास्तु कलयन्ति कालिकां यत् कला कलि जनोपकारिकाम् ।
कौल कालि कलितांघ्रि कञ्जकां तां भजामि कलिकल्मषापहाम् ॥५॥
बालार्कानन्त शोचिर्निज तनु किरणैर्दीपयन्तीं दिगन्तान्
दीप्तैर्देदीप्यमानां दनुज दल वनानल्प दावानलाभाम् ।
दान्तो दन्तोग्रचित्तान् दलितदितिसुतान् दर्शनीयान् दुरन्तान्
देवीं दीनार्द्रचित्तान् हृदि मुदितमनाः सुन्दरीं संस्मरामि ॥६॥
धीरान् धन्यान् धरित्रीं धवविधृत शिरोधूत धूल्यब्ज पादान्
धृष्टान् धाराधराधो विनिधृत चपला चारु चन्द्रत् प्रभाभाम् ।
धर्मान् धूतोपहारान् धरणि सुरधवोद्धारिणीं ध्येय रूपाम्
धीमद्धन्याऽतिधन्यां धनद-धनवृतां सुन्दरीं चिन्तयामि ॥७॥
जयतु जयतु जल्पा योगिनी योगयुक्ता जयतु जयतु सौम्या सुन्दरी सुन्दरास्या ।
जयतु जयतु पद्मा पद्मिनी केशवस्य जयतु जयतु काली कालिनी कालकान्ता ॥८॥
जयतु जयतु खर्वा षोडशी वेदहस्ता जयतु जयतु धात्री धर्मिणी धातृशक्तिः ।
जयतु जयतु वाणी ब्राह्मणा ब्रह्मवन्द्या जयतु जयतु दुर्गा दारिणी देवशत्रोः ॥
देवी त्वं सृष्टिकाले कमलभवभृता राजसी रक्तरूपा
रक्षाकाले त्वमम्बा हरिहृदय धृता सात्विकी श्वेतरूपा
भूरि क्रोधा भवान्ते भवभवन गता तामसी कृष्णरूपा
एताश्चान्यास्त्वमेव क्षितिमनुज मता सुन्दरी केवलाद्या ॥१०॥
सुमल सुमनमेतद् देवि गोप्यं गुणज्ञे ग्रहण मनन योग्यं षोडशीयं खलघ्नम् ।
सुरतरुसमशीलं सम्प्रदं पाठकानां प्रभवति हृदयाख्यं स्तोत्रमत्यन्त मान्यम् ॥११॥
इदं त्रिपुरसुन्दर्याः षोडश्याः परमाद्भुतं यः शृणोति नरः स्तोत्रं स सदा सुखमश्नुते ॥१२॥

॥ श्रीत्रिपुरसुन्दरीतन्त्रे हृदयाख्यं स्तोत्रं सम्पूर्णम् ॥

॥ श्री षोडशी अष्टोत्तरशतनाम स्तोत्रम् ॥

॥ भृगुरुवाच ॥

चतुर्वक्त्र जगन्नाथ स्तोत्रं वद मम प्रभो यस्यानुष्ठान मात्रेण नरो भक्तिमवाप्नुयात् ।
सहस्र नाम्नामाकृष्य नाम्नामष्टोत्तरं शतम् गुह्याद् गुह्यतरं गुह्यं सुन्दर्याः परिकीर्तितं ॥

विनियोगः - ॐ अस्य श्रीषोडश्यष्टोत्तर शतनामस्तोत्रस्य शम्भुः ऋषिः। अनुष्टुप्छन्दः। श्रीषोडशी देवता। धर्मार्थ काम मोक्ष सिद्धये पाठे विनियोगः।

ऋष्यादिन्यासं कृत्वा।

ॐ त्रिपुरा षोडशी माता त्र्यक्षरा त्रितया त्रयी । सुन्दरी सुमुखी सेव्या सामवेद परायणा ॥
शारदा शब्दनिलया सागरा सरिदम्बरा । शुद्धा शुद्ध तनुः साध्वी शिवध्यान परायणा ॥
स्वामिनी शंभुवनिता शांभवी च सरस्वती । समुद्रमथिनी शीघ्रगामिनी शीघ्रसिद्धिदा ॥
साधुसेव्या साधुगम्या साधुसंतुष्ट मानसा । खट्वाङ्ग धारिणी खर्वा खड्ग खर्पर धारिणी ॥
षड्वर्ग भाव रहिता षड्वर्ग परिचारिका । षड्वर्गा च षडंगा च षोढा षोडश वार्षिकी ॥
ऋतुरूपा क्रतुमती ऋभुक्षक्रतु मण्डिता । कवर्गादि पवर्गान्ता अन्तःस्था अन्तरूपिणी ॥
अकाराकार रहिता कालमृत्यु जरापहा । तन्वी तत्त्वेश्वरो तारा त्रिवर्षा ज्ञानरूपिणी ॥
काली कराली कामेशी च छाया संज्ञाप्यरुंधती । निर्विकल्पा महावेगा महोत्साहा महोदरी ॥
मेधा बलाका विमला विमल ज्ञानदायिनी । गौरी वसुन्धरा गोप्त्री गवांपति निषेविता ॥
भगाङ्गा भगरूपा च भक्तिभाव परायणा । छिन्नमस्ता महाधूमा तथा धूम्रविभूषणा ॥
धर्मकर्मादि रहिता धर्मकर्म परायणा । सीता मातङ्गिनी मेधा मधुदैत्य विनाशिनी ॥
भैरवी भुवना माताऽभयदा भवसुन्दरी । भावुका बगला कृत्या बालात्रिपुरसुन्दरी ॥
रोहिणी रेवती रम्या रम्भा रावण वन्दिता । शतयज्ञमयी सत्वा शतक्रतुवरप्रदा ॥
शतचन्द्रानना देवी सहस्रादित्य सन्निभा । सोमसूर्याग्नि नयना व्याघ्रचर्माम्बरावृता ॥
अर्द्धेन्दु धारिणी मत्ता मदिरा मदिरेक्षणा । इति ते कथितं गोप्यं नाम्नामष्टोत्तरं शतम् ॥
सुन्दर्याः सर्वदा सेव्यं महापातक नाशनं । गोपनीयं गोपनीयं गोपनीयं कलौ युगे ॥
सहस्रनाम पाठस्य फलं यद् वै प्रकीर्तितम् । तस्मात्कोटिगुणं पुण्यं स्तवस्यास्य प्रकीर्तनात् ॥
पठेत् सदा भक्तियुतो नरो तु यो निशीथ कालेऽप्यरुणोदये वा ।
प्रदोषकाले नवमीदिनेऽथवा लभेत् भोगान् परमाद्भुतान् प्रियान् ॥

॥ ब्रह्मयामले षोडश्यष्टोत्तरशत नामस्तोत्रं सम्पूर्णम् ॥

॥ श्रीषोडशी सहस्रनाम स्तोत्रम् ॥

कैलाश शिखरे रम्ये नानारत्नोप शोभिते । कल्पपादप मध्यस्थे नानापुष्पोप शोभिते ॥
मणिमण्डपमध्यस्थे मुनिगन्धर्वसेविते । कदाचित् सुखमासीनं भगवन्तं जगद्गुरुम् ॥
कपाल खट्वाङ्गधरं चन्द्रार्धकृत शेखरं । हस्तत्रिशूल डमरुं महावृषभवाहनम् ॥
जटाजूटधरं देवं कण्ठभूषण वासुकिं । विभूतिभूषणं देवं नीलकण्ठं त्रिलोचनम् ॥
द्वीपिचर्म परीधानं शुद्धस्फटिक सन्निभं । सहस्रादित्य सङ्काशं गिरिजार्द्धाङ्गभूषणम् ॥
प्रणम्य शिरसा नाथं कारणं विश्व रूपिणम् । कृताञ्जलिपुटो भूत्वा प्राहैनं शिखवाहनः ॥

॥ कार्तिकेय उवाच ॥

देव देव जगन्नाथ सृष्टिस्थिति लयात्मक । त्वमेव परमात्मा च त्वं गतिः सर्वदेहिनाम् ॥
त्वं गतिः सर्वलोकानां दीनानां च त्वमेव हि । त्वमेव जगदाधारस्त्वमेव विश्वकारणम् ॥
त्वमेव पूज्यः सर्वेषां त्वदन्यो नास्ति मे गतिः । किं गुह्यं परमं लोके किमेकं सर्वसिद्धिदं ॥
किमेकं परमं श्रेष्ठं को योगः स्वर्ग मोक्षदः । विना तीर्थेन तपसा विना दानैर्विना मखैः ॥
विना लयेन ध्यानेन नरः सिद्धिमवाप्नुयात् । कस्मादुत्पद्यते सृष्टिः कस्मिंश्च प्रलयो भवेत् ॥
कस्मादुत्तीर्यते देव संसारार्णव सङ्कटात् । तदहं श्रोतुमिच्छामि कथयस्व महेश्वर ॥

॥ ईश्वर उवाच ॥

साधु साधु त्वया पृष्टं पार्वतीप्रिय नन्दन । अस्ति गुह्यतमं पुत्र कथयिष्याम्यसंशयम् ॥
सत्वं रजस्तमश्चैव ये चान्ये महदादयः । ये चान्ये बहवो भूताः सर्वे प्रकृति सम्भवाः ॥
सैव देवी परा शक्तिर्महात्रिपुर- सुन्दरी । सैव प्रसूयते विश्वं विश्वं सैव प्रपास्यति ॥
सैव संहरते विश्वं जगदेतच्चराचरं । आधारः सर्वभूतानां सैव रोगार्ति हारिणी ॥
इच्छाज्ञानक्रियाशक्ति र्ब्रह्माविष्णुशिवात्मिका । त्रिधा शक्तिस्वरूपेण सृष्टिस्थितिविनाशिनी ॥
सृज्यते ब्रह्मरूपेण विष्णुरूपेण पाल्यते । ह्रियते रुद्ररूपेण जयदेतच्चराचरम् ॥
यस्या योनौ जगत्सर्वमद्यापि परिवर्तते । यस्यां प्रलीयते चान्ते यस्यां च जायते पुनः ॥
यां समाराध्य त्रैलोक्ये सम्प्राप्यं पदमुत्तमम् । तस्या नाम सहस्त्रं तु कथयामि शृणुष्व तत् ॥

विनियोगः - **ॐ अस्य श्रीमहात्रिपुर- सुन्दरी सहस्त्रनाम स्तोत्र मन्त्रस्य श्रीभगवान् दक्षिणामूर्तिर्ऋषिः। जगतीच्छन्दः। समस्त प्रकट गुप्त सम्प्रदाय कुलकौलोत्तीर्ण निगर्भ रहस्याचिन्त्यप्रभावती देवता। ॐ बीजं। ह्रीं शक्तिः। क्लीं कीलकं। धर्मार्थ-काम-मोक्षार्थे जपे विनियोगः।**

ऋष्यादिन्यासं कृत्वा। ध्यायेद् यथा-

॥ ध्यानम् ॥

ॐ आधारे तरुणार्कबिम्बरुचिरं हेमप्रभं वाग्भवं । बीजं मन्मथमिन्द्रगोप सदृशं हृत्- पङ्कजे संस्थितम् ॥
विष्णुब्रह्मपदस्थ शक्ति कलितं सोमप्रभा भासुरं । ये ध्यायन्ति पदत्रयं तवशिवे ते यांति सौख्यं तदम् ॥

मानसोपचार से देवी का पूजन करें पश्चात् सहस्त्रनाम पाठ करें।

कल्याणी कमला काली कराली कामरूपिणी । कामाख्या कामदा काम्या कामना कामचारिणी ॥
कालरात्रिर्महारात्रिः कपाली कालरूपिणी । कौमारी करुणा मुक्तिकल्मष - नाशिनी ॥
कात्यायनी कराधारा कौमुदी कमलप्रिया । कीर्तिदा बुद्धिदा मेधा नीतिज्ञा नीतिवत्सला ॥
माहेश्वरी महामाया महातेजा महेश्वरी । महाजिह्वा महाघोरा महादंष्ट्रा महाभुजा ॥
महामोहान्ध कारघ्नी महामोक्ष - प्रदायिनी । महादारिद्र्यनाशा च महाशत्रु विमर्दिनी ॥
महामाया महावीर्या महापातक - नाशिनी । महामखा मन्त्रमयी मणिपूरक वासिनी ॥

मानसी मानदा मान्या मनश्चक्षूरणे चरा । गणमाता च गायत्री गणगन्धर्व सेविता ।
गिरिजा गिरिशा साध्वी गिरिस्था गिरिवल्लभा । चण्डेश्वरी चण्डरूपा प्रचण्डा चण्डमालिनी ॥
चर्विका चर्चिकाकारा चण्डिका चारुरूपिणी । यज्ञेश्वरी यज्ञरूपा जपरूपा जपयज्ञपरायणा ॥
यज्ञमाता यज्ञभोक्त्री यज्ञेशी यज्ञसम्भवा । सिद्धयज्ञक्रिया सिद्धिर्यज्ञाङ्गी यक्षरक्षिका ॥
यज्ञक्रिया यज्ञरूपा यज्ञाङ्गी यज्ञरक्षिका । यज्ञक्रिया च यज्ञा च यज्ञा यज्ञक्रियालया ॥
जालन्धरी जगन्माता जातवेदा जगत्प्रिया । जितेन्द्रिया जितक्रोधा जननी जन्मदायिनी ॥
गङ्गा गोदावरी चैव गोमती च शतद्रुका । घर्घरा वेदगर्भा च रेचिका समवासिनी ॥
सिन्धुर्मन्दाकिनी क्षिप्रा यमुना च सरस्वती । भद्रा रागविपाशा च गण्डकी विन्ध्यवासिनी ॥
नर्मदा सिन्धु कावेरी वेत्रवत्या सुकौशिकी । महेन्द्रतनया चैव अहल्या चर्मकावती ॥
अयोध्या मथुरा माया काशी काञ्ची अवन्तिका । पुरी द्वारावती तीर्था महाकिल्विष नाशिनी ॥
पद्मिनी पद्ममध्यस्था पद्मकिञ्जल्क वासिनी । पद्मवक्त्रा चकोराक्षी पद्मस्था पद्मसम्भवा ॥
ह्रींकारी कुण्डलाधारा हृत्पद्मस्था सुलोचना । श्रींकारी भूषणा लक्ष्मीः क्लींकारी क्लेशनाशिनी ॥
हरिवक्त्रोद्भवा शान्ता हरिवक्त्रकृतालया । हरिवक्त्रोद्भवा शान्ता हरिवक्षःस्थल स्थिता ॥
वैष्णवी विष्णुरूपा च विष्णुमातृस्वरूपिणी । विष्णुमाया विशालाक्षी विशालनयनोज्ज्वला ॥
विश्वेश्वरी च विश्वात्मा विश्वेशीविश्वरूपिणी । विश्वेश्वरी शिवाराध्या शिवनाथा शिवप्रिया ॥
शिवमाता शिवाख्या च शिवदा शिवरूपिणी । भवेश्वरी भवाराध्या भवेशी भवनायिका ॥
भवमाता भवागम्या भवकण्टक नाशिनी । भवप्रिया भवनन्दा भवानी भवमोहिनी ॥
गायत्री चैव सावित्री ब्रह्माणी ब्रह्मरूपिणी । ब्रह्मेशी ब्रह्मदा ब्रह्मा ब्रह्माणी ब्रह्मवादिनी ॥
दुर्गस्था दुर्गरूपा च दुर्गा दुर्गार्तिनाशिनी । सुगमा दुर्गमा दान्ता दयादोग्ध्री दुरापहा ॥
दुरितघ्नी दुराध्यक्षा दुरा दुष्कृत - नाशिनी । पञ्चास्या पञ्चमी पूर्णा पूर्णपीठ निवासिनी ॥
सत्वस्था सत्वरूपा च सत्वस्था सत्वसम्भवा । रजस्था च रजोरूपा रजोगुण समुद्भवा ॥
तमस्था च तमोरूपा तामसी तामसप्रिया । तमोगुण समुद्भूता सात्विकी राजसी कला ॥
काष्ठा मुहूर्ता निमिषा अनिमेषा ततः परं । अर्द्धमासा च मासा च सम्वसर स्वरूपिणी ॥
योगस्था योगरूपा च कल्पस्था कल्परूपिणी । नानारत्नविचित्राङ्गी नानाऽऽभरणमण्डिता ॥
विश्वात्मिका विश्वमाता विश्वपाशविनाशिनी । विश्वासकारिणी विश्वाविश्वशक्तिर्विचक्षणा ॥
जपा कुसुम सङ्काशा दाडिमीकुसुमोपमा । चतुरङ्गी चतुर्बाहुश्चतुराचार वासिनी ॥
सर्वेशी सर्वदा सर्वा सर्वदायिनी । माहेश्वरी च सर्वाद्या शर्वाणी सर्वमङ्गला ॥
नलिनी नन्दिनी नन्दा आनन्दानन्द वर्द्धिनी । व्यापिनी सर्वभूतेषु भवभारविनाशिनी ॥
सर्वशृङ्गार वेषाढ्या पाशाङ्कुश करोद्यता । सूर्यकोटि सहस्राभा चन्द्रकोटि निभानना ॥

गणेशकोटिलावण्या विष्णुकोट्यरिमर्दिनी । दावाग्नि कोटि दलिनी रुद्रकोट्युग्ररूपिणी ॥
समुद्रकोटि गम्भीरा वायुकोटिमहाबला । आकाशकोटिविस्तारा यमकोटि भयङ्करी ॥
मेरुकोटि समुच्छ्राया गणकोटि समृद्धिदा । निष्कस्तोका निराधारा निर्गुणा गुणवर्जिता ॥
अशोका शोक रहिता तापत्रय विवर्जिता । वसिष्ठा विश्वजननी विश्वाख्या विश्ववर्द्धिनी ॥
चित्रा विचित्रचित्राङ्गी हेतुगर्भा कुलेश्वरी । इच्छाशक्तिर्ज्ञानशक्तिः क्रियाशक्तिः शुचिस्मिता ॥
शुचिः स्मृतिमयी सत्या श्रुतिरूपा श्रुतिप्रिया । महासत्वमयी सत्वा पञ्चतत्त्वोपरिस्थिता ॥
पार्वती हिमवत्पुत्री पारस्था पाररूपिणी । जयन्ती भद्रकाली च अहल्या कुलनायिका ॥
भूतधात्री च भूतेशी भूतस्था भूतभाविनी । महाकुण्डलिनी शक्तिर्महाविभव वर्द्धिनी ॥
हंसाक्षी हंसरूपा च हंसस्था हंसरूपिणी । सोमसूर्याग्नि मध्यस्था मणिमण्डलवासिनी ॥
द्वादशार सरोजस्था सूर्यमण्डलवासिनी । अकलङ्का शशाङ्काभा षोडशार निवासिनी ॥
डाकिनी राकिनी चैव लाकिनी काकिनी तथा । शाकिनी हाकिनी चैव षट्चक्रेषु निवासिनी ॥
सृष्टिस्थितिविनाशिनी सृष्टिस्थित्यंतकारिणी । श्रीकण्ठप्रियहृत्कंठा नन्दाख्या विंदुमालिनी ॥
चतुष्षष्टि कलाधारा देहदण्ड समाश्रिता । माया काली धृतिर्मेधा क्षुधा तुष्टिर्महाद्युतिः ।
हिंगुला मंगला सीता सुषुम्ना मध्यगामिनी । परघोरा करालाक्षी विजया जयदायिनी ॥
हृत्पद्मनिलया भीमा महाभैरव नादिनी । आकाश लिङ्गसम्भूता भुवनोद्यान वासिनी ॥
महत् सूक्ष्मा च कङ्काली भीमरूपा महाबला । मेनकागर्भ सम्भूता तप्तकाञ्चन सन्निभा ॥
अन्तरस्था कूटबीजा त्रिकूटाचल वासिनी । वर्णाख्या वर्णरहिता पञ्चाशद्वर्ण भेदिनी ॥
विद्याधरी लोकधात्री अप्सरा अप्सरःप्रिया । दीक्षा दाक्षायणी दक्षा दक्षयज्ञविनाशिनी ॥
यशःपूर्णा यशोदा च यशोदागर्भसम्भवा । देवकी देवमाता च राधिका कृष्णवल्लभा ॥
अरुंधती शचीन्द्राणी गांधारी गंधमालिनी । ध्यानातीता ध्यानगम्या ध्यानज्ञा ध्यानधारिणी ॥
लम्बोदरी च लम्बोष्ठी जाम्बवन्ती जलोदरी । महोदरी मुक्तकेशी मुक्तकामार्थसिद्धिदा ॥
तपस्विनी तपोनिष्ठा सुपर्णा धर्मवासिनी । वाणचापधरा धीरा पाञ्चाली पञ्चमप्रिया ॥
गुह्याङ्गी च सुभीमा च गुह्यतत्त्वा निरंजना । अशरीरा शरीरस्था संसारार्णव तारिणी ॥
अमृता निष्कला भद्रा सकला कृष्णपिङ्गला । चक्रप्रिया च चक्राह्वा पञ्चचक्रादिदारिणी ॥
पद्मराग प्रतीकाशा निर्मलाकाश सन्निभा । अधःस्था ऊर्ध्वरूपा च ऊर्ध्वपद्मनिवासिनी ।
कार्यकारण कर्तृत्वे शश्वद्रूपेषु संस्थिता । रसज्ञा रसमध्यस्था गन्धस्था गन्धरूपिणी ॥
परब्रह्मस्वरूपा च परब्रह्मनिवासिनी । शब्दब्रह्मस्वरूपा च शब्दस्था शब्दवर्जिता ॥
सिद्धिःबुद्धिः पराबुद्धिः सन्दीप्तिर्मध्यसंस्थिता । स्वगुह्या शांभवी शक्तिस्तत्त्वस्था तत्त्वरूपिणी ॥
शाश्वती भूतमाता च महाभूताधिप प्रिया । शुचिप्रेता धर्मसिद्धिर्धर्मवृद्धिः पराजिता ॥

कामसन्दीपिनी कामा सदा कौतूहलप्रिया । जटाजूटधरा मुक्ता सूक्ष्मा शक्तिविभूषणा ॥
द्वीपिचर्मपरीधाना चीरवल्कल धारिणी । त्रिशूलडमरुधरा नरमाला विभूषणा ॥
अत्युग्ररूपिणी चोग्रा कल्पान्त दहनोपमा । त्रैलोक्यसाधिनी साध्या सिद्धिसाधकवत्सला ॥
सर्वविद्यामयी सारा चासुराणां विनाशिनी । दमनी दामिनी दान्ता दयादोग्ध्री दुरापहा ॥
अग्निजिह्वोपमा घोरा घोर घोर तरानना । नारायणी नारसिंही नृसिंहहृदये स्थिता ॥
योगेश्वरी योगरूपा योगमाता च योगिनी । खेचरी खचरी खेल । निर्वाणपद संश्रया ॥
नागिनी नागकन्या च सुवेशा नागनायिका । विषज्वालावती दीप्ता कलाशत विभूषणा ॥
तीव्रवक्त्रा महावक्त्रा नागकोटित्वधारिणी । महासत्वा च धर्मज्ञा धर्माति सुखदायिनी ॥
कृष्णमूर्द्धा महामूर्द्धा घोरमूर्द्धा वरानना । सर्वेन्द्रिय मनोन्मत्ता सर्वेन्द्रिय मनोमयी ॥
सर्वसंग्रामजयदा सर्वप्रहरणोद्यता । सर्वषोडोपशमनी सर्वारिष्टनिवारिणी ॥
सर्वैश्वर्य समुत्पन्ना सर्वग्रहविनाशिनी । मातङ्गी मत्तमातङ्गी मातङ्गीप्रिय मण्डला ॥
अमृतोदधि मध्यस्था कटिसूत्रैरलंकृता । अमृतोदधि मध्यस्था प्रवालवसनाम्बुजा ॥
मणिमण्डलमध्यस्था ईषत् प्रहसिताननना । कुमुदा ललिता लोला लाक्षालोहित लोचना ॥
दिग्वासा देवदूती च देवदेवाधि देवता । सिंहोपरि समारूढ़ा हिमाचलनिवासिनी ॥
अट्टाट्टहासिनी घोरा घोरदैत्य विनाशिनी । अत्युग्ररक्त वस्त्राभा नागकेयूर मण्डिता ॥
मुक्ताहार लतोपेता तुङ्गपीन पयोधरा । रक्तोत्पल - दलाकारा मदाघूर्णित - लोचना ॥
समस्त देवता मूर्तिः सुरारि - क्षयकारिणी । खड्गिनी शूलहस्ता च चक्रिणी चक्रमालिनी ॥
शंखिनी चापिनी वाणा वज्रिणी वज्रदण्डिनी । आनन्दोदधि मध्यस्था कटिसूत्रैरलंकृता ॥
नानाभरण दीप्ताङ्गी नानामणिविभूषिता । जगदानन्दसम्भूता चिन्तामणि गुणान्विता ॥
त्रैलोक्य नमिता तुर्या चिन्मयानन्द रूपिणी । त्रैलोक्य नन्दिनी देवी दुःखं दुस्स्वप्न नाशिनी ॥
घोराग्निदाह शमनी राज्यदेवार्थ साधिनी । महाऽपराध - राशिघ्नी महाचौर - भयापहा ॥
रागादिदोष रहिता जरामरण वर्जिता । चन्द्रमण्डल मध्यस्था पीयूषार्णव सम्भवा ॥
सर्वदेवैः स्तुता देवी सर्वसिद्धैर्नमस्कृता । अचिन्त्यशक्तिरूपा च मणिमन्त्रमहौषधी ॥
अस्तिस्वस्तिमयी बाला मलयाचल वासिनी । धात्री विधात्री संहारी रतिज्ञा रतिदायिनी ॥
रुद्राणी रुद्ररूपा च रुद्ररौद्रार्त्तिनाशिनी । सर्वज्ञा चैव धर्मज्ञा रसज्ञा दीनवत्सला ॥
अनाहता त्रिनयना निर्भारा निर्वृतिः परा । पराऽघोरा करालाक्षी सुमतीश्रेष्ठदायिनी ॥
मन्त्रालिका मन्त्रगम्या मन्त्रमाला सुमंत्रिणी । श्रद्धानन्दा महाभद्रा निर्द्वन्द्वा निर्गुणात्मिका ॥
धरिणी धारिणी पृथ्वी धरा धात्री व सुन्धरा । मेरुमन्दर मध्यस्था स्थितिः शङ्करवल्लभा ॥
श्रीमती श्रीमयी श्रेष्ठा श्रीकरीभावभाविनी । श्रीदा श्रीमा श्रीनिवासा श्रीमती श्रीमतांगतिः ॥

उमा सारंगिणी कृष्णा कुटिला कुटिलालका । त्रिलोचना त्रिलोकात्मा पुण्यपुण्या प्रकीर्तिता ।
अमृता सत्यसङ्कल्पा सा सत्या ग्रंथि भेदिनी । परेशी परमा साध्या पराविद्या परात्परा ॥
सुन्दराङ्गी सुवर्णाभा सुरासुरनमस्कृता । प्रजा प्रजावती धन्या धनधान्य समृद्धिदा ॥
ईशानी भुवनेशानी भवानी भुवनेश्वरी । अनन्तानन्त महिता जगत्सारा जगद्भवा ॥
अचिंत्यात्मा चिंत्यशक्तिश्चिंत्याचिंत्यस्वरूपिणी । ज्ञानगम्या ज्ञानमूर्तिर्ज्ञानिनी ज्ञानशालिनी ॥
असिता घोररूपा च सुधाधारा सुधावहा । भास्करी भास्वती भीतिर्भास्वदक्षानुशायिनी ॥
अनसूया क्षमा लज्जादुर्लभा भरणात्मिका । विश्वघ्नी विश्ववीरा च विश्वघ्नी विश्वसंस्थिता ॥
शीलस्था शीलरूपा च शीला शीलप्रदायिनी । बोधनी बोधकुशला रोधनी बोधनी तथा ॥
विद्योतिनी विचित्रात्मा विद्युत्पटलसन्निभा । विश्वयोनिर्महायोनिः कर्मयोनिः प्रियात्मिका ॥
रोहिणी रोगशमनी महारोगज्वरापहा । रसदा पुष्टिदा पुष्टिर्मानदा मानवप्रिया ॥
कृष्णाङ्गवाहिनी कृष्णाकृष्णा कृष्णसहोदरी । शाम्भवी शम्भुरूपा च शंभुस्था शंभुसंभवा ॥
विश्वोदरी योगमाता योगमुद्राघ्न योगिनी । वागीश्वरी योगनिद्रा योगिनी - कोटिसेविता ॥
कौलिका मन्दकन्या च शृङ्गार पीठवासिनी । क्षेमङ्करी सर्वरूपा दिव्यरूपा दिगम्बरी ॥
धूम्रवक्त्रा धूम्रनेत्रा धूम्रकेशी च धूसरा । पिनाकी रुद्रवेताली महावेताल रूपिणी ॥
तपिनी तापिनी दीक्षा विष्णुविद्यात्मनाश्रिता । मंथरा जठरा तीव्रा अग्निजिह्वा भयापहा ॥
पशुघ्नी पशुरूपा च पशुहा पशुवाहिनी । पिता माता च धीरा च पशुपाश विनाशिनी ॥
चन्द्रप्रभा चन्द्ररेखा चन्द्रकांति विभूषिणी । कुङ्कमाङ्कित सर्वाङ्गी सुधा सद्गुरु लोचना ॥
शुक्लाम्बरधरा देवी वीणापुस्तक धारिणी । ऐरावत पद्मधरा श्वेतपद्मासन स्थिता ॥
रक्ताम्बरधरा देवी रक्तपद्मविलोचना । दुस्तरा तारिणी तारा तरुणी ताररूपिणी ॥
सुधाधारा च धर्मज्ञा धर्मसंगोपदेशिनी । भगेश्वरी भगाराध्या भगिनी भगनायिका ॥
भगबिम्बा भगक्लिन्ना भगयोनिर्भगप्रदा । भगेश्वरी भगाराध्या भगिनी भगनायिका ॥
भगेशी भगरूपा च भगगुह्या भगावहा । भगोदरी भगानन्दा भगस्था भगशालिनी ॥
सर्वसंक्षोभिणी शक्तिस्सर्वविद्राविणी तथा । मालिनी माधवी माध्वी मधुरूपा महोत्कटा ॥
भरुण्ड - चन्द्रिका ज्योत्स्ना विश्वचक्षुस्तमोपहा । सुप्रसन्ना महादूती यमदूती भयङ्करी ॥
उन्मादिनी महारूपा दिव्यरूपा सुरार्चिता । चैतन्यरूपिणी नित्या क्लिन्ना काममदोद्धता ॥
मदिरानन्दकैवल्या मदिराक्षी मदालसा । सिद्धेश्वरी सिद्धविद्या सिद्धाद्या सिद्धसंभवा ॥
सिद्धर्द्धिः सिद्धमाता च सिद्धिः सर्वार्थसिद्धिदा । मनोमयी गुणातीता परंज्योतिःस्वरूपिणी ॥
परमेशी परगा पारापरा सिद्धिः परागतिः । विमला मोहिनी आद्या मधुपानपरायणा ॥
वेदवेदाङ्ग जननी सर्वशास्त्रविशारदा । सर्वदेवमयी विद्या सर्वशास्त्रमयी तथा ॥

सर्वज्ञानमयी देवी सर्वधर्ममयीश्वरी । सर्वयज्ञमयी यज्ञा सर्वमन्त्राधिकारिणी ॥
सर्वसम्पत् प्रतिष्ठात्री सर्वविद्राविणी परा । सर्वसंक्षोभिणी देवी सर्वमङ्गलकारिणी ॥
त्रैलोक्याकर्षिणी देवी सर्वाह्लादन कारिणी । सर्वसंमोहिनी देवी सर्वस्तंभन कारिणी ॥
त्रैलोक्य - जृम्भिणी देवी तथा सर्ववशङ्करी । त्रैलोक्य रञ्जिनी देवी सर्वसंपत्तिदायिनी ॥
सर्वमन्त्रमयी देवी सर्वद्वन्द्वक्षयङ्करी । सर्वसिद्धिप्रदा देवी सर्वसम्पत्प्रदायिनी ॥
सर्वप्रियकरी देवी सर्वमङ्गलकारिणी । सर्वकामप्रदा देवी सर्वदुःखविमोचिनी ॥
सर्वमृत्युप्रशमनी सर्वविघ्नविनाशिनी । सर्वाङ्गसुन्दरी माता सर्वसौभाग्य दायिनी ॥
सर्वज्ञा सर्वशक्तिश्च सर्वैश्वर्य फलप्रदा । सर्वज्ञानमयी देवी सर्वव्याधि विनाशिनी ॥
सर्वाधारस्वरूपा च सर्वपापहरा तथा । सर्वानन्दमयी देवी सर्वेच्छायाः स्वरूपिणी ॥
सर्वलक्ष्मीमयी विद्या सर्वेप्सित फलप्रदा । सर्वारिष्ट प्रशमनी परमानन्द दायिनी ॥
त्रिकोणनिलया त्रिस्था त्रिमात्रा त्रितनुस्थिता । त्रिवेणी त्रिपथा त्रिस्था त्रिमूर्तिस्त्रिपुरेश्वरी ॥
त्रिधाम्नी त्रिदशाध्यक्षा त्रिवित्त्रि पुरवासिनी । त्रयीविद्या च त्रिशिरा त्रैलोक्या च त्रिपुष्करा ॥
त्रिकोटरस्था त्रिविधा त्रिपुरा त्रिपुरात्मिका । त्रिपुरा श्री त्रिजननी त्रिपुरा त्रिपुरसुन्दरी ॥

॥ फलश्रुति ॥

इदं त्रिपुरसुन्दर्याः स्तोत्रं नाम साहस्त्रकं । गुह्याद् गुह्यतरं पुत्र तव प्रीत्यै प्रकीर्तितम् ॥१॥
गोपनीयं प्रयत्नेन पठनीयं प्रयत्नतः । नातः परतरं पुण्यं नातः परतरं तपः ॥२॥
नातः परतरं स्तोत्रं नातः परतरा गतिः । स्तोत्रं सहस्त्र नामाख्यं मम वक्त्राद् विनिर्गतम् ॥३॥
यः पठेत् प्रयतो भक्त्या शृणुयाद् वा समाहितः । मोक्षार्थी लभते मोक्षं स्वर्गार्थी स्वर्गमाप्नुयात् ॥४॥
कामांश्च प्राप्नुयात् कामी धनार्थी च लभेद् धनं । विद्यार्थी लभते विद्यां यशोऽर्थी लभते यशः ॥५॥
कन्यार्थी लभते कन्या सुतार्थी लभते सुतम् । गुर्विणी जनयेत् पुत्रं कन्या विन्दति सत्पतिम् ॥६॥
मूर्खोऽपि लभते शास्त्रं हीनोऽपि लभते गतिम् । संक्रान्त्यां वार्कामावस्यामष्टम्यां च विशेषतः ॥७॥
पौर्णमास्यां चतुर्दश्या नवम्यां भौमवासरे । पठेद् वा पाठयेद् वापि शृणुयाद् वा समाहितः ॥८॥
स मुक्तो सर्वपापेभ्यः कामेश्वर समोभवेत् । लक्ष्मीवान् धर्मवाश्चैव वल्लभस्सर्व योषिताम् ॥९॥
तस्य वश्यं भवेदाशु त्रैलोक्यं सचराचरम् । रुद्रं दृष्ट्वा यथा देवा विष्णुं दृष्ट्वा च दानवाः ॥१०॥
यथाहिर्गरुडं दृष्ट्वा सिंहं दृष्टा यथा गजाः । कीटवत् प्रपलायन्ते तस्य वक्त्रावलोकनात् ॥११॥
अग्निचौरभयं तस्य कदाचिन्नैव सम्भवेत् । पातका विविधाः शान्तिर्मेरु - पर्वत सन्निभाः ॥१२॥
यस्मात् तच्छृणुयाद् विघ्नांस्तृणं वह्निहुतं यथा । एकदा पठनादेव सर्वपापक्षयो भवेत् ॥१३॥
दशधा पठनादेव वाचा सिद्धिः प्रजायते । शतधा पठनाद् वापि खेचरो जायते नरः ॥१४॥
सहस्त्रदशसंख्यातं यः पठेद् भक्तिमानसः । माताऽस्य जगतां धात्री प्रत्यक्षा भवति ध्रुवम् ॥१५॥
लक्षपूर्णे यथा पुत्र स्तोत्रराजं पठेत् सुधीः । भवपाश विनिर्मुक्तो मम तुल्यो न संशयः ॥१६॥

सर्वतीर्थेषु यत्पुण्यं सकृज्जप्त्वा लभेन्नरः । सर्ववेदेषु यत् प्रोक्तं तत् फलं परिकीर्त्तितम् ॥१७॥
भूत्वा च बलवान्पुत्र धनवान् सर्वसम्पदः ।
देहान्ते परमं स्थानं यत् सुरैरपि दुर्लभम् ॥
स यास्यति न सन्देहः स्तवराजस्य कीर्त्तनात् ॥१८॥

॥ श्रीवामकेश्वरतन्त्रे षोडश्याः सहस्रनामस्तोत्रं सम्पूर्णम् ॥

॥ श्री तुरीया षोडशी त्रैलोक्य विजयं कवच स्तोत्रम् ॥

कैलास शिखरे रम्ये देव देवं जगद्गुरुम् । शङ्करं परिपप्रच्छ कुमारः शिखि वाहनः ॥

॥ श्रीस्कन्द उवाच ॥

जनक श्रीगुरो देव पुत्र वात्सल्य वर्धन । कवचं षोडशाक्षर्या वद मे परमेश्वर ॥

॥ श्रीईश्वर उवाच ॥

शृणु पुत्र महाभाग! कवचं मन्त्र विग्रह । गोप्याद् गोप्यतरं गोप्यं गुह्याद् गुह्यतरं महत् ॥
तव स्नेहात्प्रवक्ष्यामि नाख्यातं यस्य कस्यचित् । ब्रह्मेश विष्णु शक्रेभ्यो मया न कथितं पुरा ॥
देवाग्रे नैव दैत्याग्रे न शौनक गुणाग्रके । तव भक्त्या तु कवचं गोप्यं कर्तुं न शक्यते ॥
एकादश महाविद्या स वर्णा सद् गुणान्विता । सर्वशक्ति प्रधाना हि कवचं मन्मुखोदितं ॥
गणेशश्च रविर्विष्णुः शिव शक्तिश्च भैरवः । पञ्च तत्त्वादि सर्वेषां वर्मावर्तेन तुष्यताम् ॥
ऊर्ध्वाम्नायं महामन्त्रं कवचं निर्मितं मया । त्रैलोक्यविजयं दिव्यं तुरीयं कवचं शुभं ॥

॥ श्रीस्कन्द उवाच ॥

कवचं परमं देव्याः श्रोतुमिच्छाम्यहं प्रभो । यत् सूचितं त्वया पूर्वं धर्म कामार्थ मोक्षदं ॥
तद् विनाऽऽराधनं नास्ति जपं ध्यानादि कर्मणि । तस्याश्च कवचं यस्मात् तस्मात् तद् वद मे प्रभो ॥

॥ श्रीईश्वर उवाच ॥

शृणु पुत्र महाप्राज्ञ! रहस्याति रहस्यकम् । तुरीयं कवचं दिव्यं सर्वमन्त्र मयं शुभं ॥

॥ विनियोगः ॥

पूजान्ते तु जपात् पूर्वं कवचं समुदीरयेत् । अस्य श्रीकवचस्यास्य ऋषिरानन्द भैरवः ॥
श्रीविद्या देवताश्छन्दो गायत्री रुचि वृत्तिकं । रमाबीजं परा शक्तिर्वाग्भवं कीलकं स्मृतं ॥

॥ करन्यासः ॥

मम सर्वार्थ सिद्ध्यर्थे जपे तु विनियोगतः । अङ्गुष्ठाग्रे वाग्भवं च हृल्लेखां तर्जनी न्यसेत् ॥
लक्ष्मी बीजं मध्यमायामङ्गिराऽनामिका तथा । पराबीजं कनिष्ठायां लक्ष्मीं करतले न्यसेत् ॥

॥ षडङ्गन्यास ॥

हृदये वाग्भवं न्यस्यात् परां शिरसि च न्यसेत् । लक्ष्मीबीजं शिखायां च कवचे वाग्भवं न्यसेत् ॥

॥दिग्बन्धन ॥

हृल्लेखां नेत्रयोर्न्य स्यादस्त्रं तु कमलां न्यसेत् । भूर्भुवः स्वरिति मनुना दिग्-बन्धनमाचरेत् ॥
ध्यानं तस्य प्रवक्ष्यामि धर्म कामार्थ मोक्षदं । न्यास ध्यानादिकं सर्वं कृत्त्वा तु कवचं पठेत् ॥

॥ ध्यानम् ॥

क्षीरसागर मध्यस्थे रत्नद्वीपे मनोहरे । रत्नसिंहासने दिव्ये तत्र देवीं विचिन्तयेत् ॥
कोटिसूर्य प्रतीकाशां चन्द्रकोटि निभाननां । दाडिमी पुष्प सङ्काशां कुकुंमोदर सन्निभां ॥
जपा कुंसुम सङ्काशां त्रिनेत्रां च चतुर्भुजां । पाशांकुशधरां रम्यामिक्षु चापशरान्वितां ॥
कर्पूर शकलोन्मिश्र ताम्बूल पूरिताननाम् । सर्वशृंगार वेषाढ्यां सर्वावयव शोभिनीं ॥
सर्वायुध समायुक्तां प्रसन्नवदने क्षणाम् । सपरिवार सावरणां सर्वोपचारार्चिताम् ॥
एवं ध्यायेत् ततो वीर! कवचं सर्वकामदं । आवर्तयेत् स्वदेहे तु सर्वरक्षाकरं शुभम् ॥

॥ कवच स्तोत्रम् ॥

शिखायां मे ह्सौः पातु स्हौ मे ब्रह्मरन्ध्रके । सर्वदा ह्लौं च मां पातु वाम दक्षिण भागयोः ॥
ऐं ह्रीं श्रीं सर्वदा पातु षोडशी सुन्दरी परा । श्रीं ह्रीं क्लीं सर्वदा पातु ऐं सौं ॐ पातु मे सदा ॥
ह्रीं श्रीं ऐं पातु सर्वत्र क्नौं रं लं ह्रीं सदा मम । क्लीं हसकहल ह्रीं मे पातु सदा सौः क्लीं मम ॥
सौः ऐं क्लीं ह्रीं श्रिया पातु सबीजा षोडशाक्षरी । आपाद मस्तकं पातु महात्रिपुरसुन्दरी ॥
श्रीजयन्ती मस्तके मां पातु नित्यं विभूतये । ह्रीं मङ्गलासदा नेत्रे पातु सर्वार्थ सिद्धये ॥
क्लीं कालिका कर्णयुग्मं पातु सर्वशुभावहा । ऐं भारती घ्राण युग्मं पातु सर्वजयाप्तये ॥
सौः कराली मुखं पातु सर्वलोक वशाप्तये । ऐं शारदा सदा वाचं पातु साहित्य सिद्धये ॥
ॐ कपालिनी मे कर्णौं पातु सद्गान सिद्धये । ह्रीं दुर्गासहिता पातु स्कन्ध देशौ सदा मम ॥
श्रीं क्षमसहिता पातु हृदयं मम सर्वदा । ककार सहिता धात्री पार्श्वयुग्मं सदाऽवतु ॥
एकार सहिता स्वाहा पातु मे जठरं सदा । ईकार सहिता नाभिं स्वधा मां सर्वदाऽवतु ॥
लकार सहिता ब्राह्मी पृष्ठदेशं सदाऽवतु । ह्रींकार सहमाहेशी कटिं पातु सदा मम ॥
हकार सहिता गुह्यं कौमारी पातु सर्वदा । सकार सहिता पातु वैष्णवी गुद देशकम् ॥
ककार युक्ता वाराही ह्यूरु युग्मं सदाऽवतु । हकार सहिता जानु युग्मं माहेन्द्री मेऽवतु ॥
लकार युक्ता चामुण्डा जङ्घा युग्मं सदाऽवतु । ह्रींकार सहिता गुल्फयुग्मं लक्ष्मीः सदाऽवतु ॥
सकार युक्ता मे पाद युग्मेऽव्यात् शिवदूतिका । ककार सहिता प्राच्यां चण्डा रक्षतु सर्वदा ॥
लकारसहिताऽऽग्नेयां प्रचण्डा सर्वदाऽवतु । ह्रींङ्कार सहिता पातु दक्षिणे चण्डनायिका ॥
सौःकार सहिता चण्डवेगिनी नैर्ऋतेऽवतु । ऐङ्कार संयुता चण्डप्रकाशा पातु पश्चिमे ॥
क्लींकार सहिता पातु चण्डिका वायु गोचरे । ह्रींकार सहिता पातु चामुण्डा चोत्तरे मम ॥

श्रीङ्कार सहिता रौद्री पायादैशान्यके मम । ऊर्ध्वं ब्रह्माणी मे रक्षेत् षोडशी सह सर्वदा ॥
अधस्ताद् वैष्णवी रक्षेत् पुनः षोडशी संयुता । सर्वाङ्गं सर्वदा पातु सहिता भुवनेश्वरी ।
जले दावानलेऽरण्ये महोत्पाते च सागरे । दिवारात्रौ च मे रक्षेद् देवी तार त्रयी मम ।

॥फलश्रुति॥

इदं तुरीया सहितं षोडशाक्षरिकात्मकं । अभेद्यं कवचं त्वेदं मन्त्रबीज समन्वितम् ॥
योगिनी चक्रसहितं तवप्रीत्या प्रकाशितम् । धारयस्व मयादत्तं गोपनीयं सुपुत्रक ॥
न पुत्राय न शिष्याय बन्धुभ्यो न प्रकाशयेत् । इदं त्रिपुर सुन्दर्यास्तुरीयं कवचं शुभम् ॥
गोपनीयं प्रयत्नेन मन्त्रवर्णक्रमोदितम् । प्रातरारभ्य सायान्तं कर्म वेदान्तमोक्तिकम् ॥
तत्फलं समवाप्नोति तुरीय कवच व्रतम् । दशधा मातृकान्यासं लघुषोढ़ा ततः परम् ॥
शक्तिन्यासं महाषोढ़ां कृत्वा बाह्यान्तरं न्यसेत् । श्रीविद्यायां महान्यासं क्रमात् सावर्णतां व्रजेत् ॥
पूजान्ते यत्फलं प्राप्तं तत्फलं कवचव्रते । सवत्सां दुग्धसहितां साधकः कामधेनुवत् ॥
त्रैलोक्य विजयायेदं कवचं परमाद्भुतम् । यथा चिन्तामणौ पुत्र! मनसा परिकल्पिते ॥
तत्सर्वं लभते शीघ्रं मम वाक्यान्न संशयः । सायुरारोग्यमैश्वर्यं सदा सम्पत्प्रवर्धनम् ॥
कवचस्य प्रभावेण त्रैलोक्य विजयीभवेत् । अदीक्षिताय न देयं श्रद्धा विरहितात्मने ॥
नाख्येयं यस्य कस्यापि कृतघ्नायाततायिने । शान्ताय गुरुभक्ताय देयं शुद्धाय साधने ॥
अज्ञात्वा कवचं चेदं यो जपेत् पर देवताम् । सिद्धिर्न जायते वत्स! कल्पकोटि शतैरपि ॥
स एव च गुरु साक्षात् कवचं यस्तु पुत्रक । त्रिसन्ध्यं च पठेन्नित्यमिदं कवचमुत्तमम् ॥
निशार्धे जपकाले वा प्रत्यहं यन्त्रमग्रतः । जगद्वश्यं भवेच्छीघ्रं नात्र कार्याविचारणा ॥
सप्तकोटि महामन्त्राः सवर्णाः सगुणान्विताः । सर्वे प्रसन्नतां यान्ति सत्यं सत्यं न संशयः ॥
इति ते कथितं दिव्यं सगुणं भजन क्रमम् । निर्गुणं परमं वक्ष्ये तुरीयं कवचं शृणु ॥
कवचस्यास्य माहात्म्यं वर्णितुं नैव शक्यते । मूलादि ब्रह्मरन्ध्रान्तं श्रीचक्रं समुदीरयेत् ॥
देहमध्ये च सर्वस्वं श्रीचक्रं चिन्तयेत् सुत । पञ्चविंशति तत्वं च अतलं वितलं तथा ॥
सुतलं च तलातलं महातलं च पञ्चमम् । रसातलं षष्ठं वक्ष्ये सप्तमं पाताललोकम् ॥
भूर्भुवः स्वर्लोकमतो महल्लोक जनस्तथा । तपश्च सत्यलोकश्च भुवनानि चतुर्दश ॥
सर्वं श्रीभुवनं चैव निराकारं विचिन्तयेत् । मानसे पूजयेत् ध्यायेज्ज्योति रूपं सुचिन्मयं ॥
कवचं प्रजपेद् वत्स! राजराजेश्वरो भवेत् । इति परमरहस्यं सर्वमन्त्रार्थ सारं ।
भजति परम भक्त्या निश्चलं निर्मलत्वम् ॥
विलसित भुवि मध्ये पुत्रपौत्राभिवृद्धिं ।
धनसकल समृद्धिं भोग-मोक्षप्रदं च ॥

॥इतिश्री चूड़ामणौ श्रीशिव-स्कन्द संवादे त्रैलोक्य विजयं नाम श्रीतुरीया षोडशी श्रीराजराजेश्वरी महात्रिपुरसुन्दरी कवचं सम्पूर्णम्॥

॥ श्री श्रीविद्या वृहत्कर्पूर स्तोत्रम् ॥

इस स्तोत्र में श्लोक २ से ८ एवं १०-११ के अन्तर्गत कई मंत्रों के मंत्रोद्धार दिये गये हैं, पश्चात् श्रीचक्रराज महिमा अभिव्यक्त की गई है।

सपूज्य शुक्लारुण चक्र चारिणीं मूलादि विन्द्वान्तर्गतां विभावयन् ।
स्थिति स्वरूपां हृदयारविन्दगामीडेश पाशांकुश वाण चापिनीम् ॥१॥

कर्पूरं पूर रेफैर्विरहितममलं योनियुक्तं महेशीकारोपेतं ललज्जा युतमपि वरदे देवि! वाक् कूटमाहुः। एतन्नित्यं जपन्ति स्मरहरमहिले! तर्क काव्याऽऽगमज्ञास्तान् मुञ्चत्यब्ज हस्ता कथमपि न च ते साधकाः सम्भवन्ति॥२॥

ईशानः सोम मारौ गिरिश शत मखौ भौवने शाख्य बीजमित्थं ते काम कूटं प्रजपति सुजनो वारमेकं कदाचित्। पार्श्वे नृत्यन्ति कामाकुलित मृग दृशाः प्राणदाः साधकस्य नित्यं निर्वाणविद्या विलसति हृदयाम्भोज मध्ये च तस्य ॥३॥

सोमः कामेन्द्र लज्जायुतमिदमनिशं शक्ति कूटं तृतीयं प्रातर्यश्चन्द्र चूडां विकसित वदनाम्भोज संशोभितां त्वाम्। ध्यायन् राजाधि राजेश्वरि! जपति जनः शान्तचित्तः प्रकामं स स्यात् त्रैलोक्यनाथः सुर मुनि दनुजैः सेव्य मानो महात्मा ॥४॥

सर्वं वागादि कूट त्रयमपि ललिते! दिश्य कौलावतंसं, कौलज्ञानैक गम्यां धृत कुसुम धनुर्वाण पाशांकुशां त्वाम्। त्रैलोक्याकर्षकः स्याद् यदि जपति सदा भावयन् रक्त वर्णां प्रातः स्वान्तोपचारै रतुल्ति विभवेऽभ्यर्च्य मूलाम्बुजस्थाम् ॥५॥

जपित्वा लक्ष त्रयं ते मनुमनल मुखे तद् दशांशं विधाय कुर्याद् यश्चक्रपूजां सुरगणनमिते श्रीयुतः स्यात् स एव। पृथ्वी पालोत्तमाङ्गासृत मणिमुकुट ज्वालिनी राजितांघ्रिर्वाचालः काव्यकर्त्ताऽमर पुरगणिका चित्तचौरश्चिरायुः ॥६॥

वाक्कूटं तदनु तव शिवे! शक्ति कूटं नियोज्य श्रीयुक्तं मन्त्रमेतज्जपति परशिवां षोडशीं षोडशार्णाम्। ध्यायेत् पाशांकुशां त्वामभय वर करां सोमसूर्याग्नि नेत्रां रक्तां चन्द्रावतंसां स भवति सकलैश्वर्य युक्तः कुलज्ञः ॥७॥

तारं मायां स पद्मां तदनु निगदितं देवि! कूट त्रयं च श्रीमाया काम वाणी स्मर हर दयिते! शक्ति युक्तैस्तदेतैः। इत्युक्तैः पञ्च बीजैः कृत पुटित महाबीज षट्कं विधाय श्रीविद्ये बीजरूपं भवति तव मनुं श्रीयुतं मोक्षदं च ॥८॥

मातः श्रीमन्त्रराज स्मरति यदि जनो वारमेकं जितात्मा कामेशाङ्क स्थितां त्वामरुणित वसनां सुस्मितामम्बुजस्थाम्। खं व्योमाकाश चन्द्र प्रमित दल युताम्भोज मध्ये विभाव्य सर्वैः पापर्विमुक्तस्तदवधि चरितैः पुण्यरूपः स एव ॥९॥

तारान्ते वाक् त्रयान्ते स्मरमपि कमलान्तेऽपि तच्छक्तिकूटं पूर्वोक्तैः पञ्च बीजैः कृतपुटित महामन्त्र राजं तवेदम्। ध्यायन् विद्याक्ष पाशांकुश करकमलां गौर वर्णां त्रिनेत्रां सर्वज्ञः। स्याज्जपेद् यः कुलपथ विधिना श्रीमहाषोडशीं त्वाम् ॥१०॥

शक्त्याख्यं चैव कामं प्रथम निगदितं कूटमब्जासनाढ्यां मायावेदादि युक्तं पुटितमपि सदा पञ्चबीजैः पुरोक्तैः। ध्यायन् नीलाम्बरां त्वां शशि सकल धरां पान पात्रां त्रिनेत्रां त्रैलोक्यं क्षोभयेद् यः प्रजपति विधिना दीक्षितः कौलिकेन्द्रः ॥११॥

मातः! श्रीमन्त्रमेतत् त्रितयमपि सदा दिव्य भावानुरक्तो दीक्षां सम्प्राप्य यत्नाज्जपति निजगुरु प्रोक्त मार्गेण कश्चित्। जीवन्मुक्तः स एव त्रिभुवन विजयी सर्व वेद गमज्ञः साक्षान्नारायणस्य प्रतिनिधिरचिरात् त्वत् पदं प्राप्नुयाद् यः ॥१२॥

प्रातः श्रीचक्र संस्थामविरतं महिलाभिर्युतः साधकेन्द्रः शुक्लैर्वोक्तोपचारैः क्रमपथनिहितैर्मन्त्रवर्यैः समर्च्य। साङ्गां साम्नाय विद्यामकुलकुलगतां षोडशाधारमूलां ध्यायन् यो वर्ण लक्षं जपति शिव समः स्यान्महाषोडशीं त्वाम् ॥१३॥

त्रिवृत्तं भूगेहे रसविधु - दलान्तर्वसुदलं ततो मन्वस्रान्तः सुललितदशार द्वयमपि ।
तदन्तः सर्पारं जननि! कुल बालार्क सदृशं, त्रिकोणं तन्मध्ये विमल तर विन्दुर्भगवति ॥१४॥

तवेदं श्रीचक्रं जगदखिलमात्मा त्वमिति च शरीरं तच्छैवं चिदपि परमे शाक्तममलम् ।
गुरोर्ज्ञात्वा सर्वं विलिखति सदा भावनपरस्त्रि लक्षं सिन्दूरैः स भवति नरेन्द्रः क्षितितले ॥१५॥

सुधाक्तैः सिन्दूरैरपि कुलरजोभिः सुरुचिरं, विलिख्य श्रीचक्रं प्रणमति च सन्तर्पयति यः ।
निशायां प्रालेयाचल कुल महोत्तंस कलिके, भवेच्छक्त्या युक्तः सकल जगतामेव वशकृत् ॥१६॥

गुरुप्रोक्तैर्मार्गैः परशिवमुखाम्भोज मुदिते, स्वदेहे श्रीचक्रं सततमपि सञ्चिन्तयति यः ।
स योगीशो वाग्मी वर निकर चूडामणिरपि, प्रवालप्राले य प्रभजति सुगुप्तं प्रभवति ॥१७॥

तदस्मिञ्छ्री पीठाश्रितरुचिर सिंहासनगतां, महापञ्च प्रेतैः सुर निकर कोलैश्च सहिताम् ।
समुक्ता माणिक्यैरसुर विवुधालभ्य मणिभिः, कृताङ्गालङ्कारां जितमदन रूपां त्रिनयनाम् ॥१८॥

नवीनादित्याभां धृत शशिकलां मुक्त चिकुरां, शरांश्चापं पाशं शृणिमपि धृतां हस्त कमलैः ।
महाकामेशाङ्के - कृतनिवसतीं रक्तवदनां, स्मितं कामं दृष्ट्वा स्मितमुख सरोजां परशिवाम् ॥१९॥

जनो योध्यायेत् त्वामकुलकुलमार्ग क्रमयुतः, समर्चायां नित्यं भुवन भय भङ्ग व्यासनिनि ।
मयूखाभिस्ताभिः प्रकट वदनाभिश्च सहितां, चतुः पीठासीनां त्रिदशगण वन्द्यः स भवति ॥२०॥

शिवे! त्वं संक्षोभिण्यसि जननि! विद्रावणकरी, परे! सर्वाकर्षिण्यसि सुललिते! सर्व वशिनी ।
अजे! सर्वोन्मादिन्यसि भगवति! त्वं त्रिनयने, त्वमेका कल्याणीश्वरि! कुलमहेश्यंकुशधरी ॥२१॥

भवाधारे खेचर्यसि जननि! बीजा त्वमसि च, महायोनिस्त्वं वै निखिलभुवनानामपि सदा ।
त्रिखण्डारूपा त्वं जगदघहरे! कौलसुखदे, करेमुद्रारूपा ब्रजसि यदि कस्यापि स शिवः ॥२२॥

समाराध्यां देवीं सकलकुल मुद्राक्रम युतां, विभाव्य त्वां नित्यं परमशिव - पर्यङ्कनिलये ।
गुरूक्तैस्तद् वीजैः सहरचित मुद्रास्तव मुदे, पुरस्त जायन्ते मदनहरतुल्याः सुरनुताः ॥२३॥

उमा त्वं काली त्वं त्वमसि भुवना दुर्गतिहरे, परा गुह्या तारा स्मरहरसती चन्द्रवदने ।
महाकुब्जा बाला त्रिपुर ललिता त्वं च विमले, रमा वाणी सर्वावरणजननी त्वं भगवति ॥२४॥

कलाभिर्नित्याभिस्तिथि परिमिताभिः परिवृतां, समभ्यर्चच्छ्री मद्गुरु कुलमपि प्रोक्त विधिना ।
स्मरेद् यस्त्वामङ्गाश्रित युवतिषड्भिः स्मितमुखि, स सर्वार्थावासः प्रमुदितमना स्यादिह सदा ॥२५॥

धरित्रि चक्रस्थां स्फटिक दृशदच्छच्छविमयीं, त्रिनेत्रामम्भोज - द्वय धृतकरां पुस्तकधराम् ।

तथाक्ष स्रग्धस्तां प्रकट जननीभिः परिवृतां, स चार्वाकां रम्यां निखिल भव सम्मोहन कराम् ॥२६॥
त्रिवृत्तस्थां रक्तां कठिन कुचभारां त्रिनयनां, विचित्रालङ्कारामभययुत विद्याक्ष वरदाम् ।
महाक्षैः संयुक्तां स विजितमनस्कांश्च युवतीं, सदा त्रैवर्गाणां फलमपि सकृत् साधन कराम् ॥२७॥
कलापत्राब्जस्थां हिमगिरि निभां शुभ्रवसनां, महागुप्ताख्याभिः करकलित पाशामभि युताम् ।
त्रिनेत्रां पाणिभ्यामभय वरदामकुश करां, स बौद्धां सर्वेषामभिलषित दानाश्वासनिनीम् ॥२८॥
जपापुष्पारक्तामभय वर विद्याक्ष विलसत्, कराम्भोजामष्टच्छद कमलसंस्थां त्रिनयनाम् ।
सदैनां देवीं गुप्ततर सकलाभिः परिवृतां, सुधासक्तां शान्तां पशुजनमहा - क्षोभण कराम् ॥२९॥
सदा शक्रारस्थामरुण वसनां सम्पदयुत, प्रदायाख्याभिस्ताभिरखिल सुसौभाग्यजननीम् ।
त्रिनेत्रां विद्याक्षाभय वर कराब्जैरपि युतां, ससांख्यां स्वच्छंदां स्मितमुखसरोजां च सुभगाम् ॥३०॥
सहस्रार्काभासामखिल कुल कौलादि सहितां, त्रिनेत्रां विद्याक्षाभय वरकरां रक्तवसनाम् ।
बहिः खैकारस्थां निखिलनिगमैः संयुतपदां, सतां सर्वार्थानामपि सुतरसा साधन करीम् ॥३१॥
दशारस्थामन्तः सकल सुररक्षणकरीं, प्रवालारक्ताभां त्रिनयनयुक्तां साभय वराम् ।
स पाशां शृण्याढ्यां सुरुधिर कपालं जपवटीं, धृतां सौरोपेतामभि नुतनिगर्भादि सहिताम् ॥३२॥
शशाङ्काभां शुभ्राभरण वसनां सस्मितमुखीं, त्रिनेत्रां तां प्राशांकुशयुत कपालाभय कराम् ।
रहस्याभिर्युक्तां निखिल भवरोग क्षयकरीं, सदाष्टारे संस्थां सुमदमुदितां वैष्णव - युताम् ॥३३॥
महाचक्रे कोणाश्रितभुवन कूटादि सहिते, स्थितां माणिक्याभामभय वरदां पुस्तक धराम् ।
तथा सालङ्कारां स्फटिक गुटिकामण्डितकरां, त्रिनेत्रां मुण्डाढ्यामपि कुसुममालां च दधतीम् ॥३४॥
स्मितास्यामारक्तामरुण वसनां मन्दहसितां, निशानाथोत्तंसामभयवर विद्याक्ष सहिताम् ।
त्रिनेत्रां पञ्चाशत् परिमित महामुण्डरचितां, दधानां तां मालां गलित चिकुरां रत्नखचिताम् ॥३५॥
क्रमात् त्वां नित्यं यः स्मरति दशचक्रेषु परमे, पुनस्तत्तन्मन्त्रैः सहकुल गुरुप्रोक्त विधिना ।
स वित्ते वित्तेशः सुर गुरु समः शास्त्र कुशलो, भवेत् त्रैलोक्याधीश्वरि! तव दयापाङ्गविषयः ॥३६॥
प्रतीहारान् मातस्तव चरणविद्यां च ललिते, प्रपञ्चाख्यां विद्यां तदनु दशदिक्पाल निवहाम् ।
ततस्तेषां शस्त्राण्यपि कुल पथाभ्यचर्य मुदितः, कहानन्ताराध्ये! ब्रजति परमधाम मनुजः ॥३७॥
रसैकास्यामम्बां धृतशशिकलां मुक्तचिकुरां, त्रिनेत्रामापीनोन्नत कुचयुगां रक्तवसनाम् ।
हरि ब्रह्मेशानाजिनमभिधानां करशतैरथाष्टोपेतैर्वा सुरनिकरयुक्तैरपि युताम् ॥३८॥
महापञ्च - प्रेतोपरि रुचिरसिंहासनमथों परीशस्तन्त्राभ्युद्भवममल रक्ताभ - कमलम् ।
श्मशानं तन्मध्ये वृषभविगतानन्द पुरुषोरसिस्थां, यो ध्यायेज्जननि स हि मोक्षं च लभते ॥३९॥
स्मरेन्निर्वाणाख्यं तव चरणसम्पूजन विधौ षडाम्नायोपेतां ब्रज गतममुं पञ्चवदनम् ।
कराम्भोजैः पद्मानि च दश दधानां च दशभिर्महाविद्यायुक्तं किमपि कुलकल्पं विदधतम् ॥४०॥
जपेद् यस्तवन्मन्त्रं जननि! सकलाम्नाय जनकं, सदा सर्वाचारैरपि यजनशीलः प्रमुदितः ।

स वाग्मार श्रीसम्पुटित दश कूटात्मकमथ, श्रुतिश्रीशाकिन्यादिकमिति सुगुह्यद्वयमपि ॥४१॥
सजीवनमुक्तः स्यादिह जननि! निर्वाणसुखदे, पयोधिः सिद्धिर्नाममर दितिजर्वन्दितपदः।
बहूक्तैः किं पञ्चाननदश शतास्याह्यविदिते, महिम्ना संयुक्तो मदन महिला मोहनकरः ॥४२॥
जनो यो हालाभिर्जननि! तव सम्पूज्यचरणौ, करे पात्रं धृत्वा भगवति! कुलज्ञान निरतः।
सहस्त्रारे ध्यात्वा परशिव गुरुं शक्तिसहितं, पिवेद् वामोच्छिष्टं स हि भवति शम्भोः प्रतिनिधिः ॥४३॥
कुलागारं पश्यन्नति दृढमना यस्तव मनुं, जपेल्लक्षं रात्रौ रहसि च मदामोद मुदितः।
तथा श्रीदूतीं तां गजदशनपयङ्क निलयां, यजेद् यस्त्वद्रूपां स भवति हरिमन्मथकले ॥४४॥
स्मरागारे कुर्वन निजकर सरोजं त्रिनयने, त्रिलक्षं त्वन्मन्त्रं भगवति! सदा घोर विधिना।
महापीठे मातस्तव दश शतार्णं शुभमनुं जपेद, यः कौलेन्द्रः स हि भुवनसौख्यं च लभते ॥४५॥
शिवे! लक्षं मन्त्रं जपति विपरीतो यदि नरः, स एव श्रीमातः! सकल भुवनानामधिपतिः।
शवारूढः कौलः पितृ वनगतः श्रीक्रमयुतस्त्रिकूटाख्यां विद्यामपि जपति स स्यात् कुलपतिः ॥४६॥
नरं मेषं छागं महिषमपि मार्जारमथवा शुभं मत्स्यं हंसं हरिहरनुते कुक्कुटमपि।
बलिं ते पूजायां वितरति यदा कौलिक जनस्तदा क्रोधादीनामपि रिपुगणानां प्रहरणम् ॥४७॥
महामूलाधारोपरि रसदलं यद् रविनिभं, ततो दिग्पत्राख्यं ललितमणिपूरं तदुपरि।
हृदम्भोजं मातस्तदुपरि विशुद्धाख्यमपरं, ततस्त्वां वै ध्यायन् द्विदलयुत पद्मोपरिगताम् ॥४८॥
हठाभ्यां संयोगाद् विलसति सुषुम्णाख्य रमणि, तथा सार्द्धं प्रीत्वाऽमर मुनि मनोभ्यर्थित सुधाम्।
परां दीपाकारां निखिलभुवनाधार जननीं, स्मरन्तस्त्वां मातर्भुवन नमिताः कौलमुनयः ॥४९॥
त्वदीयं श्रीस्तोत्रं भगवति! महामन्त्रसदनं, तथा ते ध्यानाङ्गावरण नवमुद्रादि सहितम्।
महाचक्रोद्धारैर्यतमिदमहो साधकवरः, पठेद् यः पूजाऽन्ते भुवि भवति स श्रीप्रियतरः ॥५०॥

॥ श्री श्रीविद्या वृहत् कर्पूर स्तोत्रं सम्पूर्णम् ॥

॥ श्री आवरण सहस्त्राक्षरी ॥

ॐ ऐं ह्रीं श्रीं हंसः ॐ नमो भगवति अक्षोभ्ये रूक्ष कर्णे राक्षसि पक्षत्रणे क्षपे पिङ्गलाक्षि अरुणे क्षये लीले लोले ललिते लूते लुलिते लम्बिके लङ्केश्वरि लासे विमले हुताशनि विशालाक्षि हूँकारे वडवामुखि महारवे महाक्रीड क्रोधिनि खरास्ये सर्वज्ञे तरले तारे दृष्टि हृष्टे खगकन्धरे सारसि रससंग्रहिणि तालजङ्घे करङ्किणि मेघनादे प्रचण्डोग्रे कालकर्णि चेलप्रदे चम्पे चम्पावति प्रचम्पे मलयान्तकि पितृवक्त्रे पिशाचाक्षि पिशुनि लोलुपे वानति वानरि वायु विकृतास्ये वागुवेगे बृहत्कुक्षि विकृते विश्वरूपिणि।

यम जिह्वे जये दुर्जये पुमन्तकि बिडाल रेवति पूतने विजये अनन्ते क्रन्दिनि चण्डि रेकर्णि (सर्वसंक्षोभिणि) सर्वविद्राविणि सर्वाकर्षिणि सर्ववशङ्करि सर्वोन्मादिनि सर्वमहांकुशे खेचरि (ख चक्र धारिणि) सर्वबीजरूपे महायोनिरूपे त्रिखण्डे!

अनंगब्राह्मि अनङ्गमाहेश्वरि अनङ्गकौमारि अनङ्गवैष्णावि अनङ्गवाराहि अनङ्गइन्द्राणि अनङ्गचामुण्डे अनङ्ग महालक्ष्मि प्रकटयोगिनीशि चार्वाक दर्शनाङ्गि त्रैलोक्यमोहनचक्र स्वामिनि!

कामाकर्षिणि बुद्ध्याकर्षिणि अहङ्काराकर्षिणि शब्दाकर्षिणि स्पर्शाकर्षिणि रूपाकर्षिणि रसाकर्षिणि गन्धाकर्षिणि चित्ताकर्षिणि धैर्याकर्षिणि स्मृत्याकर्षिणि नामाकर्षिणि बीजाकर्षिणि आत्माकर्षिणि अमृताकर्षिणि शरीराकर्षिणि गुप्तयोगिनीशि बौद्धदर्शनाङ्गि सर्वाशापूरकचक्रस्वामिनि!

अनङ्गकुसुमे अनङ्गमेखले अनङ्गमदने अनङ्गमदनातुरे अनङ्गरेखे अनङ्गवेगिनि अनङ्गांकुशे अनङ्गमालिनि अतिगुप्त योगिनीशि रौद्रदर्शनाङ्गि सर्वसंक्षोभिणिचक्रस्वामिनि पूर्वाम्नायेशि सृष्टि प्रदे!

सर्वसंक्षोभिणि सर्वविद्राविणि सर्वाकर्षिणि सर्वाह्लादिनि सर्वसम्मोहिनि सर्वस्तम्भनि सर्वजृम्भिनि सर्ववशङ्करि सर्वरञ्जनि सर्वोन्मादिनि सर्वार्थसाधनि सर्वसम्पत् - प्रपूरणि सर्वमन्त्रमयि सर्वद्वन्द्वक्षयङ्करि सप्रदाययोगिनीशि सर्वदर्शनाङ्गि सर्वसौभाग्यदायकचक्र स्वामिनि!

सर्वसिद्धिप्रदे सर्वसम्पत्प्रदे सर्वप्रियङ्करि सर्वमंगलकारिणि सर्वकामप्रदे सर्वदुःख विमोचनि सर्वमृत्युप्रशमनि सर्वविघ्न निवारणि सर्वाङ्गसुन्दरि सर्वसौभाग्य दायिनि कुलकौल योगिनीशि सर्वार्थसाधक चक्र स्वामिनि।

ॐ नमो भगवति चामुण्डे नरकंकगृध्रोलूक परिवार सहिते श्मशानप्रिये नररुधिर मांसचरु भोजन प्रिये सिद्धविद्याधर वृन्द वन्दित चरणे ब्रह्मेश विष्णुवरुण कुबेर भैरवी भैरवप्रिये इन्द्रक्रोध विनिर्गत शरीरे द्वादशादित्य चण्डप्रभे अस्थिमुण्डकपालमालाभरणे शीघ्रं दक्षिणदिशि आगच्छागच्छमानय २ नुद २ अमुकं मारय २ चूर्णय २ आवेशयावेशय त्रुट २ त्रोटय २ स्फुट २ स्फोटय २ महाभूतान् जृम्भय २ ब्रह्मराक्षसानुच्चाटयोच्चाटय भूत-प्रेत पिशाचान् मूर्च्छय २ मम शत्रूनुच्चाटयोच्चाटय शत्रून् चूर्णय २ सत्यं कथय २ वृक्ष्येभ्यः संन्नाशय २ अर्कं स्तम्भय २ गरुड पक्षपातेन विषं निर्विषं कुरु २ लीलांगालय वृक्षेभ्यः परिपातय २ शैलकाननमहीं मर्दय २ मुखं उत्पाटयोत्पाटय पात्रं पूरय २ भूत भविष्यं यत्सर्वं कथय २ कृन्त २ दह २ पच २ मथ २ प्रमथ २ घर्घर २ ग्रासय २ विद्रावय २ उच्चाटयोच्चाटय विष्णुचक्रेण वरुणपाशेन इन्द्रवज्रेण ज्वरं नाशय नाशय प्रविदं स्फोटय २

सर्वशत्रून् मम वशं कुरु कुरु पातालं प्रत्यंतरिक्षं आकाशग्रहं आनयानय करालि विकरालि महाकालि रुद्रशक्ते पूर्वदिशं निरोधय २ पश्चिमदिशं स्तम्भय २ दक्षिणदिशं निधय २ उत्तरदिशं बंधय २ ह्रां ह्रीं ॐ बंधय २ ज्वालामालिनि स्तम्भिनि मोहिनि मुकुट विचित्र कुण्डल नागादि वासुकी कृतहार भूषणेमेखला चन्द्रार्कहास प्रभंजने विद्युत्स्फुरित सकाश साट्टहासे निलय २ हुं फट् २ विजृंभितशरीरे सप्तदीपकृते ब्रह्माण्ड विस्तारितस्तनयुगले असिमुसल परशुतोमरक्षुरिपाशहलेषु वीरान् शमय शमय २ सहस्त्रबाहु परापरादि शक्ति विष्णु शरीरे शंकर हृदयेश्वरि बगलामुखि सर्वदुष्टान् विनाशय २ हुं फट् स्वाहा। ॐ ह्लीं बगलामुखि ये केचनापकारिणः सन्ति तेषां वाचं मुखं पदं स्तम्भय २ जिह्वां कीलय कीलय बुद्धिं विनाशय २ ह्रीं ॐ स्वाहा ॐ ह्लींह्रीं हिली हिली अमुकस्य वाचं मुखं पदं स्तम्भय शत्रुंजिह्वां कीलय शत्रूणां दृष्टिमुष्टि गतिमति दंत तालु जिह्वां बंधय २ मारय २ शोषय २ हुं फट् स्वाहा।

॥ इति बगलातन्त्रे ब्रह्मास्त्रमालामन्त्रः सम्पूर्णः ॥

॥ अथ बगलामुखी कवचम् ॥

(रुद्रयामले)

॥ श्रीभैरवी उवाच ॥

श्रुत्वा च बगलापूजां स्तोत्रं चापि महेश्वर । इदानीं श्रोतुमिच्छामि कवचं वद मे प्रभो ॥१॥
वैरिनाशकरं दिव्यं सर्वाऽशुभविनाशनम् । शुभदं स्मरणात् पुण्यं त्राहि मां दुःखनाशन ॥२॥

॥ श्रीभैरव उवाच ॥

कवचं शृणु वक्ष्यामि भैरवि प्राणवल्लभे । पठित्वा धारयित्वा तु त्रैलोक्ये विजयी भवेत् ॥३॥

विनियोग :- ॐ अस्य श्रीबगलामुखी कवचस्य नारद ऋषिः। अनुष्टुप् छन्दः। श्रीबगलामुखी देवता। लं बीजं। ईं शक्तिं। ऐं कीलकम्। पुरुषार्थचतुष्टये जपे विनियोगः।

शिरो मे बगला पातु हृदयमेकाक्षरी परा । ॐ ह्रीं ॐ मे ललाटे च बगला वैरिनाशिनी ॥४॥
गदाहस्ता सदा पातु मुखं मे मोक्षदायिनी । वैरिजिह्वा धरा पातु कण्ठं मे बगलामुखी ॥५॥
उदरं नाभिदेशं च पातु नित्यं परात् परा । परात् परतरा पातु मम गुह्यं सुरेश्वरी ॥६॥
हस्तौ चैव तथा पातु पार्वती परिपातु मे । विवादे विषमे घोरे संग्रामेरिपुसंकटे ॥७॥
पीताम्बरधरा पातु सर्वाङ्गं शिवनर्तकी । श्रीविद्या समयं पातु मातङ्गी पूरिता शिवा ॥८॥
पातु पुत्रं सुतां चैव कलत्रं कालिका मम । पातु नित्यं भ्रातरं मे पितरं शूलिनी सदा ॥९॥
रन्ध्रे हि बगलादेव्याः कवचं मन्मुखोदितम् । न वै देयममुख्याय सर्वसिद्धिप्रदायकम् ॥१०॥
पठनाद् धारणादस्य पूजनाद् वाञ्छितं लभेत् । इदं कवचमज्ञात्वा यो जपेद् बगलामुखीम् ॥११॥
पिवन्ति शोणितं तस्य योगिन्यः प्राप्य सादराः । वश्ये चाकर्षणे चैव मारणे मोहने तथा ॥१२॥
महाभये विपत्तौ च पठेद् वा पाठयेत् तु यः । तस्य सर्वार्थसिद्धिः स्याद् भक्तियुक्तस्य पार्वति ॥१३॥

॥ इति श्रीरुद्रयामले श्रीबगलामुखी कवचम् सम्पूर्णम् ॥

॥ अथ बगलामुखी ब्रह्मास्त्र कवचम् ॥

(१)

इस कवच में प्रयुक्त मंत्र के जप एवं संपुटित दुर्गापाठ कराने पर शत्रुनाश, प्रेतदोषशमन, आर्थिक उन्नति हेतु कई सफल प्रयोग किये है। षट्त्रिंशतात्मक (३६ अक्षर वाले) मंत्र के विकल्प में इस मंत्र में मंत्रोच्चारण या ध्यान समय त्रुटि की संभावना भी नहीं रहती है। हमने विकट परिस्थिति में इस मंत्र के कई सफल प्रयोग कियें है।

कैलासाचलमध्यगं पुरवहं शान्तं त्रिनेत्रं शिवम् । वामस्था गिरिजा प्रणम्य कवचं भूतिप्रदं पृच्छति ॥
देवीश्रीबगलामुखी रिपुकुलारण्याग्निरूपा च या । तस्याश्चापविमुक्तमन्त्रसहितं प्रीत्याधुना ब्रुहिमाम् ॥१॥

॥ श्रीशङ्कर उवाच ॥

देवि श्रीभवबल्लभे शृणु महामन्त्रं विभूतिप्रदम् । देव्या वर्मयुतं समस्तसुखदं साम्राज्यदं मुक्तिदम् ॥
तारं रुद्रवधू विरिञ्चिमहिला विष्णुप्रिया कामयुक् । कान्ते श्रीबगलानने मम रिपून् नाशय युग्मं त्वति ॥२॥
ऐश्वर्याणि पदं च देहि युगलं शीघ्रं मनोवाञ्छितं । कार्यं साधय युग्मयुच्छिववधूवह्निप्रियान्तो मनुः ॥
कंसारेस्तनयं च बीजमपरा शक्तिश्च वाणी तथा । कीलं श्रीमति भैरवर्षिसहितं छन्दो विराट्संयुतम् ॥३॥
स्वेष्टार्थस्य परस्य वेति नितरां कार्यस्य सम्प्राप्तये । नानाऽसाध्यमहागदस्य नियतं नाशाय वीर्याप्तये ॥
ध्यात्वाश्रीबगलाननां मनुवरं जप्त्वा सहस्त्राख्यकम् । दीर्घैः षट्कयुतैश्च रुद्रमहिलाबीजैर्विन्यस्याङ्गके ॥४॥

॥ ध्यानम् ॥

सौवर्णासनसंस्थितां त्रिनयनांपीतांशुकोल्लासिनीम् । हेमाभाङ्गरुचिं शशाङ्कमुकुटांसच्चम्पकस्त्रग्युताम् ॥
हस्तैर्मुद्गरपाशवज्ररसनाः संबिभ्रतीं भूषणैः । व्याप्ताङ्गीं बगलामुखीं त्रिजगतां संस्तम्भिनीं चिन्तयेत् ॥

विनियोग :- **ॐ अस्य श्रीबगलामुखी ब्रह्मास्त्रमन्त्रकवचस्य भैरव ऋषिः, विराट् छन्दः, श्रीबगलामुखी देवता, क्लीं बीजम्, ऐं शक्तिः, श्रीं कीलकं, मम (परस्य) च मनोभिलषितेष्टकार्य सिद्धये विनियोगः।**

ऋष्यादिन्यास :- **शिरसि भैरव ऋषये नमः। मुखे विराट्छन्दसे नमः। हृदि बगलामुखी देवतायै नमः। गुह्ये क्लीं बीजाय नमः। पादयोः ऐं शक्तये नमः। सर्वाङ्गे श्रीं कीलकाय नमः।**

करन्यास :- **ॐ ह्रां अङ्गुष्ठाभ्यां नमः, ॐ ह्रीं तर्जनीभ्यां नमः, ॐ ह्रूं मध्यमाभ्यां नमः, ॐ ह्रैं अनामिकाभ्यां नमः, ॐ ह्रौं कनिष्ठिकाभ्यां नमः, ॐ ह्रः करतलकरपृष्ठाभ्यां नमः।**

हृदयादिन्यास :- **ॐ ह्रां हृदयाय नमः, ॐ ह्रीं शिरसे स्वाहा, ॐ ह्रूं शिखायै वषट्, ॐ ह्रैं कवचाय हुम्, ॐ ह्रौं नेत्रत्रयाय वौषट्, ॐ ह्रः अस्त्राय फट्।**

मन्त्रोद्धारः :- **ॐ ह्रीं ऐं श्रीं क्लीं श्रीबगलानने मम रिपून् नाशय नाशय, ममैश्वर्याणि देहि देहि शीघ्रं मनोवाञ्छितं कार्यं साधय साधय ह्रीं स्वाहा।**

शिरो मे पातु ॐ ह्रीं ऐं श्रीं क्लीं पातु ललाटकम् । सम्बोधनपदं पातु नेत्रे श्रीबगलानने ॥१॥
श्रुतौ मम रिपुं पातु नासिकां नाशयद्वयम् । पातु गण्डौ सदा मामैश्वर्याण्यन्तं तु मस्तकम् ॥२॥
देहिद्वन्द्वं सदा जिह्वां पातु शीघ्रं वचो मम । कण्ठदेशं मनः पातु वाञ्छितं बाहुमूलकम् ॥३॥

कार्यं साधयद्वन्द्वं तु करौ पातु सदा मम । मायायुक्ता तथा स्वाहा हृदयं पातु सर्वदा ॥४॥
अष्टाधिकचत्वारिंशदण्डाढ्या बगलामुखी । रक्षां करोतु सर्वत्र गृहेऽरण्ये सदा मम ॥५॥
ब्रह्मास्त्राख्यो मनुः पातु सर्वाङ्गे सर्वसन्धिषु । मन्त्रराजः सदा रक्षां करोतु मम सर्वदा ॥६॥
ॐ ह्रीं पातु नाभिदेशं कटिं मे बगलाऽवतु । मुखिवर्णद्वयं पातु लिङ्गं मे मुष्कयुग्मकम् ॥७॥
जानुनी सर्वदुष्टानां पातु मे वर्णपञ्चकम् । वाचं मुखं तथा पादं षड्वर्णाः परमेश्वरी ॥८॥
जङ्घायुग्मे सदा पातु बगला रिपुमोहिनी । स्तम्भयेति पदं पृष्ठं पातु वर्णत्रयं मम ॥९॥
जिह्वावर्णद्वयं पातु गुल्फौ मे कीलयेति च । पादोर्ध्वं सर्वदा पातु बुद्धिं पादतले मम ॥१०॥
विनाशयपदं पातु पादाङ्गुल्योर्नखानि मे । ह्रीं बीजं सर्वदा पातु बुद्धीन्द्रियवचांसि मे ॥११॥
सर्वाङ्गं प्रणवः पातु स्वाहा रोमाणि मेऽवतु । ब्राह्मी पूर्वदले पातु चाग्नेय्यां विष्णुवल्लभा ॥१२॥
माहेशी दक्षिणे पातु चामुण्डा राक्षसेऽवतु । कौमारी पश्चिमे पातु वायव्ये चापराजिता ॥१३॥
वाराही चोत्तरे पातु नारसिंही शिवेऽवतु । ऊर्ध्वं पातु महालक्ष्मीः पाताले शारदाऽवतु ॥१४॥
इत्यष्टौ शक्तयः पान्तु सायुधाश्च सवाहनाः । राजद्वारे महादुर्गे पातु मां गणनायकः ॥१५॥
श्मशाने जलमध्ये च भैरवश्च सदाऽवतु । द्विभुजा रक्तवसनाः सर्वाभरणभूषिताः ॥१६॥
योगिन्यः सर्वदा पान्तु महारण्ये सदा मम । इति ते कथितं देवि कवचं परमाद्भुतम् ॥१७॥
श्रीविश्वविजयं नाम कीर्तिश्रीविजयप्रदम् । अपुत्रो लभते पुत्रं धीरं शूरं शतायुषम् ॥१८॥
निर्धनो धनमाप्नोति कवचस्यास्य पाठतः । जपित्वा मन्त्रराजं तु ध्यात्वा श्रीबगलामुखीम् ॥१९॥
पठेदिदं हि कवचं निशायां नियमात् तु यः । यद् यत् कामयते कामं साध्यासाध्ये महीतले ॥२०॥
तत् तत् काममवाप्नोति सप्तरात्रेण शङ्करि । गुरुं ध्यात्वा सुरां पीत्वा रात्रौ शक्तिसमन्वितः ॥२१॥
कवचं यः पठेद् देवि तस्यासाध्यं न किञ्चन । यं ध्यात्वा प्रजपेन् मंत्रं सहस्रं कवचं पठेत् ॥२२॥
त्रिरात्रेण वशं याति मृत्योः तन्नात्र संशयः । लिखित्वा प्रतिमां शत्रोः सतालेन हरिद्रया ॥२३॥
लिखित्वा हृदि तन्नाम तं ध्यात्वा प्रजपेन् मनुम् । एकविंशद्दिनं यावत् प्रत्यहं च सहस्रकम् ॥२४॥
जप्त्वा पठेत् तु कवचं चतुर्विंशतिवारकम् । संस्तम्भं जायते शत्रोर्नात्र कार्या विचारणा ॥२५॥
विवादे विजयं तस्य संग्रामे जयमाप्नुयात् । श्मशाने च भयं नास्ति कवचस्य प्रभावतः ॥२६॥
नवनीतं चाभिमन्त्र्य स्त्रीणां दद्यान् महेश्वरि । वन्ध्यायां जायते पुत्रो विद्यावलसमन्वितः ॥२७॥
श्मशानाङ्गारमादाय भौमे रात्रौ शनावथ । पादोदकेन स्पृष्ट्वा च लिखेत् लोहशलाकया ॥२८॥
भूमौ शत्रोः स्वरूपं च हृदि नाम समालिखेत् । हस्तं तद्धृदये दत्वा कवचं तिथिवारकम् ॥२९॥
ध्यात्वा जपेन् मन्त्रराजं नवरात्रं प्रयत्नतः । म्रियते ज्वरदाहेन दशमेऽह्नि न संशयः ॥३०॥
भूर्जपत्रेष्विदं स्तोत्रमष्टगन्धेन संलिखेत् । धारयेद् दक्षिणे बाहौ नारी वामभुजे तथा ॥३१॥
संग्रामे जयमाप्नोति नारी पुत्रवती भवेत् । ब्रह्मास्त्रादीनि शस्त्राणि नैव कृन्तन्ति तं जनम् ॥३२॥

सम्पूज्य कवचं नित्यं पूजायाः फलमालभेत् । वृहस्पतिसमो वापि विभवे धनदोपमः ॥३३॥
कामतुल्यश्च नारीणां शत्रूणां च यमोपमः । कवितालहरी तस्य भवेद् गङ्गाप्रवाहवत् ॥३४॥
गद्यपद्यमयी वाणी भवेद् देवीप्रसादतः । एकादशशतं यावत् पुरश्चरणमुच्यते ॥३५॥
पुरश्चर्याविहीनं तु न चेदं फलदायकम् । न देयं परशिष्येभ्यो दुष्टेभ्यश्च विशेषतः ॥३६॥

देयं शिष्याय भक्ताय पञ्चत्वं चान्यथाऽऽप्नुयात् ।
इदं कवचमज्ञात्वा भजेद् यो बगलामुखीम् ।
शतकोटि जपित्वा तु तस्य सिद्धिर्न- जायते ॥३७॥
दाराढ्यो मनुजोऽस्य लक्षजपतः प्राप्नोति सिद्धिं परां
विद्यां श्रीविजयं तथा सुनियतं धीरं च वीरं वरम् ।
ब्रह्मास्त्राख्यमनुं विलिख्य नितरां भूर्जेष्टगन्धेन वै
धृत्वा राजपुरं व्रजन्ति खलु ये दासोऽस्ति तेषां नृपः ॥३८॥

॥ इति श्रीविश्वसारोद्धारतन्त्रे पार्वतीश्वरसंवादे बगलामुखीकवचम् सम्पूर्णम् ॥

(२) ॥ अथ श्री ब्रह्मास्त्र बगला वज्र कवचम् ॥

॥ श्री ब्रह्मोवाचः ॥

विश्वेश दक्षिणामूर्ते निगमागमवित् प्रभो । मह्यं पुरा त्वया दत्ता विद्या ब्रह्मास्त्रसंज्ञिता ॥१॥
तस्य मे कवचं बूहि येनाहं सिद्धिमाप्नुयाम् । भवामि वज्रकवचं ब्रह्मास्त्रन्यासमात्रतः ॥२॥

॥ श्री दक्षिणामूर्तिरुवाचः ॥

शृणु ब्रह्मन् परंगुह्यं ब्रह्मास्त्रकवचं शुभम् । यस्योच्चारणमात्रेण भवेद् वै सूर्यसन्निभः ॥३॥
सुदर्शनं मयादत्तं कृपया विष्णवे तथा । तद्वत् ब्रह्मास्त्रविद्यायाः कवचं कथयाम्यहम् ॥४॥
अष्टाविंशत्यस्त्रहेतुमाद्यं ब्रह्मास्त्रमुत्तमम् । सर्वतेजोमयं सर्व सामर्थ्य विग्रहं परम् ॥५॥
सर्वशत्रुक्षयकरं सर्वदारिद्र्यनाशनम् । सर्वापच्छैलराशीनामस्त्रकं कुलिशोपमम् ॥६॥
न तस्य शत्रवश्चापि भयं चौर्यभयं जरा । नरा नार्यश्च राजेन्द्र खगा व्याघ्रादयोऽपि च ॥७॥
तं दृष्ट्वा वशमायान्ति किमन्यत् साधवो जनाः । यस्य देहे न्यसेद् धीमान् कवचं बगलामयम् ॥८॥
स एव पुरुषो लोके केवलः शङ्करोपमः । न देय परशिष्याय शठाय पिशुनाय च ॥९॥
दातव्यं भक्तियुक्ताय गुरुदासाय धीमते । कवचस्य ऋषिः श्रीमान् दक्षिणामूर्तिरेव च ॥१०॥
अस्यानुष्टुप् छन्दः स्यात् श्रीबगला चास्य देवता । बीजं श्रीवह्निजाया च शक्तिः श्रीबगलामुखी ॥११॥
कीलकं विनियोगश्च स्वकार्ये सर्वसाधके ।

॥ अथ ध्यानम् ॥

शुद्धस्वर्णनिभां रामां पीतेन्दुखण्डशेखराम् । पीतगन्धानुलिप्ताङ्गीं पीतरत्नविभूषणाम् ॥

पीनोन्नतकुचां स्निग्धां पीतलाङ्गीं सुपेशलाम् । त्रिलोचनां चतुर्हस्तां गम्भीरां मदविह्वलाम् ॥
वज्रारि रसनापाशमुदगरं दधतीं करैः । महाव्याघ्रासनां देवीं सर्वदेवनमस्कृताम् ॥
प्रसन्नां सुस्मितां क्लिन्नां सुपीतां प्रमदोत्तमाम् । सुभक्तदुःखहरणे दयार्द्रां दीनवत्सलाम् ॥
एवं ध्यात्वा परेशानि बगलाकवचं स्मरेत्।

॥ अथ रक्षाकवचम् ॥

बगला मे शिरः पातु ललाटं ब्रह्मसंस्तुता । बगला मे भ्रुवौ नित्यं कर्णयोः क्लेशहारिणी ॥
त्रिनेत्रा चक्षुषी पातु स्तम्भिनी गण्डयोस्तथा । मोहिनी नासिकां पातु श्रीदेवी बगलामुखी ॥
ओष्ठयोर्दुर्धरा पातु सर्वदन्तेषु चञ्चला । सिद्धान्नपूर्णा जिह्वायां जिह्वाग्रे शारदाम्बिके ॥
अकल्मषा मुखे पातु चिबुके बगलामुखी । धीरा मे कष्ठदेशे तु कण्ठाग्रे कालकर्षिणी ॥
शुद्धस्वर्णनिभा पातु कण्ठमध्ये तथाऽम्बिका । कण्ठमूले महाभोगा सकन्धौ शत्रुविनाशिनी ॥
भुजौ मे पातु सततं बगला सुस्मिता परा । बगला मे सदा पातु कूर्परे कमलोद्भवा ॥
बगलाऽम्बा प्रकोष्ठौ तु मणिबन्धे महाबला। बगलाश्रीर्हस्तयोश्च कुरुकुल्ला कराङ्गुलिम् ॥
नखेषु वज्रहस्ता च हृदये ब्रह्मवादिनी । स्तनौ मे मन्दगमना कुक्षयोर्योगिनी तथा ॥
उदरं बगला माता नाभिं ब्रह्मास्त्रदेवता । पुष्टिं मुद्गरहस्ता च पातु नो देववन्दिता ॥
पार्श्वयोर्हनुमद्वन्द्या पशुपाशविमोचिनी । करौ रामप्रिया पातु ऊरुयुग्मं महेश्वरी ॥
भगमाला तु गुह्यं मे लिङ्गं कामेश्वरी तथा । लिङ्गमूले महाक्लिन्ना वृषणौ पातु दूतिका ॥
बगला जानुनी पातु जानुयुग्मं च नित्यशः । जङ्घे पातु जगद्धात्री गुल्फौ रावण-पूजिता ॥
चरणौ दुर्जया पातु पीताम्बा चरणाङ्गुलीः । पादपृष्ठं पद्महस्ता पादाधश्चक्रधारिणी ॥
सर्वाङ्गं बगला देवी पातु श्रीबगलामुखी । ब्राह्मी मे पूर्वतः पातु माहेशी बह्निभागतः ॥
कौमारी दक्षिणे पातु वैष्णावी स्वर्गमार्गतः । ऊर्ध्वं पाङ्ःवरा पातु शत्रुजिह्वाधरा ह्यधः ॥
रणे राजकुले वादे महायोगे महाभये । बगला भैरवी पातु नित्यं क्लींकाररूपिणी ॥
इत्येवं वज्रकवचं महाबह्मास्त्र संज्ञकम् । त्रिसन्ध्यं यः पठेद् धीमान् सर्वैश्वर्यमवाप्नुयात् ॥
न तस्य शत्रवः केऽपि सखायः सर्व एव च । बलेनाकृष्य शत्रुं सोऽपि मित्रत्वमाप्नुयात् ॥
शत्रुत्वे मरुता तुल्यो धनेन धनदोपमः । रूपेण कामतुल्यः स्याद् आयुषा शूलधृक्समः ॥
सनकादिसमो धैर्य श्रिया विष्णुसमो भवेत् । तत्तुल्यो विद्यया ब्रह्मन् यो जपेत् कवचं नरः ॥
नारी वापि प्रयत्नेन वाञ्छितार्थमवाप्नुयात् । द्वितीया सूर्यवारेण यदा भवति पद्मभूः ॥
तस्यां जातं शतावृत्या शीघ्रं प्रत्यक्षमाप्रंयात् । याता तुरीयं संध्यायां भूशय्यायां प्रयत्नतः ॥
सर्वान् शत्रून् क्षयं कृत्वा विजयं प्राप्नुयान् नरः । दारिद्र्यान् मुच्यते चाऽऽशु स्थिरा लक्ष्मीर्भवेद् गृहे ॥
सर्वान् कमानवाप्नोति सविषो निर्विषो भवेत् । ऋण निर्मोचनं स्याद् वै सहस्त्रावर्तनाद् विधे ॥

भूतप्रेतपिशाचदिपीडा तस्य न जायते । द्युमणिभ्राजते यद्वत् तद्वत् स्याच्छ्रीप्रभावतः ॥
स्थिराभया भवेत् तस्य यः स्मरेद् बगलामुखीम् । जयदं बोधनं कामममुकं देहि मे शिवे ॥
जपस्यान्ते स्मरेद् यो वै सोऽभीष्टफलमाप्नुयात् । इदं कवचमज्ञात्वा यो जपेद् बगलामुखीम् ॥
न स सिद्धिमवाप्नोति साक्षाद् वै लोकपूजितः । तस्मात् सर्वप्रयत्नेन कवचं ब्रह्मतेजसम् ॥
नित्यं पदाम्बुजध्यानन् महेशानसमो भवेत्।

॥ इति श्रीदक्षिणामूर्तिसंहितायां ब्रह्मास्त्रबगलामुखीकवचम् समाप्तम् ॥

॥ अथ श्री त्रैलोक्यविजय कवचम् ॥

॥ श्री भैरव उवाचः॥

शृणु देवि प्रवक्ष्यामि स्वरहस्यं च कामदम् । श्रुत्वा गोप्यं गुप्ततमं कुरु गुप्तं सुरेश्वरि ॥१॥
कवचं बगलामुख्याः सकलेष्टप्रदं कलौ । तत्सर्वस्वं परं गुह्यं गुप्तं च शरजन्मना ॥२॥
त्रैलोक्यविजयं नाम कवचेशं मनोरमम् । मन्त्रगर्भं ब्रह्ममयं सर्वविद्या विनायकम् ॥३॥
रहस्यं परमं ज्ञेयं साक्षादमृतरूपकम् । ब्रह्मविद्यामयं वर्म दुर्लभं प्राणिनां कलौ ॥४॥
पूर्णमेकोनपञ्चाशद् वर्णैरुक्त महेश्वरि । त्वद्भक्त्या वच्मि देवेशि गोपनीयं स्वयोनिवत् ॥५॥

॥ श्री देव्युवाचः॥

भगवन् करुणासार विश्वनाथ सुरेश्वर । कर्मणा मनसा वाचा न वदामि कदाचन् ॥१॥

॥ श्री भैरव उवाचः॥

त्रैलोक्य विजयाख्यस्य कवचास्यास्य पार्वति । मनुगर्भस्य गुप्तस्य ऋषिर्देवोऽस्य भैरवः ॥१॥
उष्णिक्छन्दः समाख्यातं देवी श्रीबगलामुखी । बीजं ह्लीं ॐ शक्तिः स्यात् स्वाहा कीलकमुच्यते ॥२॥
विनियोगः समाख्यातः त्रिवर्गफलप्राप्तये । देवि त्वं पठ वर्मैतन्मन्त्रगर्भं सुरेश्वरि ॥३॥
बिनाध्यानं कुतः सिद्धि सत्यमेतच्च पार्वति। चन्द्रोद्भासितमूर्धजां रिपुरसां मुण्डाक्षमालाकराम् ॥४॥
बालांसत्त्रकचञ्चलां मधुमदां रक्तां जटाजूटिनीम्। शत्रुस्तम्भनकारिणीं शशिमुखीं पीताम्बरोद्भासिनीम् ॥५॥
प्रेतस्थां बगलामुखीं भगवतीं कारुण्यरूपां भजे । ॐ ह्लीं मम शिरः पातु देवी श्रीबगलामुखी ॥६॥
ॐ ऐं क्लीं पातु मे भालं देवी स्तम्भनकारिणी । ॐ अं इं हं भ्रुवौ पातु क्लेशहारिणी ॥७॥
ॐ हं पातु मे नेत्रे नारसिंही शुभङ्करी । ॐ ह्लीं श्रीं पातु मे गण्डौ अं आं इं भुवनेश्वरी ॥८॥
ॐ ऐं क्लीं सौः श्रुतौ पातु इं ईं ऊं च परेश्वरी । ॐ ह्लीं हूं ह्लीं सदाव्यान्मे नासां ह्लीं सरस्वती ॥९॥
ॐ ह्रां ह्रीं मे मुखं पातु लीं एं ऐं छिन्नमस्तिका । ॐ श्री वं मेऽधरौ पातु ओं औं दक्षिणकालिका ॥१०॥
ॐ क्लीं श्रीं शिरसः पातु कं खं गं घं च सारिका । ॐ ह्रीं ह्वं भैरवी पातु ङं अं अः त्रिपुरेश्वरी ॥११॥
ॐ ऐं सौः मे हनुं पातु चं छं जं च मनोन्मनी । ॐ श्रीं श्रीं मे गलं पातु झं ञं टं ठं गणेश्वरी ॥१२॥

ॐ स्कन्धौ मेऽव्याद् डं ढं णं हूं हूं चैव तु तोतला । ॐ ह्रीं श्रीं मे भुजौ पातु तं थं दं वरवर्णिनी ॥१३॥
ऐं क्लीं सौः स्तनौ पातु धं नं पं परमेश्वरी । क्रों क्रों मे रक्षयेद् वक्षः फं बं भं भगवासिनी ॥१४॥
ॐ ह्रीं रां पातु कक्षि मे मं यं रं वह्निवल्लभा । ॐ श्रीं हूं पातू मे पार्श्वौ लं बं लम्बोदर प्रसूः ॥१५॥
ॐ श्रीं ह्रीं हूं पातु मे नाभि शं षं षण्मुखपालिनी । ॐ ऐं सौः पातु मे पृष्ठ सं हं हाटकरूपिणी ॥१६॥
ॐ क्लीं ऐं कटि पातु पञ्चाशद्वर्णमालिका । ॐ ऐं क्लीं पातु मे गुह्यं अं आं कं गुह्यकेश्वरी ॥१७॥
ॐ श्रीं ऊं ॠं सदाव्यान्मे इं ईं खं खां स्वरूपिणी । ॐ जूं सः पातु मे जंघे रुं रूं धं अघहारिणी ॥१८॥
श्रीं ह्रीं पातु मे जानू उं ऊं णं गणवल्लभा । ॐ श्रीं सः पातु मे गुल्फौ लिं लीं ऊं चं च चण्डिका ॥१९॥
ॐ ऐं ह्रीं पातु मे वाणी एं ऐं छं जं जगत्प्रिया । ॐ श्रीं क्लीं पातु पादौ मे झं ञं टं ठं भगोदरी ॥२०॥
ॐ ह्रीं सर्वं वपुः पातु अं अः त्रिपुरमालिनी । ॐ ह्रीं पूर्वे सदाव्यान्मे झं झां डं ढं शिखामुखी ॥२१॥
ॐ सौःयाम्यं सदाव्यान्मे इं ईं णं तं च तारिणी । ॐ वारुण्यां च वाराही ऊं थं दं धं च कम्पिला ॥२२॥
ॐ श्रीं मां पातु चैशान्यां पातु ॐ नं जनेश्वरी । ॐ श्रीं मां चाग्नेयां ॠं भं मं धं च यौगिनी ॥२३॥
ॐ ऐं मां नैऋत्यां लूं लां राजेश्वरी तथा । ॐ श्रीं पातु वायव्यां लृं लं वीतकेशिनी ।
ॐ प्रभाते च मो पातु लीं लं वागीश्वरी सदा ॥२४॥
ॐ मध्याह्ने च मां पातु ऐं क्षं शङ्करवल्लभा । श्रीं ह्रीं क्लीं पातु सायं ऐ आं शाकम्भरी सदा ॥२५॥
ॐ ह्रीं निशादौ मां पातु ॐ सं सागरवासिनी । क्लीं निशीथे च मां पातु ॐ हं हरिहरेश्वरी ॥२६॥
क्लीं ब्राह्मे मुहूर्तेऽव्याद लं लां त्रिपुरसुन्दरी । विसर्गा तु यत्स्थानं वर्जित कवचेन तु ॥२७॥
क्लीं तन्मे सकलं पातु अं क्षं ह्रीं बगलामुखी । इतीदं कवचं दिव्यं मन्त्राक्षरमय परम् ॥२८॥
त्रैलाक्यविजयं नाम सर्ववर्णमयं स्मृतम् । अप्रकाश्यं सदा देवि श्रोतव्यं च वाचिकम् ॥२९॥
दुर्जनायाकुलीनाय दीक्षाहीनाय पार्वति । न दातव्यं न दातव्यमित्याज्ञा पारमेश्वरी ॥३०॥
दीक्षाकार्य विहीनाय शक्तिभक्ति विरोधिने । कवचस्यास्य पठनात् साधको दीक्षितो भवेत् ॥३१॥
कवचेशमिदं गोप्यं सिद्धविद्यामयं परम् । ब्रह्मविद्यामयं गोप्यं यथेष्टफलदं शिवे ॥३२॥
न कस्य कथितं चैतद् त्रैलोक्य विजयेश्वरम् । अस्य स्मरणमात्रेण देवी सद्योवशी भवेत् ॥३३॥
पठनाद् धारणादस्य कवचेशस्य साधकः । कलौ विचरते वीरो यथा श्रीबगलामुखी ॥३४॥
इदं वर्म स्मरन् मन्त्री संग्रामे प्रविशेद् यदा । युयुत्सुः पठन् कवचं साधको विजयी भवेत् ॥३५॥
शत्रुं कालसमानं तु जित्वा स्वगृहमेति सः । मूर्ध्नि धृत्वा यः कवचं मन्त्रगर्भं सुसाधकः ॥३६॥
ब्रह्माद्यमरान् सर्वान् सहसा वशमानयेत् । धृत्वा गले तु कवचं साधकस्य महेश्वरि ॥३७॥
वशमायान्ति सहसा रम्भाद्यप्सरसां गणाः । उत्पातेषु धोरेषु भयेषु विविधेषु च ॥३८॥
रोगेषु च कवचेशं मन्त्रगर्भं पठेन्नरः । कर्मणा मनसा वाचा तद्भयं शांतिमेष्यति ॥३९॥
श्रीदेव्या बगलामुख्याः कवचेशं मयोदितम् । त्रैलोक्यविजयं नाम पुत्रपौत्र धनप्रदम् ॥४०॥

ऋणं च हरते सम्यक् लक्ष्मीर्भोगविवर्धिनी । बन्ध्या जनयते कुक्षौ पुत्ररत्नं न चान्यथा ॥४१॥
मृतवत्सा च विभृयात् कवचं च गले सदा । दीर्घायुर्व्याधिहीनश्च तत्पुत्रो वर्धतेऽनिशम् ॥४२॥
इतीदं बगलामुख्याः कवचेशं सुदुर्लभम् । त्रैलोक्यविजयं नाम न देयं यस्यकस्यचित् ॥४३॥
अकुलीनाय मूढाय भक्तिहीनायदम्भिने । लोभयुक्ताय देवेशि न दातव्यं कदाचन् ॥४४॥
लोभदम्भविहीनाय कवचेशं प्रदीयताम् । अभक्तेभ्यो अपुत्रेभ्यो दत्वा कुष्ठी भवेन्नरः ॥४५॥
रवौ रात्रौ च सुस्नातः पूजागृहगतः सुधीः । दीपमुज्वाल्य मूलेन पठेद्वर्मेदमुत्तमम् ॥४६॥
प्राप्तौ सत्यां त्रिरात्रौ हि राजा तद्गृहमेष्यति । मण्डलेशो महेशानि देवि सत्यं न संशय ॥४७॥
इदं तु कवचेशं तु मया प्रोक्त नगात्मजे । गोप्यं गुह्यतरं देवि गोपनीयं स्वयोनिवत् ॥४८॥

॥ इति विश्वयामले बगलामुख्यास्त्रैलोक्यविजयं कवचम् ॥

॥ अथ श्री बगला यंत्रराज रक्षा स्तोत्रम् ॥

इस स्तोत्र में बगला मंत्र ऋषि नारद, छंद पंक्ति, देवता पीताम्बरा, ह्लीं बीजं, स्वाहा शक्ति, सं कीलक, शत्रुविनाशक विनियोग कहा गया है तथा इस स्तोत्र के पाठ से यंत्रार्चन का फल प्राप्त होता है।

वन्दे सकलसन्देह दावपावकमीश्वरम् । करुणावरुणावासं भक्तकल्परुं गुरुम् ॥१॥
उल्लसत्पीतविद्योति विद्योतिततनुत्रयम् । निगमागम सर्वस्वमीडेऽहं तन्महन्महः ॥२॥
ॐ पूर्वं स्थिरमायां च बगलामुखि सर्वतः । दुष्टानां वाचमुच्चार्य मुखं पदं तथोद्धरेत् ॥३॥
स्तम्भयेति ततो जिह्वां कीलयेति समुद्धरेत् । बुद्धिंविनाशयेति पदं स्थिरमायामनुस्मरेत् ॥४॥
प्रणवं वह्निजायां चेत्येष पैताम्बरो मनुः । पातु मां सर्वदा सर्वनिग्रहानुग्रहक्षमः ॥५॥
कण्ठं नारद ऋषिः पातु पङ्क्तिश्छन्दोऽवतान्मुखम् । पीताम्बरा देवता तु हृन्मध्यमवतान्मम् ॥६॥
ह्लीं बीजं स्तनयोर्मेऽव्यात् स्वाहा शक्तिश्च दन्तयोः । सं कीलकं तथा गुह्ये विनियोगोगोऽवताद् वपुः ॥७॥
षड्दीर्घभाजा बीजेन न्यासोऽव्यान्मे करादिकम् । द्विपञ्चपञ्चनन्देषुदशभिर्मन्त्र वर्णकैः ॥८॥
षडङ्गकल्पना पातु षडङ्गानि ह्यनुक्रमात् । ऐं विद्यातत्वं क्लीं मायातत्वं सौश्च शिवात्मकम् ॥९॥
तत्वत्रयं सं बीजं च मूलं हृत्कण्ठमध्यगः । सुधाब्धौ हेमभूरुढचम्पकोद्यानमध्यतः ॥१०॥
गारुडोत्पलनिर्व्यूढ स्वर्णसिंहासनोपरि । स्वर्णपङ्कजसंविष्टां त्रिनेत्रां शशिशेखराम् ॥११॥
पीतालङ्कारवसनां मल्लीचन्दनशोभिताम् । सव्याभ्यां पञ्चशाखाभ्यां वज्रं जिह्वां च विभ्रतीम् ॥१२॥
मुद्गरं नागपाशं च दक्षिणाभ्यां मदालसाम् । भक्तारिविग्रहोद्योग प्रगल्भां बगलामुखीम् ॥१३॥
ध्यायमानस्य मे पातु शात्रवोद्द्वेषणे भृशम् । भूकलादलदिक्पत्रषट्कोणं त्र्यस्त्रबैन्दुकम् ॥१४॥
यन्त्रं पैताम्बरं पायाद् पायात् सा माम् अविग्रहा । आधारशक्तिमारभ्य ज्ञानात्मान्तास्तु शक्तयः ॥१५॥
पीठाद्याः पान्तु पीठेऽत्र प्रथमं मां च रक्षतु । शान्तिशङ्खविशेषात्मशक्ति भूतानि पान्तु माम् ॥१६॥

आवाहनाद्या: पञ्चापि मुद्राश्च सुमनोजलैः । त्रिकोणमध्यमारभ्य पूजिता बगलामुखी ॥१७॥
क्रोधिनी स्तम्भिनी चापि धारिण्यश्चापि मध्यगा:। ओजः पूषादिपीठानि कोणाग्रेषु स्थितानि वै ॥१८॥
त्रिकोणबाह्यतः सिद्धनाथाद्या गुरवस्तथा । सिद्धनाथः सिद्धनन्दनाथः सिद्धपरेष्ठि-हि ॥१९॥
नाथः सिद्धः श्रीकण्ठश्च नाथः सिद्धचतुष्टयम् । पातु मामथ षट्कोणे सुभगा भगरूपिणी ॥२०॥
भगोदया च भगनिपातिनी भगमालिनी । भगावह च मां पातु षट्कोणाग्रेषु च क्रमात् ॥२१॥
त्वगामा शोणितात्म च मांसात्मा मेदसात्मकः । रूपात्मा परमात्मा च पातु मां स्थिरविग्रहा ॥२२॥
अष्टपत्रेषु मूलेषु ब्राह्मी माहेश्वरी तथा। कौमारी वैष्णवी वाराहीन्द्राणी च तथा पुनः ॥२३॥
चामुण्डा च महालक्ष्मीस्तत्र मध्ये पुनर्जया। विजया च जयाम्बा च राजिता जृम्भिणी तथा ॥२४॥
स्तम्भिनी मोहिनी वश्याऽकर्षिणी, अथ तदग्रके। असिताङ्गी रुरुश्चण्डः क्रोधोन्मत्तकपालिनः ।
भीषणश्चापि संहार एते रक्षन्तु मां सदा ॥२५॥
ततः षोडशपत्रेषु मङ्ला स्तम्भिनी तथा । जृम्भिणी मोहिनी वश्या ज्वालासिंही वलाहका ॥२६॥
भूधरा कल्मषा धात्री कन्यका कालकर्षिणी। भान्तिका मन्दगमना भोगस्था भाविकेति च ॥२७॥
पातु मामथ भूसद्म दशदिक्षु दिगीश्वराः । इन्द्रोऽनलो यमो रक्षो वरुणो मारुतः शशी ।
ईशाऽनन्तः स्वयम्भूश्च दशैते पान्तम मे वपुः॥२८॥
वज्र शक्तिर्दण्डखड्गौ पाशाङ्कुशगदाः क्रमात् । शूलं चक्रं सरोजं च तत्तच्छस्त्राणि पान्तु माम् ॥२९॥
अथ च पूर्वादिचतुर्द्वारेषु परतः क्रमात् । पातु विघ्नेशवटुकौ योगिनी क्षेत्रपालकः ॥३०॥
गुरुत्रयं त्रिरेखासु पातु मे वपुरञ्जसा । पुनः पीताम्बरा पातु उपचारैः प्रपूजिता ॥३१॥
साङ्गावरणशक्तिश्च जयश्रीः पातु सर्वदा । वलयं, वटुकादिभ्यो रक्षां कुर्वन्तु मे सदा ॥३२॥
शक्तयः साधका वीराः, पान्तु मे देवता इमाः। इत्यर्चाक्रमतः प्रोक्तं स्तोत्रं पैताम्बरं परम् ॥३३॥
यः पठेत् सकृदप्येतत् सोऽर्चाफलमवाप्नुयात। सर्वथा कारयेत् क्षिप्रं प्रपद्यन्ते गदातुरान् ॥३४॥
राजानो राजपत्न्याश्च पौर जानपदास्तथा । वशगास्तस्य जायन्ते सततं सेवका इव ॥३५॥
गुरुकल्पाश्च विबुधा मूकता यान्ति तेऽग्रतः । स्थिरीभवति तद्गेहे चपलानि हरिप्रिया ॥३६॥
पीताम्बराङ्गवसनो यदि लक्षसंख्यं, पैताम्बरं मनुममुं प्रजपेत् नरो यः ॥
हैमीं सकृन्नियमवान् विधिना हरिद्रामालां दधत् भवति तदवशगा त्रिलोकी ॥३७॥
भवानि बगलामुखि त्रिदशकल्पवल्लि प्रभो कृपाजलनिधे तब चरणधूतबाधाखिलः ॥
सुरासुरनरादिक सकलभक्तभाग्यप्रदे, त्वदङ्घ्रिसरसीरुहद्वयमहं तु ध्याये सदा ॥३८॥
त्वमम्ब जगतां जनिस्थितिविनाशबीं निज प्रकाशबहुलद्युतिर्भवति भक्तहन्मध्यगा ।
त्रयीमनुसुपूजिता हरिहरादिवृन्दारकै, रनुक्षणमनुक्षणं मयि शिवे क्षणं वीक्ष्यताम् ॥३९॥
शिवे तव तनूमहं हरिहराद्यगम्यां पराम्, निखिलतापप्रत्यूह हृद्दयाभावयुक्तां स्मरे ॥
विदारय विचूर्णय ग्लपय शोषय स्तम्भय, प्रणोदय विरोधय प्रविलय प्रबद्धारीणाम् ॥४०॥

क्व पार्वति कृपालसन् मयि कटाक्षपातं मनाग्। अनाकुलतया क्षणं क्षिप विपक्षसंक्षोभिणि ।
यदीक्षणपथं गतः सकृदपि प्रभुः कश्चन स्फुटं मय वशंवदा भवतु तेन पीताम्बरे ॥४१॥
ॐ नमो भगवतेमहारुद्राय हुं फट् स्वाहा। इति भैरवमन्त्रः।इति अथर्वणरहस्ये बगलामुख्या अर्चाक्रमस्तोत्रम्॥

॥ इति श्रीदेवानन्दनाथशिष्यरामचन्द्रनाथविरचितायां मन्त्रसंग्रह दीपिकायां श्रीबगलास्तवराजः समाप्तः ॥

॥ अथ बगलापञ्जर स्तोत्रम् ॥

यह स्तोत्र स्वरक्षा कारक एवं श्रीवृद्धि कारक है।

॥ सूत उवाच ॥

सहस्रादित्यसंकाशं शिवं साम्बं सनातनम् । प्रणम्य नारदः प्राह विनम्रो नतकन्धरः ॥१॥

॥ श्री नारद उवाच ॥

भगवन् साम्ब तत्त्वज्ञ सर्वदुःखापहारक । श्रीमत्पीताम्बरादेव्याः पञ्जरं पुण्यदं सताम् ॥२॥
प्रकाशय विभो नाथ कृपां कृत्वा ममोपरि । यद्यहं तव पादाब्जधूलिधूसरितोऽभवम् ॥३॥

॥ श्रीशिव उवाच ॥

विनियोग च ऋष्यादिन्यास : - ॐ अस्य श्रीमद्‌बगलामुखीपीताम्बरा पञ्जररूपस्तोत्र मन्त्रस्य भगवते नारदऋषये नमः शिरसि, अनुष्टुप्छन्दसे नमो मुखे, जगद्वश्यकरी श्रीपीताम्बरा बगलामुखी देवतायै नमो हृदये, ह्लीं बीजाय नमो दक्षिणस्तने स्वाहा शक्तये नमो वामस्तने, क्लीं कीलकाय नमो नाभौ, मम विपक्ष परसैन्यमन्त्रतन्त्र यन्त्रादिकृत क्षयार्थं श्रीमत्पीताम्बराबगलादेव्याः प्रीतये जपे विनियोगः। करसम्पुटेन मूलेन करशुद्धिः। ह्लामिति षट्‌दीर्घेण षडङ्गः। मूलेन व्यापकन्यासं कुर्यात्।

ह्लां, ह्लीं, ह्लूं, ह्लैं, ह्लौं, ह्लः से षडङ्गन्यास करें।

॥ अथ ध्यानम् ॥

मध्येसुधाब्धिमणिमण्डित रत्नवेद्यां सिंहासनोपरिगतां परिपीतवर्णाम् ।
पीताम्बराभरण माल्यविभूषिताङ्गीं देवीं नमामि धृतमुद्गरवैरिजिह्वाम् ॥

इति ध्यात्वा मनसा सम्पूज्य, मुद्रां प्रदर्श्य, ऋष्यादिन्यासं कृत्वा, पञ्जरं न्यसेत्।

॥ श्रीशिव उवाच ॥

पञ्जरं तत् प्रवक्ष्यामि देव्याः पापप्रणाशनम् । यं प्रविश्य न बाधन्ते बाणैरपि नराः क्वचित् ॥१॥
ॐ ऐं ह्लीं श्रीं श्रीमत्पीताम्बरा देवी बगला बुद्धिवर्धिनी । पातु मामनिशं साक्षात् सहस्रार्कसमद्युतिः ॥२॥
शिखादिपाद पर्यन्तं वज्रपञ्जरधारिणी । ॐ ऐं ह्लीं श्रीं श्रीमद्‌ब्रह्मास्त्रविद्या या पीताम्बर विभूषिता ॥३॥
बगला मामवत्वत्र मूर्धभागं महेश्वरी । ॐ ऐं ह्लीं श्रीं कामाङ्कुशकला पातु बगला शास्त्रबोधिनी ॥४॥
पीताम्बरा सहस्राक्षा ललाटं कामितार्थदा । ॐ ऐं ह्लीं श्रीं पातु बगला पीताम्बरसुधारिणी ॥५॥
कर्णयोश्चैव युगपद अतिरत्नप्रपूजिता । ॐ ऐं ह्लीं श्रीं पातु बगला नासिकां मे गुणाकरा ॥६॥

पीतपुष्पैः पीतवस्त्रैः पूजिता वेददायिनी । ॐ ऐं ह्रीं श्रीं पातु बगला ब्रह्माविष्णवादिसेविता ॥७॥
पीताम्बरा प्रसन्नास्या नेत्रयोर्युगपद् भ्रुवौ । ॐ ऐं ह्रीं श्रीं पातु बगला वलिदा पीतवस्त्रधृक् ॥८॥
अधरोष्ठौ तथा दन्तान् जिह्वां च मुखगां मम । ॐ ऐं ह्रीं श्रीं पातु बगला पीताम्बरसुधारिणी ॥९॥
गले हस्ते तथा वाह्वोः युगपद् बुद्धिदा सताम् । ॐ ऐं ह्रीं श्रीं पातु बगला दिव्यस्रगनुलेपना ॥१०॥
हृदये च स्तनौ नाभौ करावपि कृशोदरी । ॐ ऐं ह्रीं श्रीं पातु बगला पीतवस्त्रघनावृता ॥११॥
जङ्घायां च तथा चोर्वोर्गुल्फयोश्चातिवेगिनी । अनुक्तमपि यत् स्थानं त्वक्केशनखलोमकम् ॥१२॥
असृङ्मांसं तथाऽस्थीनि सन्धयश्चापिमे परा ॥

॥ फलश्रुति ॥

इत्येतद् वरदं गोप्यं कलावपि विशेषतः ॥१३॥
पञ्जरं बगलादेव्या दीर्घदारिद्र्यनाशनम् । पञ्जरं यः पठेत् भक्त्या स विघ्नैर्नाभिभूयते ॥१४॥
अव्याहतगतिश्चास्य ब्रह्मविष्णवादिसत्पुरे । स्वर्गे मर्त्ये च पाताले नाऽरयस्तं कदाचन ॥१५॥
प्रबाधन्ते नरव्याघ्रं पञ्जरस्थं कदाचन । अतो भक्तैः कौलिकैश्च स्वरक्षार्थं सदैव हि ॥१६॥
पठनीयं प्रयत्नेन सर्वाऽनर्थविनाशनम् । महादारिद्र्यशमनं सर्वमाङ्गल्यवर्धनम् ॥१७॥
विद्याविनयसत्सौख्यं महासिद्धिकरं परम् । इदं ब्रह्मास्त्रविद्यायाः पञ्जरं साधु गोपितम् ॥१८॥
पठेत् स्मरेद् ध्यानसंस्थः स जीयान् मरणान् नरः । यः पञ्जरं प्रविश्यैव मन्त्रं जपति वै भुवि ॥१९॥
कौलिकोऽकौलिको वापि व्यासवद् विचरेद् भुवि । चन्द्रसूर्यप्रभुर्भूत्वा वसेत् कल्पायुतं दिवि ॥२०॥

॥ श्री सूत उवाच ॥

इति कथितमशेषं श्रेयसामादिबीजं । भवशतदुरितघ्नं ध्वस्तमोहान्धकारम् ॥
स्मरणमतिशयेन प्राप्तिरेवात्र मर्त्यः । यदि विशति सदा वै पञ्जरं पण्डितः स्यात् ॥२१॥

॥ इति श्रीपरमरहस्यातिरहस्ये पीताम्बरापञ्जर स्तोत्रं समाप्तम् ॥

॥ अथ पञ्जरन्यास स्तोत्रम् ॥

(दिग्रक्षण प्रयोगः)

बगला पूर्वतो रक्षेद् आग्नेय्यां च गदाधरी । पीताम्बरा दक्षिणे च स्तम्भिनी चैव नैर्ऋते ॥१॥
जिह्वाकीलिन्यतो रक्षेत् पश्चिमे सर्वदा हि माम् । वायव्ये च मदोन्मत्ता कौवेर्यां च त्रिशूलिनी ॥२॥
ब्रह्मास्त्रदेवता पातु ऐशान्यां सततं मम । संरक्षेन् मां तु सततं पाताले स्तब्धमातृका ॥३॥
ऊर्ध्वं रक्षेन् महादेवी जिह्वास्तम्भनकारिणी। एवं दश दिशो रक्षेद् बगला सर्वसिद्धिदा ॥४॥
एवं न्यासविधिं कृत्वा यत् किञ्चिंज्जपमाचरेत् । तस्याः संस्मरणादेव शत्रूणां स्तम्भनं भवेत् ॥५॥

॥ इति पञ्जरन्यासस्तोत्रं सम्पूर्णम् ॥

॥ बगलामुखी कीलक स्तोत्रम् ॥

स्थान व देह रक्षा, शत्रुनिग्रह एवं विजय प्राप्ति हेतु

ह्लीं ह्लीं ह्लींकारवाणे रिपुदलदलने घोरगम्भीरनादे । ह्लीं ह्लींकाररूपे मुनिगणनमिते सिद्धिदे शुभ्रदेहे ॥
भ्रों भ्रों भ्रोंकारनादे निखिलरिपुघटात्रोटने लग्नचित्ते । मातर्मातर्नमस्ते सकलभयहरे नौमि पीताम्बरे त्वाम् ॥१ ॥
क्रौं क्रौं क्रौंमीशरूपे अरिकुलहनने देहकीले कपाले । हस्त्रौं हस्त्रौं स्वरूपे समरसनिरते दिव्यरूपे स्वरूपे ॥
ज्रौं ज्रौं ज्रौं जातरूपे जहिजहि दुरितं जम्भरूपे प्रभावे । कालिकङ्कालरूपे अरिजनदलने देहि सिद्धिंपरां मे ॥२ ॥
हस्त्रां हस्त्रीं च हस्त्रें त्रिभुवनविदिते चण्डमार्त्तण्डचण्डे । ऐं क्लीं सौं कौलविद्ये सततशमपरे नौमि पीतस्वरूपे ॥
द्रौं द्रौं द्रौं दुष्टचित्ताऽऽदलनपरिणतबाहुयुग्मत्वदीये । ब्रह्मास्त्रे ब्रह्मरूपे रिपुदलहनने ख्यातदिव्यप्रभावे ॥३ ॥
ठं ठं ठंकारवेशे ज्वलनप्रतिकृतिज्वालमालास्वरूपे । धां धां धां धारयन्तीं रिपुकुलरसनां मुद्‌गरं वज्रपाशम् ।
मातर्मातर्नमस्ते प्रबलखलजनं पीडयन्तीं भजामि । डांडांडां डाकिन्याद्यैर्डिमकडिमडिमं डमरुकं वादयन्तीम् ॥४ ॥
वाणीं व्याख्यानदात्रीं रिपुमुखखनने वेदशास्त्रार्थपूताम् । मातः श्री बगले परात्परतरे वादे विवादे जयम् ॥
देहि त्वं शरणागतोऽस्मि विमले देवि प्रचण्डो द्धते । माङ्गल्यं वसुधासु देहि सततं सर्वस्वरूपे शिवे ॥५ ॥
निखिलमुनिनिषेव्यं स्तम्भनं सर्वशत्रोः । शमपरमिह नित्यं ज्ञानिनां हार्दरूपम् ॥
अहरहरनिशायां यः पठेद्देवि कीलम् । भवति परमेशो वादिनामग्रगण्यः ॥६ ॥

॥ अथ बगलामुखी हृदय स्त्रोतम् ॥

विनियोग – ॐ अस्य श्रीबगलामुखी हृदयमालामन्त्रस्य नारद ऋषिः, अनुष्टुप् छन्दः, श्रीबगलामुखी देवता, ह्लीं बीजं, क्लीं शक्तिः, ऐं कीलकं श्रीबगलामुखीवरप्रसादसिद्ध्यर्थे जपे विनियोगः ।

अथ न्यासः– ॐ नारद ऋषये नमः शिरसि, ॐ अनुष्टुप् छन्दसे नमो मुखे, ॐ श्रीबगलामुख्यै देवतायै नमः हृदये, ॐ ह्लीं बीजाय नमो गुह्ये, ॐ क्लीं शक्तये नमः पादयोः, ॐ ऐं कीलकाय नमः सर्वाङ्गे ।

अथ कराङ्गन्यासौ – ॐह्लीं अङ्गुष्ठाभ्यां नमः, ॐ क्लीं तर्जनीभ्यां नमः, ॐ ऐं मध्यमाभ्यां नमः, ॐ ह्लीं अनामिकाभ्यां नमः, ॐ क्लीं कनिष्ठिकाभ्यां नमः, ॐ ऐं करतलकरपृष्ठाभ्यां नमः ॥ ॐ ह्लीं हृदयाय नमः, ॐ क्लीं शिरसे स्वाहा, ॐ ऐं शिखाये वषट्, ॐ ह्लीं कवचाय हुम्, ॐ क्लीं नेत्रत्रयाय वौषट्, ॐ ऐं अस्त्राय फट् ॥ ॐ ह्लीं क्लीं ऐं इति दिग्बन्धः ।

पीताम्बरां पीतमाल्यां पीताभरणभूषिताम् । पीतकञ्जपदद्वन्द्वां बगलां चिन्तयेऽनिशम् ॥

इति ध्यात्वा सम्पूज्य

पीतशङ्खगदाहस्ते पीतचन्दनचर्चिते । बगले मे वरं देहि शत्रुसङ्घविदारिणी ॥

इति सम्प्रार्थ्य, ॐह्लीं क्लीं ऐं बगलामुख्यै गदाधिरिण्यै प्रेतासनाध्यासिन्यै स्वाहा इति मन्त्रं जपित्वा स्तोत्रं च पठेत् ।

॥ स्त्रोतम् ॥

वन्देऽहं बगलां देवीं पीतभूषणभूषिताम् । तेजोरूपमयीं देवीं पीततेजः स्वरूपिणीम् ॥ १ ॥
गदाभ्रमणभिन्नाभ्रां भ्रुकुटीभीषणाननाम् । भीषयन्तीं भीमशत्रून् भजे भव्यस्य भक्तिदाम् ॥ २ ॥
पूर्णचन्द्रसमानास्यां पीतगन्धानुलेपनाम् । पीताम्बरपरीधानां पवित्रामाश्रयाम्यहम् ॥ ३ ॥
पालयन्तीमनुपलं प्रसमीक्ष्याऽवनीतले । पीताचाररतां भक्तां स्ताम्भवानीं भजाम्यहम् ॥ ४ ॥
पीतपद्मपदद्वन्द्वां चम्पकारण्य रूपिणीम् । पीतावतंसां परमां वन्दे पद्मजवन्दिताम् ॥ ५ ॥

लसच्चारुसिञ्जत्सुमञ्जीरपादां चलत्स्वर्णकर्णावतंसाञ्चितास्याम् ।
वलत्पीतचन्द्राननां चन्द्रवन्द्यां भजे पद्मजादीड्यसत्पादपद्माम् ॥६ ॥

सुपीताभयामालया पूतमन्त्रं परं ते जपन्तो जयं संलभन्ते ।
रणे रागरोषाप्लुतानां रिपूणां विवादे बलाद्वैरकृद्घातमातः ॥७ ॥

भरत्पीतभास्वत्प्रभाहस्कराभां गदागञ्जितामित्रगर्वां गरिष्ठाम् ।
गरीयोगुणागारगात्रां गुणाढ्यां गणेशादिगम्यां श्रये निर्गुणाड्याम् ॥८ ॥

जना ये जपन्त्युग्रबीजं जगत्सु परं प्रत्यहं ते स्मरन्तः स्वरूपम् ।
भवेद् वादिनां वाङ्मुखस्तम्भ आद्ये जयो जायते जल्पतामाशु तेषाम् ॥ ९ ॥

तव ध्याननिष्ठाप्रतिष्ठात्मप्रज्ञावतां पादपद्मार्चने प्रेमयुक्ताः ।
प्रसन्ना नृपाः प्राकृताः पण्डिता वा पुराणादिगा दासतुल्या भवन्ति ॥१० ॥

नमामस्ते मातः कनककमनीयाङ्घ्रिजलजम् । बलद्विद्युद्वर्णं घनतिमिरविध्वंसकरणम् ॥
भवाब्धौ मग्नात्मोत्तरणकरणं सर्वशरणम् । प्रपन्नानां मातर्जगति बगले दुःखदमनम् ॥११ ॥
ज्वलज्ज्योत्स्ना रत्नाकरमणिविभुषिक्ताङ्क भवनम् । स्मरामस्ते धाम स्मरहरहरीन्द्रेन्दुप्रमुखैः ॥
अहोरात्रं प्रातः प्रणयनवनीयं सुविशदम् । परं पीताकारं परिचितमणिद्वीपवसनम् ॥१२ ॥
वदामस्ते मातः श्रुतिसुखकरं नाम ललितम् । लसन्मात्रावर्णं जगति बगलेति प्रचरितम् ॥
चलन्तस्तिष्ठन्तो वयमुपविशन्तोऽपि शयने । भजामोयच्छ्रेयो दिवि दूरवलभ्यं दिविषदाम् ॥१३ ॥
पदार्चायां प्रीतिः प्रतिदिनमपूर्वा प्रभवतु । यथा ते प्रासन्न्यं प्रतिपलमपेक्ष्यं प्रणमताम् ॥
अनल्पं तन्मातर्भवति भृतभक्त्या भवतु नो । दिशातः सद्भक्तिं भुवि भगवतां भूरि भवदाम् ॥१४ ॥
मम सकलरिपूणां वाङ्मुखे स्तम्भयाशु । भगवति रिपुजिह्वां कीलय प्रस्थतुल्याम् ॥
व्यवसितखलबुद्धिं नाशयाऽऽशु प्रगल्भाम् । मम कुरु बहुकार्यं सत्कृपे ऽम्ब प्रसीद ॥१५ ॥
व्रजतु मम रिपूणां सद्मनि प्रेतसंस्था । करधृतगदया तान् घातयित्वाऽऽशु रोषात् ॥
सधनवसनधान्यं सद्म तेषां प्रदह्य । पुनरपि बगला स्वस्थानमायातु शीघ्रम् ॥१६ ॥
करधृतुरिपुजिह्वा पीडनव्यग्रहस्तां । पुनरपि गदया तांस्ताडयन्तीं सुतन्त्राम् ॥
प्रणतसुरगणानां पालिकां पीतवस्त्रां । बहुबलबगलान्तां पीतवस्त्रां नमामः ॥१७ ॥
हृदयवचनकायः कुर्वतां भक्तिपुञ्जं । प्रकटति करुणार्द्रा प्रीणती जल्पतीति ॥

धनमथ बहुधान्यं पुत्रपौत्रादिवृद्धिः । सकलमपि किमेभ्यो देयमेवं त्ववश्यम् ॥१८॥
तव चरणसरोजं सर्वदा सेव्यमानं । द्रुहिणहरिहराद्यैर्देववृन्दैः शरण्यम् ॥
मृदुलमपि शरं ते शर्म्मदं सूरिसेव्यं । वयमिह करवामो मातरेतद् विधेयम् ॥१९॥
बगलाहृदयस्तोत्रमिदं भक्तिसमन्वितः । पठेद् यो बगला तस्य प्रसन्ना पाठतो भवेत् ॥२०॥
पीताध्यानपरो भक्तो यः शृणोत्यविकल्पत । निष्कल्मषो भवेन् मर्त्यो मृतो मोक्षमवाप्नुयात् ॥२१॥
आश्विनस्य सिते पक्षे महाष्टम्यां दिवानिशम् । यस्त्विदं पठते प्रेम्णा बगलाप्रीतिमेति सः ॥२२॥
देव्यालये पठन् मर्त्यो बगलां ध्यायतीश्वरीम् । पीतवस्त्रावृतो यस्तु तस्य नश्यन्ति शत्रवः ॥२३॥
पीताचाररतो नित्यं पीतभूषां विचिन्तयन् । बगलां यः पठेन् नित्यं हृदयस्तोत्रमुत्तमम् ॥२४॥
न किंचिद्दुर्लभं तस्यदृश्यते जगतीतले । शत्रवो ग्लानिर्मायान्ति तस्य दर्शनमात्रतः ॥२५॥

॥ इति श्रीसिद्धेश्वरतन्त्रे उत्तरखण्डे बगलापटले श्रीबगलाहृदय समाप्तम् ॥

॥ अथ श्रीब्रह्मास्त्रमहाविद्यास्तोत्रम् ॥

(बगलामुखी स्तोत्रम्)

विनियोग – ॐ अस्य श्री बगुलामुखीस्तोत्रस्य भगवान् नारद ऋषिः, श्री बगुलामुखी देवता, त्रिष्टुप् छन्दः, मम सन्निहितानामसन्निहितानां विरोधिनां दुष्टानां वाङ्मुखबुद्धीनां स्तभ्भनार्थं श्री महामायाबगलामुखी वरप्रसाद सिद्ध्यर्थं जपे (पाठे) विनियोगः ।

करन्यास – ॐ ह्लीं अङ्गुष्ठाभ्यां नमः, ॐ बगलामुखि तर्जनीभ्यां स्वाहा, ॐ सर्वदुष्टानां मध्यमाभ्यां वषट्, ॐ वाचं मुखं पदं स्तंम्भय अनामिकाभ्यां हुम्, ॐ जिह्वां कीलय कनिष्ठिकाभ्यां वौषट्, ॐ बुद्धिं विनाशय ह्लीं ॐ स्वाहा करतलकरपृष्ठाभ्यां फट् । एवं हृदयादिषु ।

॥ अथ ध्यानम् ॥

सौवर्णासनसंस्थितां त्रिनयनां पीतांशुकोल्लासिनीम् हेमाभाङ्गरुचिं शशाङ्कमुकुटां सच्चम्पकस्रग्युताम् ॥
हस्तैर्मुद्गरपाशवज्ररसनाः संबिभ्रतीं भूषणैः व्याप्ताङ्गीं बगलामुखीं त्रिजगतां संस्तभ्भिनीं चिन्तयेत् ॥

जपमन्त्रः – ॐ ह्लीं बगलामुखि सर्वदुष्टानां वाचं मुखं पदं स्तंम्भय जिह्वां कीलय बुद्धिं विनाशय ह्लीं ॐ स्वाहा ।

॥ अथ स्तोत्रम् ॥

मध्येसुधाब्धि मणिमण्डप रत्नवेद्यां सिंहासनोपरिगतां परिपीतवर्णाम् ।
पीताम्बराभरण माल्यविभूषिताङ्गीम् देवीं नमामि धृतमुद्गरवैरिजिह्वाम् ॥ १ ॥

जिह्वाग्रमादाय करेणदेवीं, वामेन शत्रून् परिपीडयन्तीम् । गदाभिघातेन च दक्षिणेन पीताम्बराढ्यां द्विभुजां नमामि ॥२॥
त्रिशूलधारिणीमम्बां सर्वसौभाग्यदायिनीम् । सर्वशृङ्गारवेशाढ्यां देवीं ध्यात्वा प्रपूजयेत् ॥३॥
पीतवस्त्रां त्रिनेत्रां च द्विभुजां हाटकोज्ज्वलाम् । शिलापर्वतहस्तां च स्मरेत् तां बगलामुखीम् ॥४॥

रिपुजिह्वाग्रहां देवीं पीतपुष्पविभूषिताम् । वैरिनिर्दलनार्थाय स्मरेत् तां बगलामुखीम् ॥५॥
गम्भीरां च मदोन्मत्तां स्वर्णकान्तिसमप्रभाम् । चतुर्भुजां त्रिनेत्रां च कमलासनसंस्थिताम् ॥६॥
मुद्गरं दक्षिणे पाशं वामे जिह्वां च वज्रकम् । पीताम्बरधरां सान्द्रदृढपीनपयोधराम् ॥७॥
हेमकुण्डलभूषां च पीतचन्द्रार्धशेखराम् । पीतभूषणपीताङ्गीं स्वर्णसिंहासने स्थिताम् ॥८॥
एवं ध्यात्वा जपेत् स्तोत्रमेकाग्रकृतमानसः । सर्वसिद्धिमवाप्नोति मन्त्रध्यानपुरः सरम् ॥९॥
आराध्या जगदम्ब दिव्यकविभिः सामाजिकैः स्तोतृभिः । माल्यैश्चन्दनकुङ्कुमैः परिमलैरभ्यर्चिता सादरात् ॥
सम्यङन्यासिसमस्तभूतनिवहे सौभाग्यशोभाप्रदे श्रीमुग्धे बगले प्रसीद विमले दुःखापहे पाहि माम् ॥१०॥
आनन्दकारिणी देवी रिपुस्तम्भनकारिणी । मदनोन्मादिनी चैव प्रीतिस्तम्भनकारिणी ॥११॥
महाविद्या महामाया साधकस्य फलप्रदा । यस्याः स्मरणमात्रेण त्रैलोक्यं स्तम्भयेत् क्षणात् ॥१२॥
वामे पाशाडकुशौ शक्तिं तस्याधस्ताद् वरं शुभम् । दक्षिणे क्रमतो वज्रं गदाजिह्वाऽभयानि च ॥१३॥
विभ्रतीं संसमरेन्नित्यं पीतमाल्यानुलेपनाम् । पीताम्बरधरां देवीं ब्रह्मादिसुरवन्दिताम् ॥१४॥
केयूराङ्गदकुण्डलभूषां बालार्कद्युतिरञ्जितवेषाम् । तरुणादित्यसमानप्रतिमां कौशेयांशुकबद्धनितम्बाम् ॥१५॥
कल्पद्रुमतलनिहितशिलायां प्रमुदितचित्तौल्लासदलकान्ताम् । पञ्चप्रेतनिकेतनबद्धां भक्तजनेभ्यो वितरणशीलाम् ॥१६॥
एवं विधां तां बगलां ध्यात्वा मनसि साधकः । सर्वसम्पत्समृद्ध्यर्थं स्तोत्रमेतदुदीरयेत् ॥१७॥
चलत् कनककुण्डलोल्लसित चारुगण्डस्थलाम् । लसत्कनकचम्पकद्युतिमदिन्दुबिम्बाननाम् ॥
गदाहतविपक्षकां कलितलोलजिह्वां चलाम् । स्मरामि बगलामुखीं विमुखवाङ्मुखस्तम्भिनीम् ॥१८॥
पीयूषोदधि मध्यचारुविलसद्रत्नोज्ज्वले मण्डपे । तत्सिंहासनमूलपातितरिपुं प्रेतासनाध्यासिनीम् ॥
स्वर्णाभां करपीडितारिरसनां भ्राम्यद्गदां विभ्रमां । यस्त्वां ध्यायति, यान्ति तस्य विलयं सद्योऽथ सर्वापदः ॥१९॥
देवि त्वच्चरणाम्बुजार्चनकृते यः पीतपुष्पाञ्जलिं मुद्रां वामकरे निधाय च पुनर्मन्त्री मनोज्ञाक्षरम् ॥
पीताध्यानपरोऽथ कुम्भकवशाद् बीजं स्मरेत् पार्थिवं । तस्यामित्रमुखस्य वाचि हृदये जाड्यं भवेत् तत्क्षणात् ॥२०॥
मन्त्रस्तावदलं विपक्षदलने स्तोत्रं पवित्रं च ते । यन्त्रं वादिनियन्त्रणे त्रिजगतां जैत्रं न चित्रं हि तत् ॥
मातः श्रीबगलेति नाम ललितं यस्यास्ति जन्तोर्मुखे । तन्नामस्मरणेन संसदि मुखस्तम्भो भवेद्वादिनाम् ॥२१॥
वादी मूकति रङ्कति क्षितिपतिर्वैश्वानरः शीतति । क्रोधी शाम्यति दुर्जनः सुजनति क्षिप्रानुगः खञ्जति ॥
गर्वी खर्वति सर्वविच्च जडति त्वद्यन्त्रणायन्त्रितः श्रीनित्ये बगलामुखि प्रतिदिनं कल्याणि तुभ्यं नमः ॥२२॥
दुष्टस्तम्भनमुग्र विघ्नशमनं दारिद्र्यविद्रावणं । भूभृत्संनमनं चं यन्मृगदृशां चेतःसमाकर्षणम् ॥
सौभाग्यैकनिकेतनं समदृशां कारुण्यपूर्णेक्षणे । शत्रोर्मारणमाविरस्तु पुरतो मातस्त्वदीयं वपुः ॥२३॥
मातर्भञ्जय मद्विपक्षवदनं जिह्वां च संकीलय । ब्राह्मीं यन्त्रय मुद्रयाशु धिषणामुग्रां गतिं स्तम्भय ॥
शत्रूश्चूर्णय चूर्णयाशु गदया गौराङ्गि पीताम्बरे । विघ्नौघं बगले हर प्रणमतां कारुण्यपूर्णेक्षणे ॥२४॥
मातर्भैरवि भद्रकालि विजये वाराहि विश्वाश्रये । श्रीविद्ये समये महेशि बगले कामेशि वामे रमे ॥

मातङ्गि त्रिपुरे परात्परतरे स्वर्गापवर्गप्रदे। दासोऽहं शरणागतोऽस्मि कृपया विश्वेश्वरि त्राहि माम् ॥२५॥
त्वं विद्या परमा त्रिलोकजननी विघ्नौघविध्वंसिनी । योषाकर्षणकारिणी त्रिजगतामानन्दसंवर्धिनी ॥
दुष्टोच्चाटनकारिणी पशुमनःसंमोहसंदायिनी जिह्वाः कीलय वैरिणां विजयसे ब्रह्मास्त्रविद्या परा ॥२६॥
मातर्यस्तु मनोरमं स्तवमिमं देव्याः पठेत् सादरम् धृत्वा यन्त्रमिदं तथैव समरे बाह्वोः करे वा गले ॥
राजानो वरयोषितोऽथ करिणः सर्पामृगेन्द्राः खलास्ते वै यान्ति विमोहिता रिपुगणा लक्ष्मीः स्थिरा सर्वदा ॥२७॥
अनुदिनमभिरामं साधको यस्त्रिकालं पठति स भुवनेऽसौ पूज्यते देववर्गैः ॥
सकलममलकृत्यं तत्त्वद्रष्टा च लोके भवति परमसिद्धा लोकमाता पराम्बा ॥२८॥
पीतवस्त्रवसनामरिदेह प्रेतजासननिवेशितदेहाम्। फुल्लपुष्परविलोचनरम्यां दैत्यजालदहनोज्ज्वलभूषाम् ॥२९॥
पर्यङ्कोपरि लसद्द्विभुजां कम्बुहेमनतकुण्डललोलाम्। वैरिनिर्दलनकारणरोषां चिन्तयामि बगलां हृदयाब्जे ॥३०॥
चिन्तयामि सुभुजां शृणिहस्तां सद्भुजांचसुरवन्दितचरणाम्। षष्ठिसप्ततिशतैधृतशस्त्रैर्बाहुभिः परिवृतां बगलाम्बाम् ॥३१॥
चौराणां संकटे च प्रहरणसमये बन्धने वारिमध्ये। वह्नौ वादे विवादे प्रकुपितनृपतौ दिव्यकाले निशायाम् ॥
वश्ये वा स्तम्भने वा रिपुवधसमये प्राणबाधे रणे वा। गच्छंस्तिष्ठस्त्रिकालं स्तवपठनमिदं कारयेदाशु धीरः ॥३२॥

विद्यालक्ष्मीःसर्वसौभाग्यमायुः पुत्राः सम्पद् राज्यमिष्टं च सिद्धिः।
मातः श्रेयः सर्ववश्यत्वसिद्धिः प्राप्तं सर्वं भूतले त्वत्परेण ॥३३॥

गेहं नाकति गर्वितः प्रणमति स्त्रीसंगमो मोक्षति द्वेषी मित्रति पातकं सुकृतति क्ष्मावल्लभो दासति ॥
मृत्युर्वैद्यति दूषणं गुणति वै यत्पादसंसेवनात् तां वन्दे भवभीतिभञ्जनकरीं गौरीं गिरीशप्रियाम् ॥३४॥
यत् कृतं जपसंध्यानं चिन्तनं परमेश्वरि । शत्रूणां स्तम्भनार्थाय तद् गृहाण नमोऽस्तुते ॥३५॥
ब्रह्मास्त्रमेतद् विख्यातं त्रिषु लोकेषु दुर्लभम् । गुरुभक्ताय दातव्यं न देयं यस्य कस्यचित् ॥३६॥
पीताम्बरां च द्विभुजां त्रिनेत्रां गात्रकोज्ज्वलाम् । शिलामुद्गरहस्तां च स्मरेत् तां बगलामुखीम् ॥३७॥
सिद्धिं सध्येऽवगन्तुं गुरुवरवचनेष्वार्हविश्वासभाजाम्। स्वान्तः पद्मासनस्थां वररुचिंबगलां ध्यायतां तारतारम् ॥
गायत्रीपूतवाचां हरिहरमनने तत्पराणां नराणाम्। प्रातर्मध्याह्नकाले स्तवपठनमिदं कार्यसिद्धिप्रदं स्यात् ॥३८॥

॥ इति श्रीरुद्रयामले उत्तरखण्डे श्रीब्रह्मास्त्रमहाविद्याबगलामुखीस्तोत्रं सम्पूर्णम् ॥

॥ अथ श्री दिगबंधन रक्षा स्तोत्रम् ॥

ब्रह्मास्त्रां प्रवक्ष्यामि बगलां नारदसेविताम्। देवगन्धर्वयक्षादि सेवितपादपङ्कजाम् ॥

त्रैलोक्यस्तम्भिनी विद्या सर्वशत्रुवशङ्करी आकर्षणकरी उच्चाटनकरी विद्वेषणकरी जारणकरी मारणकरी जृम्भणकरी स्तम्भनकरी ब्रह्मास्त्रेण सर्ववश्यं कुरु कुरु ॐ ह्लां बगलामुखि हुं फट् स्वाहा।

ॐ ह्लां द्राविणि द्राविणि भ्रामिणि एहि एहि सर्वभूतान् उच्चाटय उच्चाटय सर्वदुष्टान निवारय निवारय भूत प्रेत पिशाच डाकिनी शाकिनीः छिन्धि छिन्धि खड्गेन भिन्धि भिन्धि मुद्गरेण संमारय संमारय, दुष्टान् भक्षय भक्षय, ससैन्यं भूपतिं कीलय कीलय मुखस्तम्भनं कुरु कुरु ॐ ह्लां बगलामुखि हुं फट् स्वाहा।

आत्मा रक्षा ब्रह्म रक्षा विष्णु रक्षा रुद्र रक्षा इन्द्र रक्षा अग्नि रक्षा यम रक्षा नैर्ऋत रक्षा वरुण रक्षा वायु रक्षा कुवेर रक्षा ईशान रक्षा सर्व रक्षा भूत प्रेत पिशाच डाकिनी शाकिनी रक्षा अग्निवैताल रक्षा गण गन्धर्व रक्षा तस्मात् सर्वरक्षां कुरु कुरु, व्याघ्र गज सिंह रक्षा रणतस्कर रक्षा तस्मात् सर्व बन्धयामि ॐ ह्लां बगलामुखि हुं फट् स्वाहा।

ॐ ह्लीं भो बगलामुखि सर्वदुष्टानां वाचं मुखं पदं स्तम्भय जिह्वां कीलय बुद्धिं विनाशय ह्लीं ॐ स्वाहा।

ॐ ऐं ह्लीं श्रीं बगलामुखि एहि एहि पूर्वदिशायां बन्धय बन्धय इन्द्रस्य मुखं स्तम्भय स्तम्भय इन्द्रशस्त्रं निवारय निवारय सर्वसैन्यं कीलय कीलय पच पच मथ मथ मर्दय मर्दय ॐ ह्लीं वश्यं कुरु कुरु ॐ ह्लां बगलामुखि हुं फट् स्वाहा।

ॐ ऐं ह्लीं श्रीं पीताम्बरे एहि एहि अग्निदिशायां बन्धय बन्धय अग्निमुखं स्तम्भय स्तम्भय अग्निशस्त्रं निवारय निवारय सर्वसैन्यं कीलय कीलय पच पच मथ मथ मर्दय मर्दय ॐ ह्लीं अग्निस्तम्भं कुरु कुरु ॐ ह्लां बगलामुखि हुं फट् स्वाहा।

ॐ ऐं ह्लीं श्रीं महिषमर्दिनि एहि एहि दक्षिणदिशायां बन्धय बन्धय यमस्य मुखं स्तम्भय स्तम्भय यमशस्त्रं निवारय निवारय सर्वसैन्यं कीलय कीलय पच पच मथ मथ मर्दय मर्दय ॐ ह्लीं हृज्जृम्भणं कुरु कुरु ॐ ह्लां बगलामुखि हुं फट् स्वाहा।

ॐ ऐं ह्लीं श्रीं चण्डिके एहि एहि नैर्ऋत्यदिशायां बन्धय बन्धय नैर्ऋत्यमुखं स्तम्भय स्तम्भय नैर्ऋत्यशस्त्रं निवारय निवारय सर्वसैन्यं कीलय कीलय पच पच मथ मथ मर्दय मर्दय ॐ ह्लीं वश्यं कुरु कुरु ॐ ह्लां बगलामुखि हुं फट् स्वाहा।

ॐ ऐं ह्लीं श्रीं करालनयने एहि एहि पश्चिमदिशायां बन्धय बन्धय वरुणमुखं स्तम्भय स्तम्भय वरुणशस्त्रं निवारय निवारय सर्वसैन्यं कीलय कीलय पच पच मथ मथ मर्दय मर्दय ॐ ह्लीं वश्यं कुरु कुरु ॐ ह्लां बगलामुखि हुं फट् स्वाहा।

ॐ ऐं ह्लीं श्रीं कालिके एहि एहि वायव्यदिशायां बन्धय बन्धय वायुमुखं स्तम्भय स्तम्भय वायुशस्त्रं निवारय निवारय सर्वसैन्यं कीलय कीलय पच पच मथ मथ मर्दय मर्दय ॐ ह्लीं वश्यं कुरु कुरु ह्लां बगलामुखि हुं फट् स्वाहा।

ॐ ऐं ह्लीं श्रीं महात्रिपुरसुन्दरि एहि एहि उत्तरदिशायां बन्धय बन्धय कुबेरमुखं स्तम्भय स्तम्भय कुबेरशस्त्रं निवारय निवारय सर्वसैन्यं कीलय कीलय पच पच मथ मथ मर्दय मर्दय ॐ ह्लीं वश्यं कुरु कुरु ॐ ह्लां बगलामुखि हुं फट् स्वाहा।

ॐ ऐं ऐं महाभैरवि एहि एहि ईशानदिशायां बन्धय बन्धय ईशानमुखं स्तम्भय स्तम्भय ईशानशस्त्रं निवारय निवारय सर्वसैन्यं कीलय कीलय पच पच मथ मथ मर्दय मर्दय ॐ ह्लीं वश्यं कुरु करु ॐ ह्लां बगलामुखि हुं फट् स्वाहा।

ॐ ऐं ऐं गाङ्गेश्वरि एहि एहि ऊर्ध्वदिशायां बन्धय बन्धय ब्रह्माणं चतुर्मुखं स्तम्भय स्तम्भय ब्रह्मशस्त्रं निवारय निवारय सर्वसैन्य कीलय कीलय पच पच मथ मथ मर्दय मर्दय ॐ ह्लीं वश्यं कुरु कुरु ॐ ह्लां बगलामुखि हुं फट् स्वाहा।

ॐ ऐं ऐं ललितादेवि एहि एहि अन्तरिक्षदिशायां बन्धय बन्धय विष्णुमुखं स्तम्भय स्तम्भय विष्णुशस्त्रं निवारय निवारय सर्वसैन्यं कीलय कीलय पच पच मथ मथ मर्दय मर्दय ॐ ह्लीं वश्यं कुरु कुरु ॐ ह्लां

बगलामुखिं हुं फट् स्वाहा।

ॐ ऐं ऐं चक्रधारिणि एहि एहि अधोदिशायां बन्धय बन्धय वासुकिमुखं स्तम्भय स्तम्भय वासुकिशस्त्रं निवारय निवारय सर्वसैन्यं कीलय कीलय पच पच मथ मथ मर्दय मर्दय ॐ ह्लीं वश्यं कुरु कुरु ॐ ह्लां बगलामुखि हुं फट् स्वाहा।

दुष्टमन्त्रं दुष्टयन्त्रं दुष्टपुरुषं बन्धयामि शिखां बन्ध ललाटं बन्ध भ्रुवौ बन्ध नेत्रे बन्ध कर्णौ बन्ध नसौ बन्ध ओष्ठौ बन्ध अधरौ बन्ध जिह्वां बन्ध रसनां बन्ध बुद्धिं बन्ध कण्ठं बन्ध हृदयं बन्ध कुक्षिं बन्ध हस्तौ बन्ध नाभिं बन्ध लिङ्गं बन्ध गुह्यं बन्ध ऊरू बन्ध जानू बन्ध जङ्घे बन्ध गुल्फौ बन्ध पादौ बन्ध स्वर्ग मृत्यु पातालं बन्ध बन्ध रक्ष रक्ष ॐ ह्लीं वश्यं कुरु कुरु ॐ ह्लीं बगलामुखि हुं फट् स्वाहा।

ॐ ऐं ऐं ॐ ह्लीं बगलामुखि इन्द्राय सुराधिपतये ऐरावतवाहनाय स्वेतवर्णाय वज्रहस्ताय सपरिवाराय एहि एहि मम विघ्नान् निरासय निरासय विभञ्जय विभञ्जय ॐ ह्लीं अमुकस्य मुखं स्तम्भय स्तम्भय ॐ ह्लीं अमुकस्य मुखं भेदय भेदय ॐ ह्लीं वश्यं कुरु ॐ ह्लीं बगलामुखि हुं फट् स्वाहा।

ॐ ऐं ऐं ॐ ह्लीं बगलामुखि अग्नये तेजोधिपतये छागवाहनाय रक्तवर्णाय शक्तिहस्ताय सपरिवाराय एहि एहि मम विघ्नान् विभञ्जय विभञ्जय ॐ ह्लीं अमुकस्य मुखं स्तम्भय स्तम्भय ॐ ह्लीं अमुकस्य मुखं भेदय भेदय ॐ ह्लीं वश्यं कुरु कुरु ॐ ह्लीं बगलामुखि हुं फट् स्वाहा।

ॐ ऐं ऐं ॐ ह्लीं बगलामुखि यमाय प्रेताधिपतये महिषवाहनाय कृष्णवर्णाय दण्डहस्ताय सपरिवाराय एहि एहि मम विघ्नान् विभञ्जय विभञ्जय ॐ ह्लीं अमुकस्य मुखं स्तम्भय स्तम्भय ॐ ह्लीं अमुकस्य मुखं भेदय भेदय ॐ ह्लीं वश्यं कुरु कुरु ॐ ह्लीं बगलामुखि हुं फट् स्वाहा।

ॐ ऐं ऐं ॐ ह्लीं बगलामुखि वरुणाय जलाधिपतये मकरवाहनाय श्वेतवर्णाय पाशहस्ताय सपरिवाराय एहि एहि मम विघ्नान् विभञ्जय विभञ्जय ॐ ह्लीं अमुकस्य मुखं स्तम्भय स्तम्भय ॐ ह्लीं अमुकस्य मुखं भेदय भेदय ॐ ह्लीं वश्यं कुरु कुरु ॐ ह्लीं बगलामुखि हुं फट् स्वाहा।

ॐ ऐं ऐं ॐ ह्लीं बगलामुखि वायव्याय मृगवाहनाय धूम्रवर्णाय ध्वजाहस्ताय सपरिवाराय एहि एहि मम विघ्नान् विभञ्जय विभञ्जय ॐ ह्लीं अमुकस्य मुखं स्तम्भय स्तम्भय ॐ ह्लीं अमुकस्य मुखं भेदय भेदय ॐ ह्लीं वश्यं कुरु कुरु ॐ ह्लीं बगलामुखि हुं फट् स्वाहा।

ॐ ऐं ऐं ॐ ह्लीं बगलामुखि ईशानाय भूताधिपतये वृषभवाहनाय कर्पूरवर्णाय त्रिशूलहस्ताय सपरिवाराय एहि एहि मम विघ्नान् विभञ्जय विभञ्जय ॐ ह्लीं अमुकस्य मुखं स्तम्भय स्तम्भय ॐ ह्लीं अमुकस्य मुखं भेदय भेदय ॐ ह्लीं वश्यं कुरु कुरु ॐ ह्लीं बगलामुखि हुं फट् स्वाहा।

ॐ ऐं ऐं ॐ ह्लीं बगलामुखि ब्रह्मणे ऊर्ध्वदिग्लोकपालाधिपतये हंसवाहनाय श्वेतवर्णाय कमण्डलुहस्ताय सपरिवारय एहि एहि मम विघ्नान् विभञ्जय विभञ्जय ॐ ह्लीं अमुकस्य मुखं स्तम्भय स्तम्भय ॐ ह्लीं अमुकस्य मुखं भेदय भेदय ॐ ह्लीं वश्यं कुरु कुरु ॐ ह्लीं बगलामुखि हुं फट् स्वाहा।

ॐ ऐं ऐं ॐ ह्लीं बगलामुखि वैष्णवीसहिताय नागाधिपतये गरुडवाहनाय श्यामवर्णाय चक्रहस्ताय सपरिवाराय एहि एहि मम विघ्नान् विभञ्जय विभञ्जय ॐ ह्लीं अमुकस्य मुखं स्तम्भय स्तम्भय ॐ ह्लीं अमुकस्य मुखं भेदय भेदय ॐ ह्लीं वश्यं कुरु कुरु ॐ ह्लीं बगलामुखि हुं फट् स्वाहा। ॐ नमो भगवति पुण्यपवित्रे स्वाहा।

ॐ ह्लीं बगलामुखि नित्यम् एहि एहि रविमण्डलमध्याद् अवतर अवतर सान्निध्यं कुरु कुरु। ॐ ऐं परमेश्वरीम्

आवाहयामि नमः। मम सान्निध्यं कुरु कुरु। ॐ ह्लीं बगलामुखि हुं फट् स्वाहा।

ॐ ऐं ह्रीं श्रीं ह्लां ह्लीं ह्लूं ह्लैं ह्लौ ह्लः बगले चतुर्भुजे मुद्गरशरसंयुक्ते दक्षिणे जिह्वावज्रसंयुक्ते वामे श्रीमहाविद्ये पीतवस्त्रे पञ्चमहाप्रेनाधिरूढे सिद्धविद्याधरवन्दिते ब्रह्मविष्णुरुद्रपूजिते आनन्दस्वरूपे विश्वसृष्टिस्वरूपे महाभैरवरूप धारिणि स्वर्गमृत्युपातालस्तम्भिमनि वाममार्गाश्रिते श्रीबगले ब्रह्मविष्णुरुद्ररूपनिर्मिते षोडशकलापरिपूरिते दानवरूप सहस्त्रादित्यशोभिते त्रिवर्णे एहि एहि मम हृदयं प्रवेशय प्रवेशय शत्रुमुखं स्तम्भय स्तम्भय अन्यभूतपिशाचान् खादय खादय अरिसैन्यं विदारय विदारय परविद्यां परचक्रं छेदय छेदय वीरचक्रं धनुषां संभारय संभारय त्रिशूलेन् छिन्धि छिन्धि पाशेन् बन्धय बन्धय भूपतिं वश्यं कुरु कुरु संमोहय संमोहय विना जाप्येन सिद्धय सिद्धय विना मन्त्रेण सिद्धि कुरु कुरु सकलदुष्टान घातय घातय मम त्रैलोक्यं वश्यं कुरु कुरु सकलकुलराक्षसान् दह दह पच पच मथ मथ हन हन मर्दय मर्दय मारय मारय भक्षय भक्षय मां रक्ष रक्ष विस्फोटकादीन् नाशय नाशय ॐ ह्लीं विषमज्वरं नाशय नाशय विषं निर्विषं कुरु कुरु ॐ ह्लीं बगलामुखि हुं फट् स्वाहा।

ॐ क्लीं क्लीं ह्लीं बगलामुखि सर्वदुष्टानां वाचं मुखं पदं स्तम्भय स्तम्भय जिह्वां कीलय कीलय बुद्धिं विनाशय विनाशय क्लीं क्लीं ह्लीं स्वाहा।

ॐ बगलामुखि स्वाहा। ॐ पीताम्बरे स्वाहा। ॐ त्रिपुरभैरवि स्वाहा। ॐ विजयायै स्वाहा। ॐजयायै स्वाहा। ॐशारदायै स्वाहा। ॐ सुरेश्वर्यै स्वाहा। ॐ रुद्राण्यै स्वाहा। ॐ विन्ध्यवासिन्यै स्वाहा। ॐ त्रिपुरसुन्दर्यै स्वाहा। ॐ दुर्गायै स्वाहा। ॐ भवान्यै स्वाहा। ॐ भुवनेश्वर्यै स्वाहा। ॐमहामायायै स्वाहा। ॐकमललोचनायै स्वाहा। ॐतारायै स्वाहा। ॐ योगिन्यै स्वाहा। ॐ कौमार्यै स्वाहा। ॐ शिवायै स्वाहा। ॐ इन्द्राण्यै स्वाहा। ॐ ह्लीं बगलामुखि हुं फट् स्वाहा।

ॐ ह्लीं शिवतत्वव्यापिनि बगलामुखि स्वाहा। ॐ ह्लीं मायातत्वव्यापिनि बगलामुखि हृदयाय स्वाहा। ॐ ह्लीं विद्यातत्वव्यापिनि बगलामुखि शिरसे स्वाहा। ॐ ह्लीं बगलामुखि हुं फट् स्वाहा।

ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः शिरो रक्षतु बगलामुखि रक्ष रक्ष स्वाहा। ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः भालं रक्षतु पीताम्बरे रक्ष रक्ष स्वाहा। ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः नेत्रे रक्षतु महाभैरवि रक्ष रक्ष स्वाहा। ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः कर्णौ रक्षतु विजये रक्ष रक्ष स्वाहा। ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः नसौ रक्षतु जये रक्ष रक्ष स्वाहा। ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः वदनं रक्षतु शारदे रक्ष रक्ष स्वाहा। ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः कण्ठं रक्षतु रुद्राणि रक्ष रक्ष स्वाहा। ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः स्कन्धौ रक्षतु विन्ध्यवासिनि रक्ष रक्ष स्वाहा। ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः बाहू रक्षतु त्रिपुरसुन्दरि रक्ष रक्ष स्वाहा। ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः करौ रक्षतु दुर्गे रक्ष रक्ष स्वाहा।

ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः हृदयं रक्षतु भवानी रक्ष रक्ष स्वाहा। ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः उदरं रक्षतु भुवनेश्वरि रक्ष रक्ष स्वाहा। ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः नाभिं रक्षतु महामाये रक्ष रक्ष स्वाहा। ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः कटिं रक्षतु कमललोचने रक्ष रक्ष स्वाहा। ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः उदरं रक्षतु तारे रक्ष रक्ष स्वाहा। ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः सर्वाङ्गं रक्षतु महातारे रक्ष रक्ष स्वाहा। ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः अग्रे रक्षतु योगिनि रक्ष रक्ष स्वाहा। ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः पृष्ठे रक्षतु कौमारि रक्ष रक्ष स्वाहा। ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः दक्षिणपार्श्वे रक्षतु शिवे रक्ष रक्ष स्वाहा। ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः वामपर्श्वे रक्षतु इन्द्राणि रक्ष रक्ष स्वाहा।

ॐ गां गीं गूं गैं गौं गः गणपतये सर्वजनमुखस्तम्भनाय आगच्छ आगच्छ मम विघ्नान् नाशय नाशय दुष्टं खादय खादय दुष्टस्य मुखं स्तम्भय स्तम्भय अकालमृत्युं हन हन भो गणाधिपते ॐ ह्लीं वश्यं कुरु कुरु ॐ ह्लीं

बगलामुखि हुं फट् स्वाहा।

अष्टौ ब्राह्मणान् ग्राहयित्वा सिद्धिर्भवति नान्यथा। भ्रूयुग्मं तु पठेत नात्र कार्यं संख्याविचारणम् ॥
यन्त्रिणां बगला राज्ञी सुराणां बगलामुखि। शूराणां बगलेश्वरी ज्ञानिनां मोक्षदायिनी ॥
एतत् स्तोत्रं पठेन् नित्यं त्रिसन्ध्यं बगलामुखि। विना जाप्येन सिध्येत साधकस्य न संशयः ॥
निशायां पायसतिलाज्यहोमं नित्यं तु कारयेत्। सिध्यन्ति सर्वकार्याणि देवी तुष्टा सदा भवेत् ॥
मासमेकं पठेत् नित्यं त्रैलोक्ये चातिदुर्लभम्। सर्वसिद्धिमवाप्नोति, देव्या लोकं स गच्छति ॥

॥ इति श्रीबगलामुखिकल्पे वीरतन्त्रे बगलासिद्धिप्रयोगः सम्पूर्णम् ॥

॥ अथ श्रीपीताम्बरा बगलामुखी खड्ग मालामन्त्रः ॥

यह स्तोत्र शत्रुनाश एवं कृत्यानाश, परविद्या छेदन करने वाला एवं रक्षाकार्य हेतु प्रभावी है। साधारण साधकों को कुछ समय आवेश व आर्थिक दबाव रहता है, अतः पूजा उपरांत नमस्तस्यादि शांति स्तोत्र पढ़ने चाहिये।

विनियोग :- **ॐ अस्य श्रीपीताम्बरा बगलामुखी खड्गमाला मन्त्रस्य नारायण ऋषिः, त्रिष्टुप्छन्दः, बगलामुखी देवता, ह्लीं बीजं, स्वाहा शक्तिः, ॐ कीलकं, ममाभीष्टसिद्ध्यर्थे सर्वशत्रुक्षयार्थे जपे विनियोगः।**

हृदयादिन्यास :- **नारायण ऋषये नमः शिरसि, त्रिष्टुप्छन्दसे नमो मुखे, श्रीबगलामुखी देवतायै नमः हृदये, ह्लीं बीजाय नमो गुह्ये, स्वाहाशक्तये नमः पादयोः, ॐ कीलकाय नमः सर्वाङ्गे।**

करन्यास :- **ॐ ह्लीं अङ्गुष्ठाभ्यां नमः, बगलामुखी तर्जनीभ्यां नमः, सर्वदुष्टानां मध्यमाभ्यां नमः, वाचं मुखं पदं स्तम्भय अनामिकाभ्यां नमः, जिह्वां कीलय कनिष्ठिकाभ्यां नमः, बुद्धिं विनाशय ह्लीं ॐ स्वाहा करतलकरपृष्ठाभ्यां नमः। एवं हृदयादि न्यास कृत्वा।**

॥ ध्यानम् ॥

मध्येसुधाब्धि मणिमण्डित - रत्नवेद्यां सिंहासनोपरिगतां परिपीतवस्त्राम्।
भ्राम्यद्गदां करनिपीडित वैरिजिह्वां पीताम्बरां कनकमाल्यवतीं नमामि ॥

मानसोपचारैः सम्पूज्य जपं कुर्यात्।

ॐ ह्लीं सर्वनिन्दकानां सर्वदुष्टानां वाचं मुखं पदं स्तम्भय स्तम्भय बुद्धिं विनाशय विनाशय अपरबुद्धिं कुरु कुरु अपस्मारं कुरु कुरु आत्मविरोधिनां शिरो ललाट मुख नेत्र कर्ण नासिका दन्तोष्ठ जिह्वा तालुकण्ठ बाहूदर कुक्षि नाभि पार्श्वद्वय गुह्य गुदाण्ड त्रिक जानुपाद सर्वाङ्गेषु पादादिकेशपर्यन्तं केशादिपादपर्यन्तं स्तम्भय स्तम्भय मारय मारय परमन्त्र परयन्त्र परतन्त्राणि छेदय छेदय आत्ममन्त्र यन्त्रतन्त्राणि रक्ष रक्ष, सर्वग्रहान् निवारय निवारय सर्वम् अविधिं विनाशय विनाशय दुःखं हनहन दारिद्र्यं निवारय निवारय सर्वमन्त्रस्वरूपिणि सर्वशल्ययोग स्वरूपिणि दुष्टग्रहचण्डग्रह भूतग्रहाऽऽकाशग्रह चौरग्रह पाषाणग्रह चाण्डालग्रह यक्षगन्धर्वकिंनरग्रह ब्रह्मराक्षसग्रह भूत-प्रेत-पिशाचादीनां शाकिनी डाकिनी ग्रहाणां पूर्वदिशं बन्धय बन्धय, वाराहि बगलामुखी मां रक्ष रक्ष दक्षिणदिशं बन्धय बन्धय, किरातवाराहि मां रक्ष रक्ष पश्चिमदिशं बन्धय बन्धय, स्वप्नवाराहि मां रक्ष रक्ष उत्तरदिशं बन्धय बन्धय धूम्रवाराहि मां रक्ष रक्ष सर्वदिशो बन्धय बन्धय, कुक्कुटवाराहि मां रक्ष रक्ष अधरदिशं बन्धय बन्धय

'फट्' से ताल-त्रय दें और 'ॐ रौद्रमुख्यै नमः' से दशों दिशाओं में चुटकी बजाकर दिग्बन्धन करें।

॥ ध्यानम् ॥

रक्ताङ्गीं शिव वाहनां त्रिशिरसां रौद्री महाभैरवीम्
धूम्राक्षीं भवनाशिनीं घननिभां नीलालंकार कृताम्।
खड्गं शूलं त्रिशूलं वराभय युतां ध्यात्वा कृताङ्गीं
महासर्वाङ्गीं त्रिजटां महानलनिभां ध्यायेत् पिनाकीं च ताम्।

॥ स्तोत्रम् ॥

ॐ शत्रुविध्वंसिनी रौद्रीत्रिशिरा रक्तलोचना। अग्निर्ज्वाला रौद्रमुखी घोरदंष्ट्रा त्रिशूलिनी ॥
दिगम्बरी मुक्तकेशी रक्तपाणिर्महोदरी। सर्वदा विप्लवे घोरे, शीघ्रं वश्यकरी द्विषाम् ॥

॥ फलश्रुति ॥

इदं स्तवं जपेन्नित्यं, विजयं शत्रुनाशनम्। सहस्रं त्रिदिनं कुर्यात्, कार्य सिद्धिर्न संशयः ॥
गुग्गुलं चन्दनं सर्पिः, होमयेत् सर्पिषाऽथवा। विवादे वाद संग्रामे, विजयं भवति ध्रुवम् ॥

शापोद्धार मन्त्र – 'ॐ श्रीं ह्लीं क्लीं क्रों ऐं लोभाय मोहाय उत्कीलय स्वाहा'

अग्निमंत्र – 'ॐ ह्रीं श्रीं क्लीं शत्रुभस्मं कुरु कुरु ॐ हूँ फट् स्वाहा।''

शत्रुविध्वंसिनी मंत्र – ॐ नमो भगवति चामुण्डे रक्तवाससे अप्रतिहतरूप पराक्रमे अमुकं वधाय विचेतसे स्वाहा।

॥ नन्दजा स्तोत्राष्टकम् ॥

नवीनार्ककोटिप्रभा भासयन्ती। चतुर्भिः करैः शङ्खचक्रे दधन्ती।
वरं चाभयं वैभवं भावयन्ती। जगत्यत्र विन्ध्येश्वरी क्रीडयन्ती ॥१॥
विधेर्दुर्लिपिं मस्तके खण्डयन्ती। सदा साधकानां सुखं चिन्तयन्ती।
सुभाग्याक्षरै – र्भालमामण्डयन्ती। जगत्यत्र विन्ध्येश्वरी क्रीडयन्ती ॥२॥
दरिद्रं दहन्ती नरेन्द्रं वहन्ती। कलत्रं सुपुत्रं सुपौत्रं वहन्ती।
हयं वा गजं वाहनं संददन्ती। जगत्यत्र विन्ध्येश्वरी क्रीडयन्ती ॥३॥

बलिष्ठं रिपूणामरिष्टं ग्रहाणां । विनाशैककर्त्री सुखैकप्रदात्री ।
जडानां च जाड्यं सदा ह्रासयन्ती । जगत्यत्र विन्ध्येश्वरी क्रीडयन्ती ॥४॥

बलं बाधकानामलं बाधयन्ती । छलं छद्मिनां सर्वदा मर्दयन्ती ।
शठानां हठं हाटके खण्डयन्ती । जगत्यत्र विन्धेश्वरी क्रीडयन्ती ॥५॥

शवानां करौघैः कटौ क्षुद्रघण्टी । कृता व्याघ्रचर्म्माम्बराढ्यां हसन्ती ।
निजानां जनानाम - शेषाघहन्ती । जगत्यत्र विन्ध्येश्वरी क्रीडयन्ती ॥६॥

सदा षोडशाब्दा नवीनस्तनीयम् । ममान्तः स्फुरत्वीश जायार्द्रचित्तैः ।
कटाक्षैः सुखानां समूहं ददन्ती । जगत्यत्र विन्ध्येश्वरी क्रीडयन्ती ॥७॥

परब्रह्मविज्ञान बोधैककर्त्री । जरामृत्यु संसार धारोपकर्त्री ।
त्रिभिर्नेत्र वर्गैस्सुधा प्लावयन्ती । जगत्यत्र विन्ध्येश्वरी क्रीडयन्ती ॥८॥

॥ फलश्रुति ॥

इदं नन्दजायाः स्तवं धन्यजन्मा । पठेदष्टकं नष्टसन्देहवृत्ति ।
स भाग्याधिको जायते लोकमध्ये । पुनर्नैति जन्मान्तरं तत्प्रसादात् ॥९॥

॥ श्री कामाख्या स्तोत्रम् ॥

सर्वमन्त्राक्षर मयीं कुमारीरूप - धारिणीम् । निर्गुणां योनिरूपां त्वां ज्ञानमूर्ते! नमाम्यहम् ॥१॥
सर्वभूतान्तरात्मा च देवानां दैवतं पराम् । ज्ञानगम्यां निराकारां कामाख्यां प्रणमाम्यहम् ॥२॥
निर्विकारां चिदानन्दां निर्मलां ज्योतिरूपां च । विश्वगर्भां नमो योनिं कामाख्यां प्रणमाम्यहम् ॥३॥
आदिमध्यान्तहीनां च गीयमाना सदाशिवे । कोटिनीलाम्बरामाद्यां कामाख्यां प्रणमाम्यहम् ॥४॥
सर्वविद्या स्वरूपां त्वां मातृणां रूपधारिणीम् । बालरूपां भद्रविद्यां कामाख्यां प्रणमाम्यहम् ॥५॥
भोगदात्रीं भोगकर्त्रीं भोगरतां भोगप्रियाम् । ज्ञानदात्रीं चिन्मयां त्वां वामानन्द प्रदायिनीम् ॥६॥
विश्वकर्त्रीं विश्वहर्त्रीं विश्वसंसार पालिकाम् । कामरूपां कामदात्रीं कामाख्यायै नमो नमः ॥७॥
विदेहेन संस्थितायै पूज्य देहायै ते नमः । कुलबालां पराविद्यां कामाख्यां प्रणमाम्यहम् ॥८॥
सदैकरूप संस्थितां चिद्रूपायै नमो नमः । स्वबिम्बभावेन विलासयुक्तायै नमो नमः ॥९॥
योगशान्तिप्रदायै त्वं आत्मतत्त्वप्रकाशिनी । त्वां विहाय कथं देवि! भवति शान्तमानसः ॥१०॥
अतएव महादेवि! नित्यं रक्ष सनातनि । देववृन्दसमायुक्तां कामाख्यां प्रणमाम्यहम् ॥११॥

॥ इति श्री कामाख्या स्तोत्रं सम्पूर्णम् ॥

॥ श्री शीतला कवचम् ॥

॥ पार्वत्युवाच ॥

भगवन् सर्वधर्मज्ञ सर्वशास्त्र विशारद! शीतला कवचं ब्रूहि सर्वभूतोपकारकम् ॥१॥
वद शीघ्रं महादेव! कृपां कुरु ममोपरि । इति देव्याः वचं श्रुत्वा क्षणं ध्यात्वा महेश्वरः ॥२॥
उवाच वचनं प्रीत्या तत् शृणुष्व मम प्रिये! शीतला कवचं दिव्यं शृणु मत्प्राण - वल्लभे ॥३॥

॥ ईश्वर उवाच ॥

शीतला - सार सर्वस्वं कवचं मंत्र गर्भितं। कवचं विना जपेत् यो वै नैव सिद्ध्यन्ति कलौ ॥४॥
धारणादस्य मन्त्रस्य सर्वरक्षाकरं नृणाम् । कवचस्यास्य देवेशि! ऋषिर्प्रोक्तो महेश्वरः ।
छन्दोऽनुष्टुप् कथितं च देवता शीतला स्मृता । लक्ष्मी बीजं रमा शक्तिः तारं कीलकमीरितम् ॥५॥
लताविस्फोटकादीनि शान्त्यर्थे परिकीर्त्तितः । विनियोगः प्रकुर्वीत पठेदेकाग्र मानसः ॥६॥

विनियोगः- ॐ अस्य शीतला कवचस्य श्री महेश्वर ऋषिः, अनुष्टुप् छन्दः, श्री शीतला भगवती देवता, श्रीं बीजं, ह्रीं शक्तिः, ॐ कीलकं , लताविस्फोटकादि शान्त्यर्थे पाठे विनियोगः।

ऋष्यादि न्यासः- श्री महेश्वर ऋषये नमः शिरसि, अनुष्टुप् छन्दसे नमः मुखे, श्रीशीतला भगवती देवतायै नमः हृदये, श्रीं बीजाय नमः गुह्ये, ह्रीं शक्तये नमः नाभौ, ॐ कीलकाय नमः पादयोः, लताविस्फोटकादि शान्त्यर्थे पाठे विनियोगाय नमः सर्वाङ्गे।

॥ ध्यानम् ॥

उद्यत्सूर्य - निभां नवेन्दुमुकुटां सूर्याग्नि - नेत्रोज्ज्वलाम्,
नाना गन्ध विलेपनां मृदुतनुं दिव्याम्बरालंकृताम् ।
दोर्भ्यां सन्दधतीं वराभय - युगं वाहे स्थितां रासभे,
भक्ताभीष्ट फलप्रदां भगवतीं श्रीशीतलां त्वां भजे ॥

॥ अथ कवच पाठ ॥

ॐ शीतला पातु मे प्राणे रुनुकी पातु चापाने । समाने झुनुकी पातु उदाने पातु मन्दला ॥१॥
व्याने च सेढला [illegible] शङ्करी तथा। पातु भामिन्द्रियान् सर्वान् श्रीदुर्गा विन्ध्यवासिनी ॥२॥
ॐ मम पातु [illegible] दुर्गा कमला पातु मस्तकम् । ह्रीं मे पातु भ्रुवोर्मध्ये भवानी भुवनेश्वरी ।
[illegible] मे मधुमती देवी ॐकारं भृकुटी - द्वयम् ॥३॥
नासिकां शारदा पातु तमसा वर्त्म संयुतम् । नेत्रौ ज्वालामुखी पातु भीषणा पातु श्रुतिर्मे ॥४॥
कपोलौ कालिका पातु समुखी पातु चोष्ठयोः । सन्ध्ययोः त्रिपुरा पातु दन्ते च रक्तदन्तिका ॥५॥
जिह्वां सरस्वती पातु तालुके च वाग् वादिनी । कण्ठे पातु तु मातङ्गी ग्रीवायां भद्रकालिका ॥६॥
स्कन्धौ च पातु मे छिन्ना ककुभे स्कन्द - मातरः । बाहु युग्मौ च मे पातु श्रीदेवी बगलामुखी ॥७॥
करौ मे भैरवी पातु पृष्ठे पातु धनुर्धरी । वक्षःस्थले च मे पातु दुर्गा महिषमर्दिनी ॥८॥

हृदये ललिता पातु कुक्षौ पातु महेश्वरी । पार्श्वौ च गिरिजा पातु चान्नपूर्णा तु चोदरम् ॥९॥
नाभिं नारायणी पातु कटिं मे सर्वमङ्गला । जङ्घयोर्मे सदा पातु देवी कात्यायनी पुरा ॥१०॥
ब्रह्माणी शिश्नं पातु वृषणं पातु कपालिनी । गुह्यं गुह्येश्वरी पातु जानुनोर्जगदीश्वरी ॥११॥
पातु गुल्फौ तु कौमारी पाद पृष्ठं तु वैष्णवी । वाराही पातु पादाग्रे ऐन्द्राणी सर्वमर्मसु ॥१२॥
मार्गे रक्षतु चामुण्डा वने तु वनवासिनी । जले च विजया रक्षेत् वह्नौ मे चापराजिता ॥१३॥
रणे क्षेमङ्करी रक्षेत् सर्वत्र सर्वमंगला । भवानी पातु बन्धून् मे भार्यां रक्षतु चाम्बिका ॥१४॥
पुत्रान् रक्षतु माहेन्द्री कन्यकां पातु शाम्भवी । गृहेषु सर्वकल्याणी पातु नित्यं महेश्वरी ॥१५॥
पूर्वे कादम्बरी पातु वह्नौ शुक्लेश्वरी तथा । दक्षिणे करालिनी पातु प्रेतारूढा तु नैर्ऋते ॥१६॥
पाश हस्ता पश्चिमे पातु वायव्ये मृगवाहिनी । पातु मे चोत्तरे देवी यक्षिणी सिंहवाहिनी ।
ईशाने शूलिनी पातु ऊर्ध्वे च खगगामिनी ॥१७॥
अधस्तात् वैष्णवी पातु सर्वत्र नारसिंहिका । प्रभाते सुन्दरी पातु मध्याह्ने जगदम्बिका ॥१८॥
सायाह्ने चण्डिका पातु निशीथेऽत्र निशाचरी । निशान्ते खेचरी पातु सर्वदा दिव्य - योगिनी ॥१९॥
वायौ मां पातु वेताली वाहने वज्रधारिणी । सिंहा सिंहासने पातु शय्यां च भगमालिनी ॥२०॥
सर्वरोगेषु मां पातु कालरात्रि स्वरूपिणी । यक्षेभ्यो यक्षिणी पातु राक्षसे डाकिनी तथा ॥२१॥
भूत प्रेत पिशाचेभ्यो हाकिनी पातु मां सदा । मन्त्रं मन्त्राभिचारेषु शाकिनी पातु मां सदा ॥२२॥
सर्वत्र सर्वदा पातु श्रीदेवी गिरिजात्मजा । इत्येतत् कथितं गुह्यं शीतला कवचमुत्तमम् ॥२३॥

॥ फलश्रुति ॥

ब्रह्मराक्षस वेतालाः कूष्माण्डा दानवादयः । विस्फोटक भयं नास्ति पठनाद् धारणाद्यदि ॥१॥
अष्टसिद्धिप्रदं नित्यं धारणात् कवचस्य तु । सहस्र पठनात् सिद्धिः सर्वकार्यार्थ सिद्धिदम् ॥२॥
तदर्धं वा तदर्धं वा पठेदेकाग्र मानसः । अश्वमेघ सहस्रस्य फलमाप्नोति मानवः ॥३॥
शीतलाग्रे पठेद् यो वै देवी भक्तैक मानसः । शीतला रक्षयेन्नित्यं भयं क्वापि न जायते ॥४॥
घटे वा स्थापयेद् देवीं दीपं प्रज्वाल्य यत्नतः । पूजयेत् जगतां धात्रीं नाना गन्धोपहारकैः ॥५॥
अदीक्षिताय नो दद्यात् कुचैलाय दुरात्मने । अन्य शिष्याय दुष्टाय निन्दकाय दुरार्थिने ॥६॥
न दद्यादिदं वर्म तु प्रमत्तालाप शालिने । दीक्षिताय कुलीनाय गुरु भक्तिरताय च ॥७॥
शान्ताय कुल - शाक्ताय शान्ताय कुल - कौलिने । दातव्यं तस्य देवेशि! कुलवागीश्वरो भवेत् ॥८॥
इदं रहस्यं परमं शीतला कवचमुत्तमम् । गोप्यं गुह्यतमं दिव्यं गोपनीयं स्वयोनिवत् ॥९॥

मूल मंत्रः- ॐ श्रीं ह्रीं ॐ

॥ इति श्रीईश्वर पार्वती संवादे शक्तियामले शीतला कवचं सम्पूर्णम् ॥

॥ श्री वाराही स्तोत्रम् ॥

वाराही देवी के अन्य प्रयोग पुस्तक के द्वितीय खण्ड 'उत्तरार्ध खण्ड' में दिये गये हैं।

मंत्र - **ॐ एहि परमेश्वरी स्वाहा।**

विनियोग :- **ॐ अस्य श्रीवाराही मन्त्रस्य ब्रह्मा ऋषिः, अनुष्टुप् छन्दः, सकलवशीकरणार्थे जपे विनियोगः।**

ऋष्यादिन्यास : - **श्रीब्रह्मा ऋषये नमः शिरसि, अनुष्टुप्छन्दसे नमः मुखे, सकलवशीकरणार्थे जपे विनियोगाय नमः सर्वाङ्गे।**

करन्यास : - **ॐ एहि अंगुष्ठाभ्यां नमः। परमेश्वरी तर्जनीभ्यां नमः। स्वाहा मध्यमाभ्यां नमः। ॐ एहि अनामिकाभ्यां नमः। परमेश्वरी कनिष्ठिकाभ्यां नमः। स्वाहा करतलकरपृष्ठाभ्यां नमः।**

अङ्गन्यास :- **ॐ एहि हृदयाय नमः। परमेश्वरी शिरसे स्वाहा। स्वाहा शिखायै वषट्। ॐ एहि कवचाय हुं। परमेश्वरी नेत्रत्रयाय वौषट्। स्वाहा अस्त्राय फट्।**

॥ ध्यानम् ॥

नीलाञ्जन गिरीन्द्राभ्यां, नानारत्नविभूषिताम्।
अश्वारूढां च वरदां, पाशांकुशधरां शुभाम्।
भीमामुग्रां महादेवीं, खड्गखेटकधारिणीम्।
चतुर्भुजां तीक्ष्णदंष्ट्रां, दंष्ट्राग्रस्थ वसुन्धराम्।
जगत्संहारकारिणीं, साधकस्य वरप्रदाम्॥

इस प्रकार 'ध्यान' कर मानसपूजा करे। भगवती वाराही का मन ही मन चिन्तन करते हुए स्तोत्रपाठ करे। यथा-

॥ स्तोत्रपाठ ॥

अश्वारूढे रक्तवर्णे, स्मितसौम्यमुखाम्बुजे! राजस्त्रीसर्वजन्तूनां, वशीकरणनायिके॥ वशीकरणकार्यार्थं, पुरा देवेन निर्मिता। तस्मादवश्यं वाराहि, सर्वान् मे वशमानय॥ अन्तर्बहिश्च मनसि, व्यापारेषु सभासु च। यथा मामेव स्मरति, तथा देवि! वशं कुरु। चामरां दोलिकां छत्रं, राजचिह्नानि यच्छति। अभीष्टसम्पदो राज्यं, रामाराज्यमथापि वा। मन्मथ स्मरद्रामा यान्ति रन्तु मया स्महस्त्रीरत्नेषु महत् प्रेम तथा जनय कामदे! मृगपक्ष्यादयः सर्वे, दृष्ट्या मां प्रेमवीक्षिताः। अनुगच्छन्तु मामेव, त्वत्प्रसादात्तथा कुरु, वशीकरणकार्यार्थं यत्र कुत्र प्रयुज्यते। सम्मोहनास्त्रं वर्षित्वा तत्, कार्यं तत्र वर्षय वशीकरणबालास्त्रं भक्ता वामनिवारितं तस्मादवश्यं वाराहि! जगत्सर्वं वशं कुरु। वश्यस्तोत्रमिदं देव्या, त्रिसन्ध्यं यः पठेन्नरः। सोऽपि तत्तत्क्षणाद् देव्या, रामराज्यमवाप्नुयात्।

॥ इति श्रीवशीकरण वाराही स्तोत्रम् ॥

॥ अथ नव कुमारी पूजा लघु प्रयोग: ॥

नव चण्डी या शतचण्डी में कुमारी पूजा अवश्य करें पूर्व दिन उनको निमन्त्रण देवें। चौकी आसन पर बैठाकर उनका पादप्रक्षालन गंधोपचार कर प्रार्थना करे।

अलग-अलग कामना हेतु अलग अलग जाति की कन्या की पूजा करें। शांति हेतु ब्राह्मण कन्या, विजय हेतु क्षत्रिय कन्या, अर्थप्राप्ति हेतु वैश्यकन्या, वंशवृद्धि हेतु गोपकन्या, वश्यलाभ हेतु वैश्या या नटी की कन्या, अभिचार कर्म हेतु शूद्र कन्या की पूजा करें।

पूजादिनात्पूर्वदिने गंधपुष्पाक्षतादिभिर्मूलेन भगवत्कुमारीपूजार्थं त्वं मया निमंत्रितासि मां कृतार्थयेति निमंत्रितां प्रातराहूय प्रदक्षिणीकृत्योद्वर्तनाद्यैः स्नापयित्वा गंधतैलेन शरीरं संस्कार्याकेशं परिष्कृत्य ललाटे सिंदूरंनयनयोः कज्जलं सर्वाङ्गे चंदनं दत्त्वा वस्त्रालंकारैराभूष्य पूजागृहमानीय पादौ प्रक्षाल्य अष्टदलपीठोपरि समावेश्य तांबूलेन मुखं संशोध्य देशकालौ स्मृत्वामुकसिद्ध्यर्थं श्रीदुर्गादेवी प्रीत्यर्थं कुमारीणां पूजनं करिष्ये इति संकल्प्य न्यासं कुर्यात्।

षड्ङ्गन्यास :- **ॐ क्लां कुमारिके हृदयाय नमः ॥१॥ ॐ क्लीं कुमारिके शिरसे स्वाहा ॥२॥ ॐ क्लूं कुमारिके शिखायै वषट् ॥३॥ ॐ क्लैं कुमारिके कवचाय हुम् ॥४॥ ॐ क्लौं कुमारिके नेत्रत्रयाय वौषट् ॥५॥ ॐ क्लः कुमारिके अस्त्राय फट् ॥६॥** इति षडंगं विन्यस्य एवमेव विधिना करांगन्यासं कुर्यात्। एवं न्यासं कृत्वा ध्यायेत्।

॥ ध्यानम् ॥

ॐ बालरूपां च त्रैलोक्यसुंदरीं वखर्णिनीम् । नानालंकारनम्राङ्गीं भद्रविद्याप्रकाशिनीम् ॥१॥
चारुहास्यां महानंदहृदयां शुभदां शुभाम् । शंखकुंदेन्दुधवलां द्विभुजां वरदाभयाम् ॥२॥

एवं त्वात्मशिरसि पुष्पं दत्त्वामहयेत् ॥ "मंत्राक्षरमयीं लक्ष्मीं मातृणां रूपधारिणीम्। नवदुर्गात्मिकां साक्षात्कन्या-मावाहयाम्यहम् ॥१॥" इत्यावाह्य **ॐ ह्रीं कुलकुमारिकायै नमः इदं पाद्यम् एवमिदमर्घ्यमिदमाचमनीयमिद-मनुलेपनमेतेऽक्षताः** एतानि पुष्पाणि एष धूपः एष दीपः इदं नैवेद्यमिदं तांबूलमिति पूजयित्वा उपर्युक्तषडंगन्यासमंत्रेण षडंगं पूजयेत्।

नवकन्याओं का एक एक नामावलि से पूजन करें। नवदुर्गाओं के नामों **शैलपुत्री, ब्रह्मचारिणी ..... इत्यादि नामों से** भी पूजन कर सकते हैं।

ततः ॐ ह्रीं हंसः कुलकुमारिके पुष्पांजलिं समर्पयामि। इति पुष्पांजलित्रयं दत्त्वा नवनामभिः पूजयेत्। तद्यथा-**ॐ ह्रीं कौमार्य्यै नमः ॥१॥ ॐ ह्रीं त्रिपुरायै नमः ॥२॥ ॐ ह्रीं कल्याण्यै नमः ॥३॥ ॐ ह्रीं रोहिण्यै नमः ॥४॥ ॐ ह्रीं कामिन्यै नमः ॥५॥ ॐ ह्रीं चंडिकायै नमः ॥६॥ ॐ ह्रीं शांकर्यै नमः ॥७॥ ॐ ह्रीं दुर्गायै नमः ॥८॥ ॐ ह्रीं सुभद्रायै नमः ॥९॥** इति नामभिः संपूज्य मूलेन पुष्पांजलित्रयं दत्त्वा प्रदक्षिणीकृत्य प्रणमेत्। तत्र मन्त्रः।

ॐ जगत्पूज्ये जगद्वंद्ये सर्वशक्तिस्वरूपिणि । पूजां गृहाण कौमारि जगन्मातर्नमोऽस्तु ते ॥१॥
त्रिपुरां त्रिगुणां धात्रीं ज्ञानमार्गस्वरूपिणीम् । त्रैलोक्यवंदितां देवीं त्रिमूर्तिं पूजयाम्यहम् ॥२॥
कालात्मिकां कालभीतां कारुण्यहृदयां शिवाम् । कारुण्यजननीं नित्यां कल्याणीं पूजयाम्यहम् ॥३॥
अणिमादिगुणोपेता मकारा दिस्वरात्मिकाम् । शक्तिभेदात्मिकां लक्ष्मीं रोहिणीं पूजयाम्यहम् ॥४॥

कलाधारां कलारूपां कालचण्डस्वरूपिणीम् । कामदां करुणाधारां कामिनीं पूजयाम्यहम् ॥५॥
चण्डधारां चण्डमायां चण्डमुंडविनाशिनीम् । प्रणमामि च देवेशीं चंडिकां पूजयाम्यहम् ॥६॥
सुखानन्दकरीं शांतां सर्वदेवनमस्कृताम् । सर्वभूतात्मिकां देवीं शांकरीं पूजयाम्यहम् ॥७॥
दुर्गमे दुस्तरे चैव दुःखत्रयविनाशिनीम् । पूजयामि सदा भक्त्या दुर्गां दुर्गे नमाम्यहम् ॥८॥
सुंदरीं स्वर्णवर्णाभां सुखसौभाग्य - दायिनीम् । सुभद्रजननीं देवीं सुभद्रां प्रणमाम्यहम् ॥९॥

इति प्रणम्य तदंगे श्रीदुर्गामावाह्य षोडशनामभिः पूजयेत्।

तद्यथा- **ॐ ह्रीं उमायै नमः ॥१॥ ॐ ह्रीं शूलधारिण्यै नमः ॥२॥ ॐ ह्रीं खेचर्यै नमः ॥३॥ ॐ ह्रीं चत्वरवासिन्यै नमः ॥४॥ ॐ ह्रीं सुगंधनासिकायै नमः ॥५॥ ॐ ह्रीं सर्वधारिण्यै नमः ॥६॥ ॐ ह्रीं चंडिकायै नमः ॥७॥ ॐ ह्रीं सौभद्रिकायै नमः ॥८॥ ॐ ह्रीं अशोकवासिन्यै नमः ॥९॥ ॐ ह्रीं वज्रधारिण्यै नमः ॥१०॥ ॐ ह्रीं ललितायै नमः ॥११॥ ॐ ह्रीं सिंहवाहिन्यै नमः ॥१२॥ ॐ ह्रीं भगवत्यै नमः ॥१३॥ ॐ ह्रीं विंध्यवासिन्यै नमः ॥१४॥ ॐ ह्रीं महाबलायै नमः ॥१५॥ ॐ ह्रीं भूतलवासिन्यै नमः ॥१६॥**

॥ इति संपूज्य साष्टांगं प्रणमेत्। आदर सहित नवकन्याओं को भोजन करायें। द्रव्य दक्षिणा फल वस्त्रालंकार अर्पण करें।

॥ इति कुमारीपूजनम् ॥

॥ अथ कुमारी पूजा वृहत् प्रयोगः॥

दुर्गा तंत्र पटल में नवरात्र विधान में कुमारी पूजा समय प्रचलित नवदुर्गा नाम एवं उनके मंत्र दिये है। ग्रंथांतर के आधार पर नामान्तर मिलते है उनके अनुसार- **''मंत्र महोदधि''**- २ वर्ष की कुमारी। ३ वर्ष की त्रिमूर्ति। ४ वर्ष की कल्याणी। ५ वर्ष की रोहिणी। ६ वर्ष की कालिका। ७ वर्ष की चण्डिका। ८ वर्ष की शांभवी। ९ वर्ष की दुर्गा। १० वर्ष की सुभद्रा।

इनमें नामान्तर भेद से १. कुमारी (कौमारी) २. त्रिमूर्ति (त्रिपुरा) ३. कालिका (कामिनी) ४. शांभवी (शाङ्करी) अन्य नाम भी है। ''पुरश्चर्यार्णव'' में ये नाम भेद है तथा सुभद्रा की जगह शुभदा एवं चण्डिका की जगह अंबिका है। महाकाल संहिता के अनुसार १८ नाम कौमारी देवी के कहे है। १. महाचण्ड योगेश्वरी २. सिद्धिकराली ३. सिद्धि विकराली ४. महामारी ५. वज्रकापालिनी ६. मुण्डमालिनी ७. अट्टहासिनी ८. चण्डकापालिनी ९. कालचक्रेश्वरी १०. गुह्यकाली ११. कात्यायनी १२. कामाख्या १३. चामण्डा १४. सिद्धिकाली १५. कुब्जिका १६. मातङ्गी १७. चण्डेश्वरी १८. कौमारी। वहीं अन्य १८ नाम भी बताये है। १. दुर्गा २. नारायणी ३ शिवा ४. महामाया ५. योगनिद्रा ६. कालरात्रि ७. कपर्दिनी ८. उग्रचण्डा ९ भद्रकाली १० अजिता ११ अपराजिता १२ त्रिपुरा १३ महाकाली १४ कामाख्या १५ कुलनायिका १६ भैरवी १७. भुवनेशी १८. कौमारी।

मंत्र महार्णव में रुद्रयामल के अनुसार एक वर्ष से सोलह वर्ष तक की कन्या कही है। २० वर्ष की सुकुमारी कही गई है।

॥ अथ वर्षभेदेन कुमारीभेदः॥

एकवर्षा भवेत्सन्ध्या द्विवर्षा च सरस्वती । त्रिवर्षा च त्रिधामूर्तिश्चतुर्वर्षा च कालिका ॥१॥
सुभगा पञ्चवर्षा तु षड्वर्षा च भवेदुमा । सप्तभिर्भिल्लिनी साक्षादष्टवर्षा तु कुब्जिका ॥२॥

नवभिः कालसन्दर्भा दशभिश्चापराजिता । एकादशे तु रुद्राणी द्वादशाब्दे तु भैरवी ॥३॥
त्रयोदशे महालक्ष्मीर्द्विसप्ता पीठनायिका । क्षेत्रज्ञा पञ्चदशाभिः षोडशे चाम्बिका मता ॥४॥
एवं क्रमेण संगृह्य यावत्पुष्पं न जायते । प्रतिपदादिपूर्णान्तं वृद्धिभेदेन पूजयेत् ॥५॥

विश्वासार तंत्रानुसार १ वर्ष से ७ वर्ष तक कुमारी नाम है। पश्चात् **अष्टवर्षा तु सा कन्या भवेद्गौरी वरानने। नववर्षा रोहिणी सा दशवर्षा तु कन्यका॥** अतः **उर्ध्वं महामाया भवेत्सैव रजस्वला।** १२ वर्ष से २० वर्ष सुकुमारी कही है।

कुब्जिका तन्त्र के सप्तम पटल में यह विशेष है : पाँच वर्ष से लेकर बारह वर्ष तक की कन्या, हे देवि! अपने रूप को प्रकाशित करने वाली **कुमारी** कहलाती है। छह वर्ष से लेकर नव वर्ष तक की कन्या, हे महेशानि! साधक की अभीष्टसिद्धि के लिए उपयुक्त होती है। आठ वर्ष से लेकर तेरह वर्ष की अवस्था तक की कन्या **कुलजा** कहलाती है और उसमें पूजा करनी चाहिये। दश वर्ष से लेकर सोलह वर्ष तक अवस्था वाली **युवती** कहलाती है। उसे देवता के समान समझना चाहिये। रुद्रयामल तंत्र में इस प्रकार कुछ विशेष कहा गया है। दूसरे वर्ष से ऊपर जब तक आठ वर्ष तक की हो तब तक सुन्दर मोहिनी कन्या की जप और पूजा करनी चाहिये।

अथ कुमारीणां वर्णभेदो यथा- रुद्रयामले उत्तरखण्डे सप्तमपटले :

नटीकन्यां हीनकन्यां तथा कपालिकन्यकाम् । रजकस्यापि कन्यां च तथा नापितकन्यकाम् ॥१॥
गोपालकन्यकाञ्चैव ब्रह्मणस्यापि कन्यकाम् । शूद्रकन्यां वैद्यकन्यां तथा वैश्यस्य कन्यकाम् ॥२॥
चण्डालकन्यकां वापि यत्र कुत्राश्रमे स्थिताम् । सुहृद्वर्गस्य कन्यां च समानीत प्रयत्नतः ॥३॥

योगिनी तन्त्र के अनुसार : इसलिये सब जातियों में उत्पन्न कन्याओं की पूजा करनी चाहिये। हे शिवे, कुमारीपूजन में जातिभेद नही करना चाहिय। हे महेशानि! जातिभेद करने साधक नरक में जाता है। शङ्का में पड़ा हुआ मन्त्रसाधक निश्चित रूप से पातकी होता है। इसलिए देवी बुद्धि से कुमारी का पूजन करना चाहिये। कुमारी समस्त विद्यास्वरूपा है। इसमें कोई संशय नहीं है। हे देवि! यदि भाग्य से वेश्या- कुलोत्पन्न कोई कुमारी सर्वस्व देकर भी मिल जाय तो साधक को यत्नपूर्वक स्वर्ण, रौप्य आदि देकर प्रसन्न होकर उसकी पूजा करनी चाहिये। तब साधक को महासिद्धि की प्राप्ति होती है, इसमें कोई संशय नहीं है।

॥ अथ कुमारीदान क्रम फलम् ॥

विवाहयेत्स्वयं कन्यां ब्रह्महत्या विनश्यति। यो यश्च पुण्यकाले तुं कन्यादानं समापयेत् ॥१॥
भुक्तिमुक्तिफलं तस्य सौभाग्यं सर्वसम्पदः । रुद्रलोके वसेन्नित्यं त्रिनेत्रो भगवान्हरः ॥२॥
तीर्थकोटि सहस्त्राणि अश्वमेधशतानि च । तत्फलं लभते मर्त्यो यस्तु कन्यां विवाहयेत् ॥३॥
वालुकाः सागरे ज्ञेयास्तावदब्द सहस्त्रकम् । एकैकं कुलमुद्धृत्य रुद्रलोके महीयते ॥४॥
तत्तदिष्टदेवतायाः प्रीतये तुष्टये सुधीः । कन्यादानं समाहृत्य मुक्तिमाप्नोति भैरव ॥५॥
तत्तज्जातीय कन्यायास्तत्तद्बुद्ध्या च साधकः । विभाव्य शिवरूपत्वं सम्प्रदानीयकन्यके ॥६॥
पूर्णरूपं शिवं ध्यात्वा वरं सर्वाङ्गसुन्दरम् । तेजोमयं यशः कानतं कालभैरवरूपिणम् ॥७॥

बटुकेशं महादेवं वरयेत्साधकाग्रणीः।

॥ अथ कुमारी पूजा प्रयोगः॥

॥ ध्यानम् ॥

बालारूपाञ्च त्रैलोक्य सुंदरीं वरवर्णिनीम् ।
नानालंकार नम्राङ्गीं भद्रविद्या प्रकाशिनीम् ।
चारुहास्यां महानन्दहृदयां शुभद्रां शुभाम् ।
ध्यात्वा द्वादशपत्राब्ज पूर्णचन्द्रनिभाननाम् ॥

कुमारीपूजा समय अथवा किसी कुमारी का कन्यादान करे उस समय इस मंत्र से ध्यान कर उसे ग्रहण करनी चाहिये।

पूजादिन से पूर्व दिन गन्ध, पुष्प, अक्षत आदि के द्वारा मूलमन्त्र से **भगवति कुमारि पूजार्थं त्वं मया निमन्त्रितासि मां कृतार्थय** इस प्रकार निमन्त्रण देकर प्रातः बुलाकर उसकी प्रदक्षिणा करके उद्वर्तन आदि से स्नान कराकर तेल से शरीर का संस्कार करें। केशों को परिष्कृत करके, ललाट में सिंदूर, आँखों में काजल तथा सर्वाङ्ग में चन्दन लगाकर वस्त्रालङ्कारों से आभूषित कर पादप्रक्षालन करके अष्टदल पीठ पर उसे बैठाकर ताम्बूल से मुख शुद्ध करके देशकाल का स्मरण करके "**अमुक फल प्राप्तयेऽमुककर्मण्यमुकदेव्याः प्रीतये कुमारीणां पूजनं करष्ये**" ऐसा संकल्प करके इस प्रकार न्यास करें।

हृदयादि षडङ्गन्यास : **ॐ क्लां कुलकुमारिके हृदयाय नमः ॥१॥ ॐ क्लीं कुलकुमारिके शिरसे स्वाहा ॥२॥ ॐ क्लूँ कुलकुमारिके शिखायै वषट् ॥३॥ ॐ क्लैं कुलकुमारिके कवचाय हुम् ॥४॥ ॐ क्लौं कुलकुमारिके नेत्रत्रयाय वौषट् ॥५॥ ॐ क्लः कुलकुमारिके अस्त्राय फट् ॥६॥** इति हृदयादिषडङ्गन्यासः। इसी प्रकार करन्यास भी करें। तदनन्तर ध्यान करें।

॥ ध्यानम् ॥

ॐ शंखकुन्देन्दुधवलां द्विभुजां वरदाभयाम् । चन्द्रमध्यमहाम्भोज हावभावविराजिताम् ॥१॥
बालरूपां च त्रैलोक्यसुन्दरीं वरवर्णिनीम् । नानालङ्कारनम्राङ्गीम्भद्रविद्याप्रकाशिनीम् ॥२॥
चारुहास्यां महानन्दहृदयां शुभदां शुभाम् ॥३॥

इस प्रकार ध्यान करे अपने शिर पर हाथ रखकर मानसोपचार से पूजा करके गन्धादि से इस प्रकार पूजा करें : "**ऐं ह्रीं श्रीं ह्रूं हसौः सन्ध्यायैं कुमार्य्यै नमः।**" इस प्रकार पूर्व बीजमन्त्रों का उच्चारण करके '**सरस्वत्यै कुमार्य्यै नमः**' इत्यादि वर्ष के क्रम से चतुर्थ्यन्त नाम से आसन आदि षोडशोपचारों से इस प्रकार पूजा करें :

ऐं ह्रीं श्रीं हूँ हसौः कुलकुलमारिकायै नमः। जलं समर्पयामि ॥१॥ इदं पाद्यमेवमिदमर्घ्यमिदमाचमनीयमिदमनुलेपनमेतेऽक्षता एतानि पुष्पाणि एष धूप एष दीप इदं नैवेद्यमिदं ताम्बूलमिति पूजयित्वा षडङ्गन्यासविधिना षडङ्गानि पूजयेत्।

तत्र क्रमस्तु कुमार्या हृदयं दक्षिणहस्तेन धृत्वा महातेजोमयं शुक्लवर्णं विभाव्य। ऐं ह्रीं श्रीं हूँ हसौः कुलकुमारिके हृदयाय नमः। हृदयश्रीपादुकां पूजयामि। इति सर्वत्र। शिरः शुक्लवर्णं सर्वमयं विभाव्य। हैं ह्रीं श्रीं ऐं कुलकुमारिके शिरसे स्वाहा। शिरः श्रीपा० ॥२॥ शिखां नीलाञ्जनप्रभां विभाव्य। श्रीं कुलकुमारिके शिखायै वषट्। शिखाश्रीपा० ॥३॥ कवचं प्रथमारुणसंकाशं सुतेजस्कं विभाव्य। ऐं कुलकुमारिके कवचाय हुं। कवचश्रीपा० ॥४॥ ततो नेत्रत्रयं सर्वबीजमयं महाप्रभं रक्तवर्णं कोटिजपापुष्पोज्ज्वलं विभाव्य। ऐं कुलकुमारिके नेत्रत्रयाय वौषट्। नेत्रत्रयश्रीपा० ॥५॥ ह्रीं कुलकुमारिके अस्त्राय फट्। अस्त्रश्रीपा० ॥६॥

इस प्रकार षडङ्गों की पूजा करके षोडश नामों से षोडश बार इस प्रकार पूजा करें :- **ॐ ऐं सन्ध्यायै नमः ॥१॥ ॐ ऐं सरस्वत्यै नमः ॥२॥ ॐ ऐं त्रिमूर्त्यै नमः ॥३॥ ॐ ऐं कालिकायै नमः ॥४॥ ॐ ऐं सुभगायै नमः ॥५॥ ॐ ऐं उमायै नमः ॥६॥ ॐ ऐं मालिन्यै नमः ॥७॥ ॐ ऐं कुब्जिकायै नमः ॥८॥ ॐ ऐं कालसङ्कर्षिण्यै नमः ॥९॥ ॐ ऐं अपराजितायै नमः ॥१०॥ ॐ ऐं रुद्राण्यै नमः ॥११॥ ॐ ऐं भैरव्यै नमः ॥१२॥ ॐ ऐं महालक्ष्म्यै नमः ॥१३॥ ॐ ऐं पीठनायिकायै नमः ॥१४॥ ॐ ऐं क्षेत्रज्ञायै नमः ॥१५॥ ॐ ऐं चर्चिकायै नमः ॥१६॥**

इस प्रकार पूजा करके नव नामों से इस प्रकार पूजा करें। **ॐ ह्रीं कौमार्यै नमः ॥१॥ ॐ ह्रीं त्रिपुरायै नमः ॥२॥ ॐ ह्रीं कल्याण्यै नमः ॥३॥ ॐ ह्रीं रोहिण्यै नमः ॥४॥ ॐ ह्रीं कामिन्यै नमः ॥५॥ ॐ ह्रीं चण्डिकायै नमः ॥६॥ ॐ ह्रीं शाङ्कर्यै नमः ॥७॥ ॐ ह्रीं दुर्गायै नमः ॥८॥ ॐ ह्रीं सुभद्रायै नमः ॥९॥**

इस प्रकार नामों से पूजा करके **''ॐ ह्रीं हंसः कुलकुमारिकायै नमः पुष्पाञ्जलि समर्पयामि''** इससे तीन पुष्पाञ्जलि देकर उसके अंग में अपनी इष्टदेवी का आवाहन करके पूजा तथा प्रदक्षिणा करने के बाद इस प्रकार प्रणाम करें।

ॐ जगत्पूज्ये जगद्वन्द्ये सर्वशक्तिस्वरूपिणि । पूजां गृहाण कौमारि जगन्मातर्नमोऽस्तु ते ॥१॥
त्रिपुरां त्रिगुणां धात्रीं ज्ञानमार्गस्वरूपिणीम् । त्रैलोक्यवन्दितां देवीं त्रिमूर्तिं पूजयाम्यहम् ॥२॥
कालात्मिकां कालभीतां कारुण्यहृदयां शिवाम् । कारुण्यजननीं नित्यां कल्याणीं पूजयाम्यहम् ॥३॥
अणिमादिगुणोपेतामकारादि स्वरात्मिकाम् । शक्तिभेदात्मिकां लक्ष्मीं रोहिणीं पूजयाम्यहम् ॥४॥
कलाधारां कलारूपां कालचण्डस्वरूपिणीम् । कामदां करुणाधारां कामिनीं पूजयाम्यहम् ॥५॥
चण्डधारां चण्डमायां चण्डमुण्डविनाशिनीम् । प्रणमामि च देवेशीं चण्डिकां पूजयाम्यहम् ॥६॥
सुखानन्दकरीं शान्तां सर्वदेवनमस्कृताम्। सर्वभूतात्मिकां देवीं शाङ्करीं पूजयाम्यहम् ॥७॥
दुर्गमे दुस्तरे चैव दुःखत्रयविनाशिनीम् । पूजयामि सदा भक्त्या दुर्गां दुर्गे नमाम्यहम् ॥८॥
सुन्दरीं स्वर्णवर्णाभां सुखसौभाग्य - दायिनीम् । सुभद्रजननीं देवीं सुभद्रां प्रणमाम्यहम् ॥९॥

इस प्रकार प्रणाम करके उसके कुण्डबिल में सपरिवार बालभैरव का '' **कुलकुमारिके सपरिवारबालभैरवाय नमः**' इस मन्त्र से गन्ध-पुष्पों द्वारा पूजा करें। ततः **ऐं ह्रीं श्रीं क्लीं हूँ हसौः कुलकुमारिके नमः** स्वाहा।

इसके बाद **''ऐं ह्रीं श्रीं क्लीं हूँ हसौः कुलकुमारिके नमः स्वाहा''** इस कुमारी मूलमन्त्र का या स्वीय मन्त्र का यथाशक्ति जप करके प्राणायाम के पश्चात् जप समर्पित करें। तदुपरान्त स्तोत्र, कवचादि का पाठ करके अष्टाङ्ग या पञ्चाङ्ग प्रणाम करके दक्षिणा देवें। इसका पुरश्चरण एक लाख जप है। जप से तत्तद्दशांश होम, तर्पण, मार्जन और ब्राह्मणभोजन करें।

हे महादेव! अब मैं कुमारी के जप और होम का वर्णन करुँगी। हे नाथ! माया (**ह्रीं**) या वाग्भव (**ऐं**) या रमा (**श्रीं**) या काली (**क्रीं**) अथवा कामबीज (**क्लीं**) को बिन्दुचन्द्र-विभूषित सदाशिव (**हौं**) से सम्पुटित कर एक लाख जप करें। अथवा हे त्रिदेश्वर !प्रणव (**ॐ**) से सम्पुटित मूलमन्त्र का विधानपूर्वक एक लाख जप करके उसका दशांश घृताक्त बिल्वपत्रों से, अथवा श्वेत पुष्पों से या कुन्द के पुष्पों से होम करने से महाफल प्राप्त होता है। इसी प्रकार क्रम से घृताक्त कनेर के पुष्पों से या केवल कनेर के पुष्पों अथवा चन्दन अगर मिश्रित कनेर के पुष्पों से होम करना चाहिये। दिन में हविष्याशी होते हुए पूजातत्पर होना चाहिये। शिवपूजन से अवशिष्ट कुल द्रव्यों से पूजा करनी चाहिये। इसके बाद

परमानन्दरूप धारण करके बारह जप करें और जप के अन्त में मेरे द्वारा उक्त द्रव्यों से साधक होम करें। इसके बाद प्राणवायु का पुनः पुनः शोधन करके तीन प्राणायाम करके मुदित मन से साष्टाङ्ग प्रणाम करें। हे नाथ! प्राणायाम के सयम यति इस स्तोत्र का और कवच का पाठ करें, अथवा कुमारियों या निजदेवी के महास्तोत्र का और कवच का पाठ करें। हे महादेव! कुमारियों के अष्टोत्तरसहस्रनाम का पाठ करके साधक सिद्धि प्राप्त करता है, इसमें कुछ विचार करने की आवश्यकता नहीं है। इसमें अशक्त होने पर स्वदेवी का अष्टोत्तर सहस्रनाम मङ्गलकारी होता है। हे नाथ! सिद्धि के आकांक्षी को निःसंशय इसे पढ़ना चाहिये।

हे नाथ, सुनिये! उन देवियों के शुभ स्तोत्र सर्वत्र मङ्गलकारी होते हैं और उत्तम साधक उनके पढ़ने से अकस्मात् सिद्धि प्राप्त करता है। अपने आगे करोड़ों रत्नों से भी अतिशीतल उन सभी कुमारी देवियों को स्थापित करके समाहित चित्त होकर बुद्धिमान जितेन्द्रिय साधक स्तोत्र का पाठ करें। वह चाहे दिव्याचाररत हो या वीरभावोल्बण, उसे भक्तिभावपरायण होकर क्रम से स्तोत्र का पाठ करना चाहिये। साधक महाविद्या, महासेवा, महाभक्ति, तथा महाश्रद्धा से युक्त होकर यदि पाठ करे तो शीघ्र ही महाज्ञानी होकर इच्छानुसार सिद्धि प्राप्त करता है। **कुब्जिका तन्त्र** में कहा गया है कि जो मनुष्य कुमारी को अन्न, वस्त्र तथा जल देता है, उसका अन्न पर्वत के समान तथा जल समुद्र के समान असीम हो जाता है। वस्त्र देने से वह खरबों वर्षो तक शिवलोक में निवास करता है। जो कुमारी को पूजोपकरण देता है उससे संतुष्ट होकर देवता उसके पुत्र रूप में उत्पन्न होते हैं। योगिनी तन्त्र के पूर्णखण्ड के सत्रहवें पटल में कहा गया है कि, हे सुन्दरि, मैं कुमारीपूजन का फल सहस्रकोटि जिह्वाओं और शतकोटि मुखों से भी कहने में असमर्थ हूँ।

यामल में भी कहा है कि जिस देश में कुमारी पूजन होता है वह देश समस्त पृथिवी पर पवित्र स्थान हो जाता है। उस स्थान के चारों ओर पाँच कोश तक समस्त भूभाग पुण्यतम हो जाता है। इसलिये कुमारी षोडश वर्ष पर्यन्त युवती कही जाती है। उसमें भावप्रकाश हो जाता है। भाव ही श्रेष्ठ माना गया है। उसकी प्रयत्नपूर्वक रक्षा करनी चाहिये। उसे अक्षतयोनि के रूप में यत्नपूर्वक रखना चाहिये। वस्त्र, अलङ्कार और आभूषणादि से कुमारी की महापूजा आदि यह मन्द भाग्यवाला भी करता है तो वह जय और मङ्गल को प्राप्त करता है। हे नाथ! दूसरे को जो कन्या पूजन की बात बताता है, उसे महाफल प्राप्त होता है।

जो व्यक्ति दिव्य भाव में, वीर भाव में या पशु भाव में स्थिर होकर विधिपूर्वक कुमारीपूजन करता है, उसे महासुख प्राप्त होता है। तीनों भावों में कुमारी पूजन रूप दिव्य कर्म करने पर उत्तम फल प्राप्त होता है। दिव्य भाव में स्थित होकर जो मनुष्य कुमारी पूजन करता है या कुमारियों को भोजन कराता है उसे तन्त्र-मन्त्र का साक्षात् फल मिलता है। कुमारीपूजन के द्वारा एक, दो या तीन बीजों की पूजा फलदायक होती है इसमें कोई संशय नहीं है। कुमारियों को फूल, फल, अनुलेपन, बालप्रिय नैवेद्य (मिष्ठान्न) आदि देकर और तद्भावभावित होकर, अङ्गों को मिट्टी से लिप्त कर बालभावोचित चेष्टाओं से अत्यन्त प्रिय कथालाप तथा क्रीड़ा करते हुये उन्हें (कुमारियो को) जो प्रिय हो वह कर्म करनेवाला मनुष्य सिद्धियों का स्वामी बन जाता है। कन्या समस्त सिद्धियों का रूप है। कन्या सम्पूर्ण और परम तप है। होम, मन्त्र, पूजा, नित्यक्रिया, कौलिकों का सत्कार तथा नाना फलों को देने वाले बड़े बड़े धर्म कुमारी पूजन के बिना व्यर्थ हैं। हे नाथ! कुमारी पूजन से साधक इन सभी कर्मो का फल साधक प्राप्त कर लेता है।

बृहन्नीलतन्त्रे :

महाभयाति दुर्भिक्षाद्युत्पातास्तु कुलेश्वरि । दुःखस्वप्नभयमृत्युश्च ये चान्ये च समुद्भवाः ॥१॥
कुमारी पूजनादेव न ते च प्रभवन्ति हि । नित्यं क्रमेण देवेशि पूजयेद्विधिपूर्वकम् ॥२॥
घ्नन्ति विघ्नान्पूजिताश्च भयं शत्रून्महोत्कटान् । ग्रहा रोगाः क्षयं यान्ति भूतवेतालपन्नगाः ॥३॥

तन्त्रान्तरेऽपि :

शृणु नाथ कुलार्थं मे कुमारीपूजने मनुम् । महाविद्यामहामन्त्रं सिद्धमन्त्रं ना संशयः ॥४॥
एतन्मन्त्रप्रभावेण जीवन्मुक्तो भवेत्सुधीः । अन्ते देवीपदं याति सत्यमानन्दभैरव ॥५॥
ऐहिका सुखसम्पत्तिर्मधुमत्याः प्रसादतः । अवश्यं प्राप्नुयान्मर्त्यो विश्रामं कुरु शङ्कर ॥६॥
वाग्भवेन वपुःक्षोभं मायाबीजे गुणाष्टकम् । श्रियो बीजे श्रियो लाभो मायाबीजे रिपुक्षयः ॥७॥
भैरवेण तु बीजेन खेचरत्वं सुरादिभिः । कुमारिका ह्यहं नाथ सदा त्वं हि कुमारकः ॥८॥
शतमष्टोत्तरं वापि एकां वा परिपूजयेत् । पूजिताः परिपूज्यन्ते ह्यविघ्नन्त्यवमानिताः ॥९॥
कुमारी योगिनी साक्षात्कुमारी परदेवता । असुरा दुष्टनागाश्च येये दुष्टग्रहा अपि ॥१०॥
भूतवेतालगन्धर्वा डाकिनी यक्ष राक्षसाः । या चान्या देवतास्सर्वा भूर्भुवस्वश्च भैरवाः ॥११॥
पृथिव्यादीनि सर्वाणि ब्रह्माण्डं सचराचरम् । ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः ॥१२॥
सन्तुष्टाः सर्वतुष्टाश्च यस्तु कन्यां प्रपूजयेत् । विधियुक्तां कुमारीन्तु भोजयेच्चैव भैरव ॥१३॥
पाद्यार्घ्यं च तथा धूपं कुंकुमं चन्दनं शुभम्। भक्तिभावेन सम्पूज्य कुमारीभ्यो निवेदयेत् ॥१४॥

॥ इति कुमारीपटलं समाप्तम् ॥

॥ कुमारी कवचम् ॥

अथातः संप्रवक्ष्यामि कुमारीकवचं शुभम् । त्रैलोक्य मङ्गलं नाम महापातकनाशनम् ॥१॥
पठनाद्धारणाल्लोका महासिद्धाः प्रभाकरः । शक्रो देवाधिपः श्रीमान्देवगुरुर्बृहस्पतिः ॥२॥
सम्यक् तेजोमयो वह्निर्द्धर्मराजो भयानकः । वरुणो देवपूज्यो हि जलानामधिपस्स्वयम् ॥३॥
सर्वहर्ता महावायुः कुमारः कुञ्जरेश्वरः । धनाधिपः प्रियशशम्भोस्सर्वे देवा दिगीश्वराः ॥४॥
स एकः प्रभुरेकात्मा सर्वेशो निर्मलोदयाः । एतत्कवचपाठेन सर्वेभूपा धनाधिपाः ॥५॥

॥ अथ स्तोत्रम् ॥

प्रणवो मे शिरः पातु माया सन्ध्यात्मिका सती । ललाटोर्ध्वं महामाया पातु मे श्रीसरस्वती ॥६॥
कामाख्या बटुकेशानी त्रिमूर्तिर्भालमेव तु । चामुण्डा बीजरूपा च वदनं कालिका मम ॥७॥
पातु मां सूर्य्यगा नित्यं तथा नेत्रद्वय मम । कर्णयुग्मं कामबीजस्वरूपोमा तपस्विनी ॥८॥
रसनाग्रं तथा पातु वाग्देवी मालिनी मम । तमोवस्था कामरूपा दन्ताग्रं कुब्जिका मम ॥९॥
देवी प्रणवरूपा सा पातु नित्यं शिरो मम । ओष्ठाधरौ शक्तिबीजात्मिका स्वाहास्वरूपिणी ॥१०॥
गलदेशं महारौद्री पातु मे चापराजिता । क्षौं बीजं मे सदा कण्ठं रुद्राणी स्वाहयान्विता ॥११॥
हृदयं षोडशी विद्या पातु षोडशसुस्वरा । द्वौ बाहू पातु सर्वत्र महालक्ष्मीः प्रधानिका ॥१२॥
सर्वमंत्रस्वरूपा मे चोदरं पीठनायिका । पार्श्वयुग्मं तथा पातु हृद्देवी वाग्भवात्मिका ॥१३॥

कैशोरी कटिदेशं मे मायाबीजस्वरूपिणी । जंघायुग्मं जयन्ती मे योगिनी कुल्लुकावृता ॥१४॥
सर्वाङ्गमम्बिका देवी पातु मन्त्रार्थगामिनी । केशाग्रं कमला देवी नासाग्रं नरमोहिनी ॥१५॥
चुबुकं चण्डिका देवी कुमारी पातु मे सदा । हृदयं ललितादेवी पृष्ठं पर्वतवासिनी ॥१६॥
त्रिशक्तिः षोडशी देवी लिङ्गं गुह्यं सदावतु । श्मशाने चाम्बिका देवी गङ्गा गर्भे च भैरवी ॥१७॥
शून्यागारं पञ्चमुद्रा मंत्रयंत्रप्रकाशिनी । चतुष्पथे सदा पातु मामेव वज्रधारिणी ॥१८॥
शवासनगता चण्डा मुण्डमालाविभूषिता । पातु मामेव लिङ्गे च ईश्वरी शक्तिरूपिणी ॥१९॥
वने पातु महाबला महारण्ये रणप्रिया । महाजले तडागे च शत्रुमध्ये सरस्वती ॥२०॥
महाकाशपथे पृथ्वी पातु मां शीतला सदा । रणमध्ये राजलक्ष्मीः कुमारी कुलकामिनी ॥२१॥
अर्द्धनारीश्वरी पातु मम पादतलं मही । नवलक्षमहाविद्या कुमारी रूपधारिणी ॥२२॥
कोटिसूर्यप्रतीकाशा चन्द्रकोटि सुशीतला । पातु मां वरदा बाणी बटुकेश्वरकामिनी ॥२३॥
इति ते कथितं नाथ कवचं परमाद्भुतम् । कुमार्याः कुलदायिन्याः पञ्चतत्त्वार्थपारगम् ॥२४॥
यो जपेत्पञ्चतत्त्वेन स्तोत्रेण कवचेन च । आकाशगामिनी सिद्धिर्भवेत्तस्य न संशयः ॥२५॥
वज्रदेहो भवेत्क्षिप्रं कवचस्य प्रसादतः । सर्वसिद्धीश्वरो योगी ज्ञानी भवति यः पठेत् ॥२६॥
विवादे व्यवहारे च संग्रामे कुलमण्डले । महापथे श्मशाने च योग सिद्ध्युद्धवेषु च ॥२७॥
पठित्वा फलमाप्नोति सत्यं सत्यं कुलेश्वर । वशीकरणमेतद्धि सर्वत्र जयदं शुभम् ॥२८॥
पुण्यव्रती पठेन्नित्यं यतिः श्रीमान्भवेद् ध्रुवम् । सिद्धविद्याकुमारी च ददाति सिद्धिमुत्तमाम् ॥२९॥
पठेद्यः शृणुयाद्वापि स भवेत्कल्पपादपः । भुक्तिं मुक्तिं तुष्टिपुष्टी राजलक्ष्मीं सुसम्पदम् ॥३०॥
प्राप्नोति साधकश्रेष्ठो धारयित्वा भवेज्जयी । असाध्यं साधयेद्विद्वान्पठित्वा कवचं शुभम् ॥३१॥
कुलीनानां महासौख्यं धर्मार्थकाममोक्षदम् । योगिनां दिवसे नित्यं कुमारीं पूजयेन्निशि ॥३२॥
उपचारविशेषेण त्रैलोक्यं वशमानयेत् । पललेनाशनेनापि मत्स्येन मुद्रया सह ॥३३॥
नानाभक्ष्येण भोज्येन गंधद्रव्येण साधकः । माल्येन स्वर्णरजतालङ्कारेण सुचेलकैः ॥३४॥
पूजयित्वा जपित्वा च तर्पयित्वा वराननाम् । यज्ञ दान तपस्याभिः प्रयोगेण महेश्वर ॥३५॥
स्तुत्वा कुमारी कवचं यः पठेदेव भावतः । तस्य सिद्धिर्भवेत्क्षिप्रं राजराजेश्वरो भवेत् ॥३६॥
वाञ्छाफलमवाप्नोति यद्यन्मनसि वर्त्तते । भूर्जपत्रे लिखित्वा यः कवचं धारयेद्यदि ॥३७॥
शनिमङ्गलवारेच नवम्यामष्टमीदिने । चतुर्दश्यां पौर्णमास्यां कृष्णपक्षे विशेषतः ॥३८॥
लिखित्वा धारयेद्विद्वानुत्तराभिमुखो भवेत् । महापातक युक्तोपि मुक्तः स्यात्सर्व पातकैः ॥३९॥
योषिद्वामभुजे धृत्वा सर्वकल्याणमालभेत् । बहुपुत्रान्विता कान्ता सर्वसम्पत्ति संयुक्ता ॥४०॥
तथैव पुरुषश्रेष्ठो दक्षिणे धारयेद् भुजे । इहैव दिव्यदेहः स्यात्पञ्चाननसमप्रभः ॥४१॥
शिवलोके परं याति वायुवेगो निरामयः । सूर्यमण्डलमाभेद्य परं मोक्षमवाप्नुयात् ॥४२॥

लोकानामति सौख्यदं भयहरं श्रीपादभक्तिप्रदं मोक्षार्थं कवचं शुभं प्रपठतामानन्दसिन्धूद् भवम् ।
पन्थानं कलिकालघोर कलुषध्वंसैकहेतुं जयं ये लोकाः प्रपठन्ति धर्ममतुलं मोक्षं व्रजन्ति क्षणात् ॥४३॥

॥ इति श्रीरुद्रयामले उत्तरतंत्रे महातन्त्रोद्दीपने कुमार्य्युपचर्च्या विन्यासे
कुमारी कवचोल्लासे सिद्धमन्त्रप्रकरणे भावनिर्णय कुमारी कवचं समाप्तम् ॥

॥ कुमारी स्तोत्रम् ॥

॥ श्री भैरव उवाच ॥

देवेन्द्रादय इन्दुकोटिकिरणां वाराणसीवासिनीं, विद्यां वाग्भवकामिनीं त्रिनयनां सूक्ष्मत्रियागामिनीम् ।
चण्डोद्वेगनिकृन्तनीं त्रिजगतां धात्रीं कुमारीं वरां, मूलाम्भोरुहवासिनीं शशिमुखीं सम्पूजयन्तिश्रियम् ॥१॥
भाव्यां देवगणैः शिवेन्द्रयतिभिर्मोक्षार्थिभिर्बालिकां, सन्ध्यां नित्यगुणोदयां द्विजगणश्रेष्ठोदयांशारुहाम् ।
शुक्लाभां परमेश्वरीं शुभकरीं भद्रां विशालाननां, गायत्रीं गणमातरं दिनपतिं कृष्णां च वृद्धां भजे ॥२॥
बालां बालकपूजितां गुणयुतां विद्यावतां मोक्षदां, धात्रीं शुक्लसरस्वतीं नरवरां वाग्वादिनीं चण्डिकाम् ।
स्वाधिष्ठान हरप्रियां प्रियकरीं वेदान्तविद्याप्रदां, नित्यं मोक्षहिताय योगवपुषां चैतन्यरूपां भजे ॥३॥
नानारत्नसमूहनिर्मितगृहे पूज्यां सुरैर्बालिकां, वन्दे नन्दनकानने मनसि सिद्धान्तैक बीजानने ।
अर्थं देहि निरर्थकाय वपुषे हित्वा कुमारीं कलां, मह्यं मातृकुमारिके च त्रिविधा मूर्त्या च तेजोमयी ॥४॥
हालाहाल करालिकां कुलपथोल्लासैः कराब्जोद्वहां, नासामोदकरालिनीं हि भजतां कामातिरिक्तप्रदाम् ।
बालोऽहंबटुकेश्वरस्य चरणाम्भोजाश्रितोऽहं सदाहि, त्वां बालकुमारिकेशिरसि शुक्लाम्भोरुहेसम्भजे ॥५॥
सूर्याह्लाद बलाकिनीं कलिमहापापार्दितापापहां, तेजोगां भुवि सूर्य्यगां भयहरां तेजोमयीं कालिकाम् ।
वन्दे हृत्कमले सदा रविदले बालेन्द्रविद्यां सतीं साक्षात्सिद्धिकरीं कुमारि विमले त्वामाद्यरूपेश्वरीम् ॥६॥
नित्यंश्रीकुलकामिनीं कुलवतींकौलामुनामम्बिकां नानायोग विलासिनीं सुरमणीं नित्यां तपस्यान्विताम् ।
वेदान्तार्थ विशेषदेशवसनभाषाविशेषस्थितां, वन्दे पर्वतराजराजतनयां कालप्रिये त्वामहम् ॥७॥
कौमारीं कुलमालिनीं रिपुगणक्षोभाग्निसन्दायिनीं, रक्ताभानयनां शुभां परममार्गां मुक्ति संज्ञाप्रदाम् ।
भार्यां भोगवतीं पतिं त्रिभुवनेष्वामोदपञ्चाननां, पञ्चास्यप्रियकामिनीं भयहरां सर्पादिहारां भजे ॥८॥
चन्द्रास्यां चरणद्वयां भुजमहाशोभाविनोदीं नदीं, मोहादिक्षयकारिणीं वरकरां श्रीकुब्जिकां सुन्दरीम् ।
ये नित्यं परिपूजयन्ति सहसा राजेन्द्रचूडामणिं, सम्पत्तिं धनमायुषं त्रिजगतां व्याप्येश्वरत्वं जगुः ॥९॥
योगीशं भुवनेश्वरं प्रियकरं श्रीकालसंदर्भया, शोभासागरगामिनं सुरतरुं वाञ्छाफलोद्दीपनम् ।
लोकानामघनाशनाय शिवया श्रीसंज्ञया विद्यया, धर्मप्राणसदैवतं प्रणमतां कल्पद्रुमं भावये ॥१०॥
विद्यान्तामपराजितां मदनगामामो दमत्ताननां, हृत्पद्मस्थितपादुकां कुलकलां कात्यायनीं भैरवीम् ।
ये ये पुण्यधियो भजन्ति परमानन्दाब्धिमध्ये मुदा, सर्वाच्छादित तेजसाऽभयकरीं मोक्षाय सत्कीर्तये ॥११॥
रुद्राणीं प्रणमामि पद्मवदनां कोट्यर्कतेजोमयीं, नानालंकृत भूषणां कुलभुजामानन्द सन्दायिनीम् ।

श्रीमायां कमलान्वितां हृदिगतां सन्तानबीजक्रियां वन्दे वाग्भवरूपिणीं कुलवधूं हूंकारबीजोद्भवाम् ॥१२॥
नमामि वरभैरवीं क्षितितलाधकालानलां, मृणालकुसुमारुणां भुवनदोषसंशोधिनीम् ।
जगद् भयहरां परां हरति या च योगेश्वरी, ममापदमहर्निशं सकलभोगदां तामहम् ॥१३॥
साम्राज्यं प्रददाति या भगवती विद्या महालक्षणा, साक्षादष्ट समृद्धिदा भुवि महालक्ष्मीः कुलक्षोभहा ।
स्वाधिष्ठान सुपंकजे विवसितां विष्णोरनन्तश्रियं, वन्दे राजपदप्रदां शुभकरीं कौलेश्वरीं सर्वदा ॥१४॥
पीठानामधिपाधिपामसुरहां विद्यां शुभां नायिकां, सर्वालंकरणान्वितां त्रिजगतां क्षोभापहां वारुणीम् ।
वन्दे पीठगनायिकां त्रिभुवनच्छायाभिराच्छादितां सर्वेषां हितकारिणीं जयवतामानन्द रूपेश्वरीम् ॥१५॥
क्षेत्रज्ञां मदविह्वलां कुलवतीं सिद्धप्रियां प्रेयसीं, शम्भोः श्रीबटुकेश्वरस्य महतामानन्दसञ्चारिणीम् ।
साक्षादात्मपरोद्गमां निजमनः क्षोभपहां शाकिनीं वाक्यार्थप्रकटामहं रजतभां वन्दे महाभैरवीम् ॥१६॥
सुपूर्णविधुवन्मुखीं कमलमध्यसम्भाविनीं, शिरोदशशते दलेऽमृत महाब्धिधाराधराम् ।
प्रणामफलदायिनीं सकलराजवश्यां गुणां, नमामि परमाम्बिकां विषयपाशसंहारिणीम् ॥१७॥
साक्षादहं त्रिभुवनेऽमृतपूर्णदेहां, संध्यादिदेविकललः कुलपण्डितेन्द्राम ।
तन्नो भजे सुरवरे वरकालिके त्वां, सिद्धानले प्रतिदिनं प्रणमामि भक्त्या ।
भक्तिं धनं जयपदं यदि देहि दास्यं तस्मिन्महामधुमतीलघुगेहभार्य्याम् ॥१८॥
एतत्स्तोत्रप्रसादेन कवितावाक्यपतिर्भवेत् । महासिद्धीश्वरो दिव्यो वीरभावपरायणः ॥१९॥
सर्वत्र जयमाप्नोति स हि स्याद्धरवल्लभः । वाचामीशो भवेत्क्षिप्रं कामरूपी भवेन्नरः ॥२०॥
पशुरेव महावीरो दिव्यो भवति निश्चितम् । क्रमशोप्यष्टसिद्धिः स्याद्वाग्मी भवति निश्चितम् ॥२१॥
सर्वविद्याः प्रसीदन्ति तुष्टास्सर्वदिगीश्वराः । वह्निः शीतलतां याति जलस्तम्भं स कारयेत् ॥२२॥
धनवान्पुत्रवानाजा इहलोके भवेन्नरः । स सञ्चरति वैकुण्ठे कैलासे शिव सन्निधौ ॥२३॥
मुक्त एव महादेव यो नित्यं सर्वदा पठेत् । महाविद्यापदाम्भोजं स हि पश्यति निश्चितम् ॥२४॥

॥ इति श्री कुमारी स्तोत्रम् सम्पूर्णम् ॥

॥ श्री कुण्डलिनी कवचम् ॥

॥ श्री आनन्द भैरवी उवाच ॥

अथ वक्ष्ये महादेव! कुण्डलीकवचं शुभम् । परमानन्ददं सिद्धं सिद्धवृन्दनिषेवितम् ॥१॥
यद् धृत्वा योगिनः सर्वे धर्माधर्म प्रदर्शकाः । ज्ञानिनो मानिनो धीरा विचरन्ति यथा नराः ॥२॥
सिद्धयोऽप्यणिमाद्याश्च करस्थाः सर्वदेवताः । एतत् कवचपाठेन देवेन्द्रो योगिराड् भवेत् ॥३॥
ऋषयो योगिनः सर्वेजटिलाः कुलभैरवाः । प्रातःकाले त्रिवारं च मध्याह्ने वारयुग्मकम् ॥४॥
सायाह्ने वारमेकं तु पठेत् कवचमुत्तमम् । पाठादेव महायोगी कुण्डलीदर्शनं लभेत् ॥५॥

विनियोग – ॐ अस्य श्रीकुलकुण्डली कवचस्य ब्रह्मा ऋषिः, गायत्री छन्दः, श्रीकुलकुण्डली देवता, सर्वाभीष्ट सिद्ध्यर्थे पाठे विनियोगः।

ऋष्यादिन्यासः – श्री ब्रह्मा ऋषये नमः शिरसि, गायत्री छन्दसे नमः मुखे, श्रीकुलकुण्डली देवतायै नमः हृदि, सर्वाभीष्ट सिद्ध्यर्थे पाठे विनियोगाय नमः सर्वाङ्गे।

॥ कवचपाठ ॥

ॐ ईश्वरी जगद्धात्री ललितासुन्दरी परा। कुण्डली कुलरूपा तु पातु मां कुलचण्डिका ॥१॥
शिरो मे ललिता देवी पातूग्राख्या कपोलकम्। ब्रह्मरन्ध्रेण पुटिता भ्रूमध्यं पातु मे सदा ॥२॥
नेत्रत्रयं महाकाली कालाग्नि भक्षिका शिखां। दन्तावलीं विशालाक्षी ओष्ठमिष्ठान्नवासिनी ॥३॥
कामवीजात्मिका विद्या अधरं पातु मे सदा। लृ युगस्था गण्डयुग्मं मायाबीजा रसप्रिया ॥४॥
भुवनेशी कर्णयुग्मं चिबुकं कनकेश्वरी। कपिला मे गलं पातु सर्वबीजस्वरूपिणी ॥५॥
मातृका वर्णपुटिता कुण्डली कण्ठमेव च। हृदयं कालपुत्री च कङ्काली पातु मे मुखम् ॥६॥
भुजयुग्मं चण्डदुर्गा चण्डदोर्दण्डखण्डिनी। स्कंधयुग्मं स्कन्दमाता कपोलं क्रोधकालिका ॥७॥
अंगुल्यग्रं कुलानन्दा श्रीविद्या नखमण्डलम्। कालिका भुवनेशानी पृष्ठदेशं सदाऽवतु ॥८॥
पार्श्वयुग्मं महावीरा वीरासन – धराऽभया। पातु मां कुलदर्भस्था, नाभिमुदरमम्बिका ॥९॥
कटिदेशं पृष्ठसंस्था महामहिषघातिनी। लिङ्गस्थानं महामुद्रा भगमाला मनुप्रिया ॥१०॥
भगीरथप्रिया धूम्रा मूलाधारं गणेश्वरी। चतुर्दलं कामविद्या दलाग्रं मे वसुन्धरा ॥११॥
धीर्धरा धारणाख्या च ब्रह्माणी पातु मे मुखम्। मेदिनी पातु कमला वाग्देवी पूर्वगं दलम् ॥१२॥
छेदिनी दक्षिणे पार्श्वे पातु चण्डा महातपा। चण्डघण्टा सदापातु योगिनी वारुणं दलम् ॥१३॥
उत्तरस्थं दलं पातु पृथिवीमिन्द्र – लालिता। चतुष्कोणं कामविद्या ब्रह्मविद्याष्ट – कोणकम् ॥१४॥
अष्टदलं सदापातु सर्ववाहन वाहना। चतुर्भुजा सदापातु डाकिनी कुल चञ्चला ॥१५॥
मेढ्रस्था मदनाधारा पातु मे चारुपङ्कजम्। स्वयम्भूलिङ्गं चार्वङ्गी कोटराक्षी ममासनम् ॥१६॥
कदम्बं वनगा पातु कदम्बवनवासिनी। वैष्णावीं परमा माया पातु मे वैष्णवं पदम् ॥१७॥
षड्दलं राकिणी पातु रङ्गिनी कामवासिनी। कामेश्वरी कामरूपा कृष्णं मे पीतवाससं ॥१८॥
धनुः सा वनदुर्गा मे शङ्खं मे शङ्खिनी शिवा। चक्रं चक्रेश्वरी पातु कमलाक्षी गदां मम ॥१९॥
पद्मं मे पद्मगन्धा च पद्ममाला मनोहरा। बादिलान्ताक्षरं पातु लाकिनी लोकपावनी ॥२०॥
षड्दले स्थित देवांश्च पातु कैलास – वासिनी। अग्निवर्णा सदापातु गलं मे परमेश्वरी ॥२१॥
मणिपूरं सदापातु मणिमाला – विभूषणा। दशपत्रं दशवर्णं डादिफान्तं त्रिविक्रमा ॥२२॥
पातु नीला महाकाली भद्रा भीमा सरस्वती। अयोध्यावासिनी देवी महापीठ – निवासिनी ॥२३॥
वाग्भवाद्या महाविद्या कुण्डली कालरूपिणी। दशच्छदशतं पातु रुद्रं रुद्रात्मकं मम ॥२४॥
सूक्ष्मा सूक्ष्मतरा पातु सूक्ष्मस्थान निवासिनी। राकिनी लोकजननी पातु कूटाक्षरान्विता ॥२५॥

तैजसं पातु नियतं रजकी राजपूजिता । विजया कुलवीजस्था तवर्गतिमिरापहा ॥२६॥
चन्द्रात्मिका मणिग्रन्थिं भेदिनी पातु सर्वदा । भगमाला भृगुसुता पातु मां नाभिवासिनी ॥२७॥
नन्दिनी पातु सकलं कुण्डली कालकल्पिता । हृत्पद्मं पातु कालाख्या धूम्रवर्णा मनोहरा ॥२८॥
दलद्वादश वर्णं च भास्करी भाव सिद्धिदा । पातु मे परमा विद्या क वर्गं कामचारिणी ॥२९॥
च वर्गं चारुरसना व्याघ्रास्या टङ्कधारिणी । टकारं पातु कृष्णाख्या हाकिनी पातु कालिका ॥३०॥
ठंकुराङ्गी ठकारं मे बीजभाषा महोदया । ईश्वरं पातु विमला मम हृत् पद्मवासिनी ॥३१॥
कर्णिकां कालसन्दर्भा योगिनी योगमातरं । इन्द्राणी वारुणी पातु कुलमाला कुलान्तरम् ॥३२॥
तारिणी शक्तिमाता च कण्ठवाक्यं सदाऽवतु । विप्रचित्ता महोग्रोग्रा प्रभा दीप्ता घनाऽमला ॥३३॥
वाक्स्तम्भिनी वज्रदेहा वैदेही वृषवाहिनी । उन्मत्तानन्दचित्ता च कुलेशी सा भगातुरा ॥३४॥
मम षोडशपत्राणि पातु मातृतया स्थिता । सुरान् रक्षतु वेदज्ञा सर्वभाषा च कालिका ॥३५॥
ईश्वरार्द्धासनगता प्रपायान्मे सदाशिवा । शाकम्भरी महामाया शाकिनी पातु सर्वदा ॥३६॥
भवानी भवमाता च पायाद् भ्रूमध्य पङ्कजं । द्विदलं व्रतकामाख्या अष्टाङ्गसिद्धिदायिनी ॥३७॥
पातु मामखिलानन्दा मनोरूपा जपप्रिया । लकारं लक्षणाक्रान्ता सर्वलक्षणलक्षणा ॥३८॥
कृष्णाजिनधरा देवी क्षकारं पातु सर्वदा । द्विदलस्थं सर्वदेवं सदापातु वरानना ॥३९॥
बहुरूपा विश्वरूपा हाकिनी पातु चण्डिका । हरा परशिवं पातु मानसं पातु पञ्चमी ॥४०॥
षट्चक्रस्था सदापातु षट्चक्रकुलवासिनी । अकारादि क्षकारान्ता विन्दुसर्ग समन्विता ॥४१॥
मातृकार्णा सदापातु कुण्डली ज्ञानकुण्डली । पूर्णकाली गतिप्रेता पूर्णगिरितटं शिवा ॥४२॥
उड्डीयानेश्वरी देवी सकलं पातु सर्वदा । कैलास पर्वतं पातु कैलासगिरि - वासिनी ॥४३॥
डाकिनी राकिणी शक्तिर्लाकिनी काकिनी कला । शाकिनी हाकिनी देवी षट्चक्रादीन् प्रपातु मे ॥४४॥
कैलासाख्यं सदापातु पञ्चानन - तनूद्भवा । हिरण्यवर्णा रजनी चन्द्रसूर्याग्नि - भक्षिणी ॥४५॥
सहस्त्रदलपद्मं मे सदापातु कुलाकुला । सहस्त्रदलपद्मस्था दैवतं पातु भैरवी ॥४६॥
काली तारा षोडशाख्या मातङ्गी पद्मवासिनी । श[illegible]कोटि गलद्रूपा पातु मे सकलां तनुम् ॥४७॥
रणे घोरे जले दोषे युद्धे वादे श्मशानके । सर्वत्र गमने ज्ञाने सदा मां पातु शैलजा ॥४८॥
पर्वते विविधावासे विनाशे पातु कुण्डली । पादादि ब्रह्मरन्ध्रान्तं सर्वाकाशं सुरेश्वरी ॥४९॥
सदापातु सर्वविद्या सर्वज्ञानं सदा मम । नवलक्षमहाविद्या दशदिक्षु प्रपातुमाम् ॥५०॥

॥ फलश्रुति ॥

इत्येतत् कवचं देव कुण्डलिन्याः प्रसिद्धिदं ।
ये पठन्ति ध्यानयोगे योगमार्ग व्यवस्थिताः ।
ते यान्ति मोक्षपदवीमैहिके नात्र संशयः ॥१॥

॥ रुद्रयामले उत्तरखण्डे कन्दवासिनी कवचं सम्पूर्णम् ॥

॥ कुण्डलिनी सहस्रनाम स्तोत्रम् ॥

यह स्तोत्र क-कारादि नामावलि से है तथा उत्तरार्ध में श्लोक१६८ पश्चात् की नामावलि रक्षासूत्रमय है

॥ श्रीआनन्द भैरवी उवाच ॥

अथ कान्त! प्रवक्ष्यामि, कुण्डली चेतनादिकं। सहस्रनाम सकलं, कुण्डलिन्याः प्रियं सुखं ॥१॥
अष्टोत्तरं महापुण्यं, साक्षात् सिद्धिप्रदायकं। तव प्रेमवशे नैव, कथयामि शृणुष्व तत् ॥२॥
बिना यजनयोगेन, बिना ध्यानेन यत्फलं। तत्फलं लभते सद्यो, विद्यायाः सुकृपा भवेत् ॥३॥
या विद्या भुवनेशानी, त्रैलोक्यपरिपूजिता। सा देवी कुण्डली माता, त्रैलोक्यं पाति सर्वदा ॥४॥
तस्या नामसहस्राणि, अष्टोत्तरशतानि च। श्रवणात् पठनान्मन्त्री, महाभक्तो भवेदिह ॥५॥
ऐहिके स भवेन्नाथ! जीवन्मुक्तो महाबली ॥६॥

विनियोग- अस्य श्रीमहाकुण्डलीसाष्टोत्तरशत सहस्रनामस्तोत्रस्य ब्रह्माऋषिः, जगती छन्दः, भगवती श्रीमहाकुण्डली देवता, सर्वयोग समृद्धिसिद्ध्यर्थे पाठे विनियोगः।

ऋष्यादिन्यासः- श्रीब्रह्म ऋषये नमः शिरसि। जगती छन्दसे नमः मुखे। भगवती श्रीमहाकुण्डली देवतायै नमः हृदि। सर्वयोग समृद्धिसिद्ध्यर्थे पाठे विनियोगाय नमः अञ्जलौ।

॥ अष्टोत्तरशतनामसाहस्त्रं ॥

कुलेश्वरी कुलानन्दा, कुलीना कुलकुण्डली। श्रीमन्महाकुण्डली च, कुलकन्या कुलप्रिया ॥
कुलक्षेत्रस्थिता कौली, कुलीनार्थप्रकाशिनी। कुलाख्या कुलमार्गस्था, कुलशास्त्रार्थपातिनी ॥
कुलज्ञा कुलयोग्या च, कुलपुष्पप्रकाशिनी। सुकुलीना कुलाध्यक्षा, कुलचन्दनलेपिता ॥
कुलगर्भासना कुल्ला, कुलच्छात्रा कुलात्मजा। कुलीना नागललिता, कुण्डली कुलपण्डिता ॥
कुलद्रव्यप्रिया कौला, कलिकन्या कुलान्तरा। कुलकाली कुलामोदा, कुलशब्दोत्सवाकुला ॥
कुलरूपा कुलोद्भूता, कुलकुण्डलिवासिनी। कुलाभिन्ना कुलोत्पन्ना, कुलाचारविनोदिनी ॥
कुलदृक्षसमुद्भूता, कुलमाला कुलप्रभा। कुलज्ञा कुलमध्यस्था कुल - कंकण - शोभिता ॥
कुलोत्तरा कौलपूजा कुलालापा कुलक्रिया। कुलभेदा कुलप्राणा, कुलदेवी कुलस्तुतिः ॥
कौलिका कालिका काल्या, कलिभिन्ना कलाकला। कलिकल्मषहन्त्री च, कलिदोषविनाशिनी ॥
कङ्काली केवलानन्दा, कालज्ञा कालधारिणी। कौतुकी कौमुदी केका, काका काकलयान्तरा ॥
कोमलाङ्गी करालास्या, कन्दपूज्या च कोमला। कैशोरी काकपुच्छस्था, कम्बलासनवासिनी ॥
कैकेयीपूजिता कोला, कोलपुत्री कपिध्वजा। कमला कमलाक्षी च, कम्बलाश्वतर - प्रिया ॥
कलिकाभङ्गदोषस्था, कालज्ञा कालकुण्डली। काव्यदा कविता‌वाणी, कालसन्दर्भभेदिनी ॥
कुमारी करुणाकारा, कुरुसैन्यविनाशिनी। कान्ता कुलागता कामा, कामिनी कामनाशिनी ॥
कामोद्भवा कामकन्या, केवला कालघातिनी। कैलासशिखरारूढा, कैलासपति - सेविता ॥

कैलासनाथनमिता, केयूरहारमण्डिता । कन्दर्पा कठिनानन्दा, कुलगा कीचकृत्यहा ॥
कमलास्या कठोरा च, कीटरूपा कटिस्थिता । कंदेश्वरी कंदरूपा कौलिका कंदवासिनी ॥
कटकस्था कामवीजा, कृच्छाकृच्छगुणोदया । कृच्छानन्दा कृच्छपूज्या, कृच्छहा कृच्छरक्षिका ॥
कारणांगी कृच्छवर्णा, कीलिता कोकिलस्वरा। काञ्चीपीठस्थिता काञ्ची, कामरूपनिवासिनी ॥
कूटस्था कूटभक्षा च, कालकूटविनाशिनी । कामाख्या कमला काम्या, कामराजतनूद्भवा ॥
कामरूपधरा कम्रा, कमनीया कविप्रिया कञ्जानना कञ्जहस्ता, कञ्जपत्रायतेक्षणा ॥
काकिनी कामरूपस्था, कामरूपप्रकाशिनी। कोलाविध्वंसिनी कङ्का, कलङ्कार्ककलङ्किनी ॥
महाकुलनदी कर्णा, कर्णकाण्ड विमोहिनी। काण्डस्था काण्डकरुणा, कर्मकस्था कुटुम्बिनी ॥
कमलाभा कल्मा कल्ला, करुणा करुणामयी । करुणेशी कराकर्त्री कर्तृहस्ता कलोदया ॥
कारुण्यसागरोद्‌भूता, कारुण्यसिन्धुवासिनी। कार्तिकेशी कार्तिकस्था, कार्तिकप्राणपालिनी ॥
करुणानिधिपूज्या च, करणीया क्रिया कला। कल्पस्था कल्पनिलया, कल्पातीता च कल्पिता ॥
कुलपा कुलविज्ञाना, कर्षिणी कालरात्रिका। कैवल्यदा कोकरस्था, कलमञ्जीर रञ्जिनी ॥
कलयन्ती कालजिह्वा, किङ्करासनकारिणी । कुमुदा कुशलानन्दा, कौशल्याकाशवासिनी ॥
कसापहासहन्त्री च, कैवल्यगुणसम्भवा । एकाकिनी अर्करूपा, कुवला कर्कटस्थिता ॥
कर्कोटका कोष्ठरूपा, कूटवह्निकरस्थिता । कूजन्ती मधुरध्वानं, कामयन्ती सुलक्षणं ॥
केतकीकुसुमानन्दा, केतकीपुष्पमण्डिता । कर्पूरपूररुचिरा, कर्पूरभक्षणप्रिया॥
कपालपात्रहस्ता च, कपालचन्द्रधारिणी । कामधेनुस्वरूपा च, कामधेनुः क्रियान्विता ॥
कश्यपी काश्यपा कुन्ती, केशान्ता केशमोहिनी । कालकर्त्री कूपकर्त्री कुलपा कामचारिणी ॥
कुंकुमाभा कज्जलस्था, कमिता कोपघातिनी । केलिस्था केलिकलिता, कोपना कर्पटस्थिता ॥
कलातीता कालविद्या, कालात्मपुरुषोद्भवा । कष्टस्था कष्टकुष्ठस्या, कुष्ठहा कष्टहा कुशा ॥
कलिकास्फुट कर्त्री च, काम्बोजा कामला कुला। कुशलाख्या काककुष्ठा, कर्मस्था कूर्ममध्यगा ॥
कुण्डलाकारचक्रस्था, कुण्डगोलोद्भवा कफा । कपित्थाग्रवसाकाशा, कपित्थरोधकरिणी ॥
काहोड़ी काहड़ा काड़ा, कङ्कलाभाषकारिणी। कनका कनकाभा च, कनकाद्रि - निवासिनी ॥
कार्पासयज्ञसूत्रस्था, कूटब्रह्मार्थसाधिनी । कलञ्जभक्षिणी क्रूरा, क्रोधपुञ्जा कपिस्थिता ॥
कपालीसाधनरता, कनिष्ठाकाशवासिनी । कुञ्जरेशी कुञ्जरस्था, कुञ्जरा कुञ्जरागतिः ॥
कुञ्जस्था कुञ्जरमणी , कुञ्जमन्दिरवासिनी । कुपिता कोपशून्या च, कोपाकोपविवर्जिता ॥
कपिञ्जलस्था कापिञ्जा, कपिञ्जलतरूद्भवा। कुन्तीप्रेमकथाविष्टा, कुन्तीमानसपूजिता ॥
कुन्तला कुन्तहस्ता च, कुलकुन्तलमोहिनी । कान्तांघ्रिसेविका कान्तकुशला कोशलावती ॥
केशिहन्त्री कुकुत्स्था च, ककुत्स्थवनवासिनी । कैलासशिखरानन्दा, कैलासगिरिपूजिता ॥

कीलालनिर्मलाकारा, कीलालमुग्धकारिणी । कुतुका कुट्टनी कुट्टा, कूटनामोदकारिणी ॥
क्रौङ्कारी क्रौङ्करी काशी, कुहुशब्दस्था किरातिनी। कूजन्ती सर्ववचनं कारयन्ती कृताकृतं ॥
कृपानिधिस्वरूपा च, कृपासागरवासिनी । केवलानन्दनिरता, केवलानन्दकारिणी ॥
कृमिला कृमिदोषघ्नी, कृपा कपटकूट्टिता । कृशाङ्गी क्रमभङ्गस्था, किङ्करस्था, कटस्थिता ॥
कान्तरूपा कान्तरता, कामरूपस्य सिद्धिदा । कामरूपपीठदेवी, कामरूपांकुजा कुजा ॥
कामरूपा कामविद्या, कामरूपादिकालिका । कामरूपकला काम्या, कामरूपकुलेश्वरी ॥
कामरूपजनानन्दा, कामरूपकुशाग्र - धीः । कामरूपकराकाशा, कामरूपतरुस्थिता ॥
कामात्मजा कामकला, कामरूपविहारिणी । कामशास्त्रार्थमध्यस्था, कामरूपक्रियाकला ॥
कामरूपमहाकाली, कामरूपयशोमयी । कामरूपरमानन्दा, कामरूपादिकामिनी ॥
कुलमूला कामरूपपद्ममध्यनिवासिनी । कृताञ्जलिप्रिया कृत्या, कृत्यादेवीस्थिता कटा ॥
कटका काटका कोटिकटिघण्टविनोदिनी । कटिस्थूलतरा काष्ठा, कात्यायन सुसिद्धिदा ॥
कात्यायनी काचलस्था, कामचन्द्राननाकथा । काश्मीरदेशनिरता, काश्मीरी कृषिकर्मजा ॥
कृषिकर्मस्थिता कौर्मा, कूर्मपृष्ठनिवासिनी। कालघण्टानादरता, कलमञ्जीरमोहिनी ॥
कलयन्ती शत्रुवर्गान्, क्रोधयन्ती गुणागुणं । कामयन्ती सर्वकामं काशयन्ती जगत्त्रयं ॥
कौलकन्या कालकन्या, कौलकालकुलेश्वरी । कौलमन्दिरसंस्था च, कुलधर्मविडम्बिनी ॥
कुलधर्मरताकारा, कुलधर्मविनाशिनी । कुलधर्मपण्डिता च, कुलधर्मसमृद्धिदा ॥
कौलभोगमोक्षदा च, कौलभोगेन्द्रयोगिनी । कौलकर्मा नवकुला, श्वेतचम्पकमालिनी ॥
कुलपुष्पमाल्यकान्ता, कुलपुष्पभवोद्भवा । कौलकोलहलकरा, कौलकर्मप्रियापरा ॥
काशीस्थिता काशकन्या, काशीचक्षुप्रिया कुथा। काष्ठासनप्रिया काका, काकपक्षकपालिका ॥
कपालरसभोज्या च, कपालनवमालिनी । कपालस्था च कापाली, कपालसिद्धिदायिनी ॥
कपाला कुलकर्त्री च, कपालशिखरस्थिता। कथना कृपणश्रीदा, कृपी कृपणसेविता ॥
कर्महन्त्री कर्मगता, कर्माकर्मविवर्जिता । कर्मसिद्धिरता कामी, कर्मज्ञाननिवासिनी ॥
कर्मधर्मसुशीला च, कर्मधर्मवशङ्करी । कनकाब्जसुनिर्माण - महासिंहासन - स्थिता ॥
कनकग्रन्थिमाल्याढ्या, कनकग्रन्थिभेदिनी । कनकोद्भवकन्या च, कनकाम्भोजवासिनी ॥
कालकूटादिकूटस्था, किटिशब्दान्तरस्थिता । कङ्कपक्षिनादमुखा, कामधेनूद्भवा कला ॥
कङ्कणाभा - धरा कर्दा, कर्दमा कर्दमस्थिता । कर्दमस्थजलाच्छन्ना, कर्दमस्थजनप्रिया ॥
कमठस्था कार्मुकस्था, कम्रस्था कंसनाशिनी । कंसप्रिया कंसहन्त्री, कंसाज्ञानकरालिनी ॥
काञ्चनाभा काञ्चनदा, कामदा क्रमदा कदा । कान्तभिन्ना कान्तचिन्ता, कमलासनवासिनी ॥
कमलासनसिद्धिस्था, कमलासनदेवता । कुत्सिता कुत्सितरता, कुत्साशापविवर्जिता ॥

कुपुत्ररक्षिका कुल्ला, कुपुत्रमानसापहा । कुजरक्षकरी कौजी, कुब्जाख्या कुब्जविग्रहा ॥
कुनखी कूपदिक्षुस्था, कुकरी कुधनी कुदा । कुप्रिया कोकिलानन्दा, कोकिला कामदायिनी ॥
कुकामिनी कुबुद्धिस्था, कूर्मवाहनमोहिनी । कुलका कुललोकस्था, कुशासनसिद्धिदा ॥
कौशिकीदेवता कस्या, कन्नादनादसुप्रिया । कुसौष्ठवा कुमित्रस्था, कुमित्रशत्रुघातिनी ॥
